3-5

❀ हरिः ॐ तत्सत् नमः शिवाय ❀

नराय हरये नमः (भा० ८।१६।३४)

हिन्दुसंघटनं भूयात्, बलबोधादिवर्धकम् ।
एकतासमताशालि, धर्मसंस्कृतिधारकम् ॥

चातुर्वर्ण्य - भारत - समीक्षा

(द्वितीयः खण्डः)

राष्ट्रस्याभ्युदयो भूयात्, वेदधर्मप्रचारणम् ।
दीनताहीनतानाशो, भारतं चाप्यकण्टकम् ॥

—: लेखकः :—

स्वामी महेश्वरानन्दगिरिः - महामण्डलेश्वरः

—: प्राप्तिस्थानानि :—

(सुरतगिरिबंगला - कनखल - हरिद्वार जि. सहारनपुर (उ. प्र.)

(संन्यासाश्रम विला - पारला बम्बई नं० ५६)

(बद्रिकाश्रम, मु. दरियापुर पो. चांदोद - जि. बड़ौदा-गुजरात)

हरिः ॐ तत्सत्

वन्दे विश्वेश्वरं विभुम् ।

अधःपातपराकाष्ठां प्राप्तस्यास्य समुन्नतेः ।
कालोऽयमागतो जीयाद् हिन्दुराष्ट्रमिदं पुनः ॥

चातुर्वर्ण्य-भारत-समीक्षा

(द्वितीयः खण्डः)

हरिद्वारकनखलवास्तव्यः- श्रीमत्परमहंसपरिव्राजका-
चार्य्य-श्रोत्रिय-ब्रह्मनिष्ठ- सकलनिगमागमशास्त्र-
निष्णात-स्वामिमहेश्वरानन्दगिरिमहाम-
ण्डलेश्वरमहाराजप्रणीतः, वीतराग-
विद्वद्वरस्वामिरामेश्वरानन्द-
पुरीप्रणीतभूमिकासहितः

पण्डितवरस्वामिविद्यानन्देन संशोधितः
कनखलसुरतगिरिबंगलामठस्थ - कोठारी-
श्रद्धेयश्रीकैवल्यानन्दसरस्वतीस्वामिना प्रकाशितः
विक्रमसंवत् - २०२४ खिस्ताब्दः - १९६८
मूल्यं - रूप्यकद्वयम्

निर्भया समीक्षा

समीक्षायाः प्रतिज्ञे द्वे, न दैन्यं न पलायनम् ।
यत्सत्यं हितदं युक्तं, निर्भयेण तदुच्यते ॥१॥
अयुक्तश्च विरुद्धश्च धर्मौदार्यविवर्जितम् ।
प्रोक्तमन्यान्यतो यच्च, खण्ड्यते तर्कतो मुदा ॥२॥
गीतया वेदतश्चोक्तः समत्वैकत्वसंयुतः ।
धर्मः सत्यः स विज्ञेयः, स्वौपम्यं यत्र वर्तते ॥३॥
बन्धुभ्रात्रात्मभावान् या, विशाले स्थापनाय सा ।
आर्यहिन्दुसमाजेऽत्र संभूता जयतेतराम् ॥४॥

शुभप्रेरणा

संघशक्तेश्च लाभाय, समभावस्य प्राप्तये ।
आर्यहिन्दुसमाजेऽत्र, सर्वेषामुदयप्रदम् ॥१॥
लिख्यतां प्रबलैः शब्दैः, औदार्यं वेदधर्मगम् ।
इत्येवं प्रेरयामास, परिव्राट् मामुदारधीः ॥२॥
स्वामिश्रीकेवलानन्दो बंगलामठसंस्थितिः ।
प्रसूतोऽयं ततो नूनं खण्डो विज्ञैर्विलोक्यताम् ॥३॥

इति स्वामिमहेश्वरानन्दमण्डलेश्वरस्य

पाठकेभ्यः सूचना

सीसकाक्षरदोषाद्वा योजकानां प्रमादतः ।
शोधकदृष्टिदोषाद्वा त्रुट्यः सन्त्यत्र पुस्तके ॥
अतो योजितमन्ते वै शुद्धप्रच्युतपत्रकम् ।
निरीक्ष्यं पाठकैस्तत्तु, शुद्धबोधस्य सिद्धये ॥

श्रीनृसिंहस्तवः

सर्वत्रास्ति हरिः, स एव भगवान्, तेनैव पूर्णं जगत्,
तातेत्यात्मजभाषितं श्रुतवता क्रूरेण विष्णुद्विषा ।
स्तम्भेऽस्मिन्निह दर्शयाशुमधुनेत्याक्रुश्यमानं रुषा,
प्रह्लादं परिरक्षितुं नरहरिः स्तम्भात्ततोऽवातरत् ॥१॥
कोशैः पञ्चभिरावृत्तोऽपि हृदये बोधैकरूपः स्फुरन्,
आत्मा संगविवर्जितो जनिमर्ता धीवृत्तिसाक्षी स्वराट् ।
मायाकल्पितमात्मनि स्फुरददो द्वैतेन्द्रजालं जगत्,
पश्यन्क्रीडति स स्वयं श्रुतिशिरोवेद्यो नृसिंहो हरिः ॥२॥

श्रीलक्ष्मीस्तवः

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी,
गम्भीरावृत्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मी र्दिव्यै र्गजेन्द्रै र्मणिगणखचितैस्स्नापिता हेमकुम्भैः,
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥१॥

श्रीगौरीध्यानम्

आरक्ताभां त्रिनेत्रां मणिमुकुटमयीमक्षमालां दधानाम्,
हस्ताम्भोजैः सपाशाङ्कुशकुसुमधनुः सायकै र्विस्फुरन्तीम् ।

आपीनोत्तुङ्गवक्षोरुहपरिविलसत्तारहारोज्ज्वलाङ्गीम् ,
ध्यायेत् वामाङ्कसंस्थामरुणिमवसनामीश्वरीमीश्वराणाम् ॥

साम्बसदाशिवः


साम्बो नः कुलदैवतं, पशुपते ! साम्ब ! त्वदीयाः वयम् ,
साम्बं स्तौमि सुरासुरोरगनराः साम्बेन संतारिताः ।
साम्बायास्तु नमो मया विरचितं, साम्बात्परं नो भजे ,
साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परे ब्रह्मणि ॥

श्रीराधाकृष्णस्मृतिः

नवललितवयस्कौ नव्यलावण्यपुञ्जौ ,
नवरसचलचित्तौ नूतनप्रेमवृत्तौ ।
नवनिधुवन - लीलाकौतुकेनातिलोलौ ,
स्मर निभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥१॥
द्रुतकनकसुगौर - स्निग्धमेघौघनील-
च्छविभिरखिलवृन्दारण्यमुद्भासयन्तौ ।
मृदुलनवदुकूले नीलपीते दधानौ
स्मर निभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥२॥

—:*:—

प्रस्तुत महनीय ग्रन्थके प्रेरक —



परमश्रद्धेय-माननीय श्रीस्वामी कैवल्यानन्दजी महाराज

कोठारी–सुरतगिरिका बंगला–कनखल।

ॐ नमः शिवाय, हरिः ॐ तत्सत्

भूमिका

(लेखकः—श्रीमत्परमहंसपरिव्राजकाचार्यो वीतरागो विद्वच्छिरोमणिः श्रोत्रियो ब्रह्मनिष्ठः सर्वशास्त्रपारंगतः स्वामी रामेश्वरानन्दपुरीजीमहाराजः ऋषीकेशस्थकेरलाश्रमाध्यक्षः)

(१) शुभनामनिर्देशादेव मंगललाभः तुलना च

नि:श्रेयसप्राप्तिपथे भ्रमान्ध्यं ,

प्रमार्जितं शंकरपूज्यपादैः ।

यथा तथेहाभ्युदयस्य मार्गे ,

महेश्वरानन्दयतीन्द्रपादैः A ॥

(२) सर्वोदयसिद्धिः

प्रस्थानत्रयसंग्रहेण कथितो मोक्षस्य मार्गस्ततः ,

त्वध्यात्मार्थविवृत्तकर्मविधिभिः पारत्रिकाभ्युन्नतेः ।

चातुर्वर्ण्यविधायकश्रुतिवचस्तात्पर्यतश्चैहिको—

त्कर्षस्यापि महेश्वरेण यतिना सर्वोदयः साधितः ॥

A यथा भगवत्पादै, नि:श्रेयसलाभमार्गे दुरूहं भ्रमान्ध्यं वेदादिशास्त्रयथार्थतात्पर्यप्रदर्शनसत्तर्कादिभिर्निरस्य सर्वजनसुखहितकरः केवलाद्वयब्रह्मवादः प्रदर्शितः । तथा महामण्डलेश्वरस्वामिपादैः ऐहिकश्रेयोविभागे तत्तद्गुणकर्मविहीनोत्तमाधमजातिभेदमूलकं समाजविघटनधर्मक्षयप्रयोजकं प्ररूढ भ्रमान्ध्यं शास्त्ररहस्ययुक्तिदेशकालपरिस्थितिप्रदर्शनपूर्वापरेतिवृत्तादिभि निरस्य राष्ट्रसमाजाभ्युदयकरः सर्वोदयवादः प्रदर्शित इत्यस्माभिः समीचीना तुलनाऽनेन विधीयते ।

(३) विजयशीला माहेश्वरी वाणी

प्रेयश्श्रेयोनिदानश्रुतिवचनपुराणेतिहासस्मृतीनां ,
तात्पर्यज्ञानहानादुपचितमसदाचारमुत्सारयन्ती ।
वेदोपादिष्टधर्माभ्युदयहितचतुर्वर्णतत्त्वं वदन्ती ,
वाणी माहेश्वरीयं जयति जनिमतां क्षेमराज्यं दिशन्ती ॥

(४) वराकाणां विनिवारणम्

कर्मण्यैकाधिपत्यं B श्रुतिविहितमिति ख्यापयन्तो वराकाः,
नैष्कर्म्यस्थापनेन प्रसभमभिहताः शंकराचार्यपादैः ।
वर्णश्रैष्ठ्यं स्वजन्मस्थितमभिदधतः श्रौतमर्थं जिहानाः,
लेखैर्माहेश्वरीयैः श्रुतिरवमुखरैर्दूरतो वारितास्ते ॥

(५) बोधबलादिरूपाः गुणा एव वर्णरूपाः भवन्ति

चतुर्धाऽभिव्यक्ता जगति पुरुषाङ्गोपमतया ,
गुणा वर्णप्रायाः श्रुतिषु सुखबोधाय कथिताः ।
तथाप्यर्वाचीनैः स्वजनधनमानान्धमतिभिः ,
कृताद्वर्णोल्लेखाज्जनुषि कलुषार्था श्रुतिरभूत् ॥

B 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जैमिनीपूर्वमीमांसा-सूत्रम्)

(६) श्रुतेः समानबन्धुत्वादेशः

नरास्तुल्याः सर्वे जननकृतवैषम्यरहिताः,
मिथः सौहार्दं तत् सहजरमणीयं भवतु वः ।
समानो वो मन्त्रो भवतु समितिश्चापि हि समा,
तथा श्रेष्ठादेशं श्रुतिभगवती यच्छति वरा ॥ B

(७) श्रुतिवचनतात्पर्यम्

गुणं वर्णं प्रादात् सकलगुणवर्णः कमलभूः,
प्रजाः सृष्ट्वा पश्चादिति यदभिधत्ते स्मृतिरपि ।
गुणादन्यो वर्णो न भवति तदन्यो न च गुणः, ,
तदेतत्प्राचीनैः श्रुतिवचनतात्पर्यमुदितम् A ॥

B अत्र किल सारस्वतसार्वभौमाः वेदविज्ञाः पण्डितराजस्वामिभगवदाचार्य्याः—मानवविभागो वर्णविभागश्च वेदस्याज्ञात एव । वेदस्तु वेद एव, अलौकिकज्ञानरूपो हि सः । लोकेऽप्युक्तं—'अयं निजः परो वेति, गणना लघुचेतसामि' ति । न खलु भगवान् वेदो लघुचेताः, महीयानयम् । अतो न हि वेदः कमपि पृथग्भूतं वर्णं वा, न विभिन्नां जातिं वा विजानाति । महान् वेदः स्वातन्त्र्येण सर्वानेव भूमिष्ठान् मानवान् समानरूपेण प्रबोधयितुं सर्वेषामभ्युदयाय प्रवृत्तः । न हि वर्णविभागाय वेदप्रवृत्तिः । शरीराङ्गवत् एकभावरहितो विभागो हि विनाशः । न हि विनाशाय पारमेश्वरं ज्ञानं प्रवृत्तिं विदध्यात् । वेदस्तु सर्वमानवकल्याणमेव सदाऽभिवाञ्छति । सर्वेषु मानवेषु भेदराहित्यं सौहित्यं, एकत्वमेव चोपदिशति । सर्वे एव मानवाः मानवत्वेन समाना एव । गुणकर्मवैशिष्ट्येन भवतु नाम वैशिष्ट्यं यत्र कुत्रापि । परन्तु जात्यन्तरं वर्णान्तरञ्च तत्र नैव भवति । गुणप्रकर्षेण प्रकृष्टोऽश्व इति तु भवति, परमपकृष्टगुणोऽश्वोऽश्व एव न भवतीति तु न । एवं मनुष्येष्वपि विज्ञेयम् । इति प्रतिपादयन्ति ।

A अत्रैवास्य स्मार्तवचनस्य विवृतिः एकाधिकषष्टितमे पृष्ठे (६१) द्रष्टव्या, तथाऽस्यां भूमिकायामपि विवेचनमस्य द्रष्टव्यम् ।

(८) तत्तद्गुणस्तत्तत्कर्माभ्यासाद् तत्तद्वर्णात्मक-
तया परिणमति

जने वर्णः सिद्धो यदि भवति कस्मान्नु भगवान् ,
प्रजानां जातानां तदनु गुणवर्णं वितनुयात् ? ।
गुणः कर्माभ्यासात् परिणमति वर्णात्मकतये—
त्यतो वर्णाधानं परिणमयितुः स्रष्टुरुचितम् ॥

(९) योग्याय योग्या कन्या समर्पणीयेति न्याय-
संगतः पन्थाः

वर्णानां गुणकर्मभेदकथने यत्पारधर्म्यं स्मृतं ,
नैवैतत् परिशीलनाभ्यसनयोः कुत्रापि योग्ये जने ।
नो चेद् ब्राह्मणकर्म तत्परतया राजन्ययोग्यं तदा ,
पार्थाय प्रतिबोधितैव भगवद्गीता विरुद्धा भवेत् ॥

(१०) अभ्युदयविस्तारस्य स्वराष्ट्रावनतेश्च
कारणान्वेषणा

यदा चातुर्वर्ण्यं जननजनितं जातिजनकं ,
बुधै र्न व्याख्यातं न च जनसमाजैर्व्यवहृतम् ।
तदा देशस्यास्याभ्युदयजनिता विस्तृतिरभूत् ,
तथा व्याख्यानाच्च व्यवहरणतश्च क्षतिरियम् ॥

(११) परिचर्यात्मकं शूद्रत्वं सर्वैः सेव्यम्

शूद्रत्वं परिचर्यया विरचितं सर्वैरुपेयं जनैः ,
यस्त्वार्तान्न जनान् स्वयं परिचरेन्नूनं स हिंस्रो मृगः ।
ब्रह्मक्षत्रविशां न तत्र परधर्मत्वं प्रमाणान्वितं ,
शूद्रत्वेऽधमतापि कापि भगवद्वाचापि नापादिता ॥

(१२) स्वार्थान्धचित्तप्रयुक्तवाक्यविडम्बनायाः वैफल्यम्

वेदोऽभून्निहतः पुरोहितगणैः स्वार्थान्धचित्तैः पुरा ,
तात्पर्यार्थविरोधकारिभिरपि व्याख्यातृभिः पण्डितैः ।
तेषां वाक्यविडम्बना विफलिता श्रीशंकरेणांशतः ,
पश्चादद्य महेश्वरेण यतिना निःशेषतः शोधिता ॥

(१३) अग्रिमायाः संस्कृतायाः वाचः कथं परितः क्षतिः संजाता ?

भाषाणां निखिलावनीतलजुषामुत्पत्तिभूरग्रिमा ,
या वाक् धर्ममबोधयज्जनिमतां भोगापवर्गप्रदम् ।
सैषा पृष्ठतले प्रदेशवचसां क्षिप्ता परिक्षीयते ,
तच्चैतच्छ्रुतिरोधितार्थविपरिव्याख्यानविस्फूर्जितम् ॥

वैदिक आर्यहिन्दुधर्मोऽनादिः सनातनश्चास्ति

समस्तेऽस्मिन् भूमण्डले लब्धोदयेषु विलक्षणतत्त्वज्ञानोपासनाकर्मप्रकाराधिष्ठितेषु मतापरपर्यायेषु धर्मेषु वर्तमानकाले गणनीयकोटिमधिरूढाः सन्ति चत्वारो धर्माः हैन्दव-बौद्ध-क्रैस्तव-माहम्मदनामभिरभिधीयमानाः B । अन्येऽपि केचन धर्मास्तत्र तत्र विद्यमानाः प्रचरन्तोऽपि - अप्राप्तप्राचुर्यत्वाद् अलब्धप्राबल्यत्वाद्, धर्मान्तरेभ्यः संकलितस्वभावत्वेन मौलिकताया औत्सर्गिकताया अभावाच्च पूर्वोक्तस्य धर्मचतुष्टयस्य तारतम्येन गणनीयतां नार्हन्ति । उक्तानां च चतुर्णां धर्माणां आविर्भावकालक्रमानुसारेणात्र क्रमो गृहितः । बौद्धादीनां त्रयाणां धर्माणामाविर्भावकालः, आविष्कर्तॄणांजन्मादिवृत्तान्तश्च निर्णीतः सम्प्रतिपन्नश्च सर्वेषाम् ।

B अस्मिन् सर्वस्मिन् भूमण्डले संप्रति त्रिशत (३००) कोटिसंख्याकाः विविधाःजनाः विद्यन्ते । तत्र शत (१००) कोटिसंख्याकाः ईसाईमतं मन्वते । पञ्चाशत् (५०) कोटिसंख्याकाः इस्लाममतं स्वीकुर्वते । त्र्यधिकचत्वारिंशत् (४३) कोटिसंख्याकाः वैदिकहिन्दुमतमङ्गीकुर्वन्ति । अधुना साम्यवादी चीनदेशो न कमपि धर्मं स्वीकरोति , अत एव बौद्धानां संख्या न्यूना संजाता, अवशिष्टान् सर्वान् गणयित्वा बौद्धाः सप्तदश (१७) कोटिसंख्याकाः सन्ति । पारसिकजैनशिक्खादिमतानुयायिनस्तु सर्वथाऽल्पसंख्याकाः सन्ति जैनशिक्खादयस्तु भारत एव वर्तन्ते, हिन्दुत एव समुद्भूतास्तत्रैवान्तर्भवन्ति ।

वैदिकस्यार्यहिन्दुधर्मस्य त्वाविर्भावकालस्तत्कर्तुः प्रथमप्रवर्तकस्य वा वृत्तान्तो न केनाप्यवगम्यते, न केनापि निर्णेतुं विकल्पितुं वा शक्यते। अतश्च वैदिक आर्यहिन्दुधर्मोऽयमनादिः सनातनश्चेत्युच्यते। अनादिनोऽपरिच्छिन्नस्यात एव सनातनस्य वस्तुनः प्रतिपादकत्वाच्च। बौद्धादिधर्मान्तरेषु तादृशसनातनवस्तुप्रतिपादनाभावाच्च न सनातनत्वम्। परिणामिनित्यस्य कस्यचिद्वस्तुनः तेषु प्रतिपादने सत्यपि परिणामित्वनित्यत्वयोर्विरुद्धत्वात्तस्य नित्यत्वमेव बाधितं बोध्यम्।

एवमुभयथाऽयमनादिः सनातनो वैदिक आर्यहिन्दुधर्मः, मनुष्यजातेराविर्भावकालादारभ्य बौद्धाद्युक्तधर्मान्तराविर्भावहेतुभूतवैदिकधर्मह्रासकारणाविर्भावकालपर्यन्तं निष्प्रतिद्वन्द्वितया सर्वत्र भूमण्डले व्याप्तुवानः सर्वेषां सर्वविधश्रेयोमार्गं दर्शयन् सर्वैरादि्रयमाणः श्रेयःसाधनेषु तत्त्वज्ञानोपासनेषु कर्मसु आचारेष्वनुष्ठानेषु चैकच्छत्राधिपत्यमावहन् विरराजेति निश्चप्रचोऽयमर्थः। पुराणेतिहासादिषु तथादर्शनादुपपत्तेश्च। अत एव विदेशीयाः मोक्षमूलरादयो विद्वांसोऽपि वदन्ति—यदा बौद्धादेः त्रिपिष्टकबाईबलकुरानादीनां पुस्तकानामभाव आसीत्, तदा भूमण्डलेऽस्मिन् एकमात्र ऋग्वेदो यथार्थतत्त्वज्ञानोपासनाधर्मबोधकतया धर्मग्रन्थोऽवर्तत। अतः स एव विश्वस्यास्यादिमो निष्प्रतिद्वन्द्वी निखिलग्रन्थशिरोमणि धर्मग्रन्थो मन्तव्यः, तस्य संस्कृता भाषा, संस्कृतिश्चादिमैव स्वीकर्तव्येति।

तत्तादृशस्य वैदिकार्यहिन्दुधर्मस्येदानीन्तनी कीदृशी स्थितिरित्यवलोकनीयम्

स्वप्रतिद्वन्द्वितयाऽवस्थितेषु–अर्थात् स्वसमानोद्देशेन प्रवर्तमानेषु - बौद्धेस्लामादिधर्मान्तरेषु प्रतिदिनमिव प्रचारेण प्राबल्येन च प्रवर्धमानेषु हिन्दुधर्मोऽयं प्रतिक्षणमिव प्रक्षीयमाण आत्यन्तिकविनाशस्य गर्ते आसन्नपतन इवावलोक्यते ।

इस्लामबौद्धादिधर्माणां प्रचार आधिपत्यं च देशाद्देशान्तरं व्याप्नुवन्नभिवर्धते । तद्धर्मावलम्बिनां नवनवानि राष्ट्राणि संस्थाप्यन्ते, संयोज्यन्ते, समृद्धिमाप्नुवन्ति च । हिन्दुधर्मस्य वैदिकस्य प्रचारः प्राबल्यश्च देशाद् देशाद् परिभ्रष्टं सत् शून्यप्रायतामापन्नम् । हिन्दुधर्मावलम्बिनामिदानीं राष्ट्रमेव नास्ति । अनादिकालादारभ्य तेषां प्रबलधर्मसंकेतभूतस्य भारतवर्षस्येदानीं त्रिधा विभक्तस्य भागद्वयमपि माहम्मदराष्ट्रतया पकिस्ताननाम्ना च निगीर्णम् । अवशिष्टस्तृतीयभागोऽपि हिन्दुराष्ट्रतां परित्यज्य निर्धर्मतामङ्गीकर्तुं विवशीकृतोऽभूत् । B

B अत एव भारतवास्तव्याः मुसलमानाः सुदृढभावेनैकस्वरेण च कथयन्ति – अस्माकं कृते कुरान एव कानूनं विद्यते, (दीन) धर्मादधिकमस्मभ्यं नास्ति किमपि । तेनैव हेतुनाऽस्माकं सुदृढः सम्बन्धः पाकिस्तानाद्यन्यदेशीयमुसलमानैः सहास्ति । स्वाधिकारलाभाय सततं युद्धकरणमपि, अस्माकं धर्मोऽस्ति । राजनीतितो वयं धर्मस्य पार्थक्यं नैव मन्यामहे । कुरानधर्म एवास्ति-आस्माकीना राजनीतिः, भारतराष्ट्रस्य धर्मनिरपेक्षतां कदापि कुत्रापि नैवाङ्गीकुर्महे । भारतशासकप्रवर्तितं परिवारनियोजनमपि कुरानधर्मविरुद्धमस्ति, अतः केनापि मुसलमानेन तन्नैव कर्तव्यम् । अनेकस्त्रीविवाहपद्धतिं कुरानबोधितत्वात् तां हिन्दुभिरधिकसंख्याकैरनङ्गीकृतां न्याय्यविरुद्धामपि कदापि नैव त्यक्ष्यामः । ऊर्दूभाषायै संघर्षोऽपि कर्तव्यः ।

प्रश्नसमाधाने

न च धर्मस्य त्रिविधश्रेयस्साधकस्य ऐहलौकिकश्रेयस्साधन एव क्षयो दृष्टः, न तु निःश्रेयसाख्याध्यात्मिकश्रेयस्साधने ग्रामुस्मिकश्रेयस्साधने वेति वाच्यम् । 'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।' (गी० ७।३) इत्यादिन्यायेनाध्यात्मिकामुष्मिकश्रेयोऽर्थिनां अत्यल्पसंख्याकत्वाद् ऐहलौकिकप्रत्यक्षश्रेयोऽर्थिनामत्यधिकसंख्याकत्वाच्च ऐहलोकिकश्रेयःक्षयेणैव धर्मक्षयसम्भवाद् इहलोकश्रेयोविरोधिनि धर्मे जनानां वैमुख्यसम्भवादिहलोकश्रेयःक्षयेण श्रेयोऽन्तरक्षयस्याप्यनुमेयत्वाच्च ।

स्कूलकोलेजादिशिक्षणालयेष्वपि कुरानधर्मशिक्षा दातव्या । पठितमस्माभिः—हैदराबादनगरे ग्रायोजिते मुसलमानसंमेलने भारतीयैर्मुसलमानैः काश्मीरप्रदेशे जनमतसंग्रहस्यापि समर्थनं कृतं - यत्किल पाकिस्तानमुसलमानाः वाञ्छन्ति । भारतराष्ट्रस्य नीतीनां कटुसमालोचना कृता तैः । भारतविरोधिप्रचारोऽपि वाहुल्येन विहितः । हिन्दुभ्यो घृणाप्रचारोऽपि । ग्रल्लाहमिया राष्ट्रशासकपदे मुसलमानमेव स्थापयति, नान्यमिति वदन्ति ।

ग्रपि च धर्मनिरपेक्षतावज्रोऽपि हिन्दूनामेव शिरसि निपतितः, ग्रतः—एकपत्नीपरिग्रहनियमरूपः कानूनो हिन्दूनेवोद्दिश्य प्रवर्तितः । न मुसलमानानुद्दिश्य । मुस्लिमेसाईधर्मानुयायिनः कथमपि धर्मनिरपेक्षाः न जायन्ते । काश्मीरनागादिप्रदेशेषु स्वच्छन्दं ते नरीनृत्यन्ते । ग्रतोऽद्यतनं भारतराष्ट्रशासनन्तु धर्मनिरपेक्षताव्याजेनाधार्मिकतामेवोच्छृङ्खलतामेव प्रवर्धयति । भाषाविषयेऽपि विदेशीयाङ्गलभाषाकद्र्वा दासीभावं प्रापिता विनता हिन्दीराष्ट्रभाषा । संस्कृतप्रचाराय न केनापि सर्वकारेण प्रयत्नो विधीयते । मनागपि साहाय्यमनालभ्य ये महात्मानो विद्वांसस्तदर्थं प्रयतन्ते, तेभ्यो निस्पृहेभ्यो नमो नमः सादरेण कुर्मः ।

वैदिकहिन्दुधर्मक्षयप्रयोजकानां दोषाणामपराधानाञ्च समीक्षा

एवं चिरकालादारब्धस्य - एतत्कालपर्यन्तं वर्तमानस्य वर्धमानस्य च त्रिविधश्रेयःपरिपन्थिनो भयानकस्य वैदिकार्य-हिन्दुधर्मक्षयस्य किमासीन्मूलकारणमिति पृच्छ्यते चेत्— धर्माधिकारिणामग्रेसराणां संरक्षकाणाञ्च दोषाः, तैः कृताः अपराधास्त्रुटयश्चेति निर्विशङ्कं वक्तुं शक्यम् ।

यदि हि लब्धप्रतिष्ठस्य प्रबलस्य कस्यचित्साम्राज्यस्य राज्यस्य वा सपक्षाद्विपक्षाद्वा काचित् क्षतिः पराजयो ह्रासो वा सम्भवति, तत्र साम्राज्याधिकारिणां संरक्षकाणाञ्च न्याय-वैकल्यादयो दोषाः, कर्त्तव्यपरित्यागरूपाः, अकर्त्तव्यानुष्ठान-रूपाश्चापराधाः मूलकारणमिति सर्वसाधारणतया निर्णेतुं शक्यम् । न च प्रजानामेवापराधः कारणमिति वक्तव्यम् । तदपराधेष्वपि तत्परिहारार्थं नियुक्तानामधिकारिणां स्वकर्त्त-व्यापरिपालनरूपापराधस्यैव कारणत्वात् । त्रिविधश्रेयस्साधक-संस्कारजनकं धर्मं प्रति तु प्रजानामपराधस्य प्रश्न एव नोत्तिष्ठेत ।

एवं धर्माधिकारिणां दोषेषु अपराधेषु च धर्मक्षयहेतुषु सम्प्रतिपत्त्या निर्णेतुं शक्येष्वपि त अपराधाः दोषाश्च कीदृशाः? कस्मिन् काले, धर्मस्य कस्मिन् विभागे, केषु पुरुषेषु कथं प्रवृ-त्ताः? इत्यादीन् विशेषानवगन्तुं महती पर्येषणा, महत् पर्यवे-क्षणं महान् प्रयत्नश्चापेक्षितः । अत एव वैदिकसनातनार्यहिन्दु-धर्मस्य क्षयनिवारणपूर्वकसमृद्धिकामैः पूज्यैः सकलनिगमागम-शास्त्रनिष्णातै र्महामण्डलेश्वरमहेश्वरानन्दस्वामिपादैः संक्षेपेण चातुर्वर्ण्यभारतसमीक्षायाः खण्डद्वये ते ते दोषा अपराधाश्च निरूपिता द्रष्टव्याः ।

वेदप्रवृत्तिः

श्रेयस्कराणि कर्माण्येव धर्मा उच्यन्ते । तेषामवगतिस्तु वेदादेव भवतीति वेद एव धर्मशास्त्रम् । 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।' इति मनुस्मृतिवचनात् ।

ऐहलौकिकस्य पारलौकिकस्य पारमार्थिकस्य श्रेयसस्त्रिविधत्वात् धर्मा अपि त्रिविधा भवन्ति । त्रिविधानां धर्माणां स्वरूपाणि, फलानि, साधनानि, फलसिद्धेरुपपत्तिः, क्रमः, फलोदयायापेक्षितसंस्कारजनन्यः कथाः, इतिवृत्तानि स्तुतयः प्रार्थनाः इत्यादयो बहवो विषयाः महति भगवति वेदे प्रतिपादिताः सन्ति ।

क्वचित् क्वचित् अतीवसूक्ष्माणां तत्त्वानां तत्त्वपरिणामानां विविधप्रवर्तनानिवर्तनानां च साक्षात् प्रतिपादनस्य दुष्करत्वात् कृतस्यापि दुर्बोधत्वाच्च, साहश्यमूलया प्रतिवस्तुविधया प्रतिकर्मविधया विविधोक्त्या आरोपेण अध्यवसायेन च वेदे प्रतिपादनं कृतम् ।

बोधे वैशद्यमवगाहितुं हृदयस्पर्शिताञ्च जनयितुं यावन्तोऽलङ्कारा: उक्तिवैचित्र्याणि च लोके प्रयुज्यन्ते, तावतोऽप्यधिकानि तानि वेदे प्रयुक्तानि । यथा—'चत्वारि शृङ्गास्त्रयोऽस्य पादाः' (ऋ० ४।५८।३) 'किंस्विद् वनं क उ स वृक्ष आसीत् ? 'ब्रह्म वनं स वृक्ष आसीत्, यतो द्यावापृथिवी निष्टतक्षुः' (तै० ब्रा० २।८।६) 'ब्राह्मणोऽस्य मुखमासीत्' (ऋ० १०।९०-१२) इत्यादि मन्त्रेषु द्रष्टव्यानि ।

निःश्रेयसफलानां धर्माणां नित्यत्वपक्षे सत्यपि ऐहिकामुष्मिकाभ्युदयसाधनानां तेषां देशकालबुद्धिशक्त्यवस्थाप्रतिनियतत्वं वेदे विवक्षितमित्यभ्युपगम्यते विद्वद्भिः। एवं बहुविधवैचित्र्यग्रथिताद्वेदात् धर्मस्य स्वरूपं देशकालाद्यनुरोधेन विनियोगञ्च वेदतात्पर्यानुगृहीतं सम्यगवगन्तुं तात्पर्यग्राहकप्रमाणप्रवीणाः प्रतिभावन्तोऽपि न प्रकामं प्रभवन्ति। अतएवोक्तं श्रीमद्भागवते भगवता व्यासेन 'मुह्यन्ति यत्सूरयः' (१। १। १) इति।

धर्माधिकारिकर्तव्यम्

एवमतीवदुरवबोधं श्रुत्यर्थतात्पर्यं निर्दोषेण मनसा, प्रतिभावत्या मत्या, प्रतिनियतदेशकालपरिस्थित्याद्यनुगृहीततात्पर्यग्राहकप्रमाणपरीक्षणेन च निर्णीय समीचीनै व्याख्यानैरनुष्ठानैश्च तस्य सर्वजनहिताय प्रकाशनं, तथा निर्णीतस्य धर्मस्य ग्रहणेऽनुष्ठाने च सर्वेभ्यः सहायताऽर्पणं सर्वेषां समभावमूलकं संघट्टनं राष्ट्रसमाजविविधाभ्युदयकरणञ्चैतदेव धर्माधिकारिणां प्रमुखं कर्तव्यं विद्यते। तादृशकर्तव्यलाभाय, राष्ट्रजनतामनःसु धर्मप्रबलश्रद्धास्थापनाय स्वयोग्यतासिद्धये च धर्माधिकारिभिरपि तत्तद्दोषाणां निवारणं तत्तत्सद्गुणानाञ्चाधानं कर्तव्यम्।

धर्मादित्रयप्रयोजकविपरीतानिष्टप्रवृत्तिः

परन्तु तादृशकर्तव्याकरणं तद्विपरीतकरणञ्चैष एव धर्माधिकारिणां तेषां धर्मराष्ट्रसमाजक्षयप्रयोजको गर्हणीयोऽपराधः संजातः। अतएव श्रुतिस्मृत्यादिवाक्यानां तात्पर्यनिर्णयस्य तदनुसारिणां धर्माणां प्रकाशनव्याख्यानप्रचारादेश्चाधिकार आधि-

पत्यञ्च तत्कालीनेषु वेदतात्पर्यानभिज्ञेषु वेदशब्दोच्चारणमात्रेण कृतार्थताम्मन्येषु धनजनादिबलसम्पन्नेषु रागद्वेषपक्षपातस्वार्थान्धतादिदोषकलुषितमानसेषु, स्वेषां स्ववंश्यानां स्वबन्धूनाञ्चोत्कर्षं काङ्क्षमाणेषु तदितरेषामुत्कर्षमसहमानेषु पौरोहित्यादिपरिकर्मभिः परधनमपहर्तुमिच्छत्सु तदनुकूलेषु नृपतिषु धनिकेषु च सन्निविष्टोऽभवदिति नायं कश्चिदसाधारणः सम्भवः ।

तस्मिन्नेव मध्यप्राचीनकाले तादृशैः धर्माधिकारिभिरधिपतिभिश्च अज्ञानान्धतया स्वार्थान्धतया च वेदतात्पर्यविरुद्धानि व्याख्यानानि,-अनुष्ठानानि, विभिन्नसंप्रदायप्रयोजकाः विविधाः आचाराः धर्माश्च प्रसाधिताः प्रचारिताश्चासन्, राष्ट्राभ्युदयसमाजधर्मोत्कर्षप्रयोजकौदार्यसमभावविशिष्टसंघट्टनसर्वानुगतबोधबलादिप्रचारश्च समुपेक्षितः आसीदिति निर्धार्यते ।

ततोऽनन्तरेऽनतिदूरे च काले हिन्दुधर्मसमाजराष्ट्राणां क्षयारम्भदर्शनात् धर्माधिकारिभिः कृताः धर्मादिक्षयप्रयोजकाः अपराधाः अवगम्यन्ते । एवं वेदविरुद्धाः आचारादयो बहुना कालेन रूढिं प्राप्ताः वेदविरुद्धत्वेन क्षयहेतुत्वेन वाऽनवगम्यमानाः क्षयहेतुत्वेनान्यद्यत्किञ्चिदनुपपन्नमुपदर्शयन्तो राजयक्ष्मेव, हिन्दुधर्मं, आर्यहिन्दुसमुदायञ्च सर्वतः क्षपयन्तः समूलमुन्मूलयिष्यन्तश्च सर्वत्र दरीदृश्यन्ते ।

श्रुतितात्पर्यम्

चतुर्णां वर्णानां विराडङ्गत्वश्रुत्या हि विराड्वस्तुनि महापुरुषे सर्ववर्णकर्मवैचक्षण्यस्य तदाश्रयाणां बोधबलधनादिगुणानाञ्च सम्पूर्णता प्रतिपाद्यते । ततश्च विराट्कार्यभूतेषु

सर्वेषु मानवेषु सर्ववर्णगुणानां निलीनतयाऽवस्थितिरपि विज्ञायते। कारणगुणानां कार्ये सङ्क्रमणनियमात्। तथा च सति श्रेयस्साधनानां चतुर्णामपि गुणानां विकासार्थं चतुर्णामपि वर्णधर्माणामभ्यासः सर्वैरपि मानवैः सामान्यतः कर्तव्य इत्येव श्रुत्या बोध्यते। सामान्याभ्यासेन च येषु यस्य यस्य गुणस्यातिशयो दृश्यते, तैस्तस्य तस्य धर्मस्याभ्यासोऽतिशयेन कर्तव्य इति च।

अतः सर्वोदयं साधयितुं एकत्रापि बोधबलादिविविधप्रशस्तशक्तिसमन्वयबोधनायैव आदिममूलकारणविराड्पुरुषवत् प्रवृत्तेयं भगवती निष्पक्षपाता सर्वजनसुहृद्भूता समदर्शना श्रुतिरिति निष्पक्षै र्विद्वद्भि र्यथार्थतात्पर्यसमीक्षकै र्निर्धार्यते। सति चैवं वर्तमानसमये राष्ट्रशासकै र्जननेतृभिश्च सामाजिकसमानतायाः सिद्धान्तः प्रबलेन वेगेन प्रचारितः प्रसारितश्च कृतोऽस्माभिरवलोक्यते। स्वतन्त्रभारतराष्ट्रसंविधानमपि भारतीयनिखिलनागरिकेभ्यः समानतायाः स्वतन्त्रतायाश्चाधिकारं ददाति।

व्यक्तिसमष्टिनिष्ठाभ्युदयसमालोचना

चातुर्वर्ण्यभारतसमीक्षया स्फुटीकृतस्य वेदतात्पर्यानुसारिणश्चातुर्वर्ण्यस्य श्रेयस्करत्वमुपपन्नत्वं, तद्विपर्ययेण परैः प्रवर्त्यमानस्य श्रेयोविरोधित्वमनुपपन्नत्वं च संक्षेपतः प्रदर्शयितुमिह चातुर्वर्ण्यस्योद्भवो विकासश्च लोकसाधारणया रीत्या संक्षेपतः किञ्चिन्निरूप्यते—

धर्मस्यैहिकाभ्युदय एवार्वाचीनैः राष्ट्रीयाभ्युदय इत्युच्यते। समष्टिरूपेण गृहीतानां जनानामभ्युदयः एवं राष्ट्राभ्युदय

उच्यते । तथा च व्यक्तीनां जीवनसौविध्यमेव समष्टिजीवनानुकूल्येन विकसितधर्मस्यैहिकाभ्युदयो भवति । व्यक्तिजीवनसौविध्यापेक्षितानां कर्मणां चतुर्धा विभागो भवितुं शक्नोति—उपायविज्ञानं, उपयुक्तवस्तुसम्पादनं, तत्संरक्षणं, उपयोगश्चेति । एतेषु चतुर्विधेषु कर्मसु यस्य वैदग्ध्यं सिध्यति, तस्य जीवनसौविध्यमपि नान्तरीयकतया सिद्धं भविष्यति । व्यक्तिनिष्ठानि तानि तदपेक्षितानि च कर्माणि समष्टिरूपस्य राष्ट्रस्याभ्युदयाय प्रभवन्ति । एतेषु चतुर्विधेषु कर्मसु वैदग्ध्यसिद्ध्यर्थमभ्यासानुकूलाश्चत्वारो बुद्धिबलादयो गुणाश्चापेक्षिता इत्यवगम्यते । केषुचित्कर्मसु केषाञ्चिदभ्यासेऽपि वैदग्ध्यस्य नैपुण्यस्यादर्शनात् । तत्तत्कर्माभ्यासापेक्षितं बुद्धिबलं, अभिरुचिः विशिष्टसंस्कारापरपर्याया वासना च तत्तत्कर्माभिमुख्येन प्रवर्तमानाः सामान्येन चातुर्वर्ण्यप्रयोजकाः गुणा अभ्युपगन्तव्याः ।

व्यक्तिजीवनस्य परिमितत्वाद्, अल्पकालिकत्वात् तदर्थककर्मसु वैदग्ध्यस्य प्रायः प्रकृतिसिद्धत्वाच्च, तत्र चतुर्विधानां कर्मणां विभागेन विस्तरेण वा अभ्यासस्यापेक्षा न भवति । राष्ट्रजीवनस्य तु बृहत्त्वादपरिच्छिन्नत्वाच्च तत्र सौविध्यापादकानां चतुर्विधानां कर्मणां गुणानां च विभागेन विस्तरेण क्रमवत्करणेन चाभ्यासो व्यवस्थया विनियोगश्च कर्तव्यो भवति । अत एव श्रुतिस्मृत्यादिषु धर्मशास्त्रग्रन्थेषु चातुर्वर्ण्यस्य योग्यतां रुचिञ्चानुसृत्य विभागेनाभ्यसनीयता व्यवस्थया विनियोक्तव्यता च विस्तरेण प्रतिपादिता ।

एवं समष्टिनिष्ठत्वेन विकसितानां चतुर्विधानां ज्ञानं, संरक्षणं, उत्पादनं, परिचरणं, चेति नामानि क्रमश्चोपपेदुः ।

एतेषु चतुर्विधेषु कर्मसु तदनुग्राहकगुणेषु च वैचक्षण्यमेव (कौशल्यमेव–नैपुण्यमेव-प्रावीण्यमेव) वर्ण इत्युच्यते। वर्णवत्प्रकाशमानत्वात् 'लब्धवर्णो विचक्षणः' इति पर्यायप्रसिद्धेश्च। एवं चतुर्विधकर्मवैचक्षण्यरूपवर्णवतामपि तत्तत्कर्मस्वभावानुसारेण शास्त्रेषु संज्ञाः प्रयुक्ताः। यथा–सर्वाधिकबुद्धिसापेक्षे ज्ञानकर्मणि विचक्षणस्य (प्रवीणस्य) ब्राह्मण इति, ज्ञानस्य बृहत्त्वाद् ब्रह्मपर्यवसानत्वाच्च। ततो न्यूनबुद्धिसापेक्षे संरक्षणकर्मणि विचक्षणस्य (कुशलस्य-निपुणस्य) क्षत्रिय इति संरक्षणस्य क्षतत्राणप्राधान्यात्। ततोऽपि न्यूनबुद्धिसापेक्षे उत्पादनकर्मणि विचक्षणस्य विडिति, कृषिप्रधाने उत्पादने सीरादिना कृष्टायां भूमौ दोहदनिक्षेपार्थं बीजावापार्थञ्च प्रविशतीति व्युत्पत्त्या भूमिस्पृक् इति पर्यायाच्च, वैश्य इति च स्वार्थे ष्यञ्विधानात्। सर्वतो न्यूनतमबुद्धिसापेक्षे परिचरणकर्मणि विचक्षणस्य शूद्र इति। शुचं परिचर्यमाणानां दुःखं द्रावयन्ति अपसारयन्तीति व्युत्पत्तेः। परिचरणसहकृततत्तद्वस्तूपयोगमन्तरेण इतरवर्णकर्मभिः शुचोऽपसरणासम्भवाच्च। शुचा द्रवतीति सूत्रसूचिता व्युत्पत्तिस्तु संदर्भविशेषाभिप्रायेति बोध्यम्। वैचक्षण्यस्याभ्याससाध्यत्वन्तु सर्वसंप्रतिपन्नम्।

स्मृतितात्पर्यम्

तत्तद्गुणकर्मसु वैचक्षण्यमेव चातुर्वर्ण्यगतो वर्ण इत्ययमर्थोऽस्मिंश्चातुर्वर्ण्यसमीक्षायाः द्वितीयखण्डे प्रदर्शितेन प्राचीनप्रामाणिकवचनेनाप्यवधार्यते —

प्रजापतिः प्रजाः सृष्ट्वा, तासु कर्म विधाय च।
वर्णो वर्णं समाधत्ते, एकैकगुणभाग्गुणम् ॥' इति।

अत्र प्रजापति वंर्णत्वेन एकैकगुणभाक्त्वेन च विशेषितः। तस्मिँश्चतुर्विधकर्मवैचक्षण्यस्य विद्यमानत्वात् सर्ववर्णात्मकत्वाच्च वर्णत्वम्। तत्तत्कर्मापेक्षितैकैकगुणानामर्थात् सर्वगुणानां तस्मिन् विद्यमानत्वात् तस्यैकैकगुणभाक्त्वं चोपपद्यते। 'गुणं वर्णं समाधत्ते' इति सामानाधिकरण्योक्त्या गुण एव कर्माभ्यासबलाद् वैचक्षण्यात्मकं वर्णभावं व्रजतीति विज्ञायते।

प्रजासर्गानन्तरं कर्मविधानस्य तदनन्तरं वर्णाधानस्य च स्मरणात् जननकाले कर्म वा वर्णो वा न भवतीति, पश्चात्क्रियमाणेन गुणानुसारिणा कर्माभ्यासेन तत्तद्वैचक्षण्यरूपो वर्णो जायते, इति चावगम्यते। वर्णानामेतादृशं कर्माभ्यासजन्यत्वं वैदिकैः पौराणिकैश्चेतिवृत्तैः समीक्षायाः प्रथमखण्ड एव पर्याप्तमात्रया प्रतिपादितं तत्रैव द्रष्टव्यम्। तस्माद्गुणानुरूपकर्माभ्यासजन्यो वर्ण इति न केवलं तर्कोपनीतोऽयमर्थः, किन्तु श्रुतिस्मृतिपुराणाद्यलौकिकप्रमाणतात्पर्यसिद्धोऽपि।

वर्णबीजरूपाश्चत्वारोऽपि गुणाः सर्वेषु मानवेषु निलीनाः अवतिष्ठेरन्। स्रष्टुः प्रजापतेः सर्वगुणभाक्त्ववचनात् कारणगुणानां कार्ये सङ्क्रमणनियमाच्च। व्यक्तिजीवननिर्वाहार्थानि गुणानुरूपाणि कर्माणि प्रायः प्रकृत्यैव प्रवतर्तानि भवन्ति। राष्ट्राभ्युदयहेतुत्वेन वर्णव्यवहारहेतुत्वेन च गुणानां विकासः कर्मसु वैचक्षण्यञ्च सुशिक्षितेनाभ्यासेन विना न सिद्ध्यति। न चैकस्य पुरुषस्यैक एव वर्णो भवितुमर्हति शक्नोति वेति नियमोऽस्ति, विश्वामित्रपरशुरामादिषु वेदपुराणप्रसिद्धेष्वपि व्यभिचारदर्शनात्।

न हि व्याकरणविचक्षणेन तत्पुत्रेण वा न्यायादिवैचक्षण्यं न प्राप्तव्यं, न प्राप्तुं शक्यमिति वा नियमो वक्तुं शक्यः। एवमेव ज्ञानकर्मविचक्षणेन ब्राह्मणेन परिचरणकर्म-भोजननिर्माणादिवैचक्षण्यं, तथा परिचरणकर्मविचक्षणेन शूद्रेण ज्ञानकर्मवैचक्षण्यं च न प्राप्तव्यं, न प्राप्तुं शक्यं वेति न भवति। तथापि राष्ट्रसमाजाभ्युदयार्थं कर्मणामपेक्षायां सत्यां तत्तत्कर्मस्वविचक्षणैरर्थाद् अतद्वर्णैस्तत्तत्कर्म न कर्तव्यं, विचक्षणैरर्थाद् तद्वर्णैर्न परित्याज्यमिति च नियमोऽवश्यं स्वीकर्तव्यः। अविचक्षणैः क्रियमाणेन विचक्षणैरक्रियमाणेन च कर्मणा राष्ट्रसमाजयोः क्षतिसम्भवात्।

स्वधर्मपरधर्ममीमांसा

तादृशकर्तव्यमेव स्वधर्म इति, अकर्तव्यमेव परधर्म इति च धर्मशास्त्रेषु व्यवह्रियते। अयमपि स्वधर्मपरधर्मविभागो राष्ट्रसमाजाभ्युदयार्थे, धर्मगौरवलाभार्थे च स्वस्वयोग्यतारुच्यादिना प्रयुज्यमानेषु विविधकर्मस्वेव स्वीकर्तव्यः, न तु व्यक्तेरर्थे कुटुम्बाद्यर्थे वा। स्वरक्षार्थं ब्राह्मणादिनापि युद्धस्य, स्वाश्रितेभ्यो यथाशक्ति ज्ञानप्रदानान्नोत्पादनादेः शूद्रादिनापि च कर्तव्यत्वात्। वर्णधर्माभ्यासे तु न कस्यापि कुत्रापि परधर्मत्वं प्रत्येतुं शक्यम्। गुणानुसारिणां कर्माभ्यासमन्तरेण वर्णासम्भवात्। सामान्यतोऽभ्यासमन्तरेण गुणविषयकन्यूनताऽधिकतानिर्णयासम्भवाच्च। 'श्रेयान् स्वधर्मो विगुणः, परधर्मो भयावहः' (गी० ३।३५) इत्यादिवचनेषु चैतावानेवार्थो विवक्षितो ग्राह्यः। तादृशवचनानां तत्तत्कर्मविचक्षणकर्तृकप्रयोगाभिप्रायत्वात्।

ज्ञानबलाद्यभ्यासप्रतिषेधानभिप्रायत्वाच्च ।

ब्राह्मणकर्मणः ज्ञानाभ्यासस्यापि क्षत्रियादीन् प्रति परधर्मत्वं यदि भगवता विवक्षितं स्यात्, तर्ह्यर्जुनाय भगवता क्षत्रियप्रवरेण कृतो गीतोपदेशो भीष्मविदुराद्युपदेशाश्च विरुद्धाः आपद्येरन् । स्वधर्मपरधर्मशब्दयोरेतस्मात्पूर्वोक्तादन्यं श्रुतिस्मृतिविरुद्धमर्थं कल्पयद्भिः पुराकालीनैः धर्माधिकारिभिः पण्डितैः स्वराष्ट्रस्य स्वसमाजस्य स्वधर्मस्य च कियाननर्थः कृत इति, अस्मिन्नेव समीक्षायाः द्वितीयखण्डे काश्मीरादीतिवृत्तैः श्रीमहामण्डलेश्वरस्वामिपादैः हृदयस्पर्शितया प्रतिपादितं द्रष्टव्यम् ।

एवं तत्तद्धर्मवैचक्षण्यरूपस्य वर्णस्याभ्यासलभ्यत्वे, स्वधर्मपरधर्मविभागस्य योग्यायोग्यजनसम्बन्धिप्रयोगविषयत्वे च लौकिकवैदिकोभयविधप्रमाणेतिवृत्तादिभिः प्रत्यक्षतः प्रकाशमानेऽपि, वर्णविभागवचनेषु स्वधर्मपरधर्मविभागवचनेषु च श्रुतितात्पर्यविरुद्धान् अर्थान् उपादाय स्वेषां स्ववंश्यानाञ्च स्वार्थलाभमभिलषद्भि बुद्ध्या वित्तेन च बलवद्भिरपि द्वेषासूयादिदोषकलुषीकृतहृदयैः प्राचीनैरेव कादाचित्कैः पण्डितैः तत्कालीनानां तत्तद्धर्मविचक्षणानां वंशजेषु तत्तद्वर्णस्य जन्मना सिद्धत्वं तान् प्रति तदितरकर्मणां प्रयोगस्येव अभ्यासस्यापि परधर्मत्वं च प्रकल्प्य तस्मिन्नर्थे प्रमाणवचनानि क्लिष्टप्रणाल्या भाषानियमविरोधेन च व्याख्याय स्वयं प्रणीय प्रक्षिप्य च हिन्दुधर्मनिर्मूलनपर्यवसायिनो महतोऽनर्थस्योत्तमाधमजातिभेदभावप्रयोजितस्य बीजावापः कृतः । तथाहि—

ज्ञानधर्मविचक्षणस्य पुत्रः तद्धर्माभ्यासापेक्षितगुणहीनश्चेद् योग्यतायाः रुचेश्चाभावात् तद्धर्माभ्यासविमुखो भवति ।

अभ्यस्यन्नपि तत्र वैचक्षण्यं न प्राप्नोति, तदितरधर्माभ्यासानुकूलगुणभूयिष्ठोऽपि सः परधर्मत्वव्याख्यानेन वारितस्तद्धर्माभ्यासं नैव कुरुते। ज्ञानधर्मेष्वविचक्षणोऽनभ्यासवानपि जन्मना सिद्धविचक्षणत्वाभिमानात्तं धर्मं प्रयुञ्जानो राष्ट्रस्य समाजस्य धर्मस्य चानर्थायैव कल्पते। यथा वैद्यशास्त्राभ्यासानुकूलगुणरहितेनानभ्यासवता वैद्यपुत्रेण 'वैद्योऽहमस्मी' ति मन्वानेन क्रियमाणा चिकित्सा रोगिणामनर्थायापायायैव च भवति। तथा पूर्वोक्तदार्ष्टान्तिकेऽपि बोध्यम्।

अनयैव प्रक्रिययाऽवशिष्टेषु संरक्षणोत्पादनपरिचरणरूपेषु त्रिविधेष्वपि धर्मेषु विचक्षणानां योग्यानां दौर्लभ्यं, अविचक्षणैः अयोग्यैः प्रयुज्यमानेभ्यः कर्मभ्यो विविधा अनर्थाश्चावगन्तुं शक्याः, तत्र तत्र चानुभूयन्ते। अविचक्षणैः तत्तद्धर्मानुष्ठानलक्षणं परधर्मानुष्ठानं, तत्तद्धर्मानुकूलगुणवद्भिर्विचक्षणैस्तत्तदभ्यासाद्यकरणरूपः स्वधर्मत्यागश्च सर्वतः प्रचलितो बभूव भवति भविष्यति च।

गीतावचनतात्पर्यम्

'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥'(गी० ३।३५) इत्यत्र विद्वद्भिर्विवेचनीयम्। युद्धप्रसंगे कोऽसौ स्वधर्मः, कश्चासौ परधर्म इति। आसीत् अर्जुनः शूरवीरः क्षत्रियः, तत्प्रशस्तगुणकर्माढ्यः। न्यायरक्षणं दुष्टदमनार्थं युद्धकरणमपि क्षत्रियस्य स्वधर्म इति परम्परयाऽवगतम्। अर्जुनः किल स्वाग्रे समुपस्थितं क्षत्रियधर्मं युद्धं विहाय, अनुपस्थितस्यातिदूरे स्थितस्य शमदमज्ञानध्याना-

दिलक्षणस्य संन्यासिधर्मस्य निषेवणाय । 'श्रेयो भोक्तुं भैक्षमपीह लोके' (गी० २।५) इत्युक्त्वा समुत्सुको बभूव। अतो भगवता श्रीकृष्णेन 'न त्वया संप्रति संसारासक्तेन तदयोग्येन विरक्तसंन्यासिधर्मा अनुभूताः, क्षत्रियधर्मस्तु बहुशोऽनुभूतः, समुपस्थितं अनुभूतं स्वयोग्यं कर्म परित्यज्य, अननुभूतस्यानुपस्थितस्य कर्मणो निषेवणात् अनर्थ एव स्यात्, लाभश्च न कोऽपि लब्धो भवेत्, स्वयोग्यतामनुरुध्य निषेवितस्य स्वधर्मस्य युद्धस्यानुष्ठानात् राज्यलाभः कीर्तिलाभः, शत्रुमदमर्दनमपि च सिद्धयेत् । अतः स्वधर्माश्रयणमेव तव क्षत्रियस्य श्रेयः स्यात्, न तु यथार्थवैराग्यरहितस्य तवानुपस्थितस्य संन्यासिधर्मस्याश्रयणं स्वकर्तव्यकर्मवैमुख्यप्रयोजकं श्रेयः समुत्पादयेत् । अतः स्वनुष्ठितात् = सुखेनानुष्ठेयात् परधर्मात् स्वधर्मो युद्धादिरूपो हिंसादियुक्ततया विगुणोऽपि श्रेयान् मन्तव्यः, इत्युपदिष्टम् । अतोऽत्र स्वयोग्यतामनुरुध्योपस्थितं कर्तव्यं कर्म एव स्वधर्मः, स्वयोग्यताविरुद्धमनुपस्थितमकर्तव्यमेव परधर्म इति मन्तव्यम् ।

भारतवास्तव्यजनान् प्रति स्वधर्मः स्वकीयानादिपरम्परया समागतः सत्यसंयमन्यायदयोपेतो वैदिकः सनातन आर्यहिन्दुधर्मः परैर्विरोधिभिर्विदेशीयैर्विधर्मिभिः-आरोपितमिथ्यावैगुण्ययुक्तोऽपि परधर्मात् सुखेनानुष्ठेयात् असंयमान्यायोपेतात् परधर्मात् श्रेयान् = श्रेयस्कर एव भवति । परधर्मः = यवनकृश्चियनादिविदेशीयो धर्मो भयावह एव भवति, न श्रेयस्करो भवतीति गीतावचनस्य तात्पर्यं शिष्टैर्विद्वद्भिर्वर्ण्यते । वस्तुतः स्वाभ्युदयसिद्धये नास्ति कश्चन स्वधर्मः, न चास्ति कश्चन परधर्मः । समयः, परिस्थितिः आवश्यकता, योग्यता, रुचिश्च

स्वधर्म, परधर्मरूपेण' परधर्मश्च स्वधर्मरूपेण परिणामयते इति लोकेऽपि प्रायो दृष्टम् । अतो मनुष्यस्येदमेव कर्तव्यं विद्यते - येन धर्मेण, यया क्रियया, यया च प्रवृत्त्या, येन ज्ञानेन बलेन च स्वस्य सर्वविधः प्रशस्तो यशस्करोऽभ्युदयो भवेत्, स्वसमाजराष्ट्रयोश्चाभ्युत्थानं स्यात्, तेषां स्वीकारः कर्तव्यः । यैश्च पतनं प्रभवेत्, तेषां परित्यागं कुर्यात् इति ।

अतो भगवतोऽर्जुनं युद्धविमुखमुद्दिश्य तदानींतना स्वधर्म-परधर्मोक्तिस्तु तं युद्धे कर्तव्ये प्रवर्तयितुमेव प्रवृत्ताऽभूदिति वेदितव्यम् ।

वर्णसंकरमीमांसा

बुद्धिः कर्मानुसारिणी भवति, अतः कर्मबुद्धिपरिवर्तनाद् वर्णधर्मपरिवर्तनं प्रसिद्धं लोके दृष्टम् । यथा कश्चन ब्राह्मण-ब्रुवोऽनवरतं वंशपरम्परातो वैश्यकर्मनिषेवणात् तस्य बुद्धिरपि वैश्यस्वभावानुसारिण्येव संपद्यमाना भवति, वैश्यधर्मा अपि तत्रानिवार्यतः प्रादुर्भवन्ति, शमदमादयो ब्राह्मणधर्मास्तस्मादप-गताः भवन्ति । अत एव तत्तत्कर्मसु वैचक्षण्यावैचक्षण्योरविवेक-रूपो वर्णसंकरश्च प्ररूढो भवति । अहो ! कियती शास्त्रतात्पर्यविरुद्धता श्रेयोविरुद्धता च प्रवर्तिता अमीभिः—तत्तद्योग्यतां तत्तद्रुचिं तत्तद्गुणकर्माणि च समुपेक्ष्य जन्मनैव तत्तद्वर्णसिद्धिं, तत्तद्धर्माभ्यासानर्हतां च स्वेच्छामात्रकल्पितामुपक्षिपद्भिः स्वार्थान्धैरिति विचिन्तयन्तु विद्वांसः शिष्टाः ।

यथा वैयाकरणपुत्रत्वमात्रेण कश्चिद् वैयाकरणो न भवति, न च नैयायिकपुत्रोऽपि व्याकरणाभ्यासेन वैयाकरणो न भवति । तथैव हि ब्राह्मणपुत्रत्वमात्रेण कश्चिद् ब्राह्मणो न भवति, न च

वर्णान्तरपुत्रोऽपि ब्राह्मणधर्माभ्यासेन ब्राह्मणो न भवति । ततश्च वर्णान्तरगुणवतां वर्णान्तरपुत्राणां स्वगुणाननुरूपवर्णकर्मस्वीकाराद् अनुरूपकर्मास्वीकाराच्च, अननुरूपयो र्गुणकर्मणोरेकत्र मेलनाद्, अनुरूपयोरसम्मेलनाच्च धर्मक्षयहेतु र्वर्णसङ्करो जायते इत्यवगम्यते ।

अत एव युद्धनिमित्ताज्जायमानात् स्त्रीदोषाद् वर्णसांकर्यमाशंकमानं–'स्त्रीषु दुष्टासु वार्ष्णेय ! जायते वर्णसंकरः' (गी० १।४२) इत्युक्तवन्तमर्जुनं प्रति–'युध्यस्व भारत !' (गी०) 'न कुर्यां कर्म चेदहं । संकरस्य च कर्ता स्यां, उपहन्यामिमाः प्रजाः' (गी० ३।२४) इति चोक्तवता भगवता - 'स्त्रीदोषाद्वर्णसङ्करो न जायते, किन्तु सर्ववर्णगुणवता मयेव तत्तद्वर्णधर्मविचक्षणैस्तत्तद्धर्मकर्माणि यदि न क्रियेरन्, अविचक्षणैश्च यदि क्रियेरन्, तदेव कर्मसाङ्कर्यमेव वर्णसङ्करोत्पत्तिहेतु र्भविष्यतीति स्पष्टतया बोधितम् । विचक्षणाकरणोक्त्या अविचक्षणकरणस्यापि समानयोगक्षेमत्वेनोपलक्षणत्वात् । अत एव 'परकर्मनिषेवणात् स्वकर्मणाश्च त्यागेन, जायन्ते वर्णसङ्कराः ॥' (वा० स्मृ०) 'स्वानि कर्माण्यपहाय शूद्रकर्म निषेवते । स्वस्थानात् स परिभ्रष्टो वर्णसङ्करतां गतः ।' (म. भा. अनुशासनपर्वणि-१४२) इत्याद्युक्तयः संगच्छन्ते ।

वस्तुतः सर्वं एव वर्णलक्षणाः गुणाः सर्वेषु मनुष्येषु तिष्ठन्ति । परन्तु योग्यप्रयोक्तृणामभावात् - ते गुणाः सर्वत्र विकसिता न भवन्ति । न हि सर्वे ब्राह्मणब्रुवाः शमदमादिभिरेव सम्पन्नाः भवन्ति । रक्षणवाणिज्यपरिचरणकर्तृत्वादयः

कामक्रोधादयो दुर्गुणा अपि तेषु वर्तन्त एव । यदा यस्य प्रयोजनं स्यात् तस्य गुणस्य च दोषस्य चाविष्कारः संपद्यते । न च क्षत्रियब्रुवाः केवलं युद्धादिपरायणाः क्रूरा एव सन्ति, रक्षणमपि दानमपि परिचरणमपि च ते कुर्वन्ति । न वैश्यब्रुवाः केवलं वाणिज्यमेवाचरन्ति, तेऽपि शमदमादिसम्पन्ना भवन्त्येव । दयादानरक्षणपरायणा अपि दृश्यन्ते । पुरा द्रोणादयो ब्राह्मणब्रुवा अपि क्षात्रं धर्ममाश्रित्य जीवन्ति स्म । श्रीकृष्णो भगवान् स्वयं क्षत्रियोऽपि ज्ञानोपदेशे संलग्न आसीत् । एकलव्यः शूद्रोऽपि क्षत्रविद्यायां सर्वश्रेष्ठ आसीत् । कर्णार्जुनादयो वर्णसङ्करा अपि पूर्णक्षात्रधर्मविशिष्टाः शूरवीराः तेजस्विनः प्रभावशालिनः आसन् । श्रद्धेयाः व्यासवसिष्ठादयः सङ्करा अपि विकसितपूर्ण–ब्राह्मणधर्मसंयुक्ता आसन् । भीष्मयुधिष्ठिरादयः क्षत्रिया अपि धर्मोपदेशका आसन् । रावणो ब्राह्मणोऽपि क्षत्रियकर्मयुद्धप्रवण आसीत् । अतो न दृश्यते कोऽपि गुणः कस्मिन्नपि वर्णे नियतः । तथा चेदमपि मन्तव्यमेव-सर्वे मनुष्याः ब्राह्मणाः, सर्वे क्षत्रियाः, सर्वे वैश्याः, सर्वे च सन्ति शूद्राः । सर्वेषु समानरूपेण ज्ञानबलादयो गुणाः अवतिष्ठन्ते, कुत्रचित् प्रयोजकप्रभावात् ते विकसिताः भवन्ति, कुत्रचिन्न ते तदभावात् निलीनाः तिष्ठन्तीत्यन्यदेतत् ।

श्रुत्यर्थमीमांसा संघटनविरुद्धस्वार्थान्ध्यप्रदर्शनञ्च

अथ कीदृश्या बालिशया बलहीनया बुद्धिशून्यया च प्रक्रियया प्रमाणवचनेषु जन्मनैव वर्णसिद्धिरिति वाद आरोपित इति प्रदर्शयितुं सोऽपि प्रकारो दिङ्मात्रेण निरूप्यते । तथाहि—चतुर्विधानामपि बोधबलधनादिगुणकर्मणां परस्परापेक्षितत्वं,

एककार्योपयोगित्वं, एकाश्रयत्वं, असंयुक्तानामसाफल्यं, संयुक्तानां मुखबाह्वादिवत् साफल्यञ्चोपपादयितुं प्रस्तुते 'ब्राह्मणोऽस्य मुखमासीदि' त्यादिरूपे पुरुषसूक्तमन्त्रे तावच्चत्वारोऽपि ब्राह्मणादयो वर्णाः यत्किञ्चित्सादृश्यमादाय समष्टिप्रपञ्चरूपस्यापुरुषरूपस्याप्यारोपितपुरुषरूपस्य विराड्वस्तुनो विभिन्नाङ्गत्वेन— 'एकात्मग्रथितत्वेन हेतुना कल्पितव्यावहारिकभेदभावे सत्यपि वास्तविकमेकत्वमेव' प्रबोधयितुं वर्णिता इति सर्वेऽपि शिष्टाः मन्त्रविदो विद्वांसो विजानन्त्येव ।

सादृश्यप्रदर्शनार्थमुपमानोपमेययोः ताद्रूप्यतज्जन्यत्वसहोदरत्वमित्रत्वाद्यारोपाः क्रियन्त इति ह्यालंकारिकाणां पन्थाः । तादृशेष्वारोपेषु यावन्मात्रं सादृश्यं विद्यमानमुपयोगवच्च भवति, तावन्मात्रमेवावगन्तव्यं, नाधिकमनुपयुक्तं विरुद्धमिति चालङ्कारिकसमयः । न हि मुखे चन्द्रत्वारोपेण मुखस्य व्योममण्डलवर्तित्वं, कुमुदविकासकत्वादिकं वा केनाप्यवगम्यते । एवं ब्राह्मणादिषु मुखादिताद्रूप्यारोपेऽपि मुखादिगतज्ञानप्रकाशकत्वादिकमेव साधारणधर्मतया ग्रहणीयं, न तु बाह्वाद्यपेक्षया मुखादीनामूर्ध्वाधः स्थानत्वादिकं, बाह्वाद्यवयवैः कर्तव्यानां कर्मणां मुखादिभिः कर्तुमशक्यत्वादिकं वा, ब्राह्मणादिषु तादृशधर्माणामविद्यमानत्वाद् अनुपयोगत्वाच्चेति को नाम न जानाति ? ।

अत्र ज्ञानप्रकाशकत्वाद् ब्राह्मणे मुखसादृश्यं, शस्त्रास्त्रप्रयोगकारित्वात् क्षत्रिये बाहुसादृश्यञ्च साधारणधर्मसिद्धमेव । शरीरस्थित्यपेक्षितयो र्मांसरक्तयोः प्राचुर्येणोरुमूले सञ्चितत्वस्य वैद्यशास्त्रप्रसिद्धचा राष्ट्रस्थित्यपेक्षितस्य धनधान्यादेः वैश्येषु

सञ्चितत्वाच्च वैश्ये ऊरुसादृश्यं बिम्बप्रतिबिम्बभावसिद्धम् । शूद्रधर्मवाचिनः परिचरणशब्दस्य पादसाध्ये इतस्ततोगमनेऽपि वृत्तिसत्त्वाच्छूद्रे पादसादृश्यन्तु श्लेषानुप्राणितमिति च्चावलोक्यते।

यद्यपि ब्राह्मणादौ सर्वत्र ताद्रूप्यारोप एव यद्वा मुखादौ ब्राह्मणत्वाद्यारोप एव च शब्दात् प्रकरणाच्चोपपद्यते । तथापि शूद्रे पादत्वारोपे यद्वा पादे शूद्रत्वारोपे च प्रयुक्तया श्लिष्टविभक्त्या तज्जन्यत्वारोपः कृत इति तर्कः कर्तुं शक्यते । अन्यतरस्मिन्नप्यारोपे पूर्वोक्तप्रकारकसादृश्याद् अतिरिक्तः कश्चनार्थो विवक्षितः इति केनापि विचारवता ग्रहीतुं न शक्यम् । एवमपि सति, पर्वतेषु भूमातुः स्तनत्वस्य, B समुद्रेषु वसनत्वस्य वनेषु केशत्वस्य नद्यादिषु सिरात्वादेश्चारोपेण वर्णितेषु तत्तदारोपं परित्यज्य, वस्तुत्वं परिगृह्य च पर्वतादिषु स्तनाद्युपचारं, मानुषस्त्रीणां स्तनादिषु पर्वताद्युपचारं च सर्वथा परिहास्यं बुद्धिशून्यतायाः परमावधिदर्शकं च कर्तव्यत्वेन स्वीकुर्वद्भिः प्रचारयद्भिरिव, ततोऽप्यतितरां विमूढमतिभिः प्रस्तुतपुरुषसूक्तमन्त्रे द्विविधमप्यारोपं परित्यज्य, वर्णानां तत्तदङ्गत्वमेवाङ्गीकृत्य, अङ्गानां जन्मना सिद्धत्वाद् वर्णानामपि जन्मना सिद्धत्वमुत्प्रेक्ष्य, मुखाद्यङ्गानामुच्चनीचस्थानस्थत्वाद् वर्णानामप्युच्चनीचत्वमभ्युपेत्य, तस्यैतस्य दृष्टादृष्टप्रमाणविरुद्धस्योच्चनीचभावस्य बलवत्तामाधातुं वर्णानां परस्परेण शुद्ध्यशुद्ध्यादिकं स्पृश्यत्वादिकञ्च जन्मतः एव

B समुद्रवसने ! देवि !, पर्वतस्तनमण्डले ! । विष्णुपत्नि ! नमस्तुभ्यं, पादस्पर्शः क्षमस्व मे ।।'

सिद्धमित्युत्क्षिप्य, एकेनाङ्गेन कर्तुं योग्यस्य कर्मणोऽन्येनाङ्गेन कर्तुमशक्यतायाः दृष्टान्तेन ततो विलक्षणानामपि वर्णानां वर्णान्तरकर्मानुष्ठानं सहवाससहभोजनसहबन्धुत्वादिकं च प्रतिषिद्धमिति प्रतिज्ञाय, वेदोपदिष्टैक्ययोगक्षेमसमानबन्धुत्वविरुद्धान् एकभावनाविध्वंसकान् भिन्नभावनाजनकांश्च बहुविधानाचारानङ्गीकर्तुं निर्बन्धतो राज्यबलेन च जनसमुदायान् विवशीकृत्य तादृशानामाचाराणामलङ्घनीयतां चिरस्थायितां च समुपदिश्य त्रिविधश्रेयोविरोधिनीरपि राष्ट्रीयाः सामाजिकीश्च व्यवस्थाः शतशः सञ्चाल्य, तेषामाचाराणां व्यवस्थानाञ्च प्रामाणिकत्वं प्रदर्शयितुं बहूनि वेदादिप्रमाणतात्पर्यविरुद्धानि व्याख्यानानि, शास्त्राभासवचनानि च प्रणीय, प्रक्षिप्य च न केवलं धर्मशास्त्रसाहित्यमपि तु भाषातत्त्वशास्त्रसाहित्यं च समन्तात् सम्मर्दितं विध्वंसितं चामीभिः स्वार्थान्धैरिति चातुर्वर्ण्यभारतसमीक्षायाः द्वयोरपि खण्डयोः सविचारेण पठनेनावगतमस्माभिः ।

वेदमन्त्रतात्पर्यानवगमे विरुद्धार्थावगमे च कारणम्

अहन्तु मन्ये—कर्तव्यत्वेनाविहितानां प्रत्युत 'क्रव्यादमग्निं प्रहिणोमि दूरम्' (ऋ० १०।१६।९) 'मा हिंस्याद् विश्वानि भूतानि' इत्यादिभि र्निषिद्धानां यज्ञे मनुष्यपश्वादिहिंसादीनां—अनेकपत्नीपरिग्रहसतीदाहादीनाञ्चानुष्ठानात् सञ्चितस्य पापस्य प्राबल्यादेव तदानीं वेदमन्त्रयथार्थतात्पर्यावगमः कर्तुमशक्य आसीत् । प्रत्युत स्वार्थान्ध्यादिदुर्गुणैश्च विरुद्धानुपपन्नार्थावगमोऽभूत् ।

अत एव समीक्षकाः विद्वांसः कथयन्ति—पुरासत्ययुगत्वे-

नाभिमते समये यज्ञेषु अजादिपशुवधवत् देवताप्रसादार्थं नरवधाचारोऽप्यासीदिति । अत्रास्यां समीक्षायां समुद्धृतां-ऐतरेयब्राह्मणवर्णितां रोहितशुनःशेपकथामेव प्रमाणतया ते समुदाहरन्ति । न च पर्यग्निकरणादूर्ध्वं यज्ञे वधाय निर्दिष्टं पुरुषपशुं परित्यजन्ति, अतो यज्ञे देवार्थं मनुष्यहत्या विहितेति सैषा मृषाकलंकारोपमात्रा पामरकथाऽस्तीति वाच्यम् । ऐतरेयब्राह्मणवर्णितहरिश्चन्द्ररोहितशुनःशेपादिकथानामत्राभिहितानां यथावदालोचनेन किमस्ति तथ्यमि ? ति स्वयमेव विसंवादं विहाय विज्ञाः पाठकाः ज्ञास्यन्ति । अतः सत्यतत्त्वान्वेषकाः प्रियपाठका एव सैषा कुत्सिता पामरकथा पुरा शोभनसमये सत्ययुगे आसीद्वा न वेति निर्णेतुं शक्नुयुः, अतो नात्राधिकं किञ्चिद्विलिख्यते ।

इदानीं पुनः स्वामिपादै र्यथार्थतो वेदमन्त्रतात्पर्यस्याविष्कृतत्वादवगम्यते — तथा सञ्चितानां पापानां शुद्धयज्ञधर्मानुष्ठानेन किमपि निरसनं संजातमिति । एतेन–'यज्ञीया हिंसा हिंसैव न भवति' 'अशुद्धमिति चेन्न शब्दात्' इत्यादयः प्रवादाः अपि प्रत्युक्ताः वेदितव्याः । पवित्रे सात्त्विके यज्ञधर्मस्थले 'स्वर्गंदृश्ये नरकदृश्यवत्' दृष्ट्यापि विलोकनानर्हस्य जीवहिंसाकर्मणोऽनुष्ठानं, बौद्धजैनादिवत् पिष्टपशुकल्पनादिभि र्वैष्णवाचार्यैरपि निन्दितमेवाभूत्. इत्यलमतिपल्लवितेन ।

आश्वासनं, सत्यस्यैव जयसंभवश्च

एवं विरुद्धार्थव्याख्यानैः प्रक्षेपादिभिश्च कलुषीकृते नष्टप्रायेऽपि धर्मशास्त्रसाहित्ये वेदतात्पर्यग्रहणोपयोगिनो बहवोंऽशाः अवशिष्टा आसन्नित्येष एव कश्चिदाश्वासहेतुः । अतश्च कस्य-

चित्पुरातनकवेर्वचनमनुकृत्य धर्मं प्रत्येतदाश्वासनं कर्तुं शक्यते—

A रूपं जन्म च तावकं कलुषितं, त्यक्ताः श्रुतेरुक्तयः,
प्रक्षिप्तानि बहून्यशास्त्रवचनान्यत्र व्यथां मा कृथाः ।
हे सद्धर्म ! तवैतदेव कुशलं यत्स्वार्थिभिः पण्डितैः,
सम्यक्त्वत्पथदर्शिनी श्रुतिरियं कात्स्न्येन नोन्मूलिता ॥'इति ।

अन्यथेदानीमपि चातुर्वर्ण्यभारतसमीक्षाकृद्भिश्चतुराम्नायपारगैर्महामण्डलेश्वरमहानुभावैरपि वेदमन्त्रतात्पर्याविष्करणमसाध्यमभविष्यत् ।

ननु—शास्त्राभासवचनानि प्रक्षिपद्भिः प्रचारयद्भिश्चामीभिः पण्डितैर्वेदतात्पर्यग्राहकप्रमाणवचनान्येव कुतो नोन्मूलितानीति चेत्, सत्यस्य प्रबलस्यान्ततो जयशीलत्वात्, अनृतस्यान्याय्योपेतस्यातिदुर्बलस्य पराजयशीलत्वाच्चेत्येवं वक्तव्यम् । अत एव तात्पर्यग्राहकवेदवचनानां निगूढतया स्ववंश्येषु निक्षिप्तत्वात् परेषामनभ्यस्तत्वाच्च तदुन्मूलनफलं सेत्स्यतीति भ्रान्तिस्तेषूत्पन्ना, अन्यथाऽनृतस्यैव जयापत्तेः ।

सर्वोदयाय प्रबलः प्रयत्नः आवश्यकोऽस्ति

न चास्माद्ग्रन्थाज्ज्ञायमानेन वेदतात्पर्यज्ञानमात्रेण-ऐहिकश्रेयःक्षयपरिहारः सर्वोदयश्च सम्पूर्णतया सिद्ध्यतीत्युच्यते । निःश्रेयसे ब्रह्मनिर्वाणमोक्षे तावत् ज्ञानमात्रेण फलसिद्धिः प्रसिद्धा । आमुष्मिकश्रेयसि तु वेदतात्पर्यज्ञानानन्तरं मानसिकप्रयत्नमात्रे-

A रूपं=सद्धर्मस्य रूपं सत्यदयान्याय्योपेतं, 'धर्मः सत्यदयोपेतः' (भा०) इति स्मरणात् । जन्म=सर्वोदयसिद्धये प्रादुर्भावः । उक्तयः='समानो मन्त्रः समानी समितिः' 'संगच्छध्वं संवदध्वम्' इत्यादिलक्षणाः ।

णापि फलसिद्धिः कर्तुं शक्या। परन्त्वैहिकश्रेयसि सर्वोदये तावद्वेदतात्पर्यज्ञानानन्तरमपि फलसिद्ध्यर्थं महान् प्रयत्नः कायिको वाचिको मानसिकश्च व्यक्तिभिः समाजैश्च पार्थक्येन सङ्घीभूय च कर्तव्यो भवति। कुत एतत् ? ऐहिकश्रेयस्साधनेषु परैरापातिता वेदविरुद्धता बहुष्वाचारेषु व्यवस्थास्वनुष्ठानेषु व्यवहारेषु च बहुना कालेन व्याप्ता निरूढा प्राप्तप्रतिष्ठा चेति तादृशादेकैकस्मादपि स्थानात्तां निवर्तयितुं दीर्घस्य-कालस्य महतः प्रबलस्य प्रयत्नस्य चापेक्षा स्यादिति।

एके तावत्स्वार्थभङ्गभीरुतया, अन्ये च बहवश्चिरपरिचिताचारपरित्यागभीरुतया विवशीभूताः सर्वोदयादिलक्षणं वेदतात्पर्यमवगच्छन्तोऽपि तदनुवर्तने विमुखा अवतिष्ठेरन्। वेदतात्पर्यप्रचरणोद्यमांश्चैव प्रतिबध्नीयुः। तथा च वैदिकसनातनार्यहिन्दुधर्मस्य प्रशस्तं गौरवं, पावनभारतराष्ट्रस्य स्तुत्यमभ्युदयं, विशालस्यार्यहिन्दुसमाजस्य समन्वितबोधबलादिशक्त्युदयलक्षणं श्रेयश्चाभिलषतां तद्विरोधिनः स्वार्थस्य मिथ्याभिमानस्येर्ष्याद्वेषादिदोषजातस्य तत्प्रतिकूलाचाराणाञ्च त्यागे सधैर्यं सन्नह्यतां च हिन्दुसमाजनेतॄणां महोपदेशकानां कर्तव्यानि गुरुतराणि विपुलानि च भविष्यन्ति।

(१) बोधबलादिगुणलक्षणानां वर्णानामभ्यासजन्यत्वं, (२) सर्वेषां सर्वविधाभ्युदयाय सर्ववर्णधर्माभ्यासार्हत्वं (३) अविचक्षणानां (अप्रवीणानां) तत्तद्वर्णधर्मप्रयोगप्रतिषेधः (४) विचक्षणानां तत्तद्वर्णधर्मत्यागनिषेधश्चेत्येवं चतुरङ्घ्रिमतः सर्वाम्नायसमन्वयसिद्धस्यैहिकाभ्युदयहेतोः समाजराष्ट्रगौरवप्रयो-

जकस्य सर्वोदयसाधकस्य चातुर्वर्ण्यधर्मस्य सर्वाम्नायसमन्वयवि-चक्षणैः पण्डितप्रवरैः महेश्वरानन्दस्वामिपादैः पुनराविष्कृतस्य पुनः प्रतिष्ठापनार्थं प्रचारणार्थं च राष्ट्रस्य समाजस्य चाभिमु-ख्यायाध्यवेक्षणाय तदनुकूलव्यवहाराय चाविश्रमः परिश्रमोऽवश्यं कर्तव्यः स्यात् ।

तादृशकर्तव्यतायाः सरणिरप्यस्मिन्नेव द्वितीये खण्डे स्वामिपादैः सविस्तरं प्रदर्शितः, सर्वेषामुत्तिष्ठमानानां धर्मसमा-जाभ्युदयप्रवर्तकानां परमोपयोगवान् भविष्यति । तत्तद्गुणकर्म-लक्षणानां वर्णानामभ्यासजन्यत्वस्य श्रुत्या तर्केण च साधित-त्वाद्, यदि सर्वेषां सर्ववर्णधर्माभ्याससौविध्यमेकमपि राष्ट्रस्य समाजस्य चानुशासने सर्वप्रथमतया देशव्यापकतया चोपस्थापितं भविष्यति, तन्नान्तरीकतयैवान्येषां सर्वेषामपेक्षितकार्याणां यथा-कालं पूर्तिर्भविष्यतीति शक्यं विभावयितुम् ।

समीचीना-तुलना

यथा भगवत्पादैः आदिमैः आचार्यप्रवरैः प्रस्थानत्रयी-भाष्यकारैः श्रीशंकरैः—अन्यस्मिन्नर्थे प्रयुक्तानां पदानां वाक्या-नाञ्चान्यस्मिन्नर्थे ग्रहणेन निःश्रेयसविभागे बहवस्तात्पर्यविरुद्धा-र्थाः परैरापादिताः इति प्रस्थानत्रयीभाष्येषु विस्तरेण विशदतया च तत्र तत्र पौनःपुन्येन प्रदर्शितम् ।

अनेनैव प्रकारेण पारत्रिकश्रेयोविभागे ऐहिकश्रेयोविभागे ऽपि च ततोऽधिकास्तात्पर्यविरुद्धार्थाः परैः स्वार्थान्धमतिभिः प्रवेशिताः—प्रशस्तधर्मसमाजराष्ट्रपतनकारणभूताः संजाताः इति स्वामिपादैः महामण्डलेश्वरैश्च यथाक्रमं ऋग्यजुःसामादिवेदोपनि-

षदां श्रीमद्भागवतस्य च विवृतिभूतासु-अध्यात्मज्योत्स्नासु चातुर्वर्ण्यभारतसमीक्षायाञ्च प्रदर्शितम् ।

सर्वेषां वेदानां समन्वयेन यस्मिन् विषये यस्तात्पर्यार्थो निर्णीयते, तस्य विरुद्धो यदि कश्चिदर्थः कस्मिंश्चिद्वाक्ये मुख्यया वृत्त्या प्रतिभाति, तर्हि सोऽर्थस्तात्पर्यानुकूलेऽन्यस्मिन्नर्थे मुख्येतरया लक्षणादिवृत्त्या नेतव्य इति भाष्यकारैः श्रीशंकराचार्यैरन्यैश्च प्रामाणिकैराचार्यैरभ्युपगतम् । निःश्रेयससाधनत्वेन प्रत्यगभिन्नाद्वयब्रह्मज्ञान - एव वेदतात्पर्यमिति भगवत्पादैर्निर्णीतम् । आमुष्मिकश्रेयःसाधनत्वेन विविधनामभिरभिधेयस्य विविधशक्तिविभूतिभिः प्रतिभातस्य विश्वात्मनः एकस्यैव परमेश्वरस्य सद्भक्तिपूर्णायामुपासनायां, ऐहिकश्रेयःसाधनत्वेन तत्तद्गुणकर्मसु योग्यतारुच्यनुकूलं समन्वितं सर्वोदयसाधकं वेदतात्पर्यमिति स्वामिपादैश्च प्रदर्शितम् ।

सत्यस्य हितकरस्यार्थस्य प्रचाराय निर्भयता सन्नद्धता त्यागबुद्धिः सहनशक्तिश्चापेक्षिता स्यात्

अतस्तत्रत्यानां विरुद्धार्थानां मर्मोद्घाटने प्रत्याख्याने प्रतिविधौ च न केवलं श्रुतिस्मृतिपुराणानामालयत्वं करुणालयत्वं वा पर्याप्तम् । किन्तु प्रस्तुतविरुद्धार्थाचारेभ्यो जायमानेन धनसम्मानादिस्वार्थलाभेन प्रचोद्यमानैर्बुद्धिवित्तादिबलवद्भिर्धर्माधिकारिभिः स्वार्थभङ्गभीरुतया करिष्यमाणानां प्रतिकारकर्मणां प्रतिरोधलक्षणं साम्मुख्यं कर्तुं सत्यस्य हितकरस्यार्थस्य प्रचारं विधातुञ्च निर्भयता, सन्नद्धता त्यागबुद्धिः सहनशक्तिश्च पर्याप्तमात्रायां भवितुमर्हन्ति ।

निःश्रेयसविषयमात्रे कृतसंशोधनोद्यमानां भगवत्पादानामपि ततः परोक्षेणापि स्वार्थभङ्गमुत्प्रेक्षमाणैः प्रयुक्ता अभिचारादयः स्वकीयभाष्यव्याख्यानविनाशादयश्च प्रतीकाराः यदा सम्मुखीकरणीया आसन्, तदा साक्षादेव स्वार्थभङ्गहेतौ ऐहिकश्रेयोविषयकश्रुतिविरुद्धार्थप्रत्याख्याने प्रवर्तमानेषु महानुभावेषु कीदृश्यः प्रतीकारचेष्टाः न भवेयुरिति को नाम जानीयात् ? ।

यथार्थं सिंहावलोकनम्

एवं सति चतुर्वेदमन्त्राणां भागवतपुराणश्लोकानां च तात्पर्यभूतमाध्यात्मिकं सर्वोदयसाधकमर्थञ्च सायणाचार्यादिभिः प्रख्यातवेदव्याख्यातृभिरदृष्टमिमं प्रथममभिज्ञाय सरलया वाचा प्रकाशितवत्सु तद्धेतुतया तज्जन्यतया च वेदतात्पर्यग्रहणविचक्षणतायाः परां कोटिमारुह्य विराजमानेषु महेश्वरानन्दयतिवरेष्वेव ऐहिकश्रेयोविषयकश्रुतितात्पर्याविष्करणाय विरुद्धार्थप्रत्याख्यानाय च यावन्तो गुणाः, यावन्त्यः शक्तयः, यावती सामग्री चापेक्षिता, तत्सर्वं सन्निवेश्य तानेव तत्र प्रचोदितवता भगवता परमात्मना सुवर्णे सौरभ्यमुत्पादितम् ।

एवं परमात्मनाऽन्तर्यामिणाऽनुगृहीतैः प्रचोदितैश्च स्वामिपादैः महामण्डलेश्वरमहोदयैः – निःश्रेयससाधनत्वेन ज्ञानधर्माणामिव, आमुष्मिकश्रेयःसाधनत्वेनोपासनाधर्माणामिव च, ऐहिकश्रेयःसाधनत्वेन चातुर्वर्ण्यधर्माणां वेदविहितत्वाच्छ्रुतिस्मृतिपुराणादिप्रमाणवचनानां जन्मवादगुणकर्मवादैकत्रचातुर्वर्ण्यवादादौ बलाबलमुपपत्त्यनुपपत्त्यादिकं च साकल्येन संविभागेन च समीक्ष्य तात्पर्यसिद्धांश्चातुर्वर्ण्यस्यागमस्वरूपस्वभावादीन्

कालदेशाद्यनुसारेणाभ्यासप्रयोगप्रयोजनादींश्च विशेषान् संक्षेपतोऽपि समग्रतया स्पष्टतया च सहृदयसमक्षमाविष्कर्तुं त्रिचतुरसंवत्सरेभ्यः पूर्वमेव चातुर्वर्ण्यभारतसमीक्षाख्यस्य ग्रन्थस्य प्रथमः खण्डः प्रकाशितः। तेषाञ्च विशेषाणां तदनुबन्धिनामाचाराणां च वेदतात्पर्यसिद्धत्वसमर्थकानि निर्णायकानि बहूनि प्रबलप्रमाणवाक्यानि, तन्निदर्शकानि वैदिकानि पौराणिकानि चेतिवृत्तानि च तत्रैव यथापेक्षं प्रदर्शितानि द्रष्टव्यानि।

तादृशानामाचाराणां व्यवस्थानां ऐहिकश्रेयःसाधनत्वे च वैदिकानि लौकिकानि च निदर्शनानि उपपत्तयश्चोपन्यस्तानि। तादृशं वेदतात्पर्यं परित्यज्य परैः प्रणीतानां विरुद्धार्थव्याख्यानानां तदनुसारिणामाचाराणां व्यवस्थानां चाप्रामाणिकत्वमनुपपन्नत्वमनर्थहेतुत्वं च प्रबलैः प्रमाणै निदर्शनैश्चात्रैव प्रतिपादितं समीक्षाकर्तुं महामण्डलेश्वरमहानुभावस्य महेश्वरानन्दस्वामिपादस्य सर्वतोमुखं पाण्डित्यं, सर्वव्यापि विज्ञानं, सर्वार्थग्राहि विचारतैक्ष्ण्यं, विशालवीक्षणं लेखनसौष्ठवं स्वराष्ट्रसमाजधर्मगौरवसाधिकां हितचिन्ताञ्च विज्ञापयति।

तस्यैव प्रथमखण्डस्याभ्युच्चयार्थो विस्तरार्थो दृढीकरणार्थश्चायं द्वितीयखण्डः प्रकाश्यते। मुख्याश्चास्मिन्निमे विशेषाः द्रष्टव्याः। प्रथमखण्डे तावत्सिद्धान्तितस्य वेदतात्पर्यस्य स्वीकारेण प्राप्तानां श्रेयसां, तथा विपक्षे प्राप्तानामनर्थानामापदाञ्च निदर्शनानि वैदिकेभ्य. पौराणिकेभ्यश्च वृत्तान्तेभ्यो गृहीत्वोपन्यस्तानि। अस्मिंस्तु द्वितीयखण्डे लौकिकेभ्योऽर्वाचीनेभ्यश्चेतिवृत्तेभ्योऽपि गृहीतानीति दृश्यते। श्रुतितात्पर्यानुसारिणामाचाराणां श्रेयस्करत्वे तद्विरुद्धानामापत्करत्वे च प्रमाणतया समर्थ-

कृतयोपपादकतया चास्मिन् खण्डे अर्वाचीनानां प्रामाणिका-नामैहिकाभ्युदयकार्यप्रवर्तनकुशलानां महोपदेशकानां जनगणने-तृप्रमुखानां वचनान्याचाराश्च प्राचार्युर्णास्मिन् प्रदर्शिता इत्यर्वाचीनान् अभ्यस्तविद्यान् प्रत्यस्य खण्डस्य बोधजनकत्वं हृदयगमत्वं चातिशयेनोपचितं भविष्यति ।

अपि च प्रथमखण्डकृतवेदतात्पर्यप्रकाशनेन स्वेषां स्वजनानां च महतीं स्वार्थहानिमुत्पश्यद्भिः कैश्चिद्धर्मप्रवर्तकम्मन्यैः पामरप्रायेषु सद्बुद्धिविचारहीनेषु जनेषु भ्रान्ति शङ्कां च जनयितुं ये केचन निस्सारा अपि निस्सङ्कोचाः प्रश्नाः कुतर्काश्च वार्तालापप्रवचनव्याजेन प्रसारिता आसन्, तेषामप्यत्र निशितानि प्रत्याख्यानानि-अर्थतः कृतानि समुपलभ्यन्ते ।

सदभिमानप्रयोजको महान् प्रमोदावसरः

परमश्रद्धेयो यथार्थोपदेष्टा महान् योगेश्वरोऽद्वयब्रह्मनिष्ठः आचार्यप्रवरो भगवत्पाद आदिमो लोकशंकरः करुणालयः श्रीशंकरः—केवलब्रह्माद्वैतवादी, सर्वोदयवादी, गुणकर्मवादी, शुद्धिवादी, समाजराष्ट्रसंघटनवादी चासीत् अत एव तेन महताऽऽचार्येण सर्वत्र समदर्शिना सर्वोदयं साधयितुं गुणकर्मवादानुसारेणैव विंशतिकोटितोऽप्यधिकानां बौद्धानां शुद्धिं कृत्वा 'विश्वं कृणुध्वमार्यम्' इति श्रौतादेशानुसारेण तान् आर्यहिन्दुसमाजे सन्निवेश्य वैदिकं समुदारं सत्यसनातनं धर्मं ग्राहयित्वा विशालस्य भारतराष्ट्रस्य गौरवास्पदं स्तुत्यं संघटनमेकत्वसमत्वमूलकं प्राक् विहितमिति सर्वेऽपि परिष्कृतधियो विचक्षणाः विजानन्त्येव ।

भगवत्पादकालानन्तरं तच्छिष्यप्रशिष्यपरम्परायां बहवः आचार्य्याः शङ्कराचार्य्याः हंसाः परमहंसाः श्रोत्रियाः ब्रह्मनिष्ठाः पण्डिताः महापण्डिताः मण्डलेश्वराः महामण्डलेश्वराश्च भगवत्पादैः—वेदस्य महतो निःश्रेयसविभागे प्रकाशितमेव तात्पर्यं व्याचक्षाणाः विवदन्तो विवृण्वन्त आवृण्वन्तो घटयन्तो विघटयन्तो जटिलीकुर्वन्तो विपुलीकुर्वन्तः संक्षिपन्तो विक्षिपन्तश्च विशाले भारतेऽस्मिन् सर्वतो व्याप्नुवानस्य प्रत्यक्षदृष्टस्य वैदिक सनातनधर्मक्षयस्य हिन्दुसमाजराष्ट्रातिह्रासस्य विधर्मिविरोधिजनविवर्धनस्य च मूलमजानन्त एवासन्, अतस्ते तत्परिहारमकुर्वन्त एव विख्याताः बभूवुः।

बहवश्च भगवत्पादैस्तच्छिष्यैर्वाऽध्युषितेषु मठाश्रमादिस्थानेषु धनजनादिबलमवलम्ब्य कृतारोहास्सन्तः स्वकीयमाडम्बरं छत्रचामरादिलक्षणं प्रदर्शयन्तः—सर्वतः प्रसरन्तं धर्मक्षयं विधर्मिजनाभिवृद्ध्यादिकञ्च स्वार्थसाधकमनुगृह्णन्तश्च स्वात्मनि धन्यतां कृतकृत्यताञ्चाभिनिन्युः, अभिनयन्ति च।

भगवत्पादैरारब्धस्य प्रस्थानत्रयभाष्यादिना निःश्रेयसविभागमात्रे विशेषतः साधितस्यापि— ऐहिकामुष्मिकविभागयोः संक्षेपतः साधनाय प्रदर्शितस्य विशेषतः साधयितुमवशेषितस्य सर्वोदयसाधकवेदतात्पर्यप्रकाशनरूपस्य प्रशस्तस्य कर्तव्यस्य पूर्तिं कर्तुं तेष्वेकेनाप्येकाऽप्यङ्गुलि नोत्थापिता इति प्रभुताश्चर्यतया प्रत्यक्षतो दृष्टम्।

इदानीं पुनरस्मत्कालीनैरमीभिः स्वामिपादैरस्मिन् भगवत्पादैः संक्षेपतः प्रदर्शिते विशेषतयाऽवशेषिते कर्तव्यद्वये

प्रथमस्याध्यात्मज्योत्स्नाविवृतिभि र्द्वितीयस्य चातुर्वर्ण्यभारत-समीक्षाभ्यां च सप्रमाणा सोपपत्तिका धर्मसमाजराष्ट्रहितकारिणी च सम्यक्पूर्तिः सम्पादितेति महानयमस्माकं सदभिमानहेतुः प्रमोदावसरश्च ।

यथा भगवत्पादानां वेदतात्पर्यप्रकाशनप्रसारणरूपप्रशस्त-व्यवसायेन तदानींतनः कालो हिन्दुधर्मचरित्रे प्रामुख्येन प्रभविष्णुतया प्रभापूर्णतया च प्रशुशुभे । एवमस्माकमयं कालोऽपि तथाविधेनैव विद्वद्धौरेयाणां स्वामिपादानां महामण्डलेश्वरमहोदयानां व्यवसायेन स्तुत्यस्य हिन्दुधर्मस्येतिहासेष्वितिवृत्तेषु च प्रशोभमानोऽतिचिरकालपर्यन्तं आह्लादप्रयोजिकां स्मरणीयतां प्राप्स्यतीति सर्वमवदातम् ।

इति स्वामी रामेश्वरानन्दपुरी, केरलाश्रमस्थः
ऋषिकेशवासी, दीपावलीदिने - १।११।६७ ।

पारलासंन्यासाश्रमस्था दुर्गामूर्तिः कीदृशी ?

किं ब्रह्मैकमयी ? किमुत्सवमयी ? श्रेयोमयी किं किमु ।
ज्ञानानन्दमयी ? किमु प्रियमयी ? किं सर्वशोभामयी ? ॥
इत्थं किं किमिति प्रकल्पनपरैस्त्वन्मूर्तिरुद्वीक्ष्यताम् ।
किं सर्वातिगमेव दर्शयति सा ध्यानप्रसादान्महः ? ॥१॥
मोहोद्दामदवानलप्रशमने पीयूषवृष्टिसमा ।
दिव्या शम्भुप्रिया समीहितविधौ कल्पेन्द्रवल्ली सताम् ॥
संसारप्रबलान्धकारमथने मार्तण्डचण्डद्युतिः ।
गौरीमूर्तिरुपास्यतां शिवसुखा प्रौढा पिपासाऽस्ति चेत् ? ॥२॥


भूमिका—विषयसूची

चातुर्वर्ण्यभारतसमीक्षायाः

द्वितीयखण्डस्य विषयसूची

स्वानुमोदनाभिनन्दनसम्मत्यादिविषयसूची

प्रस्तुत महनीय ग्रन्थक लेखक महोदय—



दार्शनिक - सार्वभौम - विद्यावारिधि - न्यायमार्तण्ड - वेदान्तवागीश

श्रीमत्परमहंस - परिव्राजकाचार्य श्रोत्रिय ब्रह्मनिष्ठ-

श्री १००८ स्वामी श्रीमहेश्वरानन्दजी महाराज

महामण्डलेश्वर

॥ ॐ नमः शिवाय ॥

चातुर्वर्ण्य-भारत-समीक्षा

(द्वितीयखण्डः)

मंगलाचरणं, प्रास्ताविकञ्च विवेचनं किञ्चित्

(प्रणाममंगलम्)

विश्वाधारं परात्मानं, नित्यशुद्धं चिदद्वयम् ।
सत्सुखं विश्वतोऽनन्यं, श्रद्धया प्रणमाम्यहम् ॥ १ ॥

(समीक्षायाः अयं द्वितीयः खण्डः)

हिन्दुसंघटनार्थाय प्राक् समीक्षा प्रकाशिता ।
सद्भिः प्रथम-खण्डेन विद्वद्भिरभिनन्दिता ॥ २ ॥
तस्याः द्वितीय-खण्डोऽयं विविधैर्विषयैर्युतः ।
प्रकाश्यते भयं त्यक्त्वा गुणदोषदिदृक्षया ॥ ३ ॥

(तर्कसंगतवचनस्य महत्त्वम्)

यस्तर्केणानुसन्धत्ते, स धर्मं वेद नेतरः ।
प्रायच्छन् मानवेभ्यो हि महर्षिं तर्कसंज्ञकम् ॥ ४ ॥
देवा इन्द्रादयः प्रेम्णा, निरुक्ते मानवे तथा ।
वर्ण्यते तर्कमाहात्म्यं, गुणदोषसमीक्षकम् ॥ ५ ॥
पक्षपातादिदोषैर्हि निर्मुक्ता युक्तिसंगता ।
मीमांसा सद्विचाराख्या तर्कनाम्नाऽभिधीयते ॥ ६ ॥

प्राक्तनं वर्तमानञ्च, विदुषां वचनं मुदा ।
देशकालादिकं वीक्ष्य, शिक्षां चैव परिस्थितिम् ॥ ७ ॥
समाजराष्ट्रयोर्नूनं , क्षेमाभ्युदयसाधकम् ।
यत् प्रोक्तं तर्कसंयुक्तं, ग्राह्यं दोषविवर्जितम् ॥ ८ ॥
अन्यद्धेयञ्च तर्केणा-संगतं पक्षपाततः ।
प्रोक्तं स्वार्थान्धभावेन, वैषम्यजननाय च ॥ ९ ॥

(गुणदोषमयः संसारः शाश्वतकालत एव प्रवर्तमानः आसीत्)

अदृष्टं प्रगतं भूतं, प्रशंसन्ति च पण्डिताः ।
निन्दन्ति वर्तमानञ्च, तदुन्नतिपराङ्मुखाः ॥१०॥
तेषां भ्रमनिरासाय, भूतादौ समयेऽखिले ।
गुणाः दोषाश्च सर्वत्र, सन्ति चासन् सुखादिदाः ॥ ११॥
कथाः समीक्षिताः काश्च, याः भारतेतरेयगाः ।
समीक्षन्ताञ्च विद्वांसः, शुद्धधर्माभिलाषिणः ॥१२॥

(हिन्दुसमाजवृत्तान्तः)

हिन्दुसमाजवृत्तान्त- समीक्षा सम्यगीरिता ।
तस्योदयाय शास्त्राणामुपदेशाः महात्मनाम् ॥१३॥
प्रदर्शिताश्च राष्ट्रस्य, हितायापक्षपाततः ।
हिन्दुसमाजवैषम्यं , पारतन्त्र्यप्रयोजकम् ॥१४॥
अभूत्तस्य निरासाय, सघंटनविधायकम् ।
समत्वं विद्यते नूनं, हिन्दुताभावना शुभा ॥१५॥

तल्लाभाय मया चात्र, सदुपायाः प्रदर्शिताः ।
संशोधनाद्योऽभीष्टाः, जीर्णं हर्म्यादिकं यथा ॥१६॥
संशोध्यते सुदार्ढ्याय, क्रियते परिवर्तनम् ।

(हिन्दुसमाजस्य व्यवस्था संस्कृतिश्च)

तथा ह्निन्दुसमाजस्य, व्यवस्था चेष्टसाधिका ॥१७॥
ध्वंसिका स्यादनिष्टानां, यया खलु विधीयते ।
सुशिक्षितः समाजः स्यात्, बलशौर्यान्वितो महान् ॥१८॥
कृषिवाणिज्ययन्त्रादि– समुद्योगात् धनी सुखी ।
श्रमवान् धैर्यवान् स्वस्थः, प्रेमसद्भावभूषितः ॥१९॥
रामकृष्णशिवाम्बानां, महर्षीणां प्रिया शुभा ।
संस्कृतिः सद्गुणैर्युक्ता, दुर्गुणानां च नाशिका ॥२०॥
विशाले भारते देशे, विस्तृता स्यात्तथा शिवा ।
अद्वैतब्रह्मविद्या स्यात्, वेदान्तेष्वभिवर्णिता ॥२१॥

(गुणाः पूज्याः दोषाश्च सन्ति निन्द्याः)

गुणाः पूजास्थलं तद्वत्, निन्दास्थानञ्च दुर्गुणाः ।
यदा कदापि कुत्रापि स्युश्च ते यत्र तत्र हि ॥२२॥
मान्याः निन्द्याः भवन्त्येते, स्वाभाविकनयात्तथा ।
मिथ्याप्रशंसया तस्य, व्यत्ययो नहि दृश्यते ॥२३॥
अतस्समीक्षितान्यत्र, स्मार्तवाक्यानि कानिचित् ।
धिया सत्यार्थबोधाय, पक्षपातादिशून्यया ॥२४॥

दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः।
दुर्वृत्तोऽपि गुणैर्हीनो मान्यो विप्रो न तु गुणी ॥२५॥
संयमी ज्ञानयुक्तोऽपि शूद्रो मान्यः कदाचन।
काषायवस्त्रसारोऽपि यतिः पूज्यो युधिष्ठिर ! ॥२६॥
इत्याद्या उक्तयस्त्याज्याः, चान्यायत्वेन हेतुना।
तर्केणासंगतत्वेन, पक्षपातप्रयोजिकाः।
जनताद्रोहकारित्वात् शुद्धधर्मविरोधिकाः ॥२७॥
'दुःशीलोऽपि द्विजः पूज्यः' इत्यादिनाऽभिधीयते।
मन्यन्तां दुर्गुणाः सर्वे, उपेक्ष्यन्ताश्च सद्गुणाः ॥२८॥
सत्येवञ्च प्रसक्ताः स्युः, सदा सर्वत्र दुर्गुणाः।
सद्गुणाश्च परित्याज्याः, भवेयुश्च बलादिह ॥२९॥
रामं त्यक्त्वा भजेन्नूनं, रावणं ब्राह्मणं मुदा।
कोकिलाञ्चेति संत्यज्य, काकं कुत्सितमाश्रयेत् ॥३०॥
'यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः'।
इतिन्यायेन श्रेष्ठेऽस्मिन्, दुःशीलत्वादिदुर्गुणाः ॥३१॥
दृष्टाः प्रत्यक्षतः पूज्ये चानुकार्याः इतरैर्जनैः।
भूयासुः सद्गुणाः नूनमुपेक्षणीयाः न संशयः ॥३२॥
भूयाद् हिन्दुसमाजोऽयं बोधेन च बलेन च
संयुक्तस्सत्यधर्मेण, धनेन च श्रमेण च ॥३३॥
सर्वे भवन्तु बोधाढ्याः, सदाचाराः बलान्विताः।

धनाढ्याः कृषकाः यन्त्रनिपुणाः श्रमिणो मुदा ॥३४॥
अतो मयाऽत्र वैषम्यं, द्वेषेर्ष्यादिप्रयोजकम् ।
खण्डितं बाधकैस्तर्कैः, प्रेमसद्भावदृद्धये ॥३५॥

(नारीनिन्दाज्ञानाधिकारसमीक्षा)

निन्दा नराणां कुत्रापि, संस्कृते वाङ्मयेऽखिले ।
नैवोपलभ्यते नूनं, किन्तु निन्दाघृणादयः ॥३६॥
नारीणां मातृभूतानां, महतां वचनेष्वपि ।
बाहुल्येनोपलभ्यन्ते, नरलेखकदोषतः ॥३७॥
ज्ञानार्जनेऽधिकारोऽपि, तासामुत्सारितः खलु ।
मूढाः अज्ञाश्च तिष्ठेयुः सदा ताः इति कांक्षया ॥३८॥
अतः समीक्षितं ह्यत्र, वर्तमानानुसारतः ।
विदेशाभ्युदयं वीक्ष्य, स्वदेशाभ्युदयाय च ॥ ३९ ॥

(तातकूपस्य क्षारजलस्यातिजीर्णस्य परिष्कारः)

तातकूपमिमं मत्वा क्षारमम्भस्तु मन्दधीः ।
पिबत्येव मुदा नैव, तस्य संशोधनादिना ॥४०॥
मधुरस्य च नीरस्य, लाभाय यतते खलु ।
तातकूपस्य नाशाय नैवोपदिश्यते मया ॥४१॥
किन्तु तस्य परिष्कारात् खननादिप्रयत्नतः ।
जले प्राचुर्यमाधुर्ये, सम्पादयति यः सुधीः ॥४२॥
वचांसि सन्ति शास्त्राणां कानिचिच्च कथाश्च काः ।

तातकूपस्य नीरेण, क्षारेण सदृशाः खलु ॥४३॥
तासां तेषां परिष्कारो विधेयः शुद्धबुद्धिभिः ।
दोषनाशो भवेद्येन, देशस्याभ्युदयो भवेत् ॥४४॥
सनातनस्य धर्मस्य, गौरवस्य च रक्षणम् ।
आर्यहिन्दुप्रजायाः स्यात्, समत्वैकत्वसंस्थितिः ॥४५॥

(सुधियां विचारणा)

विधर्मिभिर्विदेशीयैः कथं वाऽपहृतं ? बलात् ।
स्वातन्त्र्यं प्रियदेशस्या- भीप्सितं गौरवास्पदम् ॥४६॥
के के दोषाः समायाताः ? तेषां नाशः कथं भवेत् ? ।
सम्पाद्याश्च गुणाः के के ? सुधीभिः सुविचार्यते ॥४७॥

(स्वामी विवेकानन्दः)

विवेकानन्दसंन्यासी, प्रसिद्धो जगतीतले ।
अद्वैतब्रह्मनिष्ठत्वात्, निष्पक्षोदारधीर्महान् ॥४८॥
भारताभ्युदयाकांक्षी, विश्वकल्याणभावुकः ।
वेदान्ताभिहितायाश्च, समतायाः प्रचारकः ॥४९॥
तस्य महात्मनो ह्यत्र, सत्याः हितकराः शिवाः ।
हिन्दुत्वगौरवोपेताः, उपदेशाः प्रदर्शिताः ॥५०॥

(स्वामी रामतीर्थः)

परिव्राट् रामतीर्थोऽपि, वीतरागो महानभूत् ।
निर्द्वन्द्वो निःस्पृहः शान्तो, ब्रह्मनिष्ठ उदारधीः ॥५१॥

अद्वैतब्रह्मविद्यायाः, प्रचारो येन वै कृतः ।
देशे विदेशे सर्वत्र लोककल्याणकांक्षया ॥५२॥
महात्मना च तेनापि, भारतस्य हिताय वै ।
प्रोक्ताः सदुपदेशा ये, ते चाप्यत्र प्रदर्शिताः ॥५३॥

(सद्गुणसत्कर्मभिरेव श्रेष्ठता)

सद्गुणैः कर्मभिः शुभ्रैः, श्रेष्ठता सद्भिरुच्यते ।
मिथ्याभिमानतः कस्य, श्रेष्ठत्वं नैव जायते ॥५४॥
वर्गविग्रहवैशद्यैः, प्रयोजकतया खलु ।
समानबन्धुतायाश्च, विनाशकतया किल ॥५५॥

(मिथ्याभिमानो हेयः)

मिथ्याभिमानो हेयः स्यात्, राष्ट्राभ्युदयरोधकः ।
एकतासमताशाली, सद्गुणादिसमन्वितः ॥५६॥
अभिमानः प्रशस्तः स्यात्, समाजोन्नतिसाधकः ।
उपाददतु तं प्रेम्णा, हिन्दुधर्मावलम्बिनः ॥५७॥

(गुणकर्मनिबन्धना वर्णव्यवस्था)

ब्राह्मणक्षत्रियादीनां, स्वभावप्रभवैर्गुणैः ।
विभागो हरिणा प्रोक्तो, गीतासु स्पष्टतः खलु ॥५८॥
शमादयो गुणाः प्रोक्ताः, ब्राह्मणत्वप्रयोजकाः ।
शौर्यादयो गुणाः सन्ति, क्षत्रियत्वस्य लक्षकाः ॥५९॥
एवमग्रेऽपि विज्ञेयाः, स्वभावप्रभवाः गुणाः ।

विज्ञायते जनेष्वेतैर्विभिन्ना योग्यता रुचिः ॥६०॥
गुणकर्मविहीनानां, तत्तत्संज्ञा च निष्फला ।
लोकेऽपि ज्ञायते नूनं, वाक्कील - डॉक्टरादिषु ॥६१॥
वाक्कीलगुणयुक्तस्य, तत्संज्ञा च प्रशस्यते ।
तया च तद्विहीनस्य, ह्युपहासः प्रयोज्यते ॥६२॥

(आर्यहिन्दुत्वभावना)

तनुयुः भारतीयाः वै, आर्यहिन्दुत्वभावनाः ।
संघभावैकतासिद्ध्यै, ब्रुवीरन् पूर्वजान् स्वकान् ॥६३॥
भारद्वाजवसिष्ठाद्यान्, रामकृष्णार्जुनादिकान् ।
वर्गविग्रहवादाँश्च जह्यु र्भेदविवर्धकान् ॥६४॥
लघुताहीनताभावान्, शिक्षादीक्षादिभिस्तथा ।

(ब्रह्माद्वैतभावना)

गीतोपनिषदादीनां विदध्युः पठनं शुभम् ॥६५॥
ततः प्रत्यगभिन्नस्य ब्रह्माद्वैतस्य भावनाम् ।
तन्वीरन् मानसे शुद्धे, शान्तिमोदावहां शिवाम् ॥६६॥
अनात्मभेदभावाँश्च, मिथ्याकल्पनयोत्थितान् ।
आत्मभावनया जह्युः, समभावस्य सिद्धये ॥६७॥
वेदान्तस्य पवित्रस्य निरवद्यस्य भावनाः ।
तनुयुर्व्यवहारेऽपि, समुदाराः शुभावहाः ॥६८॥

(अन्योऽन्यमानिनः सन्तु)

अन्योऽन्यमानिनः सुज्ञाः, सर्वे सन्तु विमत्सराः ।
स्वस्थाः स्वच्छाः समृद्धाश्च, सर्वे सन्त्वकुतोभयाः ॥६९॥
राष्ट्रस्योन्नायकाः वीराः, विश्वकल्याणभावुकाः ।
स्वधर्मशालिनो दक्षाः, सर्वे सन्त्वभयङ्कराः ॥७०॥
अधःपातपराकाष्ठां, प्राप्तस्यास्य समुन्नतेः ।
कालोऽयमागतो जीयाद्, हिन्दुराष्ट्रमिदं पुनः ॥७१॥

(विविधा समीक्षा)

काश्मीराधिपराजस्य पाकिस्तानस्य वै तथा ।
वृत्तान्तो निर्मितिश्चैव, कीदृशाऽस्तीति वर्णितम् ॥७२॥
शूद्रशब्दस्य गर्ह्यस्य वाग्मिवीरवल्लस्य च ।
गीतादिवचनानाञ्च, समीक्षा ह्यत्र दर्शिता ॥७३॥

(विकासः परिवर्तनम्)

शिक्षणे राज्यतन्त्रे च शब्दे चाणौ च विद्युति ।
शस्त्रादौ च विमानादौ, विकासः परिवर्तनम् ॥७४॥
विलोक्यते यथा नूनं, समाजेऽपि तथेष्यते ।
कालस्य च विदेशस्य, प्रभावस्यानुसारतः ॥७५॥
पुराकाले शिखावन्तो, हिन्दवः श्मश्रुसंयुताः ।
प्रायोऽधुना विलोक्यन्ते, ताभ्यां हीनास्तथापि ते ॥७६॥
रामकृष्णादिनामभिर्विज्ञाताः हिन्दवः खलु ।

इत्येवं तच्छरीरेषु, परिवर्तनमीक्षितम् ॥७७॥
वेषभूषादयस्तेषां, समत्वं बोधयन्ति ते ।
इति तेषु पुरा दृष्टं वैषम्यञ्च विनिर्गतम् ॥७८॥

(वोटयुगो वेदान्तश्च)

राजयुगः समाप्तोऽभूत्, वोटयुगः समागतः ।
समत्वं ज्ञाप्यते तेन, वैषम्यं विनिवार्यते ॥७६॥
अद्वैतब्रह्मबोधस्य, वेदान्तोऽस्ति समर्पकः ।
सनातनार्यधर्मस्य, ह्यौदार्यं ज्ञापयत्ययम् ॥८०॥
भयस्य द्वैतभावोऽस्ति दुःखस्यापि प्रयोजकः ।
अर्थादद्वैतभावेन, भयादिकं निवर्तते ॥८१॥
समाजे समभावस्य, स्थापनाय महानयम् ।
वैषम्यस्य च नाशाय, वेदान्तो विजयी भवेत् ॥८२॥

(प्राक्कालिको हिन्दुसमाजः)

पुरा हिन्दुसमाजोऽयं, विस्तृतः कीदृशो महान् ।
आसीद्विलोक्यतां तावद्, यवनानां स्थलेष्वपि ॥८३॥
आर्यत्वभावना मुख्या, तत्रासीत् संघशक्तिदा ।
गुणादिबोधकास्तत्र, ब्राह्मणत्वाद्युपाधयः ॥८४॥
योग्यतायाः रुचेश्चैव, प्रतिरोधः कदाचन ।
नैवासीत् पक्षपातादि - दुर्गुणाश्चेष्टनाशकाः ॥८५॥

(समानबन्धुतातिरस्कारः)

यदा कार्पण्यवैषम्ये, तत्राभूतां तदा ह्ययम् ।
क्षीणोऽभूच्च प्रियो देशः, आर्याः धर्मान्तरं गताः ॥८६॥
पाकिस्तानस्य निर्माण- मधुना प्रविलोक्यते ।
स्वधर्मपरिहानस्य, विधर्मस्वीकृतेस्तथा ॥८७॥
समानबन्धुतायाश्च, तिरस्कारस्य तस्य तत् ।
प्रत्यक्षं कुफलं भुक्त - मार्यावर्तनिवासिभिः ॥८८॥

(परिवर्तनम्)

सर्वे भावाः क्षणध्वंस-शीलाः दृष्टाः समन्ततः ।
परिवर्तिनि संसारे, स्थिरं किञ्चिन्न लोक्यते ॥८६॥
इति न्यायेन सर्वत्र, दृश्यते परिवर्तनम् ।
देशविदेशकालानां, लोकानां विविधात्मनाम् ॥६०॥
उच्चारस्य विचारस्य, चाचारस्यानिवार्यतः ।
परिवर्तितसंस्काराः, शिक्षायाः संगतेस्तथा ॥६१॥
निविशन्ति बलान्नूनं, प्राक्तनान् वारयन्ति तान् ।

(पुराणनवयोः समन्वयः)

अतो महाशयाः शिष्टाः, पुराणनवयोः किल ॥६२॥
सर्वोदयप्रदं स्तुत्यं, साधयन्ति समन्वयम् ।
महता कालिदासेन, कविना कथितं त्विदम् ॥६३॥
पुराणं निखिलं साधु, चावद्यं निखिलं नवम् ।

मन्तव्यं नैव, तच्चेदं, समीक्ष्येतां विवेकतः ॥६४॥
परीक्ष्यान्यतरद् ग्राह्य – मभीष्टं प्रददाति यत् ।
राष्ट्रसमाजयोर्नून – मनिष्टं द्यति कष्टदम् ॥६५॥
परप्रत्ययतो नेया, मूढा बुद्धिः प्रयत्नतः ।
हेया किन्तु समादेया, प्रशस्ता प्रतिभाऽन्विता ॥६६॥
समानबन्धुताऽऽदर्शा, सर्वोदयस्य सिद्धिदा ।
श्रीरामस्य च कृष्णस्य, संस्कृतिमनुगामिनी ॥६७॥
सर्वनाशे समुत्पन्ने, ह्यर्धं त्यजति पण्डितः ।
इति न्यायेन दोषाणां, गुणानाञ्च समीक्षया ॥६८॥
दोषाश्च प्राक्तनास्त्याज्याः चोपदेयाः गुणाः शुभाः ।
अभिनवास्तथा सन्तु, विवेकोऽस्ति महानिधिः ॥६९॥

(कलिवर्णनसमीक्षा)

श्रुत्वा पौराणिकं तच्च, कलिवर्णनमद्भुतम् ।
वर्तमानोदये नूनं, निराशा जायते खलु ॥१००॥
युगस्यास्य च दुष्टत्वात् ह्युन्नतिः का भविष्यति ? ।
भाग्यवादो बलात्तेषां विमुखानां प्रयत्नतः ॥१०१॥
कलिप्रहार—संजात-विक्षेपानां भवेत्खलु ।
दुर्भाग्यं निखिलं तद्धि, भारते कलिना किल ॥१०२॥
दारिद्र्यादिमहानर्थ-प्रापकं कुत्सितं त्विह ।
भोक्तव्यं मौनभावेन, विरोधं कः करिष्यति ? ॥१०३॥

नान्यत्र तस्य दुष्टत्वं, भारतं प्रविहाय वै ।
कलिं यो मन्यते तत्र, प्रहारं वितनोति सः ॥१०४॥
भवदीयो भवन्तश्च, श्वान आक्रमते बलात् ।
परत्राक्रमणं तस्य, नैवास्तीति महाद्भुतम् ॥१०५॥
कलिं ये नैव जानन्ति, युरोपामरिकादिगाः ।
तेषामभ्युदये नैव, प्रतिरोधं करोति सः ॥१०६॥

तत्र गावो महाकायाः दुहन्ति प्रचुरं पयः ।
विद्यन्ते भारते गावः, क्षीणकाया ह्यजैः समाः ॥१०७॥
दुग्धं दुहन्ति चात्यल्पं, कलिदौष्ट्यप्रहारतः ।
तासां नातो विकासाय, प्रयतन्ते कदाचन ॥१०८॥

कलिभीत्याऽतिदौर्बल्य-हृदयाः भारताः जनाः ।
इत्यादिकलिदुष्टत्वं प्राहुः पौराणिकाः किल ॥१०९॥

यददृष्टं गतं भूतं, प्रशसन्ति कृतं युगम् ।
तत्रापि विविधाः दुष्टाः, आचाराश्च प्रदर्शिताः ॥११०॥
ऋग्वेदे पापदारिद्र्ये, कुत्सिते स्पष्टशब्दतः ।
तेन तस्य प्रशंसा च कलिनिन्दा च खण्डिता ॥१११॥

दुर्भिक्षं कलिमाहात्म्यात्, भूयोभूयः प्रजायते ।
भारते धर्मबोधाढ्ये, देशेऽस्मिन् पावने शुभे ॥११२॥
अमरीकादिदेशेषु, खाद्यान्नानामसीमतो ।
तेभ्योऽयं याचते खाद्यं, बुभुक्षितो नु रङ्कवत् ॥११३॥

कथं जातं हि वैषम्यं ? इति प्रश्नस्य ह्युत्तरम् ।
ज्ञानादिशक्तियुक्तास्ते, दुर्बलाः किङ्कराः हीमे ॥११४॥
समानबन्धुताऽऽदर्शाः, संयुक्तास्ते परस्परम् ।
छिन्नाः भिन्ना इमे सन्ति, चाप्रज्ञाः भ्रान्तदर्शनाः॥११५॥
कलिभ्रान्तिं विहायातो जुषन्तां तद्गुणान् शुभान् ।
यथार्थदर्शनाः सन्तो, नीरक्षीरविवेकिनः ॥११६॥

(वाणीविचारयोः स्वातन्त्र्यम्)

वाणीविचारयोर्वीक्ष्य, लोकतन्त्रात्मके युगे ।
अत्र तत्र च सर्वत्र स्वातन्त्र्यं लोकसम्मतम् ॥११७॥
मीमांसान्यायसांख्यादौ, दर्शनेऽपि तथा मतम् ।
विभिन्नैर्मतवादैश्च, ह्याचार्याणां समर्थितम् ॥११८॥
ब्रह्मक्षत्रसमाजादि-वादाः ह्यत्र प्रदर्शिताः ।
भवन्तु हिन्दवो नून-मार्याः गौरवशालिनः ॥११९॥
लघुताहीनताभावाः चापसर्पन्तु सर्वतः ।

(विधर्माणः कथयन्ति)

हिन्दूनां धर्मशास्त्रेषु, वैषम्यमस्ति गर्हितम् ॥१२०॥
अस्माकं धर्मशास्त्रेषु, साम्यं स्तुत्यं विलोक्यताम् ।
विधर्माणो विदेशस्थाः, प्राहुश्चेति प्रचारकाः ॥१२१॥
वर्णानामधमाः निन्द्याः चोत्तमत्वाभिकांक्षया ।
अस्मत्संघेऽत आयान्ति, हिन्दुजातिं विहाय च ॥१२२॥

प्रतिरोद्धुं मुखं तेषां, हिन्दुह्रासं तथैव च ।
सर्वगौरवलाभार्थं, प्रयत्नोऽकारि वै मुदा ॥१२३॥

(सनातनार्यधर्मस्य प्रशस्तमौदार्यम्)

सनातनार्यधर्मस्य प्रौदार्यं साम्यभूषितम् ।
रामानन्दादिभिर्नूनं, सद्भिः शिष्टैः प्रदर्शितम् ॥१२४॥

(अन्येषां महानुभावानां सम्मतिः)

गान्धिना राष्ट्रपित्रा च, मान्येन तिलकेन च ।
प्राज्ञश्रीमालवीयेन, विनोबादिभिरेव च ॥१२५॥
यत्प्रोक्तं हिन्दुजातीनां, समत्वं संघशक्तिदम् ।
तस्य प्रदर्शनार्थाय, यत्किञ्चिच्चात्र भाषितम् ॥१२६॥
गुरुगोविन्दसिंहस्य, क्षत्रियप्रवरस्य च ।
सम्मतिर्जैनबौद्धाना-मन्यत्यानां प्रदर्शिता ॥१२७॥
बहूनामनुग्रहो न्याय्यः समाजराष्ट्ररक्षकः ।
महर्षिश्रीदयानन्दो, दम्भपाखण्डमर्दकः ॥१२८॥
वेदधर्मप्रचाराय, मर्दनाय विधर्मणाम् ।
आर्याणां संघशक्त्यर्थं, प्रयासो येन वै कृतः ॥१२९॥
तस्य महानुभावस्य, सम्मतिश्चास्ति कृष्णवत् ।
गुणकर्मानुसारेण, चातुर्वर्ण्यव्यवस्थितिः ॥१३०॥

(विकृताः संस्कृताः कार्याः)

अधमाश्चोत्तमाः, कार्याः, अनार्याश्चार्यभावगाः ।

संस्कारश्चैव शुद्धिश्च, योक्तव्या विकृते जने ॥१३१॥
विधर्मिणि विदेशीये, तञ्च तां विनियोजयेत् ।
इत्येवं भगवान् वेदः प्रबोधयति सादरम् ॥१३२॥

(बोधबलादिवीर्यानुसारिणी व्यवस्था)

बलबोधादिवीर्याणामनुसारेण संस्थितिः ।
वर्णानां ब्राह्मणादीनां मन्तव्या संघशक्तिदा ॥१३३ ॥
इत्येवं वदति स्मार्तं, न्याय्यं मार्गं सुशोभनम् ।
योग्यतायाः रुचेश्चैव, समादरो विधीयताम् ॥१३४॥

(आद्यशंकराचार्यस्येतिहासः)

आचार्यैः शंकराद्यैश्च, बौद्धानां वेदविद्विषाम् ।
शुद्धिं कृत्वा कृता आर्याः, वेदधर्मानुयायिनः ॥१३५॥
तेषां महानुभावाना -मितिहासो विलोक्यताम् ।

(स्वदेशीयेभ्यो विधर्मिभ्यः स्वधर्मत्वं संस्थापनीयम्)

अधुना भारते देशे, विकृताः यवनादयः ॥१३६॥
कोटिशश्चोपलभ्यन्ते हिन्दुधर्मविरोधिनः ।
ते पुरा हिन्दवश्चासन्, रामकृष्णानुयायिनः ॥१३७॥
मेनिरे प्रणवं गंगां गीताञ्च लोकशंकरीम् ।
प्रबलैर्यवनैर्दुष्टैः, विकृताः विहिताः बलात् ॥१३८॥

तेषां संस्कारशुद्ध्यर्थं प्रयत्नश्च विधीयताम् ।
सांप्रतं वर्तमानैस्तैः आद्याचार्यानुयायिभिः ॥१३९॥
अतीतं पूर्वजार्यत्वं स्मारणीयं पुनः पुनः ।
भारतीयविधर्मिभ्यश्चात्रत्यैः संप्रचारकैः ॥१४०॥
भवतां स्पन्दते रक्तं, नाडीषु हैन्दवं शुभम् ।
विधर्मित्वमतस्त्यक्त्वाऽऽर्यधर्मोऽभ्युपगम्यताम्॥ १४१॥
बलाद्यैर्विहितं दुष्टैः, स्वधर्मपरिवर्तनम् ।
पूर्वजानां स्वकीयानां क्रियतामृणशोधनम् ॥१४२॥
अस्य पावनदेशस्य मृत्तिकातो विनिर्मिताः ।
वर्धिताः पालिताः कायाः संस्कृतिः एषु धार्यताम्॥१४३॥
जयनादोऽस्य देशस्य भवद्भिस्तन्यतां शुभः ।
देवे भक्तिश्च रामादौ, तीर्थे गंगादिकेऽपिच ॥१४४॥
स्वदेशेऽत्र प्रसूतायाः, गीतायाः पठनं मुदा ।
क्रियतां धार्यतां तस्या-श्चोपदेशः शिवप्रदः ॥१४५॥
हिन्दुभिः संप्रसूतत्वात् हिन्दुवंश्याः न संशयः ।
हिन्दुपुत्रतया यूयं हिन्दवः स्थेति ज्ञायताम् ॥१४६॥
हिन्दुस्थाननिवासित्वा-दहिन्दुत्वं निषेध्यताम् ।
हिन्दीभाषा भवद्भिश्च पठ्यतामैक्यसिद्धये ॥१४७॥

(विविधाः मतभेदाः आसन् सन्ति च)

विहाय पक्षपातादिं, गुणदोषविचक्षणैः ।
सद्भिर्द्वितीयखण्डोऽयं समीक्षायाः समीक्ष्यताम् ॥१४८॥

अत्र ये विविधाः पन्थाः, वर्णिताः रुचिभेदतः ।
अभिप्रेताः न चेद्ये स्युः, खण्ड्यतां युक्तिभिर्मुदा ॥१४९॥
अनादिकालतो नूनं मतभेदाः विदुषामपि ।
आसन् प्रवर्तमानाश्च, प्रकृतेर्नियमादिह ॥१५०॥
सुधीभिस्तान्निरीक्ष्यातो, विद्वेषो न विधीयताम् ।
कार्या चालोचना तेषां, हेयोपादेयहेतवे ॥१५१॥

(सद्गुणानां सत्कर्मणाञ्च श्रेष्ठता)

धन्याः मान्याश्च पूज्याश्च त एवालंकृतिर्भुवः ।
भवभोगविरक्ता येऽनुरक्ताश्चन्द्रशेखरे ॥१५२॥
इति न्यायेन लोकास्तान् शमादिगुणसंयुतान् ।
विप्रान् श्रेष्ठतयाऽन्यांश्च मन्वते च स्तुवन्ति च ॥१५३॥
विद्यादिगुणहीनान् तान्, नाममात्रधरान न हि ।
एवं लोकप्रवृत्त्याऽपि, श्रेष्ठत्वं गुणकर्मणोः ॥१५४॥
ज्ञायते तद्विहीने तु, दोषाढ्ये मानवे नहि ।
अतो मया वचस्तत्तु, मानवं प्रसमीक्षितम् ॥१५५॥
श्रेष्ठता सा समालोच्या, योजयेदधमादिकम् ।
अन्यत्र द्वेषवैरादि, हन्याच्च समतां शुभाम् ॥१५६॥
अतस्समत्वसिद्ध्यर्थं, स्मार्तवाक्यानि कानिचित् ।
समीक्षितानि लोकानां, शुद्धधर्माभिलाषिणाम् ॥१५७॥
मनःसन्तोषसिद्ध्यर्थं, पक्षपातादिकं न हि ।
पावने शोभने धर्मे, समब्रह्मप्रबोधके ॥१५८॥

दृष्टं यत्र च कुत्रापि, स्वार्थान्धताप्रयोजितम् ।
मन्वते तत्तु हातव्यं, खण्डनीयं प्रयत्नतः ॥१५९॥
अधुना देशनेतारः, शिक्षिताः मन्वते परम् ।
समानबन्धुताऽऽदर्शं, सर्वाभ्युदयसाधकम् ॥१६०॥
वैषम्यं कुत्सितं हेयं, स्तुत्यं साम्यमभीप्सितम् ।
उपादेयं जनाः सर्वे मन्वते वैदिकञ्च तत् ॥१६१॥

(मृषावाद उपहासप्रयोजको भवति)

श्रेष्ठत्वस्य प्रभावस्य साधनाय मृषा च यत् ।
कथितं ह्युपहासस्य, केनाऽपि स्यात् प्रयोजकम् ॥१६२॥

(श्रीनारायणगुरुस्वामी)

अद्वैतब्रह्मनिष्ठत्वात्, कृपालुः समुदारधीः ।
नारायणगुरुस्वामी, केरलीयो महान् यतिः ॥१६३॥
येन केरलवास्तव्य - हिन्दूनां रक्षणं कृतम् ।
समत्वैकत्वबोधेन, जातौ धर्मे तथेश्वरे ॥१६४॥

(ब्रह्मक्षत्रसमाजः)

ब्रह्मक्षत्रसमाजस्य, निर्माणाख्यं मतं शुभम् ।
केनचिद्विदुषा प्रोक्तं, तस्याप्यत्र प्रदर्शनम् ॥१६५॥
कृतं हिन्दुसमाजेऽत्र, स्थापनीयं प्रयत्नतः ।
विदितं च समत्वं य-च्चान्यतः श्रुतिवाक्यतः ॥१६६॥

(वयं श्रेष्ठाः, अधमाश्चेमे)

वयं श्रेष्ठाः महामान्याः, शूद्राः नीचाः इमेऽधमाः ।
ॐकारोच्चारणे तेषा-मधिकारो न वर्तते ॥१६७॥
वेदमन्त्रैश्च यज्ञादि-क्रियाः कर्तुं न योग्यता ।
अस्माकं चोत्तमानां सोऽधिकारो रक्षितः खलु ॥१६८॥
महादेवस्य लिङ्गस्य, प्रतिष्ठा शूद्रतः कृता ।
यदि स्यात्तर्हि मन्तव्या, शंकरस्यापि शूद्रता ॥१६९॥
अत एवोत्तमैः पूज्यैः, शूद्रः शम्भुर्न मन्यते ।
अर्च्यते नैव सः प्रेम्णा, नमः आदिर्न चार्प्यते ॥१७०॥
द्रव्यं स्यादर्पितं शूद्रात्, प्रेम्णा ग्राह्यं भवेच्च तत् ।
तत्र शूद्रत्वमस्माभिश्चोत्तमैर्नैव मन्यते ॥१७१॥
रक्षा स्वार्थस्य यत्र स्यात्, क्रियतां तत्र चादरः ।
यत्र तस्य विघातःस्यात्, तिरस्कारो विधीयताम्॥१७२॥
स्वोत्तमत्वस्य रक्षायै, वैषम्यं चोपदिश्यते ।
अन्यत्राधमतायाश्च, सुरक्षापि विधीयते ॥१७३॥
उत्तमाधमवैषम्यं, जन्मजातिनिबन्धनम् ।
स्वार्थस्य रक्षकं ग्राह्यं, घृणागर्वादिपोषकम् ॥१७४॥
भगवत्कृष्णतः प्रोक्तं, गुणकर्मनिबन्धनम् ।
वैषम्यं तत्तु हेयं स्यात्, स्वार्थविध्वंसकत्वतः ॥१७५॥
रक्षणं स्वार्थतायाश्च, धर्मो ज्ञेयः सनातनः ।
स्वोत्तमत्वस्य रक्षापि, धर्म्या न्याय्या भवेत्खलु ॥१७६॥

(तपस्विनः शूद्रस्य शिरोच्छेदः)

अत एव च शूद्रस्य, गुणिनश्च तपस्विनः ।
शिरच्छेदस्य धर्मत्वं बोधितं स्वार्थकामिभिः ॥१७७॥
मान्यता तद्गुणैः तस्या-धमस्य स्याज्जनार्पिता ।
स्वोत्तमस्य तस्याःस्यात् क्षीणता स्वार्थध्वंसिका ॥१७८॥
स्वार्थं एव परो धर्मो रक्ष्यः सर्वप्रकारतः ।
मान्यता रक्षिता स्याद्यैर्वचनानि धर्मरूपतः ॥१७९॥
शास्त्रप्रक्षेपणार्थाय, विविधानि प्रणीयते ।
तेषां कथनमात्रेण, स्वोत्तमत्वं प्रसाध्यते ।
धीमत्त्वं श्लाघनीयं तत् द्रष्टव्यं स्वार्थरक्षकम् ॥१८०॥

(आचार्यत्वसमीक्षा)

आचार्यत्वस्य रक्षापि वचनेन विधीयते ।
अस्माकं रक्षिता सा स्यात्, प्रभवेन्नान्यगामिनी ॥१८१॥
प्रसक्तिर्यदि चान्यत्र, तस्य स्यात् धर्मध्वंसिका ।
अधर्मस्य परा काष्ठा, स्वोत्तमत्वविनाशिका ॥१८२॥
'अपूज्याः यत्र पूज्यन्ते', इत्यादिवचनैः खलु ।
भयानां वर्णनं धर्म-भीरुभ्यः क्रियते च तैः ॥१८३॥
स्वाधिकारस्य विध्वंसो नैव स्यादिति काम्यया ।
परेषामधिकारेषु, नः प्रवेशो भवेन्मुदा ॥१८४॥
वाणिज्यादिषु तेन स्यात्, स्वार्थधर्मस्य रक्षणम् ।
अन्येषां स्वाधिकारेषु, चोपदेशकृतादिषु ॥१८५॥

प्रवेशो वर्जनीयः स्यात्, धीमत्त्वं नः प्रशस्तिदम् ।

(मदीयं मदीयमेव, त्वदीयमपि मदीयम्)

मदीयं तु मदीयं स्यात्, नान्यदीयं भवेत्खलु ॥१८६॥
अन्यदीयं मदीयं चेत्, स्यात्तदा नास्ति कल्मषम् ।
मदीयस्यान्यदीयत्वे, कल्मषं प्रभवेत्खलु ॥१८७॥
इत्येवं धर्मवैषम्यं, रच्यते तैः प्रयत्नतः ।
रचयित्वा च कथ्यन्ते, वचनानि तादृशानि तैः ॥१८८॥

(हिन्दुसमाजरक्षणम्)

हिन्दुजातिसुरक्षायै, बुधैर्निष्पक्षपातिभिः ।
वैषम्यं तादृशं त्यक्त्वा, साम्यंस्तुत्यं प्रबोध्यते ॥१८९॥
औदार्यं वेदधर्मस्य वेदान्तस्याभिधीयते ।
शिक्षादीनां परावृत्त्या, देशकालानुसारतः ॥१९०॥
रक्षणं स्वसमाजस्य, प्रधानं वीक्ष्य तैर्बुधैः ।
अन्यधर्मनिरोधाय, शोधनन्तु विधीयते ॥१९१॥
प्रेमसद्भावबन्धुत्व - स्थापनायाभिधीयते ।
द्वेषादीनां निरासाय, विप्रक्षत्रादिके त्विदम् ॥१९२॥
अतोऽन्यथा न मन्तव्यं, सुज्ञैः समाजरक्षकैः ।
भारते स्वसमाजस्य, रक्षा कार्या प्रयत्नतः ॥१९३॥
तदर्थाय च तत्सर्वं लिखितं लिख्यते मया ।
हिन्दुसंस्कृतिरक्षापि येन स्यात् संघशक्तिदा ॥१९४॥

(संघशक्तिलाभः)

संघशक्तेश्च लाभाय, श्रेष्ठत्वादेः समीक्षणम् ।
कृतं यच्च तु द्रष्टव्यं, विद्वद्भिः शान्तमानसैः ॥१९५॥
शुद्धो भावोऽत्र विज्ञेयः समदर्शित्वसाधकः ।
हितकृत् स्वसमाजस्य यशकृद्धर्मराष्ट्रयोः ॥१९६॥
वैषम्यदर्शनान्नूनं, संजाताऽधोगतिर्यतः ।
समत्वदर्शनादूर्ध्वा गतिः संपाद्यते ह्यतः ॥१९७॥

(आत्मौपम्येन समाजदर्शनम्)

आत्मौपम्येन सर्वोऽयं, समाजः प्रसमीक्ष्यताम् ।
इष्टाऽनिष्टौ समौ भावौ, विज्ञेयौ च विवेकतः ॥१९८॥
गीतायां कृष्णचन्द्रेण, महता भगवता त्विदम् ।
धार्यतां यच्छुभं प्रोक्तं, प्रचारस्तस्य तन्यताम् ॥१९९॥
याद्दशोऽपेक्ष्यते भावो, भवद्भिः स्वात्मनां शुभः ।
ताद्दशोऽपेक्ष्यतां नैव. चाशुभोऽन्यत्र कर्हिचित् ॥२००॥
गीताग्रन्थो महान् ज्ञेयो, भारताभ्युदयप्रदः ।
विश्वाचार्येण कृष्णेन, प्रोक्तः सर्वसुखः शिवः ॥२०१॥
गीतायाः समभावस्य, धारको यः प्रचारकः ।
धीरो योगी महान् ज्ञेयो, भगवत्कृपासमन्वितः ॥२०२॥

(समाजस्य मुख्यमेकत्वम्)

देहतुल्यः समाजोऽस्ति, ब्रह्माण्डाख्यो विराडिव ।
ब्रह्मक्षत्रादयस्सन्ति, मुखबाह्वादिलक्षणाः ॥२०३॥

देहेऽस्मिन् लोक्यते नूनं, मुखादीनामभिन्नता ।
नैव विच्छिन्नता क्वापि, पार्थक्यं नैव गम्यते ॥२०४॥
उपकारस्य च कर्तृत्वं, मिथस्तेषु विलोक्यते ।
एकत्रैव स्थितिस्तेषां, तुल्यः प्रेमाऽस्ति सर्वतः ॥२०५॥
पादे स्नेहो यथा दृष्टो, मुखादौ च तथा समः ।
पादे कण्टकवेधेन, पादो रोदिति नैव सः ॥२०६॥
पीडया क्रियते तेन, चाक्रोशश्च तथा नहि ।
तत्कालं रुदितो नेत्रे, मुखं चाक्रोशते परम् ॥२०७॥
इत्येवं व्यवहारेण, तेषामैक्यं प्रगम्यते ।
तथा हिन्दुसमाजोऽयं, श्रुत्या तेनोपमीयते ॥२०८॥
एकत्वस्य च मुख्यस्य, समस्नेहस्य सिद्धये ।
भिन्नकार्यकरत्वादि-गम्ये भेदे च सत्यपि ॥२०९॥
अधुना लोक्यते नूनं, समाजेऽत्र विभिन्नता ।
मिथः स्नेहादिराहित्यं, स्वार्थान्ध्यं पक्षपातता ॥२१०॥
वेदादेशतिरस्कारात् , समाजोऽधोगतिं गतः ।
भिन्नोऽहं सर्वथा तेभ्यो, बाह्वादिभ्यो मुखस्तथा ॥२११॥
वयं बाह्वादयो भिन्नास्तस्मादित्थं वदन्ति ते ।
विच्छिन्नत्वाच्च भिन्नत्वात् , प्रेमसद्भावशून्यता ।
तस्मिन् विलोकिता नूनं, दौर्भाग्यस्य परम्परा ॥२१२॥
यद्गतं तद्गतं नूनं वर्तमानः सुधार्यताम् ।
वेदादेशानुसारेण, मुख्यमैक्यं विलोक्यताम् ॥२१३॥

(सत्यस्य परिरक्षणं यशोविस्तारश्च)

हितं यच्चे च सर्वेषां, सा सत्योक्तिः सदा शिवा ।
परिपाति च वक्तारं, यथार्थपरिदर्शिनम् ॥२१४॥
सत्यस्यास्ति प्रशस्तं तत् यशः सर्वत्र विस्तृतम् ।
श्रूयते बधिरेणापि, किमुतान्येन सौख्यकृत् ॥२१५॥ B

(उपसंहारः)

स्वामिना मण्डलेशेन, प्रास्ताविकं विवेचनम् ।
लिखितं शुद्धबोधाय, किञ्चिदेतन्मया मुदा ॥२१६॥

B 'सा मा सत्योक्तिः परिपातु विश्वतः' (ऋ० १०।३७।२) 'ऋतस्य श्लोको बधिरा ततर्द' (ऋ० ४।२३।८) इति। अय-मर्थ :—'सत्यं भूतहितं प्रोक्तमि' ति न्यायेन सर्वजनहितलक्षणं यथार्थभाषणलेखनाद्यात्मकं सत्यं, तस्योक्तिः =कथनं, विश्वतः =सर्वतः - विद्वेषिजनेभ्यो मां=वक्तारं लेखकं परिपातु=परि-रक्षतु । ऋतस्य=सत्यस्य निरवद्यस्य श्लोकः=प्रशस्तं यशः - निर्भयत्वयथार्थदर्शित्वभाषित्वादिसद्गुणप्रयोजितं, बधिरा= बधिरौ - पक्षपातदुःखार्थहठाग्रहमिथ्याभिनिवेशादिना दुर्गुणेन प्रतिरुद्धौ - अतिदुर्भेदौ कर्णौ ततर्द=तर्दति - तद्दोषजातं हत्वा तस्य हृदयान्तः प्रविशतीत्यर्थः ।

वैदिकसनातनार्यधर्मस्य स्तुत्यमौदार्यम्

भारतीये वैदिकार्यसंस्कृतिलक्षणे सनातनधर्मे सर्वत्र विमलमद्वैतवेदान्तदर्शनमेव शिष्टैर्विद्वद्भिरवलोक्यते। तत्राद्वैत-भावस्य सर्वत्र विप्रसृतां दिव्यामाह्लादकरीं सुगन्धिमेवानुभवन्ति विज्ञाः। हिन्दुस्थानस्य पावनभारतवर्षस्योत्तरस्यां दिशि यथा गौरीशंकरः शृङ्गः सर्वोन्नतस्थानेऽवस्थितः सन् प्रतीयते, तथा भारतीयार्यसंस्कृतेः पृष्ठस्थाने सर्वोच्चरूपेण भव्यमद्वैतवेदान्तदर्शनमेवावभाति प्रज्ञाजुषाम्। अत एव कैलासगिरिवरशिखरे स्थित्वा ज्ञानमय आनन्दमयो जगद्गुरुर्भगवान् श्रीशङ्करो महादेवोऽनादिकालतोऽद्वैतगर्जनालक्षणं डमरूं वादयन् वर्तते।

यथा शिवस्य समीपे महनीया शक्तिः उमा भगवती पार्वती विराजते; यथा च प्रशस्तस्य सत्यस्य सविधे सामर्थ्यमवतिष्ठते; यथा च निर्मलस्य प्रेम्णः पार्श्वे पराक्रमस्तिष्ठति। एवमद्वैतभावस्य समीपे निर्भयता। अतो 'द्वितीयाद्वै भयं भवति' (बृ१।४।२) इति श्रुत्याऽर्थतोऽद्वैतादेवात्माभेदभावादेव निर्भयता सम्पद्यते इति विज्ञाप्यते। अतो वैदिकाद्वैतभावस्य प्रसार एव संसारेऽस्मिन् विशुद्धसुखसागरस्य निर्माणं कर्तुं शक्नोति, अन्यथा द्वैतभावस्य विषमस्य प्राबल्याद् दुःखसागर एव सर्वत्र सृष्टः स्यात्।

अतोऽस्मत्पूर्वजाः पूज्याः भारतीया महर्षयस्तस्यैतस्याद्वैतभावाख्यस्य महतो दिव्यस्य वस्तुनोऽखण्डशान्तिसुखागारस्य यथार्थतोऽवलोकनमकार्षुः, अत एव तैः स्वकीयसमुदार प्रशस्तस्वभावात् विश्वकल्याणाय विश्वेभ्यो मानवेभ्योऽद्वैत-

वेदान्तमन्त्रस्य 'सर्वं खल्विदं ब्रह्म' (छां० ३।१४।१) 'अहं ब्रह्मास्मि' (बृ० १।४।१०) इत्याद्यात्मकस्य दानं प्रशस्तं विहितम् ।

एतन्मन्त्रसदृशः पवित्रोऽन्यः कश्चन मन्त्रो जगतीतले नहि विद्यते । अतो भगवता श्रीकृष्णचन्द्रेणाप्यभिहितमद्वैत-ब्रह्मविद्यासु गीतासु—'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।' (गी० ४।६८) इति । ज्ञानेनार्थात्-अद्वैतज्ञानेन। वर्णितञ्च तत्— 'यो मां पश्यति सर्वत्र, सर्वञ्च मयि पश्यति ।' (गी. ६।३०) 'ज्ञानवान् मां प्रपद्यते, वासुदेवः सर्वमिति ।' (गी० ७।१९) इत्यादिना ।

अत एवातिधन्याः स्वतःप्रमाणा भगवत्यः श्रुतयोऽप्याहुः 'यस्मिन् सर्वाणि भूतानि, आत्मैवाभूद् विजानतः । तत्र को मोहः कः शोकः? एकत्वमनुपश्यतः ॥' (शु० य० ३१-७) 'आत्मानं चेद् विजानीयात्, अयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय, शरीरमनुसंज्वरेत् ॥'—(बृ० उ० ४।४।१२) 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत् ॥' (बृ० उ० ४।४।२१) 'यस्मिन् द्यौः पृथिवी चान्तरिक्षं ओतं, मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानं, अन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः ॥' (मु० उ० २।२।५) इत्याद्याः ।

अत्र किल सर्वेषामनेकेषां भूतानामध्यारोपितानामेकस्मिन् तदधिष्ठाने स्वात्मन्येव बाधसामानाधिकरण्येन प्रविलय एवास्ति वैदिकाद्वैतविज्ञानमिति, अनेकेषु भ्रान्त्या विविधनामरूपाकृतिभिर्विभिन्नरूपेण प्रतीयमानेषु भूतेषु तेषु समनुगतास्तिभातिप्रियरूपेणाद्वयतत्त्वस्यैकत्वस्य दर्शनमेवास्ति शोकमोह-

निवृत्तिप्रयोजकमिति च प्रतिपाद्यते।

अयं साक्षादपरोक्षः पुरि शयानोऽपि सर्वत्र पूर्णः सच्चित्सुख आत्मा ब्रह्मैवाहमस्मीति—अद्वैतविज्ञानेनैव कामसन्तापादयो दुष्टाः असद्भावाः विनष्टाः भवन्ति। तदेव प्रत्यगभिन्नमद्वैतं ब्रह्म विज्ञाय साधको ब्रह्म भवितुकामो ब्राह्मणः शाश्वतशान्त्यानन्दप्रदामखण्डब्रह्माकारां प्रज्ञां कुर्वीत। वागादीन्द्रियोद्वेजकान् बहून् शब्दादीन् विषयान् नैव विचिन्तयेत्, किन्तु ब्रह्मभावप्रबलमदेन वागादीन्द्रियाधिष्ठातृ मनः सदानन्दपदे निमग्नं निर्विषयं सम्पादयेत् 'ध्यानं निर्विषयं मनः' इत्युक्तत्वात्।

यत्र किल पिण्डब्रह्माण्डलक्षणो निःशेषो द्वैतप्रपञ्चः 'तन्तुषु पट इव' 'सुवर्णे विविधाभूषणमिव च' ओतः प्रोतः सन् प्रतीयते 'स ओतश्च प्रोतश्च विभूः प्रजासु' (शु० य० ३२।८) इति यजुर्वेदेऽपि समाम्नानात्। तमात्मानमेव विश्वाधिष्ठानं यूयं विजानथ। अन्यविषयककथनदर्शनश्रवणादिकं परित्यजत। आत्मज्ञानमेवास्ति संसारदुःखमहोदधिसंतारकोऽमृतस्य मोक्षस्य सम्पादकः स्तुत्यः सेतुः।

अतः संसारेऽस्मिन् द्वैतभावस्य विषमभावस्यागमनमेवार्थात् दुःखस्य भयस्य चागमनं मन्तव्यम्। अद्वैतभावस्य समभावस्यागमनमर्थात् अखण्डस्य सुखस्य प्रशस्तायाः निर्भयतायाश्चागमनं, दुःखभयादेश्चानिष्टस्य निवारणं वेदितव्यम्। ये हि जनाः शाश्वतं सुखं प्रशस्तां निर्भयताञ्चाभिलषन्ति, तदर्थञ्च ये विविधैरुपायैः प्रयतन्ते, तेषां कृते स्तुत्यस्याद्वैतभावस्य समाश्रयणं विहाय तल्लाभाय नान्यः कश्चन पन्था विद्यते। तदाश्रयणमेव दुःखभयार्णवस्य विद्यते तरणोपायः।

अत एवास्मत्पूज्याः महर्षयो महता प्रेम्णा सर्वान् विश्वमानवान् इत्थं समुपदिशन्ति—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ० २।४।५।) 'आत्मानमेव प्रियमुपासीत' (बृ० १।४।८) 'आत्मैवेदं सर्वम्' (छं० ७।२५।२) 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं' (बृ० उ० ४।५।६।) 'महान्तं विभुमात्मानं मत्वा धीरो न शोचति।' (क० २।२१) इत्यादिभिर्वचोजातैः।

अर्थात् सच्चित्सुखात्मकस्याविनाशस्यात्मन एव दर्शनादिकं कर्तव्यम्, न तु संयोगवियोगशीलस्य दुःखजडपरिच्छिन्नस्य देहाद्यनात्मवर्गस्य। आत्मैव निरतिशयप्रीतिविषयोऽस्ति सर्वेषाम्, न तु देहादयो जडा निरतिशयप्रियाः सन्ति, अतस्तत्र प्रवर्तमानामहन्तां ममताञ्च परित्यजेत्। अतस्तमेव नित्यं सुखं प्रियतममात्मानमेव सततमुपासीत। आत्मैवेदं सर्वं जगदस्ति, आत्मनो नास्ति तदन्यत्। अतः चक्षुः यद्यद् दृश्यमवलोकयति, श्रोत्रञ्च यद्यच्छब्दं शृणोति, तत्र सर्वत्रैकमात्मानमेव विभावयेत्, एवं भवदीयचक्षुरादिदृष्टीः आत्मदर्शनशालिनीः एव यूयं कुरुत। तथा कृते सति चक्षुरादीष्टानिष्टविषयनिष्ठयोः कल्याणपरिपन्थिनोः रागद्वेषयोः क्षयः परमानन्दस्य च लाभः सद्यः सेत्स्यति। अधिष्ठानभूतात्मदर्शनेनारोपितदर्शनमपि तदनन्यत्वेन सहजतः सम्पद्यते। सर्वानुगतं महान्तमात्मानं ध्यात्वा धीरो मोहशोकादिभ्योऽनिष्टेभ्यो विमुक्तो भवति।

अतो यूयं स्वमनःसु सर्वदा स्तुत्यां स्वात्मभावनामेव बिभ्रत। निन्द्यां स्वात्मभिन्नभावनाञ्च सहसा परित्यजत। एवं सति 'पुमान् पुमांसं परिपातु विश्वतः' (यजुर्वेद. १७।४३)

'समानी वः आकूतिः, समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति ॥' (ऋ० १०।१९१।४) इति श्रौतादेशं सफलं स्वीकर्तुं यूयं समर्था भविष्यथ। यथैकस्मिन् शरीरे स्थितानि विभिन्नानि हस्तपादादीन्यङ्गानि मिथः परिरक्षणं कुर्वन्ति, तत्कस्य हेतोः ?, तत्र सर्वत्रैकस्यात्मन एव दृढभावात्। तथा सर्वे मानवाः सर्वान् मानवान् परस्परं परिपान्तु, सर्वत्र दृढामेकात्मभावनामादाय। युष्माकं हृदयेषु वर्तमानः स्नेहमयः सद्भावः समभावापन्नो भवतु। हृदयानामभिप्राया अपि स्वराष्ट्रसमाजहितसाधकाः समानाः समभावापन्ना एव भवन्तु। युष्माकं मनोऽपि पक्षपातस्वार्थान्धतादिदोषरहितं सत् सर्वत्रैकात्मावलोकननिपुणं समभावापन्नं भवतु। तच्च क्षमाप्रेमौदार्यसौहार्दादिगुणार्जनेन, द्वेषेर्ष्याकार्पण्यादिदोषनिराकरणेन चाभ्युदयनिःश्रेयससम्पादकं यथा भवति तथा तत्संसाधयत।

यदा यदा यत्र यत्र च यं यं जनं प्रति, समाजं प्रति, राष्ट्रं प्रति वा युष्माकं मनांसि - अन्यत्वस्य - आत्मभिन्नत्वस्य निरीक्षणं कुर्वन्ति, स्नेहसद्भावसहायरक्षणादिभ्यो विमुखानि भवन्ति, तदा तदा तत्र तत्र तं तं प्रति च —

'सह नाववतु सह नौ भुनक्तु, सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु, मा विद्विषावहै ॥' (कृ. तै. २।१।१)

इतीमं पावनं लोकशंकरं मन्त्रं स्वात्मप्रेमभरितेन हृदयेन पौनःपुन्येन पठत। अयं किल मन्त्रो न केवलं गुरुशिष्ययोः मिथः पावनानन्यत्वभावनां विधाय रक्षणादिकं विद्वेषाभावञ्च समुपदिशति। किन्तु पतिपत्न्योः, सहोदरयोः, श्वश्रूवध्वोः,

भ्रातृपत्न्योः, श्रेष्ठिकिंकरयोः, पितापुत्रयोः, समुन्नतावनत-वर्णयोः, सजातीयविजातीययोः, सधर्मविधर्मणोश्चापि। संसारेऽस्मिन् सर्वत्र प्रतीयमानस्य द्वैतभावान्यत्वभावमयस्य दुःखभयकरस्य गाढान्धकारस्य विनाशायास्मत्पूज्यैः महर्षिभिः पूर्वोक्त-मन्त्ररूपः सुखकरो दुःखभयहरो महान् प्रशस्तः - अद्वैतात्मभाव-रूपतैलपूर्णः शाश्वतज्योतिर्मयः प्रदीपः प्रज्वालितोऽस्ति ।

इमं प्रदीपं सर्वदा स्वहस्तयोः धृत्वा सर्वत्र विचरन्तु भवन्तः, अस्य स्तुत्यालोकेन सर्वान् मिथ्याज्ञानमयगाढान्धकारेभ्यः सद्यो विमोचयन्तु। 'स्वयं तीर्णः पराँश्च तारयतु' इति सदुक्ति चरितार्थाञ्च कुर्वन्तु । अनेन किल लोकाः—अनायासतः परां शान्ति, विमलानन्दञ्चावश्यं प्राप्स्यन्ति । अद्वैतभावस्यानन्यत्व-भावस्य च व्यवहारे समाजव्यवस्थायाञ्चायमेवार्थः स्पष्टतः प्रतिभाति । यथाऽहमस्मि, तथैवेमे च सर्वेऽपि सन्ति । यद्यदिष्ट-मनिष्टञ्चोपादेयतया हेयतया चास्माकं प्रतीयते, तत्तत्सर्वमन्ये-षामपि समानरूपेणैवावभाति । नास्ति तत्र किमपि वैषम्यम् । नास्ति तत्र पक्षपातस्वार्थान्धतादिप्रयुक्तो बलप्रयोगश्च । तत्र चावलोक्यते शिष्टैः स्तुत्यः प्रेमसद्भावसौजन्यसौहार्दौदार्याभि-वर्धकः साधुभावः । यथा वयमभिलषामः - 'अस्माकं सर्व-विधोऽभ्युदयो भवतु' 'सर्वेऽप्यनिष्टाः प्रतिकूलाः दुर्भावा प्रपला-यन्तु' इति च । तथैवान्येऽपि तं तथा स्वभावतोऽभिलषन्त्येव । अयमेवास्ति वैदिकसनातनार्यधर्मस्याभिनन्दनीयोऽवधारणीयश्च स्तुत्यः सारः । यदाहुः शिष्टाः महर्षयो महाभारतेऽपि च—

'श्रूयतां धर्मसर्वस्वं, श्रुत्वा चावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ अर्थात्

'आत्मनो ह्यनुकूलानि, परेभ्यश्च समाचरेत् ॥' इति ।

हिन्दुसमाजः

अयं किल भारतीयो हिन्दुसमाजो बहोः कालात् विविध-सम्प्रदायजातिभेदादितो विघटितः; अत एवात्मविस्मृतः संघटनाभावाद् दुर्बलश्चावलोक्यमानो बभूव; भवति च । एवं भूतस्य विशालस्य हिन्दुसमाजस्य स्वकीयायाः अभीष्टायाः प्रशस्तायाः एकतायाः साक्षात्काराय, सुसंघटितकरणाय च, स्वाभिमानित्वेन यथार्थज्ञानबलतेजःश्रमादियुक्तत्वेन च पुनर्निर्माणाय कानि कानि साधनानि सम्पादनीयानीति च हिन्दुसमाजे वर्तमानैः श्रेष्ठैर्निष्पक्षैर्महापुरूषैर्विद्वद्भिर्विचारणीयम् ।

अयं किल हिन्दुसमाजः प्राक् आर्यत्वेन मानवत्वेन (मनुसन्तानत्वेन) वैदिकधर्मानुयायित्वेन सनातनत्वेन भारतीयत्वेन च प्रसिद्धो बभूव । संप्रत्यपि विज्ञाः तथैव तं जानन्ति च । हिन्दुसमाजोऽस्ति सनातनः, अर्थात् अनाद्यनन्तकालत्वेनामरतया सदा प्रतिष्ठितः, इति वयं मन्यामहे ।

संशोधनपरिवर्तनादिकमावश्यकम्

कश्चन सनातनशब्दस्यापरिवर्तनीयार्थं मन्यते । परन्तु नास्त्ययमर्थः पूर्णः । यद्यपि हिन्दुसमाजस्याविनाश्यात्माऽस्ति सदा अपरिवर्तनीयः, तथापि तस्य शरीरादिवत् बाह्यं स्वरूपं देशकालवयोऽवस्थाबुद्धिशक्तिपरिस्थित्यादिपरिवर्तनेन परिवर्तितमेवाभूत्, भवति, भविष्यति चेति वयं निश्चप्रचमवलोकयामः ।

अस्य बाह्यं स्वरूपं, यदि कालादिपरिवर्तनमनुसृत्य

परिवर्तितं न स्यात्तदाऽभिनवप्रशस्तजीवनशीलमद्यतनत्वमनन्त-त्वञ्च कथं सम्पादितं स्यात् ? । यन्नदीजलं ग्रीष्मादिसमये गर्ते प्रतिरुद्धं सत् सततपरिवहनशीलं न स्यात् , तत्किल निर्मलं कथ-मवतिष्ठेत ? । तत्र दौर्गन्ध्यमदर्शनीयत्वमपेयत्वञ्च सद्यः संपद्येत । अतः सनातनस्य हिन्दुसमाजस्य बाह्यं स्वरूपं परिवहनशीलं स्व-हितसम्पादकमेव मन्तव्यम् । तथा च हिन्दुसमाजे विविधा विचाराः आचाराः वेशभूषाभोजनविवाहादयोऽभीष्टार्थसंपादकाः अनिवार्यतया परिवर्तनशीलाः बभूवुः भवन्ति , भविष्यन्ति चेति वयं समीक्षामहे । अतएव मनुस्मृतावपि भगवान् मनुः इत्थं समुपदि-देश--

अन्ये कृतयुगे धर्माः, त्रेतायां द्वापरे परे ।
अन्ये कलयुगे नृणां, युगह्रासानुरूपतः ॥ इति (१।८५)

अतः समाजसंघटनाय तद्गतिप्रगतिविधिषु परिवर्तनं संशोधनञ्च प्रागप्यभूत् वर्तमानेऽपि तद्बलाद्भवत्येव , एवमग्रेऽपि तद्भविष्यतीति वयं यथार्थतया जानीमहे । अतः समयस्य परिवर्तनापेक्षया तदावश्यकं मन्यन्ते विज्ञाः समाजराष्ट्रहितचिन्तकाः । यतः समाजहितानुकूल-परिवर्तनशीलगतिप्रगतिरेव प्रशस्तसमाज-जीवनस्य लक्षणं शिष्टाः प्रतिपादयन्ति ।

स्वतंत्रतासंग्रामः

यद्यपि तत्तत्परिस्थितिवशीभूतस्य हिन्दुसमाजस्य विधर्मि-विदेशिपरतन्त्रतावेलायां प्रगतिः समवरुद्धा आसीत्, गौरवमपि तस्य लुप्तप्रायमासीत् यतः पराधीनस्य ललाटे लघुताया एव हीनताया एव च तिलकं नहि, कलंक एव सर्वत्र दृष्टिचरः तथाप्यस्य सनातनस्य समाजस्य गौरवशालिस्वतन्त्रजीवनस्य

बलवत्याशा दुर्दम्या आसीत्। यद्यपि सहस्रवर्षपर्यन्तं हिन्दुस्थान: पराधीन आसीत्, परन्तु प्रकृष्टबुद्धिबलशालिना विशालेन हिन्दुसमाजेन स्वाधीनतासंग्राम: पूर्णस्वतन्त्रतालाभपर्यन्तं सर्वदा सर्वत्र यया कयाऽपि रीत्या प्रचलित: कृतोऽभूत्। यस्य संग्रामस्य बहवो यशस्विनो बुद्धिबलशालिनो नेतारो महाराणाप्रताप–महाराणीलक्ष्मीदेवी–दुर्गावतीदेवी–छत्रपतिशिवाजीमहाराज–गुरुगोविन्दसिंह–स्वामिदयानन्दविवेकानन्द–तिलक–गांधी–नेहरू–पटेल–पन्त–सुभाष–सरोजिनीप्रभृतय: आसन्।

एवं बहुकालात् प्रचलितस्य स्वतन्त्रतासंग्रामस्य स्तुत्या सफलता संघटनप्रभावात् संजातैव। भारतस्येतिहासे महद् आश्चर्यं सर्वै: स्पष्टतया विलोकितम्। गौरवाढ्यो हिन्दुस्थानो महिमाशाली हिन्दुसमाजश्च सर्वथा स्वतन्त्रोऽभूत्, विदेशीयं शासनं सर्वथा विलुप्तं बभूव। ये किल केचन प्राक् हीनमनोवृत्तयो रूढिवादिन: शस्त्रविहीनेनाहिंसकसत्याग्रहेण कथं स्वदेश: स्वतन्त्रो भविष्यति? प्रबलपराक्रमशालिन: सुसज्जितविविधप्रकृष्टप्रभूतशस्त्रास्त्रा: विदेशीया: कथं पराजेष्यन्ते? प्राक भारतेतिहासे रामायणभारतादौ तथा कथमपि नैव दृष्टं, अहिंसकक्रान्ति: कुत्रापि नावलोकितेति मन्वाना: कथयन्तश्चाभवन्, ते किल स्वकीयशिरांस्यध:कृत्य लज्जिता: बभूवु:।

इतिहासावलोकनम्

हिन्दुसमाजस्येतिहासस्तावदवलोक्यताम् यद्यपि सहस्रवर्षात् प्रचलित: स्वतन्त्रतालाभायाविरत: स्वदेशभक्तानां शूरवीराणां संग्राम: सम्प्रति सफलोऽभूत्। परन्तु- अतीतेषु सहस्रसंवत्सरेषु हिन्दुसमाजेन नितान्तासह्या समुद्वेगकरी स्वक्षति-

रपि भूयसी संपादिता। विशालस्य हिन्दुस्थानस्य वह्वो भूभागाः हिन्दुस्थानात् प्रच्युताः, बहिर्भूताः विधर्मिविरोधिपरतन्त्राः अभवन्। अफगानिस्थानो बलुचिस्थानश्च प्राक् हिन्दुस्थान एवान्तर्भूतौ आस्ताम्। तस्मिन् कालखण्डे स्वदेशात् तौ इमौ बहिर्भूतौ अभूताम्।

ययोः पूर्वं 'गांधारदेशः' इति विख्यातं नाम आसीत्, यस्य प्रसिद्धा आर्यजनाः बुद्धिबलधनसम्पन्नाः यशस्विनः आसन्। यस्य देशस्य राजकुमारी कन्यका 'गान्धारी'ति संज्ञया प्रसिद्धा विख्यातानां दुर्योधनादिकौरवाणां जनन्यभूत्। गांधारदेशीय आर्यःस्वास्थ्यसौन्दर्यसमृद्ध्यादिगुणैःवेदादिशास्त्रेष्वप्यभिवर्णितो बभूव। तस्य देशस्य प्रशस्तस्वास्थ्यसम्पादकजलवायुफलादिसम्पत्तिरधुनापि प्रसिद्धाऽस्ति।

अधुनाऽस्माकं दृष्टिसमक्षमेव लोकमाता प्रशस्ता सिन्धुनदी परकीया पाकिस्तानान्तर्गता संजाता। यस्याः महत्त्वं ऋग्वेदादिसंहितासु अनेकाभिः ऋग्भिः प्रदर्शितम्। सिन्धुनामद्वारैव स्वदेशस्य स्वसमाजस्य चाभिनवा हिन्दुसंज्ञालब्धेति विज्ञाः वदन्ति। एवं समग्रसिन्धुप्रदेशः, पञ्चनदप्रदेशस्य नदीत्रयविभागीयो विशालप्रदेशः, बंगप्रदेशस्यार्धभागादप्यधिकोभूभागः, आसामदेशस्य भूभागश्च हिन्दुस्थानात् बहिर्भूताः विदेशिविधर्मिपरतन्त्रा अभवन्। परिशिष्टे स्वतन्त्रते हिन्दुस्थानेऽपि वर्तमानाः छद्मवेषिणो विधर्माणो म्लेच्छेसाईप्रभृतयस्तत्तत्समये हिन्दुराष्ट्रसमाजविघटनाय प्रयतमाना भवन्तीति समाचारपत्रविदां कृते न तिरोहितमिति हिन्दुस्थानस्य दौर्भाग्यमिदम्, खेदजनकपरिस्थितिश्चेयम्।

हिन्दुसमाजपरिस्थितिः

सम्प्रति हिन्दुसमाजस्य परिस्थितिस्तावत्पक्षपातं विहायावलोक्यतां नेत्रद्वयं सर्वतो विस्फार्य, सावधानेन मनसा विचार्यतां, पूर्वापरतोऽनुसन्धीयताञ्च । सार्धसहस्रवर्षेभ्यः प्राक् हिन्दुसमाजः संघटितः सम्मिलितश्चासीत् । यस्य ब्राह्मणादिवर्णविभागास्तावत् तत्तद्गुणकर्मप्रयुक्ता एव गौणा आसन् न तु मुख्याः । मुख्यन्तु यथैकस्मिन् शरीरे विभक्तरूपेण विभिन्नकार्यकरणरूपेण च वर्तमानेषु मुखाद्यङ्गेषु 'इदं सर्वमहमस्मी' त्यात्मकं वर्तमानमैक्यं दृष्टं तथाऽऽसीत् । तदा तु मुख्यमैक्यं समाजहितस्नेहसम्पादकं, गौणञ्च विभागं व्यवहारप्रयोजकं मन्वाना आर्याः मिथः प्रेमसद्भावपुरस्सरं सम्मिलिताः सन्तस्तत्तद्विविधयोग्यतां रुचिञ्चानुसृत्य भोजनविवाहादिव्यवहारमकार्षुः । परन्तु पराधीनतासमये तस्माद्विपरीतं संजातम् । यन्मुख्यमासीत्, तद्गौणमुपेक्षितं बभूव, यद्गौणमासीत्, तन्मुख्यं विच्छेदकं जातमिति । तस्य विपरीतभावस्य कटुफलं संघटनाभावपराधीनतादिलक्षणं हिन्दुसमाजेन बहुकालपर्यन्तं भुक्तम् ।

अस्मिन् पराधीनतायाः कालखण्डे अनेके मतवादाः सम्प्रदायविभेदाः विचारदर्शनविभागाश्च प्रचलिता अभवन् । तैर्यद्यपि हिन्दुसमाजे विघटनलक्षणा पृथक्ता कदापि नाभीप्सिता । परन्तु दौर्भाग्यवशात्, मिथ्याऽहंमन्यतामाश्रित्य तत्प्रयुक्तं परस्परं खण्डनमण्डनविद्वेषादिकप्रयोजकं समाजस्य पृथक्करणं संजातम् । बौद्ध–जैन–शिक्ख–शांकराद्वैति–रामानुजविशिष्टाद्वैति–द्वैतिमूर्तिपूजक–अमूर्ताराधक–प्रभृतयः शतशो विभेदाः

प्रचलिता अभूवन् । एवं पूर्वस्मिन् काले विदेशीयानां विधर्मणाञ्च समाक्रमणेन शासनेन च सर्वथा परतन्त्रस्य हिन्दुसमाजस्याङ्गभूताः षोडशकोटितोऽप्यधिकाः जनाः म्लेच्छादिरूपेण परिवर्तिता अभूवन् । इयान् विशालस्स्वस्माद्विच्छिन्नः समाजः प्राक् मित्रभूतः स्वकीयः सधर्मा रक्षकश्चासीत् । स एवेदानीं शत्रुभूतः परकीयो विधर्मा पृथक्भूतो भक्षकश्चसंजात इति राष्ट्रैकतावाञ्छावतां भारतीयानां कृते महान् खेदः समजनि ।

हिन्दीभाषा

यद्यपि विशाले भारते शते (१००) सप्ताशीति (८७) संख्या हिन्दूनां विद्यते । तथापि बहवो हिन्दवो जैन्टलमैनाः अधीतपरकीयांग्रेजभाषाः– 'वयं हिन्दवः आर्याः वैदिकसनातनधर्मानुयायिनः हिन्दीसंस्कृतभाषाभाषिणः स्मः' इति वक्तुं लज्जन्ते इति महदाश्चर्यं प्रतिभाति राष्ट्रैकतास्थापनेच्छुकानाम् । स्वप्रशस्तदेशस्य राष्ट्रभाषां हिन्दीं वक्तुं लिखितुञ्च समर्था अपि तां प्रायो न वदन्ति, न च लिखन्ति , परन्तु परकीयां विदेशीयामाङ्ग्लभाषामेव वदन्तो लिखन्तश्च स्वकीयं मिथ्यागौरवं वस्तुतो गर्ह्यं लाघवं प्रकटयन्ति । स्वकीयपुत्रादीनपि तामेव परकीयां भाषां पठितुं विधर्मि-ईसाई-प्रवर्तितस्कूलकोलेजादिषु प्रेषयन्ति । युरोपरूसामरीकादिविदेशेष्वपि तामेवांग्रेजभाषां भाषमाणाः स्वस्य प्रियभारतदेशस्य काचन गौरवशालिनी प्रशस्ता भाषा नास्तीति तेभ्यो विदेशीयेभ्योऽर्थात् प्रदर्शयन्तः स्वकीयं मौढ्यं न तु बुद्धिमत्वं प्रदर्शयन्ति ।

एतादृशः कश्चन भारतीयो हिन्दुः रूसदेशं गतः, तत्रत्य राजकीयभवने आङ्गलभाषयैव व्याख्यानं ददत्, तत्रत्यैः पृष्टः,

भवताऽतिगौरवेण कथ्यमाना भाषा तु अंग्रेजानामेव विद्यते, भवद्देशस्य किं काचन प्रशस्ता राष्ट्रभाषा नास्तीति ? । यद्यस्ति तर्हि स्वकीययैव राष्ट्रभाषया भवान् व्याख्यानं ददातु, किमर्थं परकीयां भाषां वदन् विशालस्य प्रशस्तस्य स्वदेशस्य हीनतां प्रकटयति । श्रूयतेऽस्माभिः- भवद्देशस्य गौरवाढ्याऽतीव प्रशस्ता देवानां वाणी परिष्कृता संस्कृतभाषा विद्यते, तत्पुत्रीरूपेण विख्याता यशस्विनी हिन्दीभाषाऽपि च विद्यते इति। संस्कृतभाषायामेव भवदीयैः पूज्यैर्महर्षिभिर्लिखिताः स्तुत्याः वेदोपनिषद्गीतादर्शनशास्त्रमहाभारतादयो विविधाः ग्रन्थाः विद्यन्ते येषां रूसभाषायां कृता अनुवादाः अस्माभिः पठ्यमानाः अपूर्वमानन्दजातं ददते । इत्येवं तत्रत्यैर्भर्त्स्यमानः स भारतीयो हिन्दुः प्रसूतया लज्जयाऽधोमुखो बभूव ।

यद्यपि स्वतन्त्रे भारतेऽपि - भवतु नामांग्रेजभाषा, तां सर्वथा परित्यक्तुं वयं नोपदिशामः । तथापि तस्याः सहकारितारूपेण दासीरूपेण चाभ्युपगमः कर्त्तव्यः न तु प्रधानतया राजमहिषीरूपेण च । प्रधाना राजमहिषी तु संस्कृतमयी हिन्दीभाषैव मन्तव्या , तथैव तत्प्रचारः सर्वत्र कर्त्तव्यः , तद्गौरवं मुख्यरूपेण प्रकटनीयम् ।

हिन्दुत्वम्

बुद्धिबलशालिनो विशालस्य हिन्दुसमाजस्य संगठनेन सहकारेण सौजन्येन समौदार्येण च यस्य वर्तमानस्य स्वतन्त्रस्य भारतसर्वकारस्यास्तित्वं दार्ढ्यञ्च संजातम् । स एव सर्वकारो हिन्दुत्वं कस्यचित्सम्प्रदायविशेषस्य चिह्नम् मन्यमानस्तस्य समादरं नैव कुरुते ।हिन्दुस्थाने लब्धजन्मनां तत्पावनमृत्तिकया निर्मितदेहानां

'हिन्दुः' इति संज्ञां नैव मनुते, इति प्रभूताश्चर्यम्।

अतएव भारतसर्वकारः सम्प्रति स्वकीयं धर्मनिरपेक्षं राष्ट्रं मनुते। परन्तु स धर्मनिरपेक्षतायाः वास्तविकमर्थंविशेषं नैव जानाति। यं मिथ्याभूतं भ्रामकमर्थंविशेषं जानाति, स खलु महतोऽनर्थस्य परम्पराः सृजति। समीक्ष्यतां तावत्—

धर्मनिरपेक्षतायाः प्रतिषेधरूपोऽर्थो नास्ति, किन्तु तस्याः विशेषस्वीकृतिरूपोऽर्थो विद्यते। सा हि सर्वेषु प्रचलितेषु धर्मेषु समभावं स्थापयति, तेषां सर्वेषां सम्मानं विदधाति, मिथः ईर्ष्याद्वेषक्रोधादिदुर्गुणान् निवारयति। क्षमासहिष्णुताप्रेमसद्भावादिसद्गुणाँश्च विस्तारयति।

पक्षपातं विहायेदं तावत् प्रत्यक्षं तथ्यं समीक्षणीयम्—

जगतीलले वर्तमानानां सर्वेषां धर्माणां मध्ये एक एव समुदारो विद्यते वैदिकहिन्दुधर्मो यः सनातनसमयादेवेत्थं ब्रुवाण आसीत्- 'मन्दिरे मस्जिदे चर्चे गुरुद्वारे तथैव च। सर्वत्र भगवान् एकः स श्रीहरि विराजते।' इति, परमेश्वरखुदागोडादिविभिन्ननामभिरपि स एव समाराध्यः परमात्मा परिगीयते। 'यो देवानां नामधा एक एव' (यजुर्वेदः) 'एकं सत् विप्राः बहुधा वदन्ति' (ऋ० १।१६४।४६) 'एकं सन्तं बहुधा कल्पयन्ति' (ऋ० १०।११४।५) इत्यादिवेदमन्त्रैः पूर्वोक्तं स्वकीयं मन्तव्यं समर्थयति। अतएव भारतराष्ट्रस्य प्रातःस्मरणीयः पिता महात्मा गन्धी अपि- 'ईश्वर अल्ला तेरे नाम, सबको सन्मति दे भगवान्।' इत्येवं सर्वान् मानवान् समुपदिशन् भगवन्तं प्रार्थयामास। अतएव हिन्दुधर्मो विशालस्वीकृतिलक्षणो विद्यते। अन्ये धर्मास्तु प्रतिषेधात्मकाः अवलोक्यन्ते। यवनेसाईप्रभृति-

धर्मस्वीकारमन्तरा न कस्यापि समुद्धारः प्रभवतीति ब्रुवाणाः। अत एवान्ययवनादिधर्माणां प्रतिषेधात्मकत्वादेव तदनुयायिभिः पावने भारतेऽपि हिन्दुदेवस्थानानि तच्छ्रद्धास्पदानि भूयांसि निर्दयतामसहिष्णुतां कुटिलताञ्चावलम्ब्य विध्वस्तानि, तत्स्थाने बलात् स्वधर्मालयमस्जिदादीनि निर्मितानि सम्प्रति स्वतन्त्रे भारतेऽपि यत्र तत्र तीर्थस्थलादौ समुपलभ्यन्ते। क्षमासहिष्णुतादयादिसद्गुणशालिनः शूरवीरा हिन्दवस्तत्प्रतीकारं कर्तुं समर्था अपि तदप्रतिकुर्वन्तो हिन्दुधर्मस्य विशेषस्वीकृतिलक्षणतामेव विज्ञापयन्ति। हिन्दुधर्मस्तु गंगादृष्टान्तेन स्वकीयमौदार्यमनादिकालादेव प्रदर्शयति। यथैकस्यां गंगायां विभिन्नपूर्वादिदिग्भ्यः समायाताः तत्रैव संमिलिताः नदीनालानिर्झरणादयः गंगारूपा एव भवन्ति, तत्तुल्यमेव पावित्र्यं लभन्ते, ततस्तेषां पार्थक्यं कथमपि नावतिष्ठते - 'रुचीनां वैचित्र्यात् ऋजुकुटिलनानापथजुषां, नृणामेकोगम्यस्त्वमसि पयसामर्णव इव।' इति महिम्नस्तोत्रस्मरणात्। हिन्दूनां भारतीयानामद्वैतवेदान्तधर्मस्तु 'सर्वं खल्विदं ब्रह्म तज्जलान्निति शांत उपासीत' (छा० उ० ३।१४।१) इति समुपदिशन् सर्वान् भेदान् निराकुर्वन् सर्वत्राभीष्टशांतिसाम्राज्यमेव स्थापयति। युरोपामरीकाजापानादिषु विदेशेष्वपि तमेव वेदान्तधर्मं सर्वमानवहितसुखावहमुपदिशन्तः स्वामिविवेकानन्दरामतीर्थप्रभृतयः परिव्राजकाः भारतीयहिन्दुधर्मस्य निरवद्यं स्तुत्यमौदार्यं प्रकटयामासुः। 'अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः। अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम्॥' इति ब्रुवाणाः गौडपादाचार्या अपि वेदान्तधर्मस्य रागद्वेषादिकलंकस्पर्शराहित्यं निखिलजनहितसुखकरत्वमेव च

बोधयन्ति ।

अतोऽयं विशालो भारतदेशो धर्मनिरपेक्षराष्ट्रमस्तीति कथनं अन्ततोगत्वाऽयं हिन्दुवैदिकधर्मो धर्मनिरपेक्षोऽस्तीत्यत्र, स्वकीयं वास्तविकं विशेषार्थमाविष्कुर्वन् सन् निःसंशयं पर्यवस्यति। सति चैवमयं हिन्दुशब्दः कस्यचित् धर्मविशेषस्य वाचको नैव मंतव्यः, किन्तु पावने भारते हिंदुस्थाने वर्तमानस्य निखिलस्य विविधसमाजस्य वाचको मंतव्यः। धर्मसमाजौ च स्तो विभिनार्थकौ। यथैकस्मिन् मानवसमाजे विभिन्नाः धर्माः विश्वासाश्च सन्ति, विभिन्नप्रकारकाः पूजानमस्कारालयादयोऽपि सन्ति। तथापि जनसमुदायस्य नामानि न भिद्यन्ते। अतो वयं दृढं मन्यामहे– विशाले भारते भवन्तु नाम विभिन्नाः धर्माः भाषाः पूजादिपद्धतयो विभिन्नदेवालयादिस्थानानि च। तथापि भारतसमाजोऽयमखण्डरूपेण हिंदुरूपेण च परिचीयमान एव भवति, भविष्यति च। यथा कश्चन पृच्छति– पाकिस्तानः कस्य देशो विद्यते? इति तदुत्तररूपेण च वदति कश्चन– स मुस्लिमदेशो विद्यते। एवं इंगलेण्डः केषां देशो विद्यते? इति, तदुत्तररूपेण कथयति– खिस्तमतानुयायिनाम्। तथैव भारतो हिंदुस्तानः केषां देशो विद्यते? तदुत्तररूपेण निःसंशयं वक्तव्यं– हिंदूनामेव इति।

भारतराष्ट्रीयमेकत्वम्

बुद्धिबलोद्योगश्रमशालिभिर्भारतीयैः स्वराष्ट्रस्यैकताऽवश्यं सम्पादनीया, जातिवादप्रांतवादभाषावादसम्प्रदायवादादिप्रयुक्ताः विभेदाः मुख्यप्रशस्तैकतानिवारकाः प्रयत्नतो निवारणी-

याः। राष्ट्रीयैकताभावनायाः सर्वत्र विकासाय समग्रदेशजनतायाः कृते समानरूपेण अधिनियमस्य (कानूनस्य) प्रचारणं कर्तव्यम्। न तत्र कथमपि भारतसर्वकारेण किमपि भयमवलम्ब्य पक्षपातो विधातव्यः। यथा सम्प्रति समुपलभ्यमानः कानूनस्य पक्षपातः हिन्दुनां कृते एकपत्नित्वस्याधिनियमः कृतः, परन्तु मुसलमानानां कृते तु बहुपत्नीत्वस्य समर्थनं तद्धर्मनियममनुरुध्य सर्वकारेण विहितमिति। तत्तु समर्थस्य सर्वकारस्य दौर्बल्यमेव विज्ञापयति। मुसलमानानामौद्धत्यञ्च सूचयति। मुसलमानाः अल्पतरसंख्यकाः कथयन्ति– अस्माकं हुंकारमुपश्रुत्य भयभीतः सर्वकारः आस्माकीनबहुपत्नीत्वस्य प्रतिरोधं कर्तुं न शक्नोति। अतः सर्वकारेण कमपि धर्मविशेषमवलम्ब्य कानूनस्येदृशो विहितो विभेदः स्वप्रबलसत्तया सर्वथा निवारणीयः। यदा ते भारत-सर्वकारस्य हितकरमेकपत्नीपरिग्रहलक्षणं कानूनमवगणयिष्यन्ति, तदा तेऽस्मिन् भारतेऽवस्थातुं कथमपि नैव शक्ष्यन्ति। अस्माभिः समाचारपत्रेष्ववलोकितम्- अन्यदेशेषु वर्तमानाः मुसलमाना अपि तद्धर्मनियमं बहुपत्नीपरिग्रहलक्षणं विहायैक-पत्नीत्वस्य कानूनं मन्वत इति। तथा च बहुसंख्यकहिन्दुभिः सह वर्तमानाः भारतीयमुसलमानाः अल्पतरसंख्यकाः कथं भारतसर्वकारस्य हितकरं न्यायोपेतं कानूनं न मन्वीरन् ?।

महात्मनां समादेशः स्वतन्त्रभारतसर्वकारं प्रति

तथा च समेषां भारतीयानां कृते कानूनविषमता सर्वथा निवारणीया। एवं भारतस्य सर्वाधिकजनतया कथ्यमानायाः ज्ञायमानाश्च गौरवशालिन्याः हिन्दीभाषायाः संस्कृतनिष्ठायाः देवनागरीलिपिसहकृतायाः राष्ट्रभाषापदे स्थापनं विधाय भारत-

संविधानस्यैवं जनभावनायाश्च समादरो विधातव्यः । एवं तस्याः सर्वत्र लोकव्यवहारे व्यापारिसमाजे राज्यसंचालने च विशेषप्रचारः कर्तव्यः । विदेशि - अंग्रेजीभाषायाः गौरवशालिपदं तस्यै समर्पणीयम् । एवं भारतीयसंस्कृतेः, भारतीयादर्शमहापुरुष - रामकृष्णबुद्ध -शंकराचार्य - विवेकानंद -महाराणाप्रताप - छत्रपतिशिवाजीप्रभृतीनां चारित्र्यस्य च सर्वत्र स्कूलकोलेजादिष्वपि विशेषः प्रचारो विधातव्यः ।

भाषाभेदप्रयोजकान् तत्तत्प्रान्तभेदान् विनिवार्य प्रशासकीयमाधारमवलम्ब्य पूर्वपश्चिमोत्तरदक्षिणमध्यरूपपञ्चविभागं कृत्वा भारतस्य विशालाः पञ्चविभागा एव संस्थापनीयाः । प्रान्तीयसर्वकारान् तत्तद्विधानमण्डलानि च समाप्यैकात्मकं शासनं भारतहितकरं प्रज्ञाबलधनधान्ययन्त्रनैपुण्यादिप्रवर्धकं प्रवर्तनीम् । एतेन राजनैतिक भ्रष्टाचाराः, अपव्ययसंभाराश्च प्रतिरुद्धाः भविष्यन्ति ।

यदि समर्थः सर्वकारः साहसं सावधानताञ्चाश्रित्य पूर्वोक्तादेशमनुरुध्य भारतराष्ट्रस्य संशोधनं करिष्यति, दोषान् विनिवार्य गुणान् स्थापयिष्यति । तदा जनतायां राष्ट्रीयैकताभावनायाः विकासः सहजतः संपत्स्यत इति वयं निश्चयतः संभावयामः । एतस्य संशोधनस्य कृते लोकमान्यतिलकमहात्मगान्धिपण्डितनेहरूसरदारपटेलसुभाषप्रभृतिनेतॄणां साहसं बुद्धिमत्त्वञ्च वर्तमानकालिकैः सर्वकारनेतृभिः अवलम्बनीयम् । एवं 'सर्वं बलवतः पथ्यमि' ति न्यायं लक्ष्यीकृत्य भारतस्य स्वतन्त्रतायाः संरक्षणायोपयुक्तं महत् सैन्यशस्त्रास्त्रविमानादिपर्याप्तं बलमपि वर्धनीयम्, येन दुष्टाः शत्रवो भारतराष्ट्रं प्रति

दूषितचक्षुर्भिर्द्रष्टुमपि न शक्नुयुः । एवं शोभनकृषिविस्तारं कृत्वा तदर्थं पर्याप्तजलसेचनप्रबन्धञ्च विधाय जीवननिर्वाहोपयुक्तानि धनधान्यादीन्यपि प्रवर्धनीयानि । इति ।

सर्वोदयवादः समानबन्धुताऽऽदर्शश्च

'ब्राह्मणोऽस्य मुखमासीद्' इत्याद्यां पावनीं श्रुतिम् ।
समादाय च विद्वद्भिः सर्वोदयः प्रदर्श्यते ॥१॥
समानबन्धुताऽऽदर्शो, वेदमन्त्रैः शुभैः पुनः ।
संघशक्त्यै च सर्वेषा, मभ्युदयाय वर्ण्यते ॥२॥
मुखमिदं ममैवास्ति, नान्यस्येति विभावयेत् ।
अतोऽस्य ज्ञानशक्तेश्च, स्वकीये योग्यतारुची ॥३॥
अनुसृत्य विजानीयात्, विकासे स्वाधिकारताम् ।
अतो मया प्रकर्तव्यं, विराजेव मुखं त्विदम् ॥४॥
ब्राह्मणं बोधसंयुक्तं यथा तातस्तथा सुतः ।
बाहुद्वयं ममैवास्ति, नान्यस्येति विभावयेत् ॥५॥
अतोऽस्मिन् शौर्यशक्तेश्च विकासे स्वाधिकारताम् ।
योग्यताद्यनुसारेण, विजानीयादसंशयम् ॥६॥
अतः कार्यं मया नूनं, बलशक्तिसमन्वितम् ।
क्षत्रियं रक्षकं तच्च, क्षतत्राणपरं शुभम् ॥७॥
अतोऽहं मुखसम्बधात्, ब्राह्मणोऽस्मीति भावयेत् ।
बाहुसम्बन्धतो नूनं, क्षत्रियोऽस्मीति भावयेत् ॥८॥

एवं संग्रहशीलं यत्, ममास्ति ह्युदरं खलु ।
कृष्याद्युद्योगयोगेन, धनधान्यसमन्वितम् ॥९॥
वैश्यात्मकञ्च संपाद्यं, पित्रा सम्पादितं यथा ।
निःशेषदेहभारस्य, वोढारौ श्रमसंयुतौ ॥१०॥
पादौ पूज्यौ ममैव स्तः, शूद्ररूपौ न संशयः ।
उदरस्य च संयोगात्, वैश्योऽस्मि धनवान्सुखी ॥११॥
पादयोगेन शूद्रोऽस्मि, श्रमसेवारतो महान् ।
अतो मयैव संपाद्याः, इष्टाः बोधादिशक्तयः ॥१२॥
पित्रा सम्पादिताः यद्वत्, मुदा मय्येव यत्नतः ।
चातुर्वर्ण्यमतो विद्धि, मय्येव सुप्रतिष्ठितम् ॥१३॥
चक्षुःश्रोत्रादिकं यद्वत्, मय्येकस्मिन् प्रतिष्ठितम् ।
दर्शनश्रवणाद्यर्थं, विज्ञेयं ब्राह्मणादिकम् ॥१४॥
चक्षुर्विना यथा जन्तोः, अन्धत्वं जायते तथा ।
श्रोत्रं विना च बाधिर्यं, दुखदं भयदं खलु १५॥
रसनाऽभावतो नूनं, मूकतादि प्रजायते ।
अन्धत्वादिनिरासाय, स्वस्थं तदभिलष्यते ॥१६॥
यथा, तथा निरासाय, मूढताया अपेक्ष्यते ।
ब्राह्मण्यं बोधसंभारं प्रशस्तं सुखसंस्थितम् ॥१७॥
दुर्बलत्वस्य नाशाय, क्षत्रियत्वमपेक्ष्यते ।
दुष्टानां दमने दक्षं, रक्षकं बललक्षणम् ॥१८॥

बाहुद्वये च सम्पाद्यं, मयैव तदपेक्षितम् ।
धनादीनामभावाच्च, दीनता हीनता खलु ॥१६॥
बलबोधादिनाशश्च , सर्वस्मिन् जायते सदा ।
उद्योगाच्च धनादीनां, लाभःस्यादीप्सितः सदा ॥२०॥
ऊरूद्वयात्मकं वैश्यं, उद्योगस्य च लक्षकम् ।
उदरं तस्य सान्निध्यात्, संग्रहत्वस्य लक्षकम् ॥२१॥
एकीकृत्य तयोः ह्यत्र, तादृक् तदभिलक्ष्यते ।
सम्पाद्यते मया नूनं, मय्येवैतत्सुखावहम् ॥२२॥
पादाभ्यां लक्षितः स्तुत्यः, सेवाधर्मः श्रमात्मकः ।
तल्लाभान्मयि शूद्रत्वं, जायते यदपेक्षितम् ॥२३॥
स्वोदयाय चतस्रस्ताः, सम्पाद्यन्ते तु शक्तयः ।
याभिः स्यात्खलु सर्वेषामुदयो निखिलेप्सितः ॥२४॥
तत्तच्छक्तेश्चवैशेष्यात्, संज्ञाःस्युः शिक्षकादिगाः ।
युरोपादि–विदेशेषु, यथा सर्वे सुशिक्षिताः ॥२५॥
युद्धे विशारदाः नूनं, बलाढ्याः शस्त्रपाणयः ।
प्रवीणाः कृषिवाणिज्ये, श्रमिणोऽनलसाः दृढाः ॥२६॥
स्वराष्ट्रस्य स्वधर्मस्य, स्वस्वातन्त्र्यस्य रक्षकाः ।
धनधान्यैः समृद्धाश्च, स्वस्थाश्च चिरजीविनः ॥२७॥
समानबन्धुताऽऽदर्शस्स्थापितस्संघशक्तये ।
बुद्धिवित्तबलाढ्यैर्यैस्तान्पश्यन्त्वार्यहिन्दवः ॥२८॥
बिभृतां ताश्चतस्रश्च, शक्तीः इष्टाः सुखादिगा ।

प्रयतन्ताञ्च सर्वेषां, हिन्दवोऽभ्युदयाय च ॥२६॥
विदेशीयमनिष्टं यं, कदाचारं न गृह्णताम् ।
सदाचारं परं धर्मं, भवन्तो वृणतां सदा ॥३०॥
इस्लामादिमतानाञ्च, विदेशेष्वपि कारणम् ।
विस्तृतस्य प्रचारस्य, विद्वद्भिरभिवर्ण्यते ॥३१॥
समानबन्धुताऽऽदर्शो वैषम्यविष - नाशकः ।
हिन्दुधर्मः स्वदेशेऽपि क्षीणोऽभूच्च कथं खलु ? ॥३२॥
स्वकीयैः परकीयत्वं कथं प्राप्तं ? विचार्यताम् ? ।
स्वदेशश्च विदेशोऽभूत् ? बुद्ध्या निष्पक्षपातया ॥३३॥
भिन्नभाषाऽभिधाभूषा - धर्मरीत्यादिकञ्च यैः ।
स्वीकृत्यैव परित्यक्तं, स्वकीयत्वं कथं ? वद ॥३४॥
भाषादिकं स्वदेशस्य, नामधर्मादिकं तथा ।
मित्रभावं कथं त्यक्त्वा शत्रुभावं समाश्रितम् ? ॥३५॥
विजयो यवनादीनां क्षत्रियाणां पराजयः ।
कथं जातश्च ? दासत्वं गर्ह्यं भारतवासिषु ॥३६॥
विदेशेषु च बौद्धादि - धर्मस्याऽभूत् प्रचारणा ? ।
हिन्दुधर्मप्रचारश्च, तत्र नाभूत् कथं खलु ? ॥३७॥
हिन्दुजातेरधःपातो हिन्दुधर्मस्य दुर्दशा ।
कथं जातेति ? विद्वद्भि दीर्घदृष्ट्या समीक्ष्यते ॥३८॥
समानबन्धुताऽऽदर्शो वैदिकोऽभूत् महान् शुभः ।

उत्तमादिविभेदस्य प्रतिषेधः कृतो यतः A ॥३९॥
विश्वस्मिन् आर्यभावस्य, प्रचारो विहितः खलु ।B
प्रपाभोजनसाम्यस्य चादेशो येन नः कृतः E ॥४०॥
एकस्मिन् स्नेहसद्भाव - बन्धने योजनं कृतम् ।
सहैव गमनं येन, सहैवाभाषणं मुदा ।
मनोभावाः समानाश्च विहिताः संघशक्तये M ॥४१॥

A' अज्येष्ठासो अकनिष्ठास एते संभ्रातरो वावृधुः सौभगाय' (ऋ०. ५।६०।५) 'सुजातासो जनुषा पृश्निमातरः ।' (ऋ० ५।६०।६) जनुषा=जन्मनैव पृश्नेः=भारतभूमातुः पुत्राः परस्परं - उत्तमाधमभाव-रहिताः, भ्रातरः=समानबन्धुत्तादर्शाः, सौभाग्यलाभाय एते वावृधुः= विवर्धन्ताम् ।

B ' कृण्वन्तो विश्वमार्यम् ' (९।३।५) अर्थात् सर्वान् विकृतान् संशोध्य समग्र विश्वं आर्यभावापन्नं संस्कृतं कुर्वन्त्वित्यर्थः ।

E ' समानी प्रपा सह वोऽन्नभागः, समाने योक्त्रे सह वो युनज्मि ।' (अथर्व० ५।१९।६) समानी = एका न तु भिन्ना, प्रपा = पानीयस्थलं, वः = युष्माकं, अन्नभागः = अन्नभोजनं, सह = समानमस्तु । ' सहधर्म चारिणी ' इत्यादौ सहशब्दस्य समानार्थे, एकार्थे च प्रसिद्धत्वात् । समाने = एकस्मिन् मिथः समाने, योक्त्रे = स्नेहबन्धने, सह = सहैव मिलित्वा वः = युष्मान् सर्वान्, अहं = वेदभगवान् युनज्मि = संयोजयामीत्यर्थः ।

M ' संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् । '(ऋ० १०।१९१।२) यूयं सर्वे मिथः संमिलिताः सन्तः सहैव गमनं कुरुत, स्वदेशाभ्युदयकरं एकविधमेव भाषणं कुरुत । युष्माक चेतांसि समानमेकमिधमेवार्थम-वगच्छन्तु ।

A समभावस्य संसिद्ध्यै - सभाभेदनिवारणम् ।
रहस्यभाषणं गुप्तं तद्वत् स्यादेकरूपकम् ।
येनादिष्टं स वेदोक्तो धर्मो ज्ञेयः सनातनः ॥४२॥
यूयं सर्वे मिथः प्रेम्णा, प्रियं सत्यं वचो हितम् ।
ब्रूध्वं, कदापि कुत्रापि वियुक्ताश्च कथं च न ॥४३॥
मिथो भवत मा, यूयं संयुक्ताःस्त सदा मुदा । B
समानबन्धुताऽऽदर्शः इत्येवं येन बोधितः ॥४४॥
यूयं स्थ ब्रह्मणः सर्वे ह्यमृतस्य परात्मनः । M
पितृधर्मेण सम्पन्नाः प्रियाः पुत्राः न संशयः ॥४५॥
अतो भवद्भिर्विज्ञेयं, भ्रातृत्वञ्च परस्परम् ।
तातेन बोधितं नूनं, प्रेमसद्भाववर्धकम् ॥४६॥
शिक्षिता वृणुते कन्या, स्वयं मित्रं पतिं प्रियम् । D

A 'समानो मन्त्रः समितिः समानी समानं मनः' (ऋ० १०।१९१।३) युष्माकं मन्त्रः = रहस्यमयं गुप्तभाषणं, समानः = एकरूपं भवतु । समितिः = सभा, समानी = एकैव भवतु, न तु विभिन्ना ।

B 'अन्यो अन्यस्मै वल्गु वदन्तः एत मा वियौष्ट' (अथर्व० ३।३०।५) परस्परं वल्गु = शोभनं सत्यप्रियहितवाक्यं भाषमाणाः सन्तः, एत = अग्रे भारताभ्युदयाय गच्छत, यूयं सर्वे मा वियौष्ट = कदाचिदपि वियुक्ताः पृथग्भूताः मिथो विरुद्धा वा मा भवत, किन्तु प्रेमसद्भावाभ्यां सदा संघट्टिता एव भवतेत्यर्थः ।

M 'शृण्वन्तु विश्वे अमृतस्य पुत्राः' (शु० यजुर्वेद. अ० ११।५) इति ।

D 'भद्रा वधूर्भवति यत्सुपेशास्स्वयं सा मित्रं वनुते जनेचित् ।'

परस्परस्य सम्मत्या सुज्ञयोर्वरकन्ययोः ॥४७॥
स्वयंवरसमाख्यातो विवाहो वैदिके युगे ।
सुदृढप्रेमसम्बद्धः पितृभ्यामनुमोदितः ॥४८॥
आर्यत्वभावना यत्र, हिन्दूनां संस्कृतिस्तथा ।
स्वधर्मस्य स्वराष्ट्रस्य यत्रास्तेऽभिमतिः शुभा ॥४९॥
दृश्यते समता यत्र गुणानां कर्मणां तथा ।
विवाहः समयोरेव शोभते तोषसौख्यकृत् ॥५०॥
रूढिवादो मृषासंज्ञाऽनुलोमप्रतिलोमकम् ।
बाधकं परिहर्तव्यं, संमतिश्चेत् द्वयोर्भवेत् ॥५१॥
अनुदारा मनोवृत्ति र्हेया ग्राह्या तथा शिवा ।
उदारा संस्कृता बुद्धिर्यथार्थदर्शिनी मुदा ॥५२॥
बहवः पालकाः यस्य ज्ञानिनो बलिनस्तथा ।
धनिनःश्रमसंयुक्ताः सर्वे ये हितचिन्तकाः ॥५३॥
बहुभिस्तैर्जनैर्नूनं, पालनीये प्रिये निजे ।
E स्वाराज्ये यत्नशीलाश्च भवेम ग्रथिता वयम् ॥५४॥

(ऋ० १०।२७।१२) इति । सुपेशा=शोभनरूपयौवनवती, स्वयं= आत्मनैव जने = आर्यजनमध्येऽवस्थितं मित्रं = प्रियपतिं स्वसमानं, वनुते = याचते - वृणोति स्वयंवरधर्मेण प्रार्थयते इत्यादि ।

E 'बहुपाय्ये स्वाराज्ये यतेमहि'। (ऋ० ५।६६।६) बहुभिः पाय्ये= पालनीये रक्षणीये, यतेमहि = प्रयत्नान् कुर्महे ।

मिथः प्रेम्णा समत्वेन, प्रमादादिं विहाय च ।
समानबन्धुताऽऽदर्शो राष्ट्रेऽस्मिन्स्थाप्यतांमुदा ॥५५॥
एकाधिकारतायाश्च प्रतिषेधो विधीयताम् ।
अतो वयं मिलित्वा च, रक्षणाय हिताय च ॥५६॥
बहुपाय्यस्वराज्यस्य, तत्पराः स्याम वै सदा ।
येनैव पूज्यवेदेन राष्ट्ररक्षा प्रबोधिता ॥५७॥
स्तुत्यादर्शस्य वै तस्य, घृणागर्वादिपोषकः ।
तिरस्कारः कृतो नूनं, तदेवानिष्टकारणम् ॥५८॥
वर्गविग्रहवादस्य संजातोऽयं प्रयोजकः ।
विश्वामित्रवसिष्ठादेः कलहादिकथा मृषा ॥५९॥
ब्रह्मक्षत्रघृणायै च मिथो येन प्रयोजिता ।
A तस्मात्तस्य तिरस्कारः कर्तव्यस्तेन वै मुदा ॥६०॥
शास्त्राणामस्त्रशस्त्राणां शिक्षासर्वगता खलु ।
आचारोच्चारनीत्यादेः प्रतिषिद्धा प्रयत्नतः ॥६१॥
नारीशिक्षानिषेधेन, देशार्धाङ्गं जडीकृतम् ।
पूर्वोक्तानाञ्च सर्वेषां प्रश्नानामेकमुत्तरम् ॥६२॥
विद्वद्भिर्दीयतेऽनिष्टं, भेदभावस्य वर्धनम् ।
स्वार्थान्धतादिमूलस्य प्रेमसद्भावनाशकम् ॥६३॥
वैदिकादर्शतस्तस्य, क्रियतां विनिवारणम् ।
हिन्दुजातेः सुरक्षायै, मतिमद्भिः प्रयत्नतः ॥६४॥

A तस्य = तिरस्कारस्य, तेन = समानबन्धुताऽऽदर्शेन ।

सनातनस्य धर्मस्य, विस्ताराय शुभाय च ।
वेदान्तब्रह्मभावस्य पवित्रस्य ध्रुवस्य च ॥६५॥
प्रियभारतदेशस्याभ्युदयाय हिताय च ।
समतैकत्वसंसिद्ध्यै, प्रयतन्तां मनीषिणः ॥६६॥
गवाश्वगर्दभाजानां विजातीनां यथा भिदा ।
ब्रह्मक्षत्रादिवर्णानां, भेदोऽभूच्च सजातिहा ॥६७॥
प्राबल्याद्भेदभावस्य विजातीयत्वदृष्टिभिः ।
समानबन्धुताऽऽदर्शः क्षीणोऽभूद्भारते प्रिये ॥६८॥
संघशक्तेरभावाच्च प्रेमसद्भाववर्जनात् ।
विजातीये कथं प्रेमा ? सद्भावश्च कथं भवेत् ? ॥६९॥
स्तुत्यं संघटनं स्याच्च कथं ? साजात्य वर्जनात् ।
बलबोधादिशक्तीनां संक्षयाद्भारतो महान् ॥७०॥
समाक्रान्तो विदेशीयैः दुष्टानां दासतां गतः ।
देशवास्तव्यनेतॄणां, गान्ध्यादीनां प्रयत्नतः ॥७१॥
विवेकानन्दसंन्यासि - रामतीर्थोपदेशतः ।
संघशक्तिं समादाय, बन्धुत्वस्य समानताम् ॥७२॥
स्वतन्त्रोऽभूत्प्रियो देशो जातो हर्षो महानिह ।
स्वातन्त्र्यस्यास्य रक्षायै स्तुत्यादर्शस्य तस्य च ॥७३॥
अभ्युत्थानाय धर्मस्य, वैदिकस्य ह्यनादिनः ।
मिथः समत्वमापन्नै र्यत्यतामार्य - हिन्दुभिः ॥७४॥
शिक्षितैर्बलिभिर्नूनं, धनाढ्यैः श्रमिभिर्मुदा ।
वेदधर्मस्य राष्ट्रस्य भक्तैश्च संघशक्तिकैः ॥७५॥

यथार्थस्य हिन्दुत्वस्य प्रशस्तभावना

यः खलु वैदिकसनातनधर्मं श्रद्धया गृहीत्वा सर्वेश्वरस्य भगवतः शरणं गृह्णाति। यस्य देवदुर्लभस्य प्रशस्तमानवजीवनस्य लक्ष्यं भव्यं प्रशंसनीयमस्ति। असत्यं परित्यज्य यः किल सत्यमेव सेवते, स एव यथार्थः प्रशस्तो हिन्दुरहमस्मीति सततं विभावयेत्।

स एव यथार्थो हिन्दुः आर्यो वेदितव्यः, यः खलु वैदिकसनातनधर्मस्य प्रबलोऽनुयायी भूत्वा सर्वजनहिताय सर्वजनसुखाय च सदा क्रियाशीलो भवति। अस्मिन् जगतीतले यस्य गणना प्रशस्तमानवरूपेण, अन्तरिक्षे पूज्यरूपेण च भवति। स एव हिन्दुः – यस्य जीवनं सर्वदा सर्वस्थलेषु च प्रेमभाववन्धुभावपूर्णमस्ति। यः किल पृथिवीमिमां स्वकीयन्यायपरोकाराभ्यां समलंकृतां करोति। यस्य खलु स्नेहशौर्यान्विता विश्वहितवाञ्छाशालिनी दयालुः प्रकृतिरस्ति। यः सर्वान् जनान् मित्रस्य चक्षुषा पश्यति, यश्च सर्वान् स्वानुकूलान् स्वकीयान् मित्रभूतान् विदधाति, स एव स्तुत्य आर्यो हिन्दुर्वेदितव्यः। यः खलु स्वकीयं सर्वं कर्तव्यं कर्म 'ॐ आनन्दः ॐ आनन्दः' इति मन्त्रमुक्त्वा आरभते, 'ॐ शान्तिः ॐ शान्तिः' इति च मन्त्रमुच्चार्य पूर्णं करोति। यस्य किलैको हस्तो न्याय्यं सत्यं स्वीकरोति, अपरश्च हस्तोऽन्याय्यमसत्यञ्च प्रतिरुणद्धि। यद्वा यस्य खल्वेकः करः सर्वेश्वरस्य पावनमन्त्रजपनाय मालां परिगृह्णाति अपरश्च करो दुष्टानां दमनाय शस्त्रं धारयति, इत्येवं कृत्वा यो गीतोपदेशं 'मामनुस्मर युध्य च।' (गी० ८।७) इति स्वकरयोः स्वीकरोति। यस्य खल्वेकं चक्षुः

चन्द्रवत् निर्मलप्रेमसद्भावपूर्णं सत् प्रामाणिकं हित-सुखकरमेव मार्गमवलोकते। अपरश्च चक्षुः प्रकृष्टतेजओजःपूर्णं सत् सूर्यवत् दुष्टान् जनान् अभिभवति सन्तापयति च। यस्य किलोभौ कर्णौ समादरेण भद्रभावानेव शृणुतः। जिह्वा च सत्यं प्रियं हितं मितमेव वचोजातं संस्कृतं ब्रवीति। न तु विकृतमसत्यादिकं ब्रूते। स एवार्यो हिन्दुरहमस्मि।

यः खलु स्वकीयं जीवनं ब्रह्मक्षत्रयोः समन्वितज्ञानबलशक्ति-पूर्णं विदधाति, यश्च किल स्वकीयासु नाडीषु वसिष्ठरामव्यास-कृष्णयोः पावनीं संस्कृतिं रक्तरूपेण प्रवहनशीलामनुभवति। यः किल 'विश्वं कृणुध्वमार्यम्' (ऋ० ९।३।५) इति भगव-द्वेदाज्ञामनुसृत्य सर्वान् विकृतान् संशोध्य तान् संस्कृतान् आर्यान् विधातुं प्रयतते। यश्च स्वकीयस्य प्रियभारतराष्ट्रस्य स्वातन्त्र्य-मेकत्वं गौरवञ्च स्वप्राणेभ्योऽप्यधिकं मत्त्वा तेषां रक्षणाय स्वप्राणानप्यर्पयितुं न विलम्बमवलम्बते। यो हि सदा संयमं सन्तोषं सत्संगञ्च निरन्तरं सेवते, वेदोपनिषदो गीतां रामायण-भागवतादिकञ्च प्रेम्णा पठति, पाठयति शृणोति, श्रावयति च स एवार्यो हिन्दुरहमस्मि।

गीतावचनसमीक्षा

'ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परंतप!। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥' (गी० १८।४१) इति भग-वद्वाक्येऽस्मिन् तावत् उद्देश्यविधेयभावोऽस्ति वर्णितः। अत्र खलु विचार्यते - सम्मुत्पन्नं ब्राह्मणादिकमुद्दिश्य तत्र गुणकर्म-विधानं क्रियते भगवता, यद्वा गुणकर्माणि समुद्दिश्य ब्राह्मणादि-

वर्णविधानं क्रियते इति ? ।

अत्र कश्चन श्रीहरिहरकृपालुः पण्डित एवं वर्णयति-ब्राह्मणत्वाद्यवच्छिन्नोद्देश्यतानिरूपित-विधेयताश्रयाणि कर्माणि स्वभावप्रभवैर्गुणैः सन्ति विभक्तानि, आहारनिद्राभयादीनि सन्ति प्राणिमात्रसाधारणानि । अतस्तानि ब्राह्मणाद्युद्देश्यकतत्तद्विहितकर्मानुष्ठाने तत्तदधिकारप्राप्तये तदनुष्ठानात्पूर्वं ब्राह्मणत्वादीनि सन्ति नितान्तं समपेक्षितानि । अतस्तैः कर्मभिः - प्रविभक्तैर्ब्राह्मणत्वादीनां सिद्धिं कर्तुं न सक्यते, सिद्धसाधनतादोषापातात्, यतो ब्राह्मणत्वादिकन्तु तत्तत्प्रविभक्तकर्मानुष्ठानात्पूर्वमुद्देश्यविधया सिद्धमेव, अतः कर्मानुष्ठानात् तस्य सिद्धिः कथं स्यात् ? यत एकस्मिन्नेव सिद्धत्वसाध्यत्वरूपो धर्मः पूर्वापरकालवृत्तिविरुद्धत्वात् नैवावतिष्ठते । अतः शमदमादिकर्म, ब्राह्मणत्वजातिप्रयौजकं नास्ति, किन्तु तत् ब्राह्मणत्वजातिप्रयोज्यमस्ति । एवं शौर्यतेजआदिकर्म, क्षत्रियत्वजातित एव प्रयोज्यं मन्तव्यम्, एवमग्रेऽपि । तथा च 'ब्रह्मकर्मस्वभावजं, क्षात्रकर्मस्वभावजम्, इत्याद्युक्तम् ।

अत्र किल यथार्थतो विद्वद्वरैरित्थं समीक्ष्यते 'स्वभावप्रभवैर्गुणैर्हेतुभिः ये सन्ति ब्राह्मणाः क्षत्रियाः वैश्यास्तथा शूद्रास्तेषां कर्माणि प्रविभक्तानि अवलोक्यन्ते, इत्येवं तद्भगवच्छ्लोकपदयोजनेन गुणकर्मवाद एव सिद्धयति, न तु जन्मजातिवादः, अतोऽत्र - 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।' (गी० ४।१३) इति प्रथमोक्तस्वकीयश्लोकानुसारेणैव भगवता श्रीकृष्णेन समुपदिष्टं, न तु किमपि स्ववचनविरुद्धं वर्णितं । अत्र किल स्पष्टतः स्वभावप्रभवान् गुणानेव समुपदिश्य तत्तत्प्रविभक्त-

कर्मकरणाय ब्राह्मणत्वादीनां विधानं क्रियते भगवता, न तु ब्राह्मणादीन् समुद्दिश्य स्वभावप्रभवाः गुणाः विधीयन्ते।

यदि जन्मना वा जात्या वा ये ब्राह्मणाः सन्ति, तेषां शमदमादीनि कर्माणि प्रविभक्तानि स्वभावप्रभवगुणजानि सन्ति, इति मन्येत, तदा स्वभावजकर्मसु विपरीतभावः कदापि कुत्रापि केनापि नावगन्तुं शक्येत। परन्तु पूर्वकाले वा वर्तमानकाले वाऽस्माभिरवलोक्यते स्पष्टतः-द्रोणाचार्याश्वत्थामपरशुरामादिषु ब्रह्मकर्मणां शमदमादीनां प्रादुर्भाव एव नासीत्, क्षात्रकर्मणां शौर्यतेजोयुद्धप्रभृतीनामेव प्रादुर्भावोऽवलोक्यते। एवं युधिष्ठिर-भीष्मादिषु च ज्ञानविज्ञानास्तिक्यादीनां ब्रह्मकर्मणां आविर्भावो-निरीक्ष्यते।

विदेशीयाचारविचारोच्चाराढ्ये वर्तमानकाले तु सर्वथा वैपरीत्यमेवागम्यते। कृषिवाणिज्यश्ववृत्त्यादिवैश्यशूद्रकर्मतत्प-राणां ब्राह्मणानां न सन्ति तानि स्वभावप्रभवगुणप्रयुक्तानि कर्माणि, तथापि ते तानि स्वभावजान्येव कृत्वा वंशपरम्परातोऽ-कार्षुः कुर्वन्ति च। ब्रह्मकर्माणि तु तत्र लेशतोऽपि नावगम्यन्ते।

त्रिवेदिद्विवेदिप्रमृतिसंज्ञाधारिषु प्रायो वेदग्रन्थदर्शनमेव नाभूत्, नास्ति वा, कुतस्तत्पठनं कुतस्तरां तदर्थाधिगतिश्च? तद्धर्मधारणन्तु दूरापास्तमेव। अतः पूर्वोक्ते श्लोके-स्वभावजै-र्गुणैर्ये सन्ति, ब्राह्मणादयो न तु जन्मना जात्या वा, तेषां कर्माणि प्रविभक्तानीति भगवतोपदिष्टम्।

तथा च भारतस्य सर्वेषु मानवेषु ब्राह्मणादीनां चतुर्णां वर्णानां धर्माः युगपत् सम्मिलिताः वा प्रविभक्ता वा यथातथं दृष्टिपथमायान्ति। ब्राह्मणादिनामभिर्व्यवहृतेष्वपि चतुर्णां

वर्णानां धर्माणि विकसितानि समुपलभ्यन्ते ।

एवं सति तत्तत्समाजेषु तत्तत्स्वभावप्रभवैर्गुणैःसृष्टाः विख्याताश्च ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च, तेषां कर्माणि प्रविभक्तानि समुपलभ्यन्ते । अतोऽवगम्यते-स्वभावस्य, तत्प्रभव-गुणानाञ्चानियतत्वात् न कस्यापि जन्मजातिप्रयुक्तानि कर्माणि सन्ति, सर्वेषु सर्वेषां धर्माणां कर्मणाञ्चोदयस्य संभवात् । अतः सर्वेऽपि सन्ति मानवाः जन्मना समानाः । 'जन्मना जायते शूद्रः, संस्काराद्द्विज उच्यते । वेदाभ्यासाद्भवेद्विप्रो, ब्रह्मजानाति ब्राह्मणः ॥' 'नायोग्यः पुरुषः कश्चित् प्रयोक्तैव सुदुर्लभः' इति च न्यायेन तत्तच्छिक्षादितस्तत्र तत्र ब्राह्मणादिधर्मकर्माणि विकसितानि भवन्ति ।

यदि मन्येत, शमदमादीनि कर्माणि स्वभावजानि सन्तीति, तदा 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।' (गी० ४।१३) इति भगवद्वचनमेव विरुद्धयेत । यतः स्वभावजाः गुणाः स्वभावजानि कर्माणि च नहि सृष्टानि निर्मितानि भवन्ति । नहि जले विद्यमानस्य स्वभावसिद्धस्य शैत्यस्य गुणस्य, पिपासो-पशमनलक्षणस्य कर्मणश्च केनापि निर्माणं कर्तुं शक्येत । अतः प्रथममुद्देश्यविधया तत्तत्स्वभावप्रभवैर्गुणैर्निर्मिताः सन्ति ब्राह्म-णादयः, पश्चात् तत्र तत्तद्योग्यतामनुरुध्य शमदमादीनि शौर्य-तेजःप्रभृतीनि कृषिवाणिज्यादीनि च कर्माणि विधियन्ते इति व्याख्यानमेव समुचितम् ।

तथा च स्वभावप्रभवैर्गुणैः सत्त्वादिभिर्यदा ब्राह्मणा-दयः चत्वारो वर्णाः सृष्टा भवन्ति, तदैव तेषु वर्णेषु स्वभाव-जानि प्रविभक्तानि कर्माणि अवतिष्ठन्ते, नान्यथा, सर्वत्र वैप-

रीत्यदर्शनात् । एवं सति 'ब्रह्मकर्म स्वभावजम्' 'क्षात्रं कर्म स्वभावजम्' (गी० १८।४२-४३) इति भगवतोक्तं सर्वं समुपद्यते ।

ननु—स्वभावप्रभवगुणोद्देशेन ब्राह्मणत्वादिविधाने पुनः कर्मप्रविभागविधाने च विधेयभेदात् वाक्यभेदोनाम मीमांसाप्रसिद्धो दुर्धरो दोषः स्यात् ।

इति चेन्मैवम्—अत्र विद्वद्भिरेवं समाधीयते—'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' (गी० ४।१३) इति गुणकर्मविभागप्रयुक्तचातुर्वर्ण्यसृष्ट्यनुवादमात्रं ब्राह्मणक्षत्रियविशामित्यनेन क्रियते। अन्यथा पौनरुक्त्यापत्तेः । न चानुवादवैयर्थ्यम् । 'शमो दमस्तपः शौचमि' त्यादिविशेषप्रविभागप्रदर्शनार्थतया सार्थक्यात् । यथा 'यावज्जीवमग्निहोत्रं जुहोती' त्युत्पत्तिविधिप्राप्तं होत्रं 'दध्नाजुहोती' त्यत्र दधिद्रव्यविधानाय 'जुहोती' ति पदेनानूद्यते । इत्यलं पल्लवितेन ।

अन्यस्य गीतावचनस्य समीक्षा

ननु—'येऽपि स्युः पापयोनयः स्त्रियो वैश्यास्तथाशूद्राः ।' (गी० ९।३२) इत्यनेन भगवद्वचनेन जन्मतः एव जातिभेदोऽस्ति अभिमतः । पापाधिकारिणी योनिरुत्पत्तिर्येषां ते पापयोनयो दुरितजन्मानः , के ते सन्ति ? इत्यत आह—स्त्रियो वैश्यास्तथा शूद्राः इति। तत्र स्त्रीशूद्राणां वेदाध्ययनादावनधिकृतानां पापबाहुल्याल्लब्धस्त्रीशूद्रजन्मनां पापयोनित्वं स्पष्टमेव । 'अनृतं साहसं माया मूर्खत्वमतिलुब्धता । अशौचं निर्दया दर्पः स्त्रीणामष्टौ स्वदुर्गुणाः ॥' (शुक्रनीति-३।१६४) इत्यादिनिसर्गदोषोपहताः सन्ति स्त्रियः, वैश्या अपि पापकर्मणा तद्योनिमापन्नाः कृषिवाणिज्यादिरता ग्राह्या इति ।

अत्र समीक्ष्यते—सर्वासां ब्राह्मणक्षत्रियादिस्त्रीणामपि यदि पापयोनित्वमभ्युपगम्येत, तदा ताभ्यः पापयोनिभ्यः स्त्रीभ्यः पुण्यानां ब्राह्मणक्षत्रियपुत्राणामुत्पत्तिः कथं स्यात् ? जननी-दोषेण दुष्टत्वं पापयोनित्वमेव तेषु प्रसज्येत । एवं सति तत्र पुण्यत्वं सदाचारत्वोत्तमयोनित्वादिलक्षणं कथं सिद्ध्येत ? । 'किं पुनर्ब्राह्मणाः पुण्याः भक्ताः राजर्षयस्तथा ।' (गी० ९।३३) इति गीतोक्तं कथमुपपद्येत ? । न ह्यत्र स्त्रीपदेन शूद्रस्त्रीणां ग्रहणं कर्तुं शक्येत ?, यतः शूद्रपदेन तासां ग्रहणसम्भवात्, अनर्थकं स्त्रीपदं स्यात् । तथा च तेन सर्वासामेव ब्राह्मणादि-स्त्रीणां ग्रहणं क्रियते निःसंशयम् । अनृतादिनिसर्गदोषा अपि सर्वासु तासु स्वीक्रियन्ते, न तु केचन गुणास्तत्र संभाव्यन्ते, इति महती स्त्रीनिन्दाऽनेनावगम्यते ।

वस्तुतः स्त्रियः सन्ति जनन्यो मातरः पूज्याः, 'यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः (म० स्मृ० ३।५६) इत्यु-क्तत्वात् । 'पितुःशतगुणा माता गौरवेणातिरिच्यते ।' (व० स्मृ० ७।४९) इत्यनेन पुरुषपित्रपेक्षया तत्र जननीषु स्त्रीषु गुणगौ-रवप्रयुक्तं प्रकृष्टमहत्त्वमवगम्यते । दयाक्षमासेवास्नेहसहनशील-त्वमधुरभाषित्वमृदुत्वादयो गुणास्तत्र प्रत्यक्षतो दृश्यन्ते । अत-एव भगवता श्रीकृष्णेनापि गीतासु नारीणां सर्वासां तत्रावस्थित-गुणगौरवप्रदर्शनाय मुक्तकण्ठतः प्रशंसाक्रियते—'कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ।' (गी० १०।३४) इत्यनेन । नारीणां स्त्रीणां मध्ये वर्तमानाः कीर्त्यादयः सद्गुणाः पुण्याः अहमेवास्मि । यासामाभासमात्रेणापि लोक आत्मानं कृतार्थं मन्यते, ताः सर्वास्तत्र साकल्येनावतिष्ठन्ते । कीर्तिः = धर्माचरण-

निमित्ता ख्यातिः, श्रीः = लक्ष्मीः शोभा कान्तिश्च । वाक् = वाणी शोभना माधुर्योपेता, सर्वार्थप्रकाशिका सरस्वती च । स्मृतिः = चिरानुभूतस्य स्मरणशक्तिः, मेधा = प्रतिभाऽलंकृता ग्रन्थार्थावधारणशक्तिः, धृतिः = सात्त्विकं धैर्यं, क्षमा प्रसिद्धा ।

अतस्तासु पुण्ययोनित्वमेव सिद्धयति, न पापयोनित्वम्, पापकर्मनिबन्धना निकृष्टता, पुण्यकर्मनिमित्ता चोत्कृष्टता जायते इति न्यायेन सर्वासु स्त्रीषु सर्वेषु च पुरुषेषु निकृष्टत्वमुत्कृष्टत्वञ्च सिद्धयति । अतो न केवलासु स्त्रीषु निकृष्टत्वं, न केवलेषु पुरुषेषु चोत्कृष्टत्वं दृश्यते । पुरुषा अपि स्त्र्यपेक्षया महाक्रूराः दुष्टाः कपटिनः कठोरहृदयाः व्यभिचाररताः हिंसकाश्च बाहुल्येन दृश्यन्ते । नाम्ना व्यवहृतेषु ब्राह्मणेष्वपि चाण्डालकर्माणो निरीक्ष्यन्ते ।

तथा च पूर्वोक्तस्य भगवद्वचनस्य—स्त्रियो वैश्यादयोऽपि सन्ति पुण्ययोनयः, परन्तु तासु तेषु च ये सन्ति पापयोनयः = पापप्रधानाः पापकर्मोत्पादकाः, तेऽपि भगवतः शरणमागत्य तद्भजनेन पापेभ्यो विमुक्ताः भूत्वा परमगतिं प्राप्नुवन्ति, इतीदृशं व्याख्यानं भक्ति महत्त्वमेव विज्ञापयति, न तु केषाञ्चित् जन्मतो जातितश्च पापयोनित्वं साधयति । एवमनृतकापटचदंभादिपापकर्मकुर्वाणा ये केऽपि स्युस्ते सर्वेऽपि शूद्राः नीचाः पापयोनय एव मन्तव्याः नान्ये ।

पूर्वकालिनैः पापकर्मभिरेव जीवाः स्त्रीयोनित्वं वैश्य योनित्वञ्च प्राप्नुवन्तः पापयोनयो भवन्तीति कथनन्तु सर्वासां स्त्रीणां प्रशस्तकृष्यादिकर्मरतानां सर्वेषां वैश्यानाञ्च महतीं निन्दामेव विज्ञापयति । छांद्रोग्योपनिषत्तु वैश्यानामपि ब्राह्मणादि-

वत् रमणीययोनित्वं कथयति, न पापयोनित्वम् । यदाह–'रमणीयचरणाः अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा' (छां० ५।१०-।७) इति । कृष्यादिकर्मरतत्वं यदि पापयोनित्वस्य प्रयोजकं स्यात्तदा ब्राह्मणक्षत्रियादिसकलप्राणिजातजीवननिर्वाहहेतुभूतस्य श्रेष्ठस्य कृषिकर्मणः करणाय भगवान् वेदः–'अक्षैर्मादीव्यः कृषिमित्कृषस्व, वित्ते रमस्व बहु मन्यमानः' (ऋ० १०।३४।१३) 'सुसस्याः कृषीस्कृधि' (शु० य० ४।१०) इत्यादिनां कथमपि प्रशस्तं तद्विधानं न कुर्यात् ।

सम्प्रति आधुनिकाः विवेचकाः यथार्थदर्शिनो विद्वांसः प्रतिपादयन्ति–ये सन्ति–अन्नादीनां समुत्पादकाः, त एव श्रेष्ठाः पुण्यकर्माणो मानवाः मन्तव्याः, ये च सन्ति अनुत्पादकाः परपरिश्रमफलं भुञ्जानाः केवलां स्वार्थान्धतामयीं पुष्पितां पल्लवितां वाचमेव भाषमाणाः कृष्यादिकर्मविमुखाः त एव पापयोनयोऽधमाः वेदितव्याः इति ।

भारताद्यन्यवचनानां समीक्षा

ननु–'प्रजापतिः प्रजाः सृष्ट्वा, तासु कर्म विधाय च । वर्णो वर्णं समावत्ते एकैकगुणभाक् गुणम् ॥ ब्राह्मणे वेदबोधन्तु क्षत्रिये तेज उत्तमम् । दाक्ष्यं वैश्ये च, शूद्रे च सर्ववर्णानुकूलताम् ॥' (म० भा० उ० २२६) इत्यत्र किल ब्राह्मणादिवर्णसृष्ट्यनन्तरं तत्तद्गुणकर्मविभागाधानं स्पष्टतो विहितम् । अतो ज्ञायते महाभारतमपि जन्मजातिसिद्धमेव ब्राह्मणत्वादिकमभिप्रैति ।

इति चेन्नैवम्–अत्र किल पूर्वोक्तगीतावचनवत् सात्त्व-

कादिस्वभावप्रभवैर्गुणैरेव प्रजापतिना तावत् ब्राह्मणाद्याः प्रजाः सृष्ट्वा तासु तत्तत्कर्मणां विधानं कृतं निरूप्यते। अत एव वर्णः = वर्ण्यमानोऽवलोक्यमानः स्वभावप्रभवो गुण एवं वर्णं = ब्राह्मणादिकं समाधत्ते = विधत्ते, एकैकगुणभाक् = तत्तत्सात्त्विकादिगुणान् भजमान एव जनः, गुणं = गुणभूतं वर्णं ब्राह्मणादिरूपं स्वीकरोतीति व्याख्यानेन गुणकर्मवाद एव समायाति, न तु गुणकर्मविहीनो जन्मजातिवादोऽत्रावगम्यते। अतो ब्राह्मणे सात्त्विकस्वभावप्रभवशमदमादिगुणप्रयोजित एव, न तु गुणकर्मविहीने नाममात्रे ब्राह्मणे वेदबोधः स्पष्टतोऽवभाति। तत्र तु वेदबोधस्योदय एव न संभवति। एवं नाममात्रे क्षत्रिये उत्तमस्य शौर्यादिप्रभवस्य तेजस उदयः कथं स्यात्? न स्यात्, एवं वैश्येऽपि विज्ञेयम्। [अथवा प्रजापतिरिति—वर्णः = रजोगुणसम्बन्धाद्रक्तवर्णः, त्रैगुण्यसम्बन्धाच्छबलवर्ण इति वा, एकैकगुणभाक् = स्वसृष्टप्रजागतसकलगुणनिधानमित्यर्थः। प्रजापतिः = ब्रह्मा प्रजाःसृष्ट्वा, तासु कर्म च विधाय, ब्राह्मणे = ब्राह्मणत्वार्हे, प्रजामात्रत्वेन सृष्टेरुक्तत्वात्, सृष्टिकाले सर्वतः प्रथमे ब्राह्मणत्वादेरभावस्य बोधितत्वात्, ब्राह्मणत्वार्हे एवानन्तरक्षणभाविगुणकर्मसृष्टब्राह्मणत्वमुपचरितं ग्राह्यम्। वेदबोधं तद्रूपं गुणं, वर्णं ब्राह्मणत्वव्यवहारहेतुं समाधत्ते = उत्पादयतीत्यर्थः। अत्र प्रजात्वेन सामान्यरूपेण सृष्टेरुक्तत्वात्, ब्राह्मणत्वादिव्यवहारहेतोर्वर्णस्य पश्चात् वेदबोधादिगुर्णकर्मभिः आधानकथनाच्च, जन्मना न जातिः, किन्तु गुणकर्मभ्यामेवेति निर्धार्यते। 'क्षत्रिये तेज उत्तमम्' इत्यादावपि पूर्ववद्योजना कार्या।

वर्णः = प्रकाशात्मक इति वा। अत्र गुण एव वर्ण इति

स्पष्टमुक्तम् । एकैकस्याः सर्वस्याः प्रजायाः जनकत्वात् तद्गत-तत्तद्गुणभाक्त्वं प्रजाप्रतावपि विद्यत एव । कार्यगुणानां कारणे विद्यमानत्वनियमात् । वेदबोधादिरूपगुणाधानात्पूर्वं ब्राह्मणत्वाद्यभावाच्च 'ब्राह्मणे वेदबोधं समाधत्ते' इत्यादिवाक्ये ब्राह्मणादिपदानि ब्राह्मणत्वाद्यर्हपराणीति निश्चेतुं शक्यते । प्रजापतेर्भिन्न-भिन्नवर्णप्रयोजकैकैकगुणभाक्त्ववचनात्तस्यापि च चतुर्वर्णत्वं प्रतिपादितमस्ति । ततश्च एकवर्णापेक्षया मिश्रवर्णत्वं, तत्रापि मिश्रचतुर्वर्णत्वं श्रेष्ठमिति विज्ञाप्यते ।

ननु–'सुगन्धा ब्राह्मणी भूमिः, रक्तगन्धा तु क्षत्रिया । मधुगन्धा भवेद् वैश्या, मद्यगन्धा च शूद्रिणी ॥' एवं वृक्षसर्पगजादिष्वपि ब्राह्मणत्वादिवर्णानां विधानं दृष्यते । अतो जन्मतः एव वर्णव्यवस्थाऽङ्गीकर्तव्या, न तु गुणकर्मादिभिः इति चेन्नैवम्–

अत्र तु स्पष्टतो गुणकर्मवाद एव प्रतीयते, न जन्म जातिवादः । तथाहि–प्रत्यक्षां भूमिमुद्दिश्य तत्र सुगन्धगुणद्वारा ब्राह्मणीत्वं विधीयते, एवं रक्तगन्धगुणद्वारा तस्यां भूमौ क्षत्रियात्वं, मधुगन्धगुणद्वारा तस्यां वैश्यात्वं, एवं मद्यगन्धगुणद्वारा शूद्रात्वं च विधीयते । न तु प्राक् ब्राह्मणीत्वादिजातिविशिष्टा भूमिरेव सुगन्धा भवतीति ज्ञातुं वा प्रवक्तुं वा समुचितम् । अन्यथा यदि या या हि सुगन्धाभूमिः ब्राह्मणी मन्येत, तदा तस्याः स्वामित्वं, तस्यां निवासशीलत्वञ्च क्षत्रियादीनां कथमपि नैवोपपद्येत । एवमन्यान्यगन्धविशिष्टायाः तस्याः भूमेः स्वामित्वं, तस्याश्च निवासशीलत्वं ब्राह्मणस्यापि कथमपि नैव सिद्धयेत् । तथा च तत्तद्गन्धपरीक्षणपूर्वकतत्तद्भूमिस्वामित्वादिप्रविभागस्य दुष्करत्वमेव संपद्येत ।

ननु—'सर्वेषां जन्मना जातिर्नान्यथा कर्मकोटिभिः । पश्वादीनां यथा जातिर्जन्मनैव न चान्यथा ॥' (शि० मा०ख०-१५।५१) इत्येनन जन्मजातिवाद एवोपदिश्यते, इति चेन्नैवम्—

यथा पशुपक्ष्यादीनां जन्मनैव पशुत्वगोत्वपक्षित्वकीरत्वादिलक्षणाः जातिरभ्युपगम्यते, तथैव सर्वेषां मानवानां मानवत्व जातिः स्वभावसिद्धाः – तत्तदाकृतिगम्या समानप्रसवात्मिका सिद्धयति, कर्मकोटिभिस्तां कश्चनान्यथयितुं न शक्नोति, केनाप्युपायेन स्वकीयां मानवजातिं विहाय पश्वादिजातौ प्रवेष्टुं न प्रभवति । ब्राह्मणत्वादिव्यवहारास्तु न जन्मादिमूलकाः सन्त्यपितु तत्तद्गुणकर्मप्रयुक्तोपाधिबोधकाः - डाक्टरबेरिष्ट-रादिवत् सन्तीति वेदितव्यम् ।

सन्यासिसम्राट्– भारतमहापुरुषस्याभिनवशंकराचार्यस्य स्वामिविवेकानन्दस्य समुदाराः हितकराः सद्विचाराः ।

(इमे सद्विचारास्तावत् गुर्जरदेशीयाहमदाबादनगरस्य सस्तुसाहित्यवर्धककार्यालयात् - स्वाम्यखण्डानन्दसंस्थापितात् प्रकाशितेषु गुर्जरभाषयाऽनुदितेषु 'स्वामी विवेकानन्दः' इतिनाम्ना प्रसिद्धेषु पुस्तकेषु प्रदर्शिताः सन्ति, त एवात्र संस्कृतभाषयाऽनूद्य प्रदर्श्यन्ते)

(१) प्रशस्तहिन्दुधर्मस्य विशालं भवनं—अजेयानुपमाद्वैतवादमेव मूलाधारमवलम्ब्य विनिर्मितम् ।

(२) समस्तसात्त्विकशक्तीनां, सुमतिसंयमेतरधर्मसहिष्णुतोदारतादिसद्गुणानां, समुन्नतविचाराणां पारमार्थिकजीवनस्य च समुदाय एवास्ति स्तुत्यं हिन्दुत्वमार्यत्वलक्षणम् ।

(३) भो ! पावनभारतवास्तव्याः सज्जनाः ! यूयं सर्वे 'वयं हिन्दवः आर्याः स्मः' इत्यनवरतं दृढतमभावनया स्वकीयं हृदयं प्रभावितं कुरुत । वैदिकसमुदारसनातनधर्मस्य विषयेऽपि यूयं दृढाग्रहिणो भवत । तत्प्रशस्तादेशान् यथावद्विज्ञाय तान् विधारयत । तद्विधारणेन यूयं बुद्धिमन्तो बलवन्तः सुखसमृद्धि-शालिनश्च भविष्यथ। अद्यतनप्रवर्तमानदम्भपाखण्डभेदभावाँश्च यूयं दूरमुत्सारयत । तेषामवलम्बनेन यूयं विवेकविचारशून्याः मूर्खाः भविष्यथ । अतोऽहं भवतः सर्वान् समुपदिशामि—प्राचीन-वैदिकसनातनधर्मं यूयमङ्गीकुरुत । यत्र किलोत्तमाधमभावशून्यः समभावः प्रदर्शितोऽस्ति । यत्र खलु - अनेकतासु एकताया उपदेशो विद्यते । यत्र किल तत्तत्स्वभावप्रभवगुणान् तत्तद्योग्यतां विविधां रुचिञ्चानुसृत्य तत्तत्कर्माणि प्रविभक्तानि सन्ति । यत्र किल 'कृण्वन्तो विश्वमार्यम् ।' (ऋ० ९।३।५) 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।' (ऋ० १०।१९१।२) 'समानी प्रपा सह वोऽन्नभागः' (अथर्व० ५।१९।६) 'स्वस्तिपन्था-मनुचरेम सूर्याचन्द्रमसाविव ।' (ऋ० ५।५१।१६) 'यद्भद्रं तन्न आसुव' (ऋ० ५।८२।५) 'ते अज्येष्ठा अकनिष्ठास उद्भिदोऽ-मध्यमासो महसा विवावृधुः, सुजातासो जनुषा पृश्निमातरः ।' (ऋ० ५।५९।६) 'सह नाववतु सह नौ भुनक्तु' (कृ. तै. २।१।१) इत्याद्याः समुदाराः समाजराष्ट्रहितकराः उद्घोषाः वर्तन्ते ।

(४) विविधासु विद्यासु वित्तेषु संस्कारेषु च खलु—अमुकवर्ग-विशेषस्यैवाधिकारः स्वामित्वञ्चास्तीति न मन्तव्यम् । स्वस्व-योग्यतामनुरुध्य स्वस्वप्रबलेच्छाञ्चावलम्ब्य सर्वेऽपि भारतीयाः विविधां विद्यां वित्तं संस्काराँश्चावाप्तुं शक्नुवन्ति ।

(५) श्रीयच्छंकराचार्योऽगाधविशालबुद्धिशाल्यासीत्, अतएव तस्य केवलाद्वैतवादाख्यं भालं समुन्नतं प्रशस्तं मन्ये। परन्तु श्रीमद्रामानुजाचार्यस्य च हृदयं समुदारं संवेदनशीलमासीत्। अकिञ्चनपतितदुःखिमानवेभ्यस्तस्यातीवसहानुभूतिरवलोक्यते।

(६) हिन्दुराष्ट्रस्याभ्युदयाय हिन्दुप्रजानां मस्तकं तावद् वेदान्तस्याद्वैतभावेन पूर्णं कर्तव्यम्। एवं परिशिष्टं शरीरं इस्लामस्य समानबन्धुभावेन च विभूषितं विधातव्यम्।

(७) यत्र किल समानो धर्मो व्यवसायस्तत्तद्गुणकर्मस्व-भाववर्णानां साम्यञ्चावलोकितं स्यात्, मिथो युवकयुवत्योश्च प्रेमसम्मतिश्च भवेत्, तत्र तत्तज्जादिभेदं प्रान्तभेदञ्च समुपेक्ष्य विवाहस्यानुमतिमहं ददामि।

(८) अस्माकं देशे भारते वर्णाश्रमसुद्दिश्य भूयसी चर्चा प्रवर्तते। पक्षविपक्षौ चाश्रित्य विविधाः कोलाहलाश्च प्रादुर्भ-वन्ति। परन्तु-अहं भवतः पृच्छामि-वर्णाश्रमशब्दस्य कोऽस्ति वास्तविकोऽर्थ इति भवन्तो विजानन्ति। सम्प्रति भारते वास्तविकार्थविभूषिताः ब्राह्मणादयश्चत्वारो वर्णाः विद्यन्ते किं ? अहन्तु दत्तद्गुणकर्मालङ्कृतान् चतुरो वर्णान् विभक्तान् नैव पश्यामि। अस्माकं बंगदेशे विद्यते काचन किंवदन्ती—'मस्तकन्तु नास्ति, तथापि तत्र वेदना प्रवर्तते' इति। एवं चतुर्णां वर्णानां वास्तविकं नास्त्यस्तित्वम्, तथापि चतुरो वर्णानुद्दिश्य विविधा-चर्चाः कलहाश्च समुपतिष्ठन्ते।

'कलावाद्यन्तयोः स्थितिः' इति वचनेन यदि भारते ब्राह्मणाश्चैव शूद्राश्च विद्यन्ते, तर्हि क्षत्रियाः वैश्याश्च कुत्र गताः ? इति तावद्वक्तव्यम्। यदि कुत्रापि स्तः तौ, तदा

हिन्दुधर्मनियमानुसारेण ताभ्यां वेदाध्ययनस्य यज्ञोपवीतधारणस्य च कथं गुरुत्वाभिमानिनो ब्राह्मणा आज्ञां न ददते ? । यदि देशेऽस्मिन् तौ न स्त एव, केवलं ब्राह्मणाश्च शूद्राश्चैव वर्तन्ते, तदा शास्त्रादेशानुसारेण-अस्मिन् शूद्रप्रधाने देशे ब्राह्मणैः कदापि निवासो न कर्तव्यः, भारतं विहायान्यत्र गमनं कर्तव्यम् । अन्यत्र कुत्र ? समुद्रे । तं विहायान्येषु देशेषु तु विधर्माणो म्लेच्छाः शूद्रादपि हीनतमाः वसन्ति, तस्मात्तेषां समुद्र एव गतिः ।

(९) सत्ययुगे तावत् एकमात्रं ब्राह्मणज्ञातिः आसीत्, नान्यास्तद्भिन्ना ज्ञातिः समवर्तत । पश्चात् विभिन्नशिक्षारक्षाकृषिवाणिज्याद्युद्योगश्रमादिव्यवसायानुसारेण शनैः शनैः आर्यप्रजाः अनेकज्ञातिभिर्विभक्ताः बभूवु । अतो ब्राह्मणक्षत्रियादिज्ञातिभेदे विभिन्नो व्यवसाय एव यथार्थं प्रयोजकं कारणं मन्तव्यम्, नान्यत् । भविष्यत्यपि सत्ययुगेऽनेका विभिन्ना ज्ञातिः-एकस्मिन्नेव समभावपूर्णे स्नेहबन्धने आर्यभावे च संमिलिता भविष्यतीत्यहं मन्ये । एवं सति तदा भारते विद्यमानस्य ज्ञातिभेदरूपमहाप्रश्नस्य निर्णयः सम्प्रत्यपि भवितुमर्हति, यदा-समुन्नतवर्गस्थब्राह्मणादीनामवनतिमकृत्वाऽधःस्थितानां समुत्कर्षं विधाय ब्राह्मणकोटिप्रवेशः साधनीयो भवेत् ।

(१०) यद्यप्यस्मिन् देशे ब्राह्मणादिजातिस्तत्तद्वंशगता विद्यते, सामाजिकनियमोऽप्येतादृशो दृश्यते । परन्तु तत्सिद्धिप्रयोजकं तद्भावसंधारणं तत्तद्गुणकर्मभेदमनुसृत्यैव मन्तव्यम् ।

(११) स्वस्थप्रशस्तशरीरसम्बन्धरूपक्षेत्राणां विस्तारेण तत्तद्विशिष्टवंश्यानां रक्तसंयोगेन च हिन्दुसमाजस्य नूनमभ्युदयो भविष्यति, तत्तद्रोगाद्यनर्थाश्चास्तं गमिष्यन्ति ।

विविधयोग्यशिक्षाप्रयोजितेन स्तुत्यचारित्र्येण, शारीरिकमानसिकबलेन, समुदारविशालबुद्ध्या, राष्ट्रीयसमभावनया स्वावलम्बनेन च स्वस्थप्रशस्तसमाजशरीरस्य निर्माणं कर्तव्यम्।

(१२) उत्तमवर्णाभिमानिभिः अल्पसंख्यकैः— अधमवर्णवतां स्त्रीशूद्रान्त्यजादीनां बहुसंख्यकानां कृता योपेक्षा तिरस्कारश्चाहं हिन्दुधर्मस्य भारतराष्ट्रस्य च महत्पातकमस्तीति मन्ये। हिन्दुसमाजस्यावनतेर्विविधकारणेषु-इदं बृहत् कारणमस्तीति च।

अतः—इमे किलाधमवर्णवन्तः-अकिञ्चनाः योग्यशिक्षणाभावात् अधःपतिता अपि मम प्रियदेश—पावनार्यधर्म-स्तुत्यहिन्दुज्ञातिबन्धव एव सन्तीति दृढं मत्वा तेषामभ्युदयायोत्तमवर्णाभिमानिभिः सदा प्रयतितव्यम्।

(१३) सर्वैरपि हिन्दुभिः- ये केऽपि स्युः- अवनता वा उन्नता वा- तैः पक्षपातं विहाय-ॐ कारस्य पवित्रमन्त्रस्योच्चारणं कर्तव्यम्। पावनगायत्रीमन्त्रस्य च जपो विधातव्यः। अवनतानां विकृतानाञ्च हिन्दूनामुन्नतये संस्काराय चोन्नतैः संस्कृतैर्हिन्दुभिः सर्वथा प्रयतनीयम्। वेदादिशास्त्राणामध्ययनमबाधितगत्या सर्वेऽपि हिन्दवो यथा कुर्युस्तथा सहायो विधातव्यः। प्रशस्तार्यभावस्य स्तुत्यार्यसंस्कृतेश्च हिन्दुस्थानवास्तव्येषु सर्वेषु जनेषु प्रचारः प्रसारश्च कर्तव्यः।

(१४) भारते खलु मुसलमानानां कृश्चियनानाञ्च संख्याऽभिवर्धते तत्र हिन्दूनामेव दोषो विद्यते। यतस्तैः समुन्नतैः शिक्षितैर्हिन्दुभिः सामान्याकिञ्चननिम्नकोटिभ्यो हिन्दुभ्यो धर्मसद्व्यवहारादिविषयकशिक्षायाः प्रशस्तं दानं विस्मृतम्। तेषां तैर्महती कृतोपेक्षा सम्प्रत्युपलभ्यते। अतस्ते तेषु विधर्मिषु संमिलिताः भूत्वा तेषां

संख्याभिवृद्धि कुर्वते ।

भारते विशाले इस्लामादेर्विस्तृतप्रचाराय हिंदूनां तत्तद्विभिन्नोच्चावचजातीयप्रथात्मकमेव प्रबलं कारणमवलोकितम् । येषां किल निम्नकोटीनां लोकानां हिन्दुसमाजे समाना कक्षाऽलब्धा आसीत्, तैरेवातिद्वेषेण हिन्दुजातिं तिरस्कृत्यातिप्रेम्णा स्वकीयौ बाहू प्रसार्य इस्लामादेः स्वागतं कृतम् । अतो विज्ञायते इस्लामादिविस्तारशक्तेः प्रधानं कारणं तत्र जातीयभेदभावाभावप्रयोजितं समानबन्धुत्वमेव। अतो भारतस्यानेकैः कोटिकोटिभिर्हिन्दुभिः—हर्षेण वा लोभेन वा भयेन वा इस्लामादेः स्वीकारः कृतः । अतएव काश्मीरादिप्रदेशे-इस्लामादिस्वीकर्तृषु हिन्दुब्राह्मणपण्डितक्षत्रियादीनां काटजु-किचलु-बक्षि-राजपुत-प्रभृतय उपाधयः संप्रत्यपि समुपलभ्यन्ते ।

हिन्दुधर्मानुयायिनां समुन्नतानां प्रकृष्टो धर्मस्तु जलकुंभादौ भोजननिर्माणस्थले च महानस एवावलोक्यते । तेषामीश्वरास्तु भोजननिर्माणजलादिपात्राण्येव सन्ति । वृद्धाश्च पण्डिताः जलपानं केन हस्तेन कर्तव्यं ? वामेन वा दक्षिणेन वेत्यादिनिकृष्टप्रश्नानां निराकरणाय समग्रं जीवनं समर्पयन्ति । परन्तु-अवनतानां विकृतानां हिन्दूनां समुद्धाराय, संस्काराय, ज्ञानप्रदानाय च नैव प्रयतन्ते ।

(१५) सर्वेषु देशेषु तावत् पुरोहिताः धर्मगुरवश्च प्राचीनरूढिवादमेवाश्रित्य स्वानुयायिनो लोकान् उपदिशन्ति । ते तु दुराग्रहवशात् देशकालपरिस्थित्यादीन् न विचारयन्ति, विकृतस्य रूढिवादस्य संशोधनाय समाजस्य राष्ट्रस्य चाभ्युदयाय न प्रवर्तन्ते ।

(१६) इस्लामधर्मस्य सर्वत्र बाहुल्येन प्रचारोऽभूत्, संप्रत्यपि भवति, तत्रेदमेव कारणं स्पष्टतोऽवलोक्यते। सर्वेऽपि जनास्तत्राबाधितगत्या प्रविविशुः प्रविशन्ति च। कस्यापि देशस्य, कस्यापि धर्मस्य च, कोऽपि मानवो रूपतः कृष्णो वा गौरो वा पीतो वा स्यात्, हीनो वाऽधमोऽपि वा स्यात्, तेन यदैकवारं कल्मो पठित्वा मुसलमानधर्मस्याङ्गीकारः कृतस्तदा सम्पूर्णः इस्लामसमाजः तं स्वकीयं भ्रातरं मत्वा प्रेम्णा समुदारहस्तेन तं गृह्णाति, अनुगृह्णाति च। तेन साकं भोजनविवाहादिव्यवहारेऽपि भेदभावं नैव मनुते। कश्चनोऽशिक्षितः आरण्यकः सर्वथा निम्नतमोऽपि स्यात्, तेन सह भोजनकरणाय सर्वोच्चमुसलमानबादशाहोऽपि नैव कामपि बाधामनुभवति। यदि तत्र बुद्धिप्रतिभादिप्रयुक्ता योग्यताऽवलोक्येत, तदा श्रेष्ठतोऽपि श्रेष्ठतमा पदवी तस्य कृतेऽप्राप्या नैवावतिष्ठते। इति तस्य धर्मस्य महदौदार्यमेव सर्वत्राकर्षकं विद्यते, तस्माद्वैपरीत्यं हिन्दुधर्मे दृश्यते, स्वार्थान्धताप्रयुक्तं कार्पण्यमेवावलोक्यते, अतएव हिन्दुधर्मस्यान्यत्र प्रचारो नाभवत्। स्वदेशेऽपि तस्य महान् ह्रासोऽवलोकितः। *

परन्तु मुसलमानधर्मस्येदृशो भ्रातृभावः, इतरधर्मानुयायिनः प्रेक्ष्य 'प्रचण्डसूर्यालोके पतितस्य हिमखण्डस्येव' विलीनो भवति। तेषु तु भ्रातृभावविरुद्धं शत्रुभावमेव ते तन्वन्ति।

---

* अतएव पंजाबकेसरि-प्रसिद्धदेशभक्त-लालालाजपतरायस्य पिताऽग्रवालमहोदयो मुंशीराधाकृष्णोऽपि-इस्लामधर्मं ग्रहीतुं मस्जिदस्य सोपानमारुरोह, परन्तु तत्पत्न्या प्रतिरुद्धो तत्र प्रवेष्टुं न शशाक इति तदितिहासो वर्ण्यते।

इतरधर्मालयानपि प्रकृष्टद्वेषबुद्धया खण्डयितुं प्रवर्तन्ते। इतरधर्मानुयायिनं काफिरं दुष्टं मत्वा तं हन्तुमपि नैव संकोचमनुभवन्ति। एवमिसाईमतस्यापि- 'सर्वेऽपि जनाः तस्य महतः पितुः सन्तानाः सन्तीती' दृशः समुदारो भावः अन्यधर्मावलम्बिनो जनान् दृष्ट्वा सप्तसमुद्रानप्युल्लंघ्य प्रपलायते। तदपेक्षया हिन्दुधर्मानुयायिषु इतरधर्मावलम्बिनां कृते महत् औदार्यं अवलोक्यते।

(१७) उपनिषदां लेखकाः विशेषतः क्षत्रियाः आसन्। गीतायाः गायकः श्रीकृष्णस्तु क्षत्रियप्रवर एव। अतस्तेषां सदुपदेशाः समस्तमानवं प्रति समभावपूर्णाः अमुकजातिं प्रति पक्षपातलक्षणेन दुर्भावेन रहिताश्चासन्। तेभ्यो वैपरीत्यं-ब्राह्मणाचार्योपदेशकेषु लक्ष्यते। तत्र स्वजातीयपक्षपातः स्वकीयश्रेष्ठतावादः प्रबलभेदभावश्च दृश्यते। ते चामुकविशिष्टजातिष्वेव धर्मोपदेशाध्ययनादेर्मर्यादां, तत्तदधिकारविशेषस्य च नियममुपदिदिशुः। ईश्वरावताररूपेण संमानिताः श्रीरामकृष्णबुद्धादयो जन्मतः क्षत्रिया एवासन्।

(१८) अस्मिन् जगति-अद्वैववेदान्तधर्म एव सर्वश्रेष्ठः सार्वभौमधर्मोऽस्ति निःसंशयम्। स एव विवादविरोधरहितो नित्यसत्यपूर्णोऽस्ति। अतोऽखिलविश्वस्य प्रधानो वेदान्त एव समुद्धारको धर्मो भविष्यतीत्यहं मन्ये। समस्तचराचरविश्वेन साकं स एवैकत्वसमत्वप्रतिपादकोऽस्ति।

परिव्राजकाग्रगण्यो-बालब्रह्मचारी-स्वामिविवेकानन्दः
तस्य चौजस्विनी-अमरवाणी-प्रबलशक्तिप्रदायिनी

सुसमृद्धसुशिक्षितयुरोपामरीकादिदेशवास्तव्यानां पाश्-

चात्यानां गर्वोन्नतं मस्तकं-भारतीयवैदिक-समुदाराद्वैतवेदान्त-ज्ञानस्य गुरुतायाः समक्षं सर्वतः प्रथमं येन भारतीयपरिव्राजक-महापुरुषेण स्वामिविवेकानन्देन सुतरामवनतं कृतम् । येन किल शिकागोनगरस्य सर्वधर्मसंमेलनावसरे भारतीयाद्वैतवेदान्तस्य समुदात्तः सर्वलोकहितसुखकरः सदुपदेशः—आकर्षकमनोहरविल-क्षणपद्धत्या कृतः । स खलु युरोपादिदेशस्थसुशिक्षितजनतायाः हृदयपटले शाश्वतरूपेण समङ्कितो बभूव ।

स्वामी विवेकानन्दः—दीनहीनरुग्णदरिद्राणां भगवद्-बुद्ध्या कृता या सेवा, सा भगवत्सेवैवास्तीति यथार्थं मेने । स किल सर्वान् समुपदिदेश—हे भ्रातरः ! यूयं ब्रूत—ये हि क्षुधिताः नग्नाः अशिक्षिताः अस्पृश्याश्च भारतीयाः जनाः सन्ति, ते नूनं मम भ्रातर एव सन्तीति । विशालस्य भारतस्य यत्सर्वगतं हितमस्ति, तन्ममैवास्तीति मनुध्वं । अहर्निशं तामेव प्रशस्तां प्रार्थनां कुरुध्वम्—'हे महाशक्ते ! परमात्मन् ! मम दुर्बलतां दूरीकुरु, मम च नरवीररूपेण सर्जनं विधेहि' इति । अतः स्वामी विवेकानन्दो वस्तुतः ईदृश एव नरवीरो महापुरुष आसीत् ।

भारतीयजनेषु विविधज्ञानबलादिशक्तिलाभसाधनार्थं प्रियदेशोद्धाराय च येन तरुणसंन्यासिना बालब्रह्मचारिणा प्रियदर्शनेन विवेकानन्देन वेदान्तस्य व्यावहारिकमीमांसायाः महत्त्वं सर्वतः प्रथममनुभूतम् । स एव प्रथमः संन्यासी आसीत्, येन किल वेदान्तग्रन्थानां शुष्कसिद्धान्तचर्चायाः सामाजिक-समुन्नतजीवनस्य सुव्यवस्थायां सर्वोदयप्रयोजिकायां सरस-स्रोतोरूपेण विनियोगः कृतः ।

अतः स्वामी विवेकानन्दः सुदृढात्मविश्वासशाली,

सिद्धमहापुरुषो भविष्यद्द्रष्टा चासीत् । येन किल प्राक् कथितं- देशस्य स्वतन्त्रतां लब्ध्वाऽपि यदि भारतीया जनाः शक्तिशालिनो नैव भविष्यन्ति, तदा बर्बरो चीनदेशो भारतस्योपरि समाक्रमणं करिष्यतीति । तस्य कथनं सर्वथा प्रामाणिकं सत्यं सम्पन्नम् । तस्य महापुरुषस्य तत्कालीना अमरवाणी संप्रत्यपि अस्माकं कर्णकुहरेषु प्रतिध्वनिरूपेण गुञ्जायमाना भवति ।

देशस्य परतन्त्रतादिवसेषु तेन महापुरुषेण समग्रस्य राष्ट्रस्य शक्तिसंचयाय बललाभाय चाह्वानं कृतम् । तेन किलोच्चतमस्वरेण राष्ट्रस्य युवकेभ्यः इत्थं सदुपदेशो विहितः । हे मदीयाः साहसशौर्यप्रज्ञाशालिनो युवकबन्धवः ! यूयं विश्वासं कुरुत, भवन्तः किल राष्ट्रसमाजाभ्युदयसाधकं महत् प्रशस्तं कार्यमेव कर्तुमस्या अवन्याः तले समागताः सन्तीति । अतस्सृगालानां मिथ्याभर्त्सनैर्भयभीता मा भवन्तु । कामं शिरसि वज्रपातोऽपि भवतु । तथापि भवन्तो निर्भयाः सन्तः स्वकार्यकरणाय सदा सन्नद्धा एव तिष्ठन्तु । देशाभ्युदयाय धीराणां वर्तते आवश्यकता । अतो भवन्तो धीराः वीराश्च पर्वतवत् सुनिश्चलाश्च भवन्तु । 'सत्यमेव जयते नानृतमि' ति श्रुत्युद्घोषं सर्वत्र तन्वताम् ।

भारतोऽभिलषति-विद्युच्छक्तिमभिनवाम् । या किल राष्ट्रस्य सर्वासु नाडीषु नूतनजीवनस्य सपदि संचारं कुर्यात् । अतो यूयं नूतनजीवनलाभाय साहसधैर्यशौर्यप्रतिभाशालिनो भवत । मानवः सकृदेव मृत्युमालिङ्गति । अतो मदीयाः शिष्याः भीरवः कातराः शयालवश्च मा भवन्तु । अहं किल भयकातर्यादितो घृणां करोमि ।

गम्भीरतमकठिनतमपरिस्थितिष्वपि यूयं स्वकीयं मानसिकमव्यग्रत्वलक्षणं संतुलनं सदा धारयत। क्षुद्रा अबोधाश्च जनाः भवद्विरुद्धं किं किं प्रलपन्ति, तत्र लेशतोऽपि दृष्टिपातं मा कुरुत। तस्य प्रलापस्य तु सर्वथा क्षमौदार्यभावेन समुपेक्षा विधेया। विचारयत यूयं—संभाषणशीलं मुखं केवलमेकमस्ति, परन्तु अवलोकनशीले नेत्रे द्वे स्तः, अतश्चक्षुर्भ्यां यूयं द्विगुणितमवलोकनं कुरुत। तथापि मुखेन मितं यथार्थं हितकरमेव वदत। पर्वतसदृशविघ्नबाधाभिः संकुलिते मार्गेऽपि गच्छन्तो भवन्तः स्वकीयं प्रारब्धं राष्ट्रसमाजाभ्युदयसाधकं महत् कार्यं यथार्थरीत्या सम्पादयन्तु। स्वकीयं स्तुत्यं पौरुषं प्रकटयन्तु। कामकाञ्चनयोः समासक्ताः मोहान्धाः जनाः सर्वथा समुपेक्षणीया एव।

भवन्तः कथं रुदन्ति ? भो बन्धवः ! भवत्सु समग्रा शक्तिर्निहिता वर्तते, इति विश्वासं भावनाञ्च कुर्वन्तु। अतः स्वकीयां निखिलशक्तिमतीं चैतन्यभूतां परां प्रकृतिं समुद्बुद्धां कुर्वन्तु। द्रक्ष्यन्ति, अखिला विश्वसृष्टिरियं भवतां चरणयोर्लुण्ठिता भविष्यति। अस्यां किलैकमात्रस्यात्मन एव प्रशासनं प्रवर्तते, नान्यस्येति निश्चयेन विजानन्तु। जडाः देहादयः पदार्थाः चैतन्यसत्तां विना कथं शासनं कर्तुं शक्नुयुः ?।

स्वं शरीराज्जडादभिन्नं मन्वानाः मूर्खजनाः एव करुणोच्चस्वरेण प्रलपन्ति-वयं दुर्बलाः स्मः, शक्तिहीनाश्चेति। अतोऽधुना देशेऽस्मिन् आवश्यकता वर्तते, साहसस्य वैज्ञानिकप्रतिभायाश्चेति। वयमभिलषामः—प्रबलं साहसं, प्रचण्डां शक्तिं, अदम्यमुत्साहञ्च। क्लीबजनोचितदुर्बलव्यवहारेण कस्यापि कार्य-

स्य सिद्धिर्नैव भविष्यति । सौभाग्यलक्ष्मीः तस्यैव वीरपुरुषस्य समीपे समागच्छति, तमेव चादरेणाभिवृणोति, यः किलास्ति पुरुषार्थी, यस्य च हृदयं बोधवलोत्साहसमन्वितं सिंहसदृशं वर्तते ।

लक्ष्यलाभाय भवन्तोऽग्रमेवाग्रं गच्छन्तु । यदा वयमिच्छामः, सम्पादयामश्च-अनन्तशक्तिं, असीममुत्साहं, प्रबलं साहसं, महत् धैर्यञ्च । तदैव महान्ति कार्याणि सेत्स्यन्ति ।

वेदान्तः पापवार्तां नैव मनुते । स किल विस्मृतिलक्षणां त्रुटीमेव स्वीकरोति । तन्मतेन भवन्तः सर्वतो महतीं त्रुटीं तदैव कुर्वन्ति, यदा कथयन्ति-भवन्तः, अहं दुर्बलोऽस्मि, शक्तिहीनोऽस्मि, अहमस्मि च पापी । कश्चनाहमस्मि जीवो दुःखी, नास्ति मयि कस्यापि कार्यस्य करणाय सामर्थ्यमिति ।

प्राचीनाः उपदेशकाः ऊचुः—सः नास्तिकोऽस्ति, यः खलु ईश्वरे विश्वासं नैव करोतीति । परन्त्वभिनवा उपदेशकाः वदन्ति-स एव नास्तिको वेदितव्यः, यः किल निखिलशक्त्यधिष्ठाने स्वात्मनि विश्वासं नैव बिभर्ति, बलमेवास्ति जीवनं, दुर्बलतैवास्ति मृत्युः, बलमेवास्ति परमानन्दः, शाश्वतममरजीवनञ्च ।

दुर्बलता निरन्तरं विद्यते भारस्वरूपा दुःखरूपा च । बाल्यादारभ्यैव भवन्मस्तकेषु बलप्रदाः अभ्युदयप्रयोजकाः रचनात्मकाः सहायकाश्च विचारा एव प्रविशन्तु । दुःखभोगस्यैकमात्रं प्रधानं कारणमस्ति दुर्बलता । वयं दुःखिनो भवामः, यतो वयं दुर्बलाः स्मः । वयमनृतं वदामः, चौर्यं हत्यां विविधान् अपराधांश्च कुर्मः, किं कारणम् ? यतो वयं दुर्बलास्मः । वयं

दुःखं भुञ्ज्महे, वयं मृताः शवकल्पाः भवामः, विविधाञ्च व्यग्रतामनुभवामः, कस्य हेतोः ? यतो वयं दुर्बलाः स्मः ।

यत्र किल दुर्बलताप्रयोजकं न किमपि बीजं पश्यामः, यत्र खलु नास्ति मत्युः, न चास्ति दुःखं पापञ्च स एवाहमस्मि, प्रबलशक्तिनिधान आत्मा ब्रह्म, इति भवन्तोऽहर्निशं सविश्वासं विभावयन्तु ।

उत्तिष्ठन्तु, साहसिकाः शक्तिमन्तश्च भवन्तु । निर्भयाः सन्तः समग्रमुत्तरदायित्वं भवन्तः स्वस्कन्धेष्वेव वहन्तु । निश्चयेन विजानन्तु-वयमेव स्वसौभाग्यस्य विधातारः स्म इति ।

भवद्भिः किमपि बलमपेक्ष्यते, कापि सहायता चाभिलष्यते । तत्सर्वं किल भवत्स्वेव निहितं वर्तते, अतएव स्वकीयं भद्रं भवितव्यं भवद्भिरेव निर्मातव्यम् ।

ईदृशस्य भद्रस्य, विश्वासस्याभयस्य, शक्त्यवतरणस्य च न केवल उपदेशो विहितः स्वामिना विवेकानन्देन, किन्तु तेषां व्यावहारिक-क्रियात्मकोदाहरणानि, तेन स्वकीयप्रशस्तजीवनादर्शेऽपि प्रदर्शितानि । अत आधुनिके युगे वर्तते स्वामिविवेकानन्दरूपेण स्तुत्योपलब्धिः, अस्माकं महतः सौभाग्यस्य विज्ञापिका, यस्य संन्यासिसम्राट्-भारतमहापुरुषस्य समक्षं न केवलं कार्यसिद्धयः किन्तु विश्वशक्तयोऽपि स्वशिरोऽवनतिं कुर्वन्त्योऽवतिष्ठन्ते ।

येन यशस्विना किल महापुरुषेण भारतस्य पराधीनतासमये, अध्यात्मतत्त्वज्ञानस्य वैदिकार्योदारसंस्कृतेः स्वराष्ट्रस्वाधीनतायाश्च कृते जागरुकाः हितकराः पावनमन्त्राः उपदिष्टाः । महात्मा स्वामी विवेकानन्दो भयविसर्जनपूर्वकः सद्विश्वासशक्ति-

साधकः आसीत् । प्रशस्तजीवनस्य तद्द्वयं-विश्वासश्च शक्तिश्च आधारभूतं मेने । विश्वासास्थयोरभावे शक्तिभक्त्योः प्रादुर्भाव-एव न भवति । तद्द्वयस्य लाभादेव तयोः आविर्भावः स्वत एव सम्पद्यते । विश्वास एवास्तिस्वकीयमात्मबलम् । तस्याराधनात-एव शक्तिसाधना स्वत एव सिद्धयति ।

सर्वतः प्रथमो भारतीयः संन्यासी स्वामी विवेकानन्द-ईदृश एक एवासीत् । येन खलु वेदान्तस्य जटिलता सर्वसाधारणजनतायाः कृते सुलभा कृता । येन किलास्मभ्यं सरलभाषयोपदिष्टम्-अविनाशिनी-पूर्णानन्दमयी व्यापिनी चैतन्यशक्तिः एव सम्पूर्णस्य चराचरस्य जगत आत्मा कारणञ्चास्ति । सा शक्तिरेव मानवानां कृते सर्वतः श्रेष्ठः शान्तिसुखकरः शाश्वतो निधिर्वर्तते । तां विना मानवजीवनं व्यर्थं सामर्थ्यहीनञ्च भवति । तामाविर्भूतां शक्तिं स एव साधको लब्धुं शक्नोति । यः किल वेदान्तस्य गीतोपनिषदादेः समुदारान् सिद्धान्तान् प्रेम्णाऽभिवृणोति । लोकव्यवहारेऽपि विषमताविषनिरासाय समभावामृतपानाय चताननुसरति । तेषां संरक्षणाय विपुलप्रचाराय च प्रतिज्ञां प्रयत्नांश्च करोति । शक्तिसाधकः सिद्धान्तानुरागी च मानवो महान् विश्वात्मा जगद्गुरुर्भवति ।

तस्य प्रशस्तवेदान्तसिद्धान्तोपदेशकस्य महापुरुषस्य स्वामिविवेकानन्दस्य तपोभूमिः पावनसाधनास्थलमेकं कन्याकुमारीतीर्थेऽपि दक्षिणस्यां दिशि विद्यते । तत्र तत्स्मारकं विशालभवनात्मकं तच्छ्रद्धेयमूर्तिसहितं भारतीयाः सम्पन्नजनाः तत्तत्प्रदेशसर्वकाराश्च कर्तुमधुना प्रयतन्ते, इति महान् प्रमोदावसरः इति ।

परिव्राजकशिरोमणे र्निर्द्वन्द्वस्याद्वैतब्रह्मनिष्ठस्याभिनवशुकदेवस्य ब्रह्मलीनस्वामिरामतीर्थस्य

महोदाराः सदुपदेशाः

(इमे सदुपदेशास्तावत्-गुर्जरदेशीयाहमदाबादनगरस्थ सस्तुसाहित्यवर्धककार्यालयात् स्वाम्यखण्डानन्दसंस्थापितात् प्रकाशिते-गुर्जरभाषया श्री स्नेहज्योतिःस्वामिनाऽनुवादं कृत्वा 'स्वामी रामतीर्थः' इतिनाम्ना अष्टमनवमविभागरूपेण प्रसिद्धे पुस्तके लिखिताः सन्ति त एव संस्कृतभाषयाऽनूद्यात्र प्रदर्श्यन्ते ।)

(१) सामाजिकनिखिलानिष्टानां मूलं कारणं-यथार्थव्यावहारिकज्ञानस्य न्यूनतैवास्ति-अत्र किल शारीरिकश्रमतिरस्कारः, जातिसम्प्रदायेषु प्रकृतिविरुद्धो भेदभावः, मतभेदः, विविधदेशाटनप्रतिरोधः, बालविवाहः, स्त्रीषु च समर्पित-मानसिकशारीरिकभ्रान्त्यन्धकारश्चान्तर्भवन्ति । व्यावहारिकज्ञानस्य दरिद्रतयैव स्वदेशस्य भारतस्याधपतनं संजातम् ।

(२) पुराणवादिनः स्वभूतकालमेव समाददानाः विकासशीलं वर्तमानमुपेक्षमाणाश्चावलोक्यन्ते । ते दुराग्रहास्तथैव तिष्ठन्तु, परन्तु भवन्तो विचारयन्तु—

किमसत्यमुपादाय स्वराष्ट्रस्य समुद्धारं भवन्तः करिष्यन्ति ? लोकान् गाढान्धकारे प्रक्षिप्य तेषु एकतां संघटनञ्चोत्पादयिष्यन्ति किम् ? । मिथ्याविश्वासैः, भ्रान्तिमयरूढिबन्धनैश्च राष्ट्रीयैकतां कथं साधयिष्यन्ति ? ।

सर्वेषामपि नौवाहकानां-तस्यामेकस्यामेव दिशि सा दिक् यद्यपि लक्ष्यविपरीता, विकासविरुद्धा यथार्थमार्गविमुखाश्च

भवेत् तथापि नौकायाः प्रचालनं किमुचितमस्ति ?, नैव । ईदृशी नौकाऽवश्यमेव मार्गपतितशिलाखण्डप्रचण्डाघातेन विनष्टा भविष्यति । अतः हे राष्ट्रसमाजैकताऽऽकांक्षावन्तो भवन्त ! प्रथमं भवदीयं कर्तव्यमेतादृशमेवास्ति-यत् राष्ट्रसमाजयोर्मध्ये याः याः प्रवर्तमानाः अमानवीयाः प्रथाः सन्ति, ताः सद्यो निराकुरुत । तदर्थं मिथ्यावादिभिः अन्धविश्वासशीलैः- स्वार्थान्धमनोदर्शैश्च कृतस्य गालीप्रदानस्य दण्डप्रहारस्यापि च सहनं मौनधैर्यभावेन च भवद्भिः कर्तव्यम् ।

(३) स्वदेशस्य कल्याणं संकुचितलघुविचारवद्भिर्महापुरुषैः कथमपि नैव सेत्स्यति । किन्तु समुदारसहाविचारवद्भिरेव लघुपुरुषैः तत्सिद्धं भविष्यति ।

(४) योग्ये विवेकविचारशीले वरकन्ये स्वकीयं विवाहं स्वप्रशस्तसम्मत्या यदि कर्तुं नैव शक्नुतस्तदा तादृशं हठाद्वाऽज्ञानाद्वा क्रियमाणमपवित्रं विवाहं वेदमन्त्राः पवित्रं करिष्यन्तीति कथनन्तु दौर्बल्यज्ञापकतयैकत्र तिष्ठतु, परन्तु तादृशविवाहप्रयोजकतया वेदमन्त्राः स्वकीयं प्रशस्तं महत्त्वं परित्यजन्ति । अतो हे भारतीयतरुणजनाः ! भवन्तस्सद्यस्तां समयपरिस्थितिविरुद्धामज्ञानान्धकारग्रस्तां विवाहपद्धतिं प्रतिरुन्धन्तु ।

(५) प्राक् भारतीयब्राह्मणक्षत्रियादिज्ञातिसमुदायः केवलं तत्तत्कार्यविभागलक्षक एवासीत् । तत्र किलैको मनुष्यः शिक्षकधर्माचार्यस्य, द्वितीयः क्षत्रियस्य योद्धुः, तृतीयःकृषिवाणिज्याद्युद्योगस्य, चतुर्थश्च विविधश्रमस्य च कार्यं स्वस्वयोग्यतां रुचिञ्चानुसृत्य कर्तुं शशाक । यस्य यस्य च कृते यद्यत्कार्यं कर्तुमुचितं प्रतिबभौ, यस्मिन् यस्मिंश्च मानवे यस्य यस्य

कार्यस्य च करणाय सामर्थ्यमभूत्, सः सः तत्तत्कार्यं कर्तुं प्रववृते ।

यस्मिन् खलु दुष्टप्रहरणाय शस्त्रप्रयोगस्य शक्तिः आसीत्, सः क्षत्रियो व्यवहृतोऽभूत्, सः किल शिक्षकस्य धर्मोपदेशकस्य प्रशान्तकार्यस्य च कृते योग्यो नैव स्वीकृतः । यश्च आपणस्य वाणिज्यस्य च कार्यं कर्तुं शशाक, तस्य खलु शस्त्रप्रहरणे धर्मोपदेशे च योग्यता नैवाङ्गीकृता । अतस्तदानीन्तनः प्रत्येको मानवः स्वस्वरुचिं च योग्ताञ्चानुरुध्य तत्तच्छिक्षारक्षादिकार्यकरणाय प्रतिरोधरहितोऽभूत् । ईदृशः कार्यविभागस्तु सर्वासु विदेशस्थितासु प्रजास्वपि किं न प्रचलति ?, अमरीकायुरोपादावपि ईदृशस्य कर्ममूलकस्य वर्गभेदस्यास्तित्वमवलोक्यत एव । अत एव महाभारतस्य शान्तिपर्वण्यपीत्थमुक्तं- 'इत्येतैः कर्मभिर्व्यस्ताः (विभक्ताः) द्विजाः वर्णान्तरं गताः' (१८८।११) 'न विशेषोऽस्ति वर्णानां, सर्वं ब्राह्ममिदं जगत् । ब्रह्मणा पूर्वं सृष्टं हि कर्मभिर्वर्णतां गतम् ॥' (१८८।७) इति ।

(६) हिन्दुस्थाने मनुस्मृतिसमाख्यमेकं धर्मपुस्तकं वर्तते । यस्मिन् समये तल्लिखितमभूत् तस्य समयस्यानुसारेण तदानींतनानां लोकानां कृते तत्सहायभूतमासीत् । तस्मिन् पुस्तके खलु प्रत्येकवर्गस्य कृते भिन्नभिन्नविधिविधानानि, विभक्तसूचनादेशाश्च वर्णिताः सन्ति, परन्तु शनैः शनैः कालक्रमेण तत्र पाठभेदाः पाठप्रक्षापाश्च संजाताः, पण्डितैस्तत्तत् श्लोकानां विपरीतार्थश्च कृताः उपलभ्यन्ते, एवं तस्य पुस्तकस्य वर्तमानविकासशीलसमयाद्विपरीता, मिथो विरुद्धा च स्थितिः संजाता । कार्यविभागं विनाऽपि वर्णभेदं सुदृढतया लोकाः मेनिरे ।

वर्णविभागोऽस्ति शाश्वतोऽपरिवर्तनीयोऽसंशोधनीयश्चेति ते हठाग्रहतया स्वीचक्रुः। तस्य कठोरतमैर्नियमैर्भारतीयप्रजायाः चैतन्यं विलुप्तमभूत्। तादृशानामन्धविश्वासमयानां सुदृढनियमानां मिथ्यारूढिबन्धनानाञ्च पालनायैवास्ति मानवजीवनमिति भारतीयाः मेनिरे। इत्थं भारतीयमानवानां यथार्थविपरीताः समतैकतावर्जिताः स्वार्थान्धतापक्षपातशीलाः सर्वे व्यवहाराः कृत्रिमाः संजाताः।

(७) विविधरूढिरीतिबन्धनरूपैः साम्प्रदायिकमतमतान्तररूपैश्च राक्षसैः, भारतीयप्रजानां जागरूकस्य चैतन्यस्य पराभवः कृतः, विशालशक्तेश्च समुच्छेदो विहितः। सर्वत्र भारते-धर्मान्धतायाः यद्वा धर्मानुरागस्यायमेवार्थः—बहिष्कारवृत्ति-निराशावाद-मिथ्याविश्वास-दम्भपाखण्ड-वर्तमानोपेक्षा-पुराणप्रियतादिरूपेणैव प्रचलितोऽभूत्।

भारतीयानां मिथ्याजातिभेदविचारैश्च नितान्तमपेक्षितं संघटनबलं सर्वथा विनष्टम्। नैतिक-आध्यात्मिक-सामाजिक-राजकीयप्रभृतिनिखिलसम्बन्धाश्च विपरीताः संजाताः। प्ररूढजातिबन्धनेन हेतुना यत्र तत्र पक्षपाताः, मतभेदाः, विरोधभावाः, तत्तज्जातिविद्वेषाश्चप्रवर्तिताः अभूवन्। अत एव तत्राभ्युदयलाभाय संशोधनपरिवर्तने चापक्ष्येते। परमेश्वरो विश्वस्रष्टा कदापि-अमुकव्यक्तेः अमुकसंज्ञायाः अमुकजातेश्च पक्षपातं नैव करोति। सः खलु गीतासु ब्रवीति—'समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।' (गी. ९।२९) इति। अतो यः किल स्वाभ्युदयाय कार्यं करोति, स एव विजयश्रिय उपभोगं कर्तुं शक्नोति, यश्च नूनं विविधां शिक्षां गृह्णाति, ज्ञानं बलञ्च

विपुलं सम्पादयति, स एव संग्रामे विजयं प्राप्नोति ।

(८) जातिभेदं कार्यविभागञ्चादाय हिन्दुस्थानस्य निखिलप्रजायाः अधोगतिः कथं संजाता ? इत्ययं प्रश्नः—महतीं पूर्वापरविचारणां जनयति । प्राक् तस्मिन् समये तत्तत्कार्यविभागस्य, मिथः प्रीतिसद्भावसंघटनादीनाञ्च संरक्षणाय ज्ञातिसंस्थायाः योजना महर्षिभिरकारि । परन्तु वर्तमानसमयस्य परिस्थितिस्तस्मात्प्राचीनसमयात्सर्वथा विरुद्धा संजाता । सहस्रवर्षेभ्यः प्राक् ये ये वस्त्रालंकाराः प्रचलिता आसन्, त एव संप्रत्यपि परिधातव्याः इति हठाग्रहो वक्तुर्मौढ्यमेव ज्ञापयति । देशकालवयोऽवस्थाबुद्धिशक्त्यादीनां परिवर्तनमनुसृत्य तत्रापि बलाज्जातं परिवर्तनं यथा सर्वैरप्यभ्युपगम्यते । तथा हिन्दूनां प्राचीनरीतिनियमादीनामपि परिवर्तनं संशोधनञ्चापेक्ष्यते । अतो हिन्दुप्रजायाः संकुचितधर्मान्धशिक्षणपद्धतेः स्थाने राष्ट्रसमाजयोः सर्वाङ्गीणविकासाय समुदारा सर्वाभ्युदयसाधिका यथार्थधर्मनीत्यनुकूला तर्कसंगता काचनाभिनवा पद्धतिर्निर्मातव्या ।

(९) विदेशीयानां मुसलमानानां हिन्दुस्थानविजयस्य प्रयोजकमिदमेकं प्रबलं कारणं गोमातुः प्रकृष्टपूज्यत्वभावनारूपमवलोकितम् । यदा यवनेन महम्मदघोरिणा प्रथमं हिन्दुस्थानोपरि-आक्रमणं कृतं, तदा भारतीयैः शूरवीरैः राजपुत्रैः राजभिः संमिल्य तस्य पराभवः कृतः । पश्चात् तेन हिन्दूनामन्धविश्वासस्यावलोकनं कृतम् । तस्मात्तेन विजयलाभः सद्यः सम्पादितः । वदन्ति किलेतिहासविदः— तेन महम्मदघोरिणा स्वसैन्यस्य सम्मुखे पूज्यानां गोमातृणां सेना संस्थापिता । तां विलोक्य बलिनो वीराः हिन्दुक्षत्रियाः यवनस्थापितानां गवामुपरि शस्त्र-

प्रहारं कर्तुं प्रतिरुद्धाः । हिन्दुभिस्तैः तासां गां संरक्षणाय स्वदेशस्वातन्त्र्यस्य बलिदानं कृतम् । यवनसेनाप्रहारैः प्रतिप्रहारविमुखा हिन्दुसेना पराजिता । स्वतन्त्रो देशो विधर्मिविदेशिदुष्ट यवनपरतन्त्रो जातः । सहस्रवर्षपर्यन्तमनिष्टस्य पारतन्त्र्यस्य विविधाऽसह्या वेदना हिन्दुभिः अनुभूता । सहस्राणां कोटीनामर्बुदानाञ्च पूज्यानां गवां वधः संपन्नः । सहस्रकोटिहिन्दुयुवतीनां शीलापहरणं जातम् । असंख्यहिन्दुमन्दिराणि तैर्दुष्टैर्विध्वंसितानि । दशकोटितोऽप्यधिकाः हिन्दवो यवनरूपेण विकृताः अभूवन् । 'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।' इति यथार्थं हितकरमुपदेशं तिरस्कृत्य स्वकीयान्धविश्वासस्य गर्हणीयं कुफलं लब्धमविवेकिभिर्हिन्दुभिः ।

(१०) आर्याणां हिन्दूनां बुद्धयः सन्ति प्रतिभाशालिन्यस्तीव्राः, आध्यात्मिकज्ञानभक्त्यादिभावना तेष्वतिप्रबला विद्यते उदारतासहिष्णुताकरुणामैत्रीसहानुभूतिपरोपकारप्रभृतयः सद्गुणास्तेषु सहजतयाऽवतिष्ठन्ते । तेषु शारीरिकबलपराक्रमस्यापि च नास्ति न्यूनता । तथापि हिन्दुस्थानस्य हिन्दवो व्यावहारिकसमतैकतासाधकवेदान्तज्ञानस्याभावाद्धेतोः परस्परं काल्पनिकानेकविभागैर्विभक्ताः बभूवुः, भवन्ति च । अतस्तेषां मध्ये एकसमुदायस्य ज्ञानं बलञ्चान्यसमुदायस्य ज्ञानेन बलेन च सह न संयुक्तं, न चोपयुक्तं बभूव, भवति च । अतस्ते दुर्बलाः परतन्त्राः विभक्ताः दीना हीनाश्च संजाताः, पावनहिन्दुस्थानस्य स्तुत्यं गौरवं विनाशयामासुः, विनाशयन्ति च । अतो हिन्दुस्थानस्य गौरवलाभाय लघुताविनाशाय समुद्धाराय च तेभ्यो निखिलेभ्यो हिन्दुभ्यः समतैकतोपदेशकस्य व्यावहारिकवेदान्तज्ञानस्य प्रशस्ता

शिक्षा दातव्या । तया नूनं दृश्यमानाः विविधाः पक्षपाताः, भेदभावाः, रागद्वेषादयः क्लेशाः, मिथ्याज्ञातिविभागपद्धतयश्च विनंक्ष्यन्ति, हिन्दुस्थानस्य समुद्धारोऽचिरादेव संपत्स्यते ।

(११) वंशपरम्परायास्तत्तद्योग्यनियमानुसरणेन, देशकाल-परिस्थितिमनुसृत्य तत्रानुकूलावश्यकसंशोधनपरिवर्तनाभ्याञ्च सामाजिकं जीवनं विकसितं भवति । पशुपक्ष्यादिप्राणिवर्गेष्वपि वंशपरम्परायाः नियमाः सुतरामवलोक्यन्ते । एवं मानवानां शारीरिकं बलमिन्द्रियाणि च तन्नियमाधीनान्येव सन्ति । तथापि विविधशिक्षाप्रभावात् समुचितसंशोधनपरिवर्तनमहिम्न-श्च मानवाः विशिष्टां प्रगतिं कर्तुं, समुन्नतां स्थितिञ्च लब्धुं शक्नुवन्ति । अण्डसमुद्भूताः कुक्कुटशिशवोऽपि स्वमातापितृ-सदृशमेव ज्ञानं लभन्ते । कतिपयपक्षिशिशवस्तु जन्मसमयादेव स्वपूर्वजस्वभावमनुसृत्य मक्षिकादिक्षुद्रजन्तूनां भक्षणं कर्तुं सहसा प्रवर्तन्ते । ते किल स्वपूर्वजानां निखिलाः शक्तीः सहजत-एव प्राप्नुवन्ति । परन्तु मानवसमाजस्तत्तद्विशिष्टशिक्षाभिः समयानुकूलरीतिनियमपरिवर्तनेन च प्रशस्तां समुन्नतिमद्भूतं सामर्थ्यञ्च लब्ध्वा समस्तजगति सुखारामसाम्राज्यं भोक्तुं शक्नोति ।

तथापि कतिपयैर्विवेकहीनैः स्वार्थान्धतापक्षपातपूर्ण-हृदयैर्हिन्दुसमाजशास्त्रिभिर्विविधशिक्षणस्य परिवर्तननियमस्य चावगणनां कृत्वा वंशपरम्परायाः सुदृढनियमान् हिन्दुसमाजे संस्थाप्य विकसितप्रज्ञाशाली हिन्दुसमाजो वनस्पतिवर्गस्यपशु-पक्ष्यादिवर्गस्य च कोटौ समानरूपेण संस्थापितः । ते किल मानवात्मनामनन्तशक्तिषु लेशतोऽपि श्रद्धां नधारयन्ते । शूद्रबालक-

शिक्षणं ब्राह्मणबालकसदृमं स्यादिति ते न मन्वते। शूद्रस्य पुत्रः शूद्र एव तिष्ठतु, वैश्यस्य पुत्रो वाणिज्यमेव करोतु, न ब्राह्मणपुत्रो वाणिज्यं कर्तुं प्रभवति। क्षत्रियस्य पुत्रः क्षत्रियभावमेवासादयतु, इति तेऽभ्युपगच्छन्ति। तेषु वर्तमानां तत्तद्रुचिं तत्तद्योग्यताञ्च ते तिरस्कुर्वन्ति। तस्मिन् विषये ते ईदृशान् आपातरमणीयान् विषमदृष्टान्तान् पुरस्कुर्वन्ति। सारमेयस्य शिशुः सारमेय एव भवति, वटवृक्षः स्वजातीयफलान्येव निष्पादयति, न विजातीयफलानि। कोकिलपक्षिणः शिशुः कोकिल एव भवन् मधुरं रौति इत्यादीन्। परन्तु मानवसमाजे तादृशं नास्ति वैषम्यं, तादृशं वैजात्यञ्च प्रायोनावगन्तुं शक्यते। 'नायोग्यो मनुजः कश्चित् प्रयोक्तैव सुदुर्लभः।' इति शास्त्रीयन्यायेन मानवसमाजोऽस्ति विविधयोग्यतानां प्रभूतशक्तीनाञ्च प्रशस्तो निधिः। अत एव सम्पादिताचरिततत्तच्छुभाशुभगुणकर्मभिः शूद्रो ब्राह्मणतां क्षत्रियतां वैश्यतां, ब्राह्मणश्च शूद्रत्वयवनत्वादिकञ्चावाप्तुं शक्नोतीति हिन्दुशास्त्रेष्वपि समुपदिष्टोऽस्ति यथार्थो निर्णयः। अत एव युरोपामरीकारूसादिदेशानां मनुजसमाजः प्राक् संस्कारशिक्षाविहीनः आरण्यक एवासीत्। तस्य वंशजाः विविधां शिक्षां लब्ध्वा, स्वतन्त्रतत्तत्कार्यपद्धतिञ्चाङ्गीकृत्य शारीरिकस्वास्थ्यशक्तिं प्रकृष्टबौद्धिकप्रतिभां राजकीयसामाजिकादिविविधसामर्थ्यञ्चावाप्याद्यतनदृश्यमानभौतिकविविधाद्भुताविष्कारांश्च कृत्वा तेऽभ्युदयलाभस्य परां काष्ठामवापुः। परन्तु हिन्दुसमाजो वेदान्तविहिताद्वैतज्ञानविरुद्धं प्रबलमनिष्टकरं विविधभेदभ्रममेवाश्रित्य शारीरिकमानसिकसामाजिकराष्ट्रीयाभ्युदयात् पराङ्मुखो भूत्वा स्वात्महत्यामेव कर्तुं

प्रवर्तते । संकुचितानेकज्ञातिविभागपरिधौ आकण्ठं निमग्नो
भूत्वा तर्कासंगतेष्वपि तत्तच्छास्त्रवचनेषु प्रबलां श्रद्धां बध्नाति ।
पाकशालाभोजनादेस्तत्तदाचारधर्मनिवाङ्गीकृत्य मिथ्याज्ञानपा-
शजाले च पतित्वा क्षुद्रव्यर्थंविगतवार्ता एव मदोन्मत्तः सन्
प्रलपतीति हा ! कष्टतरम् ।

विभागचतुष्टयम्

सर्वेष्वपि देशेषु- एकः शिक्षाविभागः, द्वितीयो रक्षा-
विभागस्तृतीयः कृषिवाणिज्याद्युद्योगविभागः चतुर्थश्च श्रम-
सेवाविभागश्च मिलित्वा चत्वारो विभागाः दृश्यन्ते । तत्तादृश-
विभागचतुष्टयं विना कस्यापि देशस्य विदेशस्य च यथावद्व्य-
वस्था सुस्थिरा नहि सम्पद्यते । सर्वस्यापि तदावश्यकताऽनिवा-
र्यतया वर्तते, इत्यत्र नास्ति कस्यापि बुद्धिमतो विवादः । सति
चैवं भारतीयो हिन्दुसमाजोऽपि चतुरस्तादृशान् तान् विभागान्
स्वीचकार, स्वीकरोत्येव च । अतो भारतेऽस्मदीये देशे तावत्
विविधशिक्षाविभागस्य संचालकाः शिक्षकाः विविधबोधाढ्याः
आदर्शचरिताः ब्राह्मणपदवाच्याः, रक्षाविभागस्य च संचालकाः
रक्षकाः बलशौर्यसमन्विताः विविधशस्त्रास्त्रप्रवीणाः वीराः
सिंहपदाभिधेयाः क्षत्रियनामवाच्याः; कृषिवाणिज्यविविधयन्त्रा-
लयाद्युद्योगविभागसंचालकाः- उद्योगपतयो बुद्धिधनवैभवसम्प-
न्नाः पोषकाः वैश्यनामाभिधेयाः, एवं श्रमसेवादिविभागसंचा-
लकाः सेवकाः विनयादिसम्पन्नाः शूद्रपदवाच्याश्च बभूवः,
भवन्ति भविष्यन्ति च ।

तथा चास्मिन् विषये निष्पक्षविचारकाणां राष्ट्रैकता-
समताकामानामिदृशः प्रश्नः समुपस्थितो भवति । यदेतादृश-

विभागचतुष्टयस्य प्रयोजकं किं मन्तव्यम् ? । किं भारतेऽपि युरोपामरीकादिविदेशवत् तत्तद्भिन्नभिन्नयोग्यतारुच्यादिकमनुसृत्य तत्तद्गुणकर्मानुसारेण विभागचतुष्टयं स्वीकर्तव्यम्, आहोस्वित् तत्तद्योग्यतारुच्यादिकं तिरस्कृत्य, तत्तद्गुणकर्माणि चोपेक्ष्य रूढिवादस्य जन्मजातिनिबन्धनां प्रचलितपरम्परामभ्युपगम्य-अमुकसमाजस्य कृतेऽमुको विभागो व्यवस्थितोऽस्ति, तस्मिन् विभागे तदन्यसमाजस्य नास्त्यधिकार इति स्वीकरणीयम् ।

परन्तु संप्रति स्वतन्त्रभारतसर्वकारस्य तद्विशिष्टनेतृणां 'चातुर्वण्य मया सृष्टं गुणकर्मविभागशः ।' अर्थात् न तु जन्मजातिविभागशः ।' (गी० ४।१३) इति गीतागायकस्य श्रीकृष्णस्य भगवतः प्रामाणिकहितकरवचनमनुशरणशीलः समाजसुसंगतव्यवस्थाप्रयोजको व्यवहारः सर्वथा तत्तद्योग्यतारुच्यादिकमनुसृत्यैव प्रवर्तमानोऽस्माभिरवलोक्यमानश्च भवति । तमन्यथयितुं प्रयत्नशीला अपि रूढिवादिनो धर्मध्वजिनः स्वस्वार्थाभिमानसंरक्षणकामाः पण्डितमानिनो न शक्नुवन्ति । अतएव 'य एव पदपदार्थाः लोके बहुमत्या स्वीकृताः भवन्ति, त एव वेदादिशास्त्रेष्वपि मन्तव्याः' 'बहूनामनुग्रहो न्याय्यः' इति च न्यायेन लोकव्यवहारसिद्धं गुणकर्मयोग्यतारुच्यादिवादं शास्त्रेष्वपि तत्तत्प्रबलप्रमाणैः संसाधयन्ति राष्ट्रसमाजैकतासमतासंरक्षणकामाः भारतीयवैदिकसमुदारसंस्कृतिप्रचारप्रवीणाः विद्वांसः । सति चैवं पूर्वोक्तविभागचतुष्टयस्य प्रशस्ता यथावद्व्यवस्था सुसंगता सिद्धयति । अन्यथा जन्मजातिनिबन्धना व्यवस्था तु बाहुल्येन व्यवस्थितैव न दृश्यते, यतो विशेषसंख्यकानां ब्राह्मणक्षत्रियब्रुवाणां कृषिवाणिज्यश्ववृत्यादिषु-अन्या-

धिकारेषु स्वपितृपितामहपरम्परया प्रवर्तमानत्वात् । अतएव तत्तद्गुणकर्मवर्णस्वभावव्यवसायादेः समानतां वीक्षमाणाः-हिन्दवो मिथोऽबाधितगत्या भोजनविवाहादिकमपि कुर्वन्तो लक्ष्यन्ते ।

शास्त्रादेशस्यावहेलना

यथा मनुस्मृतावभिहितम्—

'न ब्राह्मणवधाद् भूयान् अधर्मो विद्यते भुवि ।
तस्मादस्य वधं राजा मनसापि न चिन्तयेत् ॥ (८।३८१)इति

अर्थात् ब्राह्मणस्य वधः कदापि न कर्तव्यः-'ब्राह्मणो न हन्तव्यः' इति शास्त्रेणादेशः कृतः, परन्तु स्वतन्त्रभारतसर्वकारस्य न्यायव्यवस्थायां तस्यादेशस्य पालनं नैव क्रियते, किन्त्वुपहासं कृत्वा ब्राह्मणलेखनकानां स्वजातिपक्षपातं, स्वार्थान्धतामेव चाभ्युपगम्य-सा न्यायव्यवस्था कथयति-यः कोऽपि मानव-उत्कृष्टजातीयो वा स्यात्, निकृष्टजातीयो वा स्यात्, सति प्रबलापराधे तस्य वध एव करणीयः, यथा विश्वमान्यस्य भारतराष्ट्रपितु र्महात्मगान्धिनो वधकर्तुर्गोडसे ब्राह्मणस्य तया वधो निर्दिष्टः । न्यायविदः कथयन्ति-राज्यन्याय्ये विषमता कथमपि नाभ्युपेया, सा विषमता शास्त्रोपदिष्टाऽपि कामं भवेत्, तथापि सा सर्वथाऽवहेलनीया गर्हणीयैव च भवति ।

शमो दमस्तपः शौचं······ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ।' (गी० १८।४२) इति गीताबोधितगुणकर्मवादानुसारेण तु पूर्वोक्तप्रशस्तगुणकर्माढ्यस्य वास्तविकब्राह्मणस्य प्रबलापराधः कुतः संभवेत् ? तदभावे तस्य कुतस्तराम् मृत्युदण्डः स्यात् ? तदभावे च तत्प्रतिषेधोऽपि कथं विधातव्यो-

भवेदिति । गुणकर्मविहीनस्य नाममात्रस्य तु ब्राह्मण्यमुपहासात्मकमेव स्यात् दरिद्रस्याकिञ्चनस्य कोट्यधिपतिनामवत् ।

एवं मनुस्मृतौ—'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।' (८।४१६) अतः कश्चिद्दासोऽर्थात् शूद्रः केनाप्युपायेन धनं सम्पादयेत्तदा बलात् तस्माद् धनं ब्राह्मणोऽपहरेत् । यदि सः शूद्रः शासकस्य राज्ञः समीपे तादृशमन्यायं निवेदयेत्-तदाऽपि स राजा ब्राह्मणं न दण्डयेत् इत्याह-मनुमहाराजः—'विस्रब्धं ब्राह्मणःशूद्राद् द्रव्योपादानमाचरेत् । नहि तस्यास्ति किञ्चित् स्वं, भर्तृहार्यधनो हि सः ॥' (८।४१७) इति । विस्रब्धं = निर्विचिकित्सं = संशयमकृत्वा शूद्रात् = दासात्, ब्राह्मणः, द्रव्योपादानं = धनग्रहणं, आचरेत् = कुर्यात्-तत्सम्पादितं बलादपहरेत् । यतस्तस्य दासस्य शूद्रस्य किञ्चिदपि स्वं = द्रव्यं नास्ति, सर्वं धनं ब्राह्मणस्यैवास्ति । भर्त्रा = ब्राह्मणेन हार्यं = ग्राह्यं धनं यस्य सः—भर्तृग्राह्यधनोऽसौ । एवं बलादपि दासाद् ब्राह्मणो धनं गृह्णन् न स राज्ञा दण्डनीय-इत्येवमर्थमेतदुच्यते । शूद्रो ब्राह्मणधनमपहरेत्, तदा दण्डनीयो भवति स शूद्रः, एवं ब्राह्मणः शूद्रधनमपहरेत् तदा स दण्डनीयो न भवति, इति वैषम्यं सांप्रतिकं न्यायालयं कथमपि नैव स्वीकरोतीति मनुस्मृतिशास्त्रस्येयमवहेलना प्रत्यक्षा ।

हिन्दुधर्माचार्य्याणां पण्डितानां कूपमण्डुकताऽनुदारताया अदीर्घदर्शितायाश्च पराकाष्ठा, काश्मीरस्य लज्जाखेदजनकश्चेतिहासः

ईस्वीये (१३२०) एकसहस्रत्रिशतविंशतितमे सने

तदानीं काश्मोरस्य राजा सूहदेवः क्षत्रियोऽप्योग्यशासक आसीत् । तदा तुर्कस्थानस्य दुष्टैर्मंगोलैः काश्मीरोपरि प्रबलाक्रमणं कृतम् । स दुर्बलो राजा राज्यं स्वकीयं विहाय भयादन्यत्र तिरोहितोऽभूत् । तैर्दुष्टैः काश्मीरप्रदेशस्य महती हानिः कृता, ग्रामाः नगराणि मन्दिराणि च विध्वस्तानि, तेषामपरिमिता सम्पत्तिः सुवर्णादिरूपा स्वायत्तीकृता । सुसस्याढचानि क्षेत्राणि विनाशितानि, विविधफलपुष्पलतावृक्षाढचाश्च मनोहराः वाटिकाः विध्वस्ताः । तद्देशीयाः नराः दासीकृताः, मनोरमायुवतयो नार्यश्च बलात् परिगृहीताः ।

यदा प्रबलशीतहिमपातसमये क्षेत्रादिविनाशात् खाद्य-सामग्र्याः अभावे च सति-दुष्टाः आक्रमणकारिणो लुण्टकाः पिशाचा मंगोलाः स्वदेशं तुर्कस्थानं गन्तुं सन्नद्धा अभवन्, तदा काश्मीरदेशीयः कश्चन ब्रह्मचारी साधुः तान् दुष्टान् विनाशयितुं तत्कृतदुष्टकर्मप्रबलदण्डञ्च प्रदातुं विकटविषमदुर्गममार्गं सुगम-तया निर्दिदेश । तस्मिन् हिमालयीये मार्गे तान् निक्षिप्य क्षुधया प्रबलशीतेन च विध्वंसितवान् । आक्रमणकारिणो लुण्टकास्तेऽ-सहायाः सन्तः प्रकृष्टहिमसागरे स्वत एव विलीनाः मृताश्च-बभूवुः ।

तदा कश्मीरप्रदेशः अनाथ इवाभवत् । तं सनाथं कर्तुं तच्छासनञ्च विधातुं कश्मीरप्रदेशस्य सेनापतिः रामचन्द्रः प्रकटो-ऽभूत् । तत्समीपे लद्दाखदेशस्य कश्चन शूरवीरो महत्त्वाकांक्षी युवको रिञ्चननामा बौद्धधर्मावलम्बी राजकुमारः सहायकतया-ऽवस्थित आसीत् । तेन किल दुर्गे राजवदस्थितस्य सेनापति-रामचन्द्रस्य शासकस्य स्वयं राजा भवितुकामनया विश्वासघातः

कृतः । निशीथे तदुपरि प्रबलाक्रमणं विधाय सेनापतिं तं रामचन्द्रं हत्वा स्वयं कश्मीरप्रदेशस्य शासको राजाऽभूत् ।

सिंहासनेऽवस्थितो भूत्वा स रिञ्चनराजः काश्मीरप्रजाः स्ववशे विधातुं तत्र सम्मिलितुञ्च विविधप्रयत्नमकार्षीत् । प्रथमं तेन स्वेन हतस्य सेनापतिरामचन्द्रस्य कोटासंज्ञिकया युवत्या पुत्र्या सह विवाहो विहितः । स च तां सुन्दरीं स्वपत्नीं राजकुमारीं स्वप्रेम्णा औदार्येण च वशीचकार । स्वर्गीयस्य-सेनापतेः रामचन्द्रस्य पुत्राय रावणचन्द्रनाम्ने कोटादेवीभ्रात्रे लहरलद्दाखप्रदेशमर्पयित्वा तमपि सर्वथाऽनुकूलमकार्षीत् ।

तथापि स रिञ्चनराजो विश्वासघातहननादिदुष्टकर्म-कारितया मनसि शान्तिं नैव लेभे । सः तस्य प्रबलस्य—'मित्र-द्रोही कृतघ्नश्च, तथा विश्वासघातकः । त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥' इत्येनेन निन्दितस्य पापस्य तामिस्र-कालिमघटया व्याप्तत्वात् सदा भयाक्रान्त एवावस्थितः । जन्मना बौद्धः सः शुभधर्माचरणेन 'पुण्येन पापमपनुदति' इति श्रुतिप्रामाण्यात्तस्य प्रायश्चितं कर्तुमभिललाष । तदा तत्रत्यो बौद्धधर्मो जादूटोनादिभिः सर्वथा विकृतः संजातः । अतस्तस्य तस्मिन् धर्मे विश्वासः श्रद्धा चापगता ।

वैदिकसनातनार्यधर्मस्य महत्त्वानुसन्धानम्

सः खलु हिन्दुसनातनधर्मस्य श्रद्धेयं महत्त्वमौदार्यञ्च विचारितवान् ।

अहो ! वैदिकसनातनार्यहिन्दुधर्मस्य महान्तो विश्व-विश्रुताः महनीयकीर्तयो वसिष्ठविश्वामित्रव्यासप्रभृतयो महर्षयः अतिधन्याश्च पावनज्ञानबलप्रेमकरुणादिव्यपराक्रमनिधयः श्री-

रामकृष्णप्रभृतयो भगवदवताराः कैलासपतिर्जगद्गुरुर्भगवान् दक्षिणामूर्तिः श्रीमहेश्वरः शंकरः, तत्सहचारिणी पवित्रस्नेह-दयाक्षमामयी सुधामयी भगवती जगदम्बिका महालक्ष्मी, महा-सरस्वती स्वरूपा गौरी भवानी। श्रुतिस्मृतिदर्शनपुराणादीनि च विस्तृतानि प्रशस्तानि शास्त्राणि। गंगायमुनाकाशीहरिद्वार-वृन्दावनायोध्यारामेश्वरादीनि पावनानि च तीर्थानि। यद्यस्य कल्पवृक्षसमस्य महतो धर्मस्याहं शरणं स्वीकरिष्यामि, तदाऽहं निःसंशयं सद्यः पापाद्विमुक्तः पवित्रः सन् उत्तमगतिभाक् भविष्यामि। यस्मिन् धर्मे किल हिन्दुक्षत्रियपितृजन्या मम प्राणप्रिया पत्नी महाराज्ञी कोटादेव्यपि प्रबलां निष्ठां दधाति।

इति विचार्य तत्कालीनः काश्मीरनरेशो रिञ्चनः—हिन्दुधर्माचार्यान्-पण्डितान्-स्वसमीपे-आहूय-स्वविचारं तेभ्यः प्रदर्शयामास। तमवगत्य तदानींतनैः पण्डितैः गीताश्लोकस्य—'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥' (गी० ३।३५) इत्यस्य वास्तविकार्थ-विरुद्धमनर्थं तस्मै बोधयित्वा स्वकीया कूपमण्डुकता गर्हणीया-ऽनुदारता मौढ्यज्ञापिकाऽदीर्घदर्शिता च प्रदर्शिता। तस्य हिन्दुधर्मा-ङ्गीकारस्य महती प्रबलाऽभिलाषा विनाशिता।

तस्मै तैर्धर्मविमूढचित्तैः पण्डितैरुक्तं-त्वमसि बौद्धधर्मा-वलम्बी, अतस्तव बौद्धधर्म एव स्वधर्मः, हिन्दुवैदिकधर्मस्तु तव कृते परधर्मोऽस्ति। स च त्वां पापिष्ठं पापाद्विमुक्तं नैव करि-ष्यति। परधर्मो भयावह एवास्तीति, गीतायाः महान् उपदेशो-ऽस्ति। अतस्तव स्वकीये बौद्धधर्मे एव मरणं श्रेष्ठमस्ति। अतस्तव काश्मीरप्रदेशसिंहासनाधीश्वरस्य क्षत्रियकन्यापाणि

ग्रहीतुरपि हिन्दुधर्मग्रहणे नास्त्यधिकारः।

अतो हे महाराज! त्वमार्यवैदिकधर्मे वा, शैवे वा, वैष्णवे वा शाक्ते वा, धर्मे संमिलितुं नार्हसि।

राजपण्डितसंवादः

पण्डितानां तद्वचनं श्रुत्वा राजा रिञ्चनो महान्तं विक्षोभमवाप। परन्तु सः स्वस्थो भूत्वा तान् विनयेन पप्रच्छ—

कथं मम हिन्दुवैदिकधर्मग्रहणेऽधिकारो नास्ति। यतो मम तस्मिन् धर्मे महती श्रद्धा विद्यते, मम प्रेयसी राज्ञी पत्न्यपि हिन्दुधर्मावलम्बन्त्येवास्ति। सा चातिप्रेम्णा भगवन्तं श्रीमहेश्वरं जगदम्बिकां भवानीं दुर्गाञ्च विविधोपचारैः सदाऽऽराधयत्येव गीतां दुर्गासप्तशतीञ्चातिश्रद्धया नियमतः पठत्येव। व्रतोपवासयज्ञदानादिकमपि करोत्येव बौद्धधर्मेऽतिविकृते तु मम स्वल्पाऽपि श्रद्धा नास्ति।

पण्डिताः ऊचुः—स्वधर्मस्य परिवर्तनं कदापि कुत्रापि केनापि नैव कर्तव्यम्। जन्मजातः स्वकीय एव धर्मः परिपालनीयः, सः गुणाढ्यात् परधर्मात् विगुणोऽपि कथं न स्यात्? स एव श्रेयान् भवति। गीतायां श्रीकृष्णस्यायमेवोपदेशः।

राजा उवाच—मया श्रुतं—यवनधर्माचार्याणां-ईरानतुर्कस्थानादिवास्तव्यानां मुखेभ्यः। ते तु प्रसन्नाः भूत्वा स्वकीये समुदारे इस्लामधर्मेऽन्यधर्मावलम्बिजनान् संमेलयन्ति। ते तु अन्यधर्मपरिवर्तनं कृत्वा स्वधर्मग्राहणं श्रेष्ठं मन्वते, तस्मात्ते न बिभ्यति, ते तु भवत्कथनवत् नैव कथयन्ति-ममेस्लामधर्मस्य ग्रहणेऽन्यधर्मजातजनानां नास्त्यधिकार इति। ते तु-ये केऽपि स्युःकस्यापि देशस्य निवासिनो भवेयुः कमपि धर्मं प्राक मन्वानाश्च

स्युः-तान् सर्वान् विविधप्रकारेण स्वकीयमिस्लामधर्ममत्यौदार्येण ग्राहयन्ति। पश्यन्तु तावत् भवन्तः।

बौद्धधर्मोऽपि हिन्दुधर्मस्यैव किमपि विलक्षणं रूपान्तरं विद्यते, मिथः शैवशाक्तवैष्णवादिधर्मवत्। भगवान् बुद्धोऽपि जन्मजात आर्यः क्षत्रियो भारतीय एवासीत्। यस्य हिन्दुक्षत्रिय-जातिनामधेयं सिद्धार्थः इतीदृशमासीत्। अत एव भगवान् बुद्धो बर्मालंकामलायावियतनामादि-विविधानेकदेशवास्तव्यजनान् सर्वान् स्वकीये बौद्धधर्मे संयोजयितुं-स्वशिष्येभ्योऽन्यदेशगमनमादिदेश।

पण्डिता ऊचुः—राजन्! धर्मःपवित्रपदार्थोऽस्ति। तस्य परिवर्तनं युक्तं नैव शिष्टाः मन्वते। यथा पतिव्रता साध्वी स्त्रीः स्वपतिपरिवर्तनं युक्तं नैव मनुते। तथा धर्मविषयेऽपि मन्तव्यम्।

राजा उवाच—भवतामीदृश्या संकीर्णगर्हणीयतुच्छमनोवृत्त्या बाह्यजनानां कृते विशालप्रशस्तार्यहिन्दुधर्मद्वाराणि पिहितान्येवाकारिषत। अस्य हिन्दुधर्मस्य समुन्नतिः प्रशस्तिर्विपुलप्रचारश्च कथं भविष्यतीति खिन्नो भूत्वा राजा तान् पण्डितान् पप्रच्छ।

पण्डिता ऊचुः—गर्वेण-बाह्यलोकानामस्मद्धर्मे प्रवेशस्यावश्यकता नास्ति। ते तु कामं यं कमपि धर्मं पालयन्तु, परन्तु-तैर्हिन्दुधर्मग्रहणं कदापि नैव कर्तव्यम्। तेन ते पुण्यं नैव पापमेव लाभं नैव हानिमेव च लप्स्यन्ते।

इत्युक्त्वा ते मूर्खपण्डिताः काश्मीरराजभवनाद्वहिर्जग्मुः।

रिञ्चनराजस्य-इस्लामधर्मग्रहणम्

राजा रिञ्चनो धर्मशीलायाः आदर्शचरितायाः क्षत्रि-

यहिन्दुकन्यास्वकीयमहाराज्ञीकोटादेव्याः संगत्या धर्मपिपासुः संजातः, स्वोद्धारस्य च प्रवलकामनया व्याप्त आसीत् । सच्चरितो यशस्वी च भवितुमभिललाष । मूढपण्डितविहितेन-हिन्दुधर्मप्रवेशप्रतिरोधेन तस्य मनसि महान् संक्षोभः, महती निराशा आत्मलज्जा च संभूता । किं करोमि ? क्व च गच्छामि ? कं हि शरणमुपयामि ? को हि दयानिधिर्ममोद्धारं करिष्यतीति सततं विचारयामास ।

यद्यपि तदानीं काश्मीरप्रदेशे हिन्दूनां बाहुल्यमासीत्, विशेषसंख्यया पण्डिताः ब्राह्मणाः स्वकर्मधर्मनिष्ठा न्यवसन् । मुसलमानधर्मालयो मस्जित् तत्रैकोऽपि नाभूत् । विदेशेभ्यः समागतानां यवनानां संख्या 'पिष्टे क्षारवत्' अतीवन्यूना आसीत् । तथापि तत्र बहवो मुसलमानसाधवः स्वधर्मविद्वांसः तस्य धर्मजिज्ञासोःरिञ्चनराजस्य समीपे समागमन् । तेषां विविधमुपदेशं शुश्राव । इस्लामधर्मस्यौदार्यं, वर्जितोत्तमाधम-भेदभावां समानबन्धुताञ्च तेभ्यो विजज्ञौ ।

एकदा प्रभाते राजा रिञ्चनः स्वराजप्रसादोपरि स्थित्वा वितस्तायाः (झेलम) सरितस्तटे प्रशान्ते मनोरमे कमपि मुसल-मानफकीरं वस्त्रमास्तीर्य तत्रावस्थाय परमेश्वरस्य खुदाऽल्ला-संज्ञकस्य प्रेमभक्तिपूर्वकप्रार्थनायां निमग्नं ददर्श । राजा मुग्ध-भावेन विशेषसमयपर्यन्तं तमवालुलोके ।

तत्र जातश्रद्धः सः राजा तत्समीपे गतवान् । तस्य फकीरस्य 'सैयदशफरुद्दीनः' इति नामधेयमासीत् । स हि विशेष-लोकप्रियो वीतरागः खुदाभक्तश्च बभूव । लोकाः हि तं प्रेम्णा 'बुलबुलशाहः' इत्युपनाम्ना आजुहुवुः । राजा श्रद्धया तस्य

विविधमुपदेशं श्रुतवान् । तेन सः विशेषरूपेण तत्प्रभावान्वितो जातः । राजा इस्लामधर्मग्रहणाय तं प्रार्थयामास । तेन प्रसन्नेन फकीरेण तस्मै यवनधर्मदीक्षा प्रदत्ता । तस्य 'रिञ्चनः' इति प्राचीननाम्नः 'शद्रुद्दीनः' इत्यभिनवेस्लामनाम्ना परिवर्तनं तेन कृतम् । तत्पश्चात् स्वर्गीयसेनापतिरामचन्द्रस्य पुत्रेण रावण-चन्द्रेणापि-बुलबुलशाहसकाशात् इस्लामधर्मदीक्षा गृहीता । कोटादेवीगर्भात्तस्यैकः पुत्रः संजातः, तस्यापि 'हैदरखानः' इति मुसलमाननाम विहितम् । स्वदीक्षा गुरोः बुलबुलशाहस्य कृते तेन वितस्तानदीतटे एका मस्जिद् कारिता । सैव काश्मीरप्रदेशे सम्प्रति वर्तमानाभ्यो मस्जिद्भ्यः सर्वाभ्य आदिमा वर्तते ।

काश्मीरप्रदेशे इस्लाममतविस्तारः

हिन्दुधर्मप्रवेशाभिलाषातिरस्कारप्रसूतद्वेषघृणाभावान्वितहृदयेन तेनाभिनवयवनेन बंगदेशीयकालिपदभट्टाचार्यवत् (कालापहाड़वत्) काश्मीरप्रदेशवास्तव्याः ब्राह्मणादिहिन्दवः—यथा सामदामभेददण्डादिना इस्लामधर्ममङ्गीकुर्युः तथा विविधोपायाः कृताः । स्वकीयशासनालयेषु सेनायाञ्च, त एव हिन्दवः प्रवेष्टुमर्हन्ति, ये किल यवनधर्मं गृहीत्वा मुसलमानाः भवन्ति । यैः पूर्वजैः पण्डितैः तस्य हिन्दुधर्माङ्गीकाराभिलाषा विनाशिता, तेषां सन्तानाः 'यथा राजा तथा प्रजाः' इति न्यायेनानायासतो हिन्दुधर्मं परित्यज्य, शिखां सूत्रं संध्योपासनगायत्रीजपादिकं च विहाय, रामकृष्णशिवदुर्गेत्यादिपावननामोच्चारणञ्च तिरस्कृत्य, वेदगीतोपनिषदादिग्रन्थान् पादाहतान् कृत्वा मुसलमानधर्मनामवेषाचारादिकस्य ग्रहणमकार्षुः । काशी-हरिद्वाररामेश्वरादितीर्थयात्रां विहाय ते मक्कामदीनादिहजयात्रा-

करणाय सन्नद्धाः बभूवुः । येषु गृहेषु प्राक् वेदमन्त्रपाठः, गीतापारायणं शिवविष्णुदेवीपूजा च प्रचलिता आसीत्, तेष्वेव गृहेषु कुरानपाठः, नमाजः, 'अल्लाहो अकबरः' इति प्लुतोच्चारणञ्च सञ्जातम् ।

इत्येवं तेन तत्पुत्रेण च ब्राह्मणादिहिन्दुबहुलकाश्मीर-प्रदेशस्य मुसलमानीकरणं विहितम् । यत्र किल शते द्वौ वा त्रयो वा विदेशीयाः यवनाः निवासं चक्रुः, तत्र किल शते ब्राह्मणादिहिन्दवः पञ्च वा सप्त वैवावशिष्टाः अवर्तस्थिरे । तेन किल हिन्दुधर्मद्वेषिणा हिन्दुधर्मालयाः विध्वस्ताः । श्रीनगरस्य समीपे वर्तमानस्य शंकराचार्यपर्वतस्योपरि स्थितो विशालो मनोरमः श्रीशंकरपीठोऽपि विनाशितः, तस्य शिवमन्दिरमपि समुन्नतं ध्वस्तम्, तस्यावशेषः संप्रत्यप्यवलोक्यते ।

इत्येवं हिन्दुधर्माचार्याणां पण्डितानां कूपमण्डुकता, अनुदारतायाः, संकीर्णमनोवृत्तेः, अदीर्घदर्शितायाश्च निन्दनीया पराकाष्ठा, काश्मीरप्रदेशस्य लज्जाखेदजनकश्चेतिहासः, सम्प्रत्यपि आगामिबहुसमयपर्यन्तमपि च समग्रस्य भारतवर्षस्य पाकिस्तानतत्रत्य यवनोपद्रवविहितां प्रकृष्टां शिरोवेदनां भयंकरयुद्धादिकञ्च जनयति, जनयिष्यति च ।

वाक्पटोः प्रसिद्धस्य बिरबलस्य मौढ्यम्

अस्ति काचन किंवदन्ती । सा यथार्थाऽस्ति वा, कपोलकल्पिता वाऽस्तीति सर्वज्ञो भगवानेव जानीयात् । यवनसम्राट् अकबरो हिन्दुधर्मे महतीं श्रद्धां रुचिञ्च विधारयमाण आसीत् । अतः सः सपरिवारो हिन्दुधर्मग्रहणाय महतीमभिलाषां विदधार । एकदा सः स्वसमीपे वर्तमानं मन्त्रिणं बिरबलं ब्राह्मणं

प्रति स्वकीयां तां प्रकटयामास । तेन प्रहस्योक्तमस्मिन् विषये कमपि विचारं करिष्यामीति ।

एकस्मिन् दिवसे स बिरबलो यमुनायां स्थित्वा गर्दभं गृहीत्वा किमपि मन्त्रजातमुच्चारयन् तज्जलेन तस्य स्नानमकारयत् । तत्र गतो बादशाहोऽकबरस्तं गर्दभञ्च दृष्ट्वाऽपृच्छत् । भो बिरबल ! त्वया किं क्रियते ? इति । बिरबलेनोक्तं—भो जहाँ-पनाह ! इमं गर्दभमहं यमुनाजलस्नानेनोत्तममश्वं करोमीति । तच्छ्रुत्वाऽकबर उवाच—भो ! मूढमते ! कदाप्ययं खरोऽश्वो न भविष्यति । गर्दभस्याश्वरूपेण परिणतिः केनाप्युपायेन न सेत्स्यतीति ।

तदा बिरबलेनोक्तं—भो ! सम्राट् ! यदा गर्दभोऽश्वो न भवति, तदा यवनो मुसलमानः कथं हिन्दुः स्यात् ? कथमपि नैव भवितुमर्हतीति ।

इत्युक्त्वा बिरबलेन ब्राह्मणपण्डितेन सम्राजोऽकबरस्यापि हिन्दुधर्मग्रहणाभिलाषा रिञ्जनराजेच्छावत् विनाशिता ।

यदीयं 'किंवदन्ती' यथार्थाऽस्ति, तदाऽवश्यं विद्वद्भिर्वक्त-व्यम्—बिरबलोऽयं ब्राह्मणो महामूर्ख एवासीत् । न तु बुद्धिमान् हिन्दुराष्ट्रधर्महितेच्छुर्वाऽऽसीदिति । अवलोक्यतां तावत्—

दृष्टान्तसिद्धान्तयोर्मध्ये महती विषमता विद्यते । द्वयो-र्गर्दभाश्वयोः प्रत्यक्षदृष्टा विजातीयता वर्तते । परन्तु बिरबला-कबरयोर्मध्ये मनुष्यत्वरूपेण सजातीयतैवास्ति । यदाहुः पौराणिका अपि—

'गोवर्गमध्यञ्च गतो यथाऽश्वो, निर्धार्यते ज्ञैः सुविचक्षणत्वात् ।
मनुष्यभावादविशिष्यमाणः, तद्वत्द्विजः शूद्रगणान्न भिन्नः ॥

मनुष्यजाते र्न परो विशेषो यः कल्प्यते सर्वनरानुयायी ।'
(भ० पु० ४०।२०,२१) इति ।

तद्वत् = गर्दभवर्गमध्ये गतोऽश्वः पृथक् जातिरूपेण यथाऽवलोक्यते, तथा समानवेषधारिणां मानवनां मध्ये पृथक् जातिता नावलोकयितुं शक्यते । अत इतिहासविदः प्राहुः—हिन्दुधर्मप्रेमी सम्राट् अकबरो हिन्दुक्षत्रियराजवेषभूषां धारयति स्म, एवं हिन्दुक्षत्रियराजकन्यया जोधाबाईसंज्ञिकया युवत्या साकं विवाहमप्यकार्षीत् । तद्गर्भात् पुत्रानपि जनयामास ।

हिन्दुयवनयोर्विजातीयता विद्येत चेत्-तदा यथा गोगर्भात् अश्वः सन्तानान् जनयितुं न शक्नोति, तथाऽकबरो हिन्दुकन्यागर्भात् कथमपि सन्तानान् जनयितुं, ततो रतिसुखं प्राप्तुञ्च नैव शक्नुयात् । अतो बिरबलस्य विषमदृष्टान्तप्रदर्शनेन सम्राजोऽकवरस्य हिन्दुधर्मग्रहणप्रतिरोधेन च मौढ्यमेवावगम्यते निःसंशयम् ।

अपि च गर्दभाश्वादिवत् सर्वथा हिन्दुयवनादिषु विजातीयता स्यात्, तदा प्राक्कालिकाः ब्राह्मणादयो हिन्दवो दशकोटिसंख्यातोऽप्यधिकाः कथं यवनाः मुसलमानाः बभूवुः भवन्ति वा । हिन्दुसन्तानेषु हिन्दुरक्तविभूषितेषु पाकिस्तानभारतमुसलमानेषु कथं सुदृढं हिन्दुत्वविरोधि यवनत्वमुपलभ्येत् ? इति मूढपण्डिताः ब्रूयुः । वर्तमानकालिका सिनेमाऽभिनेत्री बंगालब्राह्मण कन्या शर्मिला प्रेम्णा मुसलमाननवाबं स्वशरीरोपभोक्तृपतित्वेन कथमभिवृणुयात् ? पञ्जाबक्षत्रियकन्या गीताञ्जलिश्च विदेशीयं विधर्माणं क्रिकेटवीरं विवाहप्रेम्णा कथं संबद्धनीयात् ? । तथा च भारतीयादियवनाः शोभनसंस्कारादिकमादाय हिन्दवो भवेयुः,

इत्यत्र नास्ति कश्चन प्रत्यक्षादिदृष्टः प्रतिरोधः ।

अपि च प्राक् भगवत्पादेनादिमेन जगद्गुरुणा हिन्दु-राष्ट्रसंस्कृतिसमुद्धारकेण श्रीशंकराचार्येण बौद्धाः वैदिकार्यं-धर्मप्रिया रामकृष्णशिवादिपूजका हिन्दवः कृताः इति मूढपण्डितो बिरबलः किं न विजज्ञौ । तस्य मूढत्वे किमपि कारणं वक्तव्यम् । भारतराष्ट्रस्य हिन्दुधर्मस्य च दौर्भाग्यमेव कारणमिति विज्ञाय सन्तोष्टव्यम् । इत्यलं पल्लवितेन जलविलोडनप्रयासेन ।

शूद्रशब्दोऽस्ति घृणापमानतिरस्कारज्ञापकः

'न शूद्राय मतिं दद्यात्' 'स्त्रीशूद्रौ नाधीयाताम्' 'शूद्रो यज्ञेऽनवक्लृप्तः' 'स्मशानमेतत् पद्यु: योऽयं शूद्रः, तस्माच्छूद्रसमीपे नाध्येतव्यम्' यदि शूद्रो वेदमुच्चारयेत्, तदा तस्य जिह्वायाः विच्छेदः कर्तव्यः' 'वेदमुपशृण्वतः शूद्रस्य त्रपुजतुभ्यां श्रोत्र-पूरणं कर्तव्यम्' 'वेदधारणे शरीरविच्छेदः' 'शूद्रगंवारढोलपशु-नारी, ये सब ताड़न के अधिकारी' (तुलसी रामायण) इत्याद्य-संख्यवचनैर्हिन्दुधर्मशास्त्रेषु शूद्रशब्दो निःसंशयं स्वार्थनिष्ठ-घृणाऽपमानतिरस्कारानेव विज्ञापयति ।

अत एव भगवता रामचन्द्रेणारण्ये तपःकुर्वाणस्य कस्यचिच्छूद्रस्य शिरःच्छेदः कृतः, तस्य हननाय प्रेरणा केनचि-द् ब्राह्मणेन-स्वपुत्राणां मरणे प्रयोजकं तच्छूद्रविहितं तप एवा-स्तीति ब्रुवाणेन कृता । परन्तु-इदं तावद्विवेक्तव्यम्-शूद्रतपः कथं ब्राह्मणपुत्रमरणे प्रयोजकं स्यात् ? तयोः तपःपुत्रमरणयोः कथं कार्यकारणभावो भवेत् ? नैव कथमपि स्यात्, सर्वथाऽसं-गतं तत् । समदर्शी कृपालुर्वानरादिप्रियः प्रभुः श्रीरामचन्द्रः कथ-मपि निरपराधिनं तपस्विनं नैव हन्यात्, तत्कथावर्णनन्तु धूर्त-

पण्डितानां स्वार्थान्ध्यलक्षणं मौढ्यमेव बोधयतीति वयं मन्यामहे।

कस्मिंश्चित्समये गुर्जरदेशीयः कश्चन व्यापारी कृषको धनाढ्यः–हरिजनानुद्दिश्याब्रवीत्–शूद्राः इमे सन्तीति। तदा मयोक्तं–शूद्राः त एव भवितुमर्हन्ति, ये खलु शिखां यज्ञोपवीतञ्च न धारयन्ति, संध्यावन्दनं गायत्रीजपञ्च न कुर्वन्ति, इति। अतस्तद्रहितत्वेन हेतुना भवत्स्वेव शूद्रत्वं सिद्ध्यति। एवं ये ब्राह्मणब्रुवाः अग्निहोत्रसंध्योपासनादिकं ब्रह्मकर्म नानुतिष्ठन्ति, वेदांश्च नैव पठन्ति, किन्तु कृषिवाणिज्यश्ववृत्त्यादिकं कुर्वन्ति, विधर्मिविदेशिभाषामतिरुच्या ब्रुवते, तद्वेषभूषाऽऽहाराचारादिकं विदधते, तेऽपि–'अग्निकार्यपरिभ्रष्टाः संध्योपासनवर्जिताः। वेदांश्चैवानधीयानाः सर्वे ते वृषलाः स्मृताः॥' (पाराशरसंहिता-१२।२६।१६) इति स्मार्तवचःप्रामाण्यात् वृषलाः शूद्रा एव विज्ञेयाः।

तदा तेन नयनयोः प्रबलं क्रोधं विधार्योक्तं–यदि कश्चनास्मान् 'शूद्राः भवन्तः' इति ब्रूयात्, तदा दण्डप्रहारेण तन्मस्तकं रक्तरञ्जितं कुर्यामिति। अतो विज्ञायते–भारतीयजनेषु शूद्रशब्दो घृणाऽपमानतिरस्कारवाचकत्वेन प्रसिद्धोऽस्ति। यथा 'वयं ब्राह्मणाः स्मः, क्षत्रियाश्च स्मः' इति प्रेम्णा ब्रुवाणाः ब्राह्मणादिशब्दैः स्वगौरवं गर्वाढ्यं प्रकटयन्ति। तथा किं–'अहं शूद्रोऽस्मी' ति कश्चनापि जनो यदि सः शिक्षितो बुद्धिमांश्च स्यात्–वक्तुं शक्नोति ? तत्कथनेन स्वात्मनि सः लज्जासधमताञ्चानुभवति। अन्यकथनेनापमानादिकञ्च। अत एव केरलादिदेशेषु वर्तमानाः निम्नकोटिकाः भूयांसो हिन्दवः

स्वनिष्ठशूद्रत्वाधमत्वादिनिवारणाय हिन्दुधर्मविरोधिनो ब्राह्मण-विद्वेषिणः कृश्चियनाः बभूवुः भवन्ति चेति प्रत्यक्षमेतत् ।

ईसाईधर्मप्रचारका अपि तान् कथयन्ति-भवन्तः सन्ति अधमाः अस्पृश्याः हिन्दुमन्दिरबहिष्कृताः मनुष्यत्वाधिकारवञ्चिताश्च, अतः शूद्रत्वादिज्ञापकं गर्हितविषमभावमण्डितं हिन्दुत्वं परित्यज्य अस्माकं समुदारेऽमृतमयप्रशंसनीयसमभावैकभावविभूषिते समाजे धर्मे च भवन्तः सम्मिलिताः भवन्तु । भवतः सर्वान् वयं स्वसदृशान् उत्तमान् गौरवाढ्यान् ज्ञानबलादिसमलंकृतान् करिष्यामः । हिन्दुब्राह्मणाः किं भवद्भ्यो दशलक्षसंवत्सरेष्वपि-स्वसदृशं ब्राह्मणत्वं स्वसमानगौरवाधिकारशिक्षादीक्षादिकञ्च समर्पयिष्यन्ति ?, नैव । अतो भवन्तो विचारयन्तु-हिन्दुत्वं भवत्सु गौरवादिकं स्थापयिष्यति वा कृश्चियनत्वं वेति । अतो यूयं याथातथ्यतः स्वकीयं शुभाशुभं विज्ञाय 'यथा योग्यं तथा कुरुत' इति ।

ईदृशमीसाईयवनधर्मप्रचारकाणां स्वगौरवसाधकं स्व-लाघवविनाशकं वचोजातं श्रुत्वा हिन्दुजातिषु शूद्रत्वेनास्पृश्य-त्वेन चाभिमताः दशकोटिसंख्यातोऽप्यधिकाः नीचहिन्दवः ईसाईधर्मे यवनधर्मे चानायासतः संमिलिताः बभूवः, सम्प्रत्यपि भवन्ति चेत्येतत् हिन्दुस्थानस्य दौर्भाग्यं, हिन्दुधर्माचार्याणां मौढ्यञ्चेति स्पष्टं समुदाराशयैर्विद्वद्भिरवलोक्यते, इत्यलं बहुना जलताडनेन ।

संस्कृतपण्डितानां कार्पण्यं, निश्चलदासवृत्तान्तश्च

वाराणस्यां ब्राह्मणपण्डितसंचालितसंस्कृतविद्यालयपाठ-शालादौ प्रायः—इदं दृष्टं—दण्डिनो विहाय ये हि परमहंससंन्या-

स्युदासीनप्रभृतयः साधवः सन्ति, तेषां सर्वेषां संस्कृतमध्येतुकामानां प्रवेशं संस्कृताध्यापकाःपण्डिताः प्रतिषेधन्ति, इति।

अत एव ब्राह्मणपण्डिताः इच्छन्तीदं-अस्माकं संस्कृतभाषां संस्कृतशास्त्राणि च जन्मजातियुक्तं ब्राह्मणं विहाय–अन्ये ये सन्ति तद्भिन्नाः हिन्दवः, ते कथमपि मा पठेयुरिति। यदि ते तां तानि च पठिष्यन्ति, तदाऽस्माकं स्तुत्यं पूज्यं गौरवं समाप्तं भविष्यतीति मत्त्वा, तत्पठनं प्रतिरुन्धन्ति। तस्माद्बिभ्यति च।

अत एव भारते चान्यदेशेषु च प्रसिद्धमिदं जातं भारतस्य गरिष्ठा महती संस्कृतभाषा देववाणी, भिक्षुकभाषाऽस्ति। 'उत्तमाः भिक्षुकाः विप्राः' इति स्मरणात्। सा चान्यत्रागमनात् मृता बभूवेति। अतः सामान्यलोकाः कथयन्ति–मृतभाषेयमिति, अतीवक्लिष्टाऽस्ति सा, तदध्ययनेन दन्ताः पतन्ति, शिरश्च व्यग्रतामुपयातीति। अतः इंग्लीशकौलेजादौ छात्राः भारतीयसंस्कृतभाषां विहाय विदेशीयपर्सीयनफ्रेंचादिभाषां पठनाय स्वीकुर्वन्ति। विदेशीयानां विधर्मिणामिंग्लीशभाषादिपण्डितानां तावन्महदौदार्यं सर्वत्र स्कूलकौलेजयुनिवर्सीटिप्रभृतिषु शिक्षाणालयेषु दृश्यते। ते च सततमभिलषन्ति–अस्माकमिंग्लीशादिभाषां-ये केऽपि स्युः,– ते सर्वेऽपि प्रेम्णाऽऽदरेण च पठन्तु, तदगाधं वैदुष्यमासादयन्तु, पठित्वा चास्माकं वेषभूषारीतिनीत्यादिकं स्वीकृत्यास्मत्समाजे सम्मिलन्तु चेति। अतो भारते सर्वत्र यत्र तत्र इंग्लीशभाषाविदां प्राचुर्यमवलोक्यते, अत एव भारतीयाः हिन्दवोऽपि इंग्लीशभाषामेव भाषमाणाः स्वकीयं मस्तकं गर्वेण समुन्नतं कुर्वन्ति। व्यापारिणोऽपि तस्यामेव

सर्वमपि लेखनादिव्यवहारं कुर्वन्तः स्वकीयं गौरवं प्रकटयन्ति, भारतीयहिन्दीप्रभृतिभाषां ब्रुवन्तो लिखन्तश्च ते लज्जां लाघवञ्चानुभवन्ति। इत्येवमुभयेषां पण्डितानामेकत्र कार्पण्यमन्यत्रौदार्यञ्चावलोक्यते। कार्पण्यवशादेव भारते लक्षेषु कश्चनैकः संस्कृतभाषावित् काठिन्येनोपलभ्यते।

यत्र विद्यते प्रसिद्धस्य विचारसागरवृत्तिप्रभाकराद्यनेकाद्वैतवेदान्तग्रन्थप्रणेतु दादुसम्प्रदायशिरोरत्नायमानस्य साधुसमाजाग्रगण्यस्य महाविदुषो निश्चलदासस्य वृत्तान्तः। स च राजस्थानीयजयपुरनगरस्थित— श्रीदादुमहाविद्यालयस्याध्यक्षेण श्रीमन्मंगलदासस्वामिना-बम्बईनगरस्थितश्रीसाधुवेलास्वयंसेवकमण्डलात् प्रकाशिते विचारसागरे 'ग्रन्थकार का परिचय' इति शीर्षके प्रकाशित उपलभ्यते।

महाविद्वान् महात्मा साधुवेषधारी श्रीनिश्चलदासः वाराणस्यां संस्कृतव्याकरणादिशास्त्राध्ययनाय पञ्चदशवर्षायुःसमय एवाजगाम। तत्र विंशतिसंवत्सरपर्यन्तं वेदतदङ्गव्याकरणन्यायसांख्ययोगवेदान्तादिशास्त्राणामत्युन्नतां शिक्षां सम्पादयामास। अध्ययनसमय एव तस्य विद्वत्समाजे संस्कृतभाषणशास्त्रार्थादिजन्या महती विख्यातिः संजाता। यस्य विदुषः पण्डितस्य गुरोः समीपे सोऽध्ययनमकार्षीत्, तस्य महती कृपाऽऽसीत् तदुपरि। तेन पण्डितेन प्राक् किंजातीयको भवान्? इति पृष्टं, तस्य प्रश्नस्योत्तरं तेन 'ब्राह्मणोऽहमस्मीति कथनेन-ब्राह्मणभिन्नोऽहमस्मीति कथनजन्याध्ययनप्रतिरोधभीत्या विहितम्। यदा तेन श्रीनिश्चलदासेन यथावत् सम्पूर्णतया सर्वाणि शास्त्राणि समधीतानि, संस्कृतस्यायमस्ति महान् उद्भटो विद्वान् इति

च ख्यातिः समर्जिता । तदा तस्याध्यापकस्य पण्डितगुरोः स्वदेशगमनायाज्ञा याचिता । गुरुणा सम्यक् विचार्य तस्य सर्वविधयोग्यतां प्रगल्भपाण्डित्यञ्च निरीक्ष्येदमुक्तं-भो ! त्वं मदीयः प्रियः शिष्योऽसि । मया मयि स्थिताः सर्वाः शास्त्रविद्याः भवते प्रेम्णा समर्पिताः । अतस्त्वया ममायमादेशः आदरेण परिपालनीयः—त्वं संप्रति साधुवेषं परित्यज्य ब्राह्मणवेषञ्च परिधाय मदीयां तव सदृशीं योग्यां कन्यां विवाहविधिना च परिगृह्य गृहस्थः सन् मम प्रियजामातृपदे स्थितः सन् मदीय एवावासे निवासं कुरु, ममेमां संस्कृतपाठशालाञ्च संचालय, अतोऽन्यत्र गमनं त्वया न कर्तव्यमिति ।

परन्तु श्रीनिश्चलदासः साधुवेषं ब्रह्मचर्यव्रतञ्च प्राणार्पणेनापि रक्षितुकामः गुरोः एतस्यादेशस्य परिपालनेन मम सर्वस्वं नष्टं भविष्यतीति मन्वानः—तमादेशं विफलं कर्तुं स्वकीयां जन्मनिबन्धनां क्षत्रियजाटजातिं तस्मै प्रकटयामास—'नाहं ब्राह्मणोऽस्मि, किन्तु कृषकवर्गीयो जाटोऽहमस्मीति कथनेन । तच्छ्रुत्वा विफलमनोरथो भूत्वा स गुरुः पण्डितो महतीं व्यथामवाप । अतिरुष्टः सन् निश्चलदासाय शापोऽयं विहितः-त्वं यावज्जीवनं सन्तप्तो भविष्यसीति । कथयन्ति लोकाः—अनेनाभिशापेन निश्चलदासस्य शरीरं प्रतिदिनं घण्टाद्वयपर्यन्तं ज्वराक्रमणेन सन्तप्तमभवदिति । ब्राह्मणपण्डितस्य गुरोः व्यथया शापेन च किल ब्राह्मणं विहाय संस्कृतभाषां संस्कृतशास्त्राणि च क्षत्रियादयः कथमपि न पठेयुरिति संस्कृतपण्डितानां कार्पण्यं विज्ञायते ।

अत एव गुरुणा पण्डितेन तेन ब्राह्मणेतरस्य संस्कृत-

शास्त्रेषु प्रगल्भपाण्डित्यप्रकटनभीत्या तस्मै निश्चलादासाय स्वशिष्याय—त्वया संस्कृतभाषायामभिनवाः ग्रन्थाः न लेखनीयाः, किन्तु प्राकृतहिन्दीभाषायामेवेत्यादिष्टम् । अतस्तेन स्वगुरोस्ता-माज्ञामनुरुध्य हिन्दीभाषायामेव प्रशस्ताः अतीवलोकप्रियाः मुमुक्षुहितसाधकाः विचारसागरादयो ग्रन्थाः प्रणीताः, संस्कृत-भाषायामेकोऽपि ग्रन्थो न लिखित इति—काचन किंवदन्ती श्रूयते ।

जन्मजातिवादगुणकर्मवादयोः कार्पण्यौदार्ये

जन्मजातिवादे तावत् गर्वघृणादिदोषपोषकतया तत्त-द्वर्गविग्रहप्रयोजकतया, हिन्दुसंघट्टनविनाशकतया तत्तदभीष्ट-प्रगतिप्रतिरोधकतया च स्पष्टतः कार्पण्यमेवावलोक्यते । गुणकर्मवादे च सर्वोदयसम्पादकतया गर्वादिदोषनिवारकतया संघट्टनसाधकतया चौदार्यमवगम्यते । अत एव समुदारं प्रशस्तं गुणकर्मवादमनादृत्य कृपणं जन्मजातिवादञ्चादाय गुरुणा तेन पण्डितेनापराधरहिताय स्वप्रियशिष्याय निश्चलदासाय शापो विहितः ।

ब्राह्मणोऽहमस्मीत्यनृतकथनमेवास्ति तस्यापराध इति चेन्नैवम् प्रामाणिकगुणकर्मवादाभिप्रायेण तत्कथनं पाण्डवादि-वत् अस्त्यपराधवर्जितमिति वदामः ।

वनवासादिसमये यथा ब्राह्मणाः वयमिति भाषमाणाः, तद्वेषं धारयमाणाः वेदादिशास्त्रमधीयानाश्च युधिष्ठिरादयः पाण्डवाः न ह्यनृतवादिनोऽभवन्, तथा विद्यालाभाय निश्चल-दासस्य साधुसमाजशिरोमणेस्तत्कथनं निर्दोषमेव मन्तव्यं ।

जन्मजातिवादे तु सम्प्रति नीचजातौ परिगणितानां

दृश्यमानः शिक्षादिविषयकोऽभ्युदयः कथमपि नासेत्स्यत् । 'न शूद्राय मतिं दद्यात्' इति वचनप्रामाण्यात् शिक्षणालये तेषां प्रवेशः प्रतिरुद्धोऽभविष्यत् । स्वयोग्यतायाः प्रकटनं कथमपि नैव कर्तुमशक्ष्यत् । अतो जन्मजातिवादे तत्तद्वर्गविग्रहप्रयोजकं सर्वाभ्युदयविरोधिकार्पण्यमेव निःसंशयं सिद्धयति । तदिदमद्यतनाः श्रीमहात्मगान्धिपण्डितनेहरूस्वामिविवेकानन्दमहर्षिदयानन्दस्वामिरामतीर्थयोग्यरविन्दलालबहादुरशास्त्रिप्रभृतयः निष्पक्षविचारकाः स्वराष्ट्रसमाजाभ्युदयाकांक्षिणो विद्वांसः कथमपि नाभ्युपयन्ति, किन्तु प्रशस्तं समुदारं गुणकर्मवादमेव स्वीकुर्वन्ति सर्वत्र च प्रचारयन्ति ।

जैनबौद्धसंप्रदायानुमतिः

जैनागमपण्डिता अपि तत्तद्विशिष्टगुणप्रयोजिततत्तत्कर्मभिरेव ब्राह्मणादिसंज्ञालाभः सिद्धयति नान्यथेत्याहुः ।

यथा— 'कम्मुणा बम्भणो होइ, कम्मुणा होइ खत्तियो ।'
(ऊत्तरा. अ० २५ गा० ३३)

अर्थात् कर्मणा ब्राह्मणो भवति, कर्मणा च क्षत्रियो भवति, न तु केवलेन जन्मना जात्या वा ।

केनापि कारणेन यो मिथ्यावचो न वदति, किन्तु सदा सर्वत्र निर्भयतया सत्यमेव वदति, तं वयं सत्यवादिनमेव ब्राह्मणं ब्रूमः, नान्यमित्यप्याहुः—

'कोहा वा जइ वा हासा, लोहा वा जइ वा भया ।
मुसं न वयई जो उ, तं वयं बूम माहणम् ॥'
(पञ्चप्रतिसूत्र—१)

कोहा = क्रोधेन हेतुना, हासा = हास्येन, लोहा = लो-

भेन, भया = भयेन च, जो = यो मुसं = मृषा—असत्यं, न वगई = न वदति, तं वयं माहणं = ब्राह्मणं बूम = ब्रूमः। बंभण-माहणापभ्रंशशब्दौ च ब्राह्मणाभिधायकौ जैनागमे स्तः। एवं खत्तियशब्दोऽपि क्षत्रियार्थबोधकः।

एवं भगवान् बुद्धोऽपि जगाद, यथा—

'यो न हिंसति भूतानि, यश्च सच्चं वदेत् सदा।
तमहं ब्राह्मणं ब्रूमि........... ॥'
न जच्चा वसलो होति, न जच्चा होति ब्राह्मणो।
कम्मना वसलो होति, कम्मना होति ब्राह्मणो॥
(वसलसुत्तं)

सच्चं = सत्यं, जच्चा = जन्मना, वसलो = वृषलः—शूद्रः, होति = भवति कम्मना = कर्मणा। वसलसुत्तं = वृषल-सूत्रम्। जैनबौद्धागमेषु तावत्तेषां पण्डितै लेखकैः संस्कृतभाषा-परिष्कृतपदानि मनस उच्छृङ्खलरीत्या विभिन्नभाषारचनाभि-प्रायेणापभ्रष्टानि कृतानि बाहुल्येनोपलभ्यन्ते। तत्र किल तेषां संस्कृतभाषाविद्वेष एवावगम्यतो पृथक् संप्रदायप्रदर्शनञ्च।

अत एवास्माकं धर्मशास्त्रेष्वपि ब्राह्मणादिवर्णलाभ-प्रयोजकस्य कर्मप्राधान्यस्य वर्णनं सर्वत्रोपलभ्यते। यथाहि—'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते। सुखं दुःखं भयं क्रोधं कर्मणैव प्रपद्यते॥ कर्मणा ब्राह्मणत्वं च मुक्तत्वं च स्वकर्मणा। कर्मणा क्षत्रियत्वं च वैश्यत्वं च स्वकर्मणा। कर्मणा चैव शूद्रत्वमन्त्यजत्वं स्वकर्मणा। कर्मणैव च म्लेच्छत्वं लभते नात्र संशयः॥ (उशनस्-स्मृतिः) इति

समत्वसाधको वोटयुगोऽयम्

राजयुगः किल समाप्तः । तत्स्थाने सम्प्रति लोकतान्त्रिको वोटयुगः प्रचलति । स च सर्वत्र समत्वं साधयति, उत्तमाधमभेदभावं समूलमुन्मूलयति । जनताया: अधिकवोटलाभद्वारा सः— यः कोऽपि स्यात्, उत्तमो ब्राह्मणादि र्वा अधमः शूद्रादि र्वा स्यात्—प्रधानमन्त्रिमुख्यमन्त्रिराष्ट्रपत्यादिपदेषु अभिषिक्तः सन् राज्यं प्रशास्ति । यो महान् दार्शनिको विद्वान् राजनीतिज्ञः पण्डितः स्यात्, यश्च महामूर्खो निरक्षरः स्यात्, तावुभावपि शासकचयनाय एकमेव वोटं (चयनपत्रविशेषं) दातुं शक्नुतः । नाधिकं न न्यूनम् । एतेन व्यवहारेण वोटयुगः संघट्टनविनाशिकां विषमतां निवारयति । प्राचीनस्स्मृत्यादिशास्त्रबोधितः तत्तदुत्तममध्यमाधमजन्मजातिवादयुगस्तु विवाहादिव्यवहारेषु निन्दनीयां विषमतामेव साधयति । तथाहि—

भार्याग्रहणलक्षणे विवाहेऽपि वैषम्यम्

उत्तमो ब्राह्मणः—ब्राह्मणस्य, क्षत्रियस्य, वैश्यस्य शूद्रस्य च चतसृभिः कन्याभिः साकं विवाहं कर्तुं शक्नोति । मध्यमः क्षत्रियः क्षत्रियवैश्यशूद्राणां तिसृभिः कन्याभिः सह, वैश्यश्च वैश्यशूद्रयोः द्वाभ्यां कन्याभ्यां सार्द्धं विवाहं कर्तुं शक्नोति । अधमः शूद्रस्तु शूद्रकन्ययैव साकं विवाहं कर्तुं शक्नोति, नोत्तमकन्याभिः साकमिति सनातनधर्मशास्त्रे मनुस्मृतौ दादृशं वैषम्यमित्थमुपदिष्टम्—

'शूद्रैव भार्या शूद्रस्य, सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञश्च, ताश्च स्वा चाग्रजन्मनः ॥'

(अ० ३।१३)

शूद्रस्य शूद्रैव भार्या भवति, न तूत्कृष्टा वैश्यादयस्तिस्रः। विशः = वैश्यस्य, शूद्रा वैश्या च द्वे भार्ये स्मृते = कथिते। सा = शूद्रकन्या, स्वा = स्वकीया वैश्यकन्या। ते = शूद्रवैश्य-कन्ये, स्वा = स्वकीयक्षत्रियकन्या, राज्ञ = क्षत्रियस्य तिस्रो भार्याः स्मृताः। ताश्च = शूद्रवैश्यक्षत्रियकन्याः, स्वा = ब्राह्मणकन्या, अग्रजन्मनः = ब्राह्मणस्य चतस्रो भार्याः अनुलोम-विवाहरूपेण बोधिताः कर्तुं। परन्तु सम्प्रति स्वतन्त्रभारत-राष्ट्रशासनेन हिन्दुमानवः एकामेव भार्यां ग्रहीतुं शक्नोति विवाहविधिना, नान्यामित्यादिष्टम्। एवं ब्राह्मणादीनां कृते धर्मशास्त्रमनुस्मृतिबोधितमपि तादृशं वैषम्यमन्यायत्वात् प्रतिषिद्धम्।

सतीप्रथायामपि वैषम्यम्

गरुडपुराणे काचन विधवानारी पश्चात्तापं करोति, स्वकीयं नारीशरीरञ्च निन्दति—

'न धर्मबुद्ध्या पतिरेव सेवतो, वह्निप्रवेशो न कृतो मृते पतौ।'
'नारीशरीरं बहुदुःखभाजनं, लब्धं मया पूर्वकृतैर्विकर्मभिः॥'
(गरुडपुराणे. ६।१८)

एतस्मिन् कथने—पत्या धर्मबुद्ध्या स्नेहभावेन च पत्नी न सेविता स्यात्, तथापि पत्न्या धर्मबुद्ध्या स्नेहभावेन च पतिः सेवनीय एवेति, मृतायां पत्न्यां पतिस्तया सह वह्निप्रवेशं न कुर्यात्तथापि मृते पत्यौ सति पत्न्या तेन सह स्वर्गसोपानारोह-प्रयोजको वह्निप्रवेशः कर्तव्य एवेति वैषम्यमवगम्यते।

गरुडपुराणे तावत् मृतपत्या सह चिताग्निना स्वजीवित-शरीरं भस्मसात्कर्त्र्याः सत्याः महिमानं पृच्छति—

'सती यदि भवेत्पत्नी, तस्याश्च महिमां वद।'
(ग. पु. १०।१) महिमां = महिमानं—आर्षप्रयोगः।

स्वर्गे सहैव पतिपत्न्योर्निवासः, ततः पुनर्जननेऽपि चेति महिमाऽनेन कथ्यते—

'या स्त्री स्वपतिना सार्द्धं, स्वशरीरञ्च दाहयेत्।
सदा तौ सह वर्तेते, जन्मनेऽपि तथा च तौ॥' इति

पतिव्रता नारी स्वमृतपत्युः चिताऽग्निं तावद् गंगाजलसमं शीतलं जानीयात् तस्मान्न बिभीयात् तेन प्रियपत्या सहैव गमनं कुर्यादिति-विधत्ते—

'पतिव्रता यदा नारी, भर्तुः प्रियहिते रता।
इच्छेत्सहैव गमनं, तदा स्नानं समाचरेत्॥'
(१०।३५)

गंगाजलसमं ज्ञात्वा शरीरं परिदाहयेत्। इति
गर्भिणी नारी पश्चात्सती स्यात्, न तदेति बोधयति—
न दहेद् गर्भिणी नारी शरीरं पतिना सह।
जनयित्वा प्रसूतिं च बालं पोष्य सती भवेत्॥'
पुनः सत्याः महत्त्वं विविधं प्रतिपादयति—
'सती नारी दहेत्पापं, हुताशने ह्यमृतोपमे।'
मृते भर्तरि या नारी समारोहेद्धुताशनम्।
साऽरुन्धतीसमा भूत्वा स्वर्गे लोके महीयते॥
तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः।
रमते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश॥
मातृकं पैतृकञ्चैव, यत्र सा च प्रदीयते।
कुलत्रयं पुनात्यत्र भर्तारं याऽनुगच्छति॥

तिस्रः कोटचोऽर्द्धकोटिश्च यानि रोमाणि मानुषे ।
तावत्कालं वसेत्स्वर्गे, पतिना सह मोदते ॥' इति

विपक्षे चिताऽग्निना स्वशरीरदाहाकरणे विरहदुःख-लक्षणं दण्डं बोधयति—

'या क्षणं दाहदुःखेन सुखमेतादृशं त्यजेत् ।
सा मूढा जन्मपर्यन्तं दह्यते विरहाग्निना ॥
यावच्चाग्नौ मृते पत्यौ, स्त्री नात्मानं प्रदाहयेत् ।
तावन्न मुच्यते सा हि, स्त्रीशरीरात्कदाचन ॥

इदं चिन्त्यम्—सती नारी स्वशरीरं दग्ध्वा बहुदुःख-भाजनात् स्त्रीशरीराद् विमुक्ता भवेच्चेत् तदा तस्याः पत्या सह स्त्रीशरीराभावात् रमणं कथं सिद्धचेदिति । उपसंहरति—

'तस्मात्पतिं शिवं ज्ञात्वा सह तेन दहेत्तनुम् ।' इति
(गरुडपुराणे)

परन्तु—

मृतानुगमनं नास्ति ब्राह्मण्याः ब्रह्मशासनात्'
(व्यासस्मृतिः-८।७)

इति वचनादवगम्यते-ब्राह्मणभार्या स्वमृतपतिचितां प्रविश्य सती न स्यात्, स्वशरीरमग्नौ न प्रदहेत्, मृतानुगमनञ्च न कुर्यात्, किन्त्वर्थात् परिशिष्टाः—अन्याः क्षत्रियभार्याद्याः स्त्रिय एव सत्यः स्युः, स्वशरीराणि मृतेन पत्या सहाग्नौ प्रक्षिप्य प्रदहेयुः इति प्रकृष्टमहिमशालिन्यां सतीप्रथायामपि पक्षपातलक्षणं वैषम्यमवगम्यते । ब्राह्मणलेखकप्रबोधितः सतीत्वप्रयोजितो महालाभः स्तुत्यो ब्राह्मण्या कथं परित्यज्यते ? इति न ज्ञायते । अथवेदृशी बलात्काररूपा विध्वंसलीला स्वगृहे

न स्यात्, किन्तु परगृहेष्वेव भवेदिति दुरभिसंधिरेव कारणं प्रत्येतव्यम् ।

सतीप्रथा तु – घोरातिघोरान्यायरूपत्वात् बहुकालात्-अंग्रेजराज्यशासनेन प्रतिसिद्धा, संप्रत्यपि न काऽपि स्त्री सती भवितुं शक्नोति । अतः शास्त्रबोधितः सतीधर्मोऽपि-अधर्मत्वेना-न्यायत्वेन च हेतुना 'ब्रह्मशासनात्' तदा ब्राह्मणभार्यया परि-त्यक्तः, क्षत्रशासनाभावात् क्षत्रियाद्याभि र्न परित्यक्तः, इति क्षत्रियवैश्यादिकरेषु लेखन्यभाव एव कारणं विज्ञा-यते । तत्सद्भावे तु – 'मृतानुगमनं नास्ति क्षत्रियायाः क्षत्रशा-सनात् ।' इति लिखितं कुत्रचित् उपलभ्येत ।

अतो वदन्ति व्यवहाररहस्यविदः पण्डिताः—'यत्र किल यादृशी स्वार्थान्धता, तत्र किल तादृशी नीतिमर्यादाविरुद्धवर्तन-शीलताऽवलोक्यत इति । नीतिशास्त्रन्तु सर्वत्र समतामेवोपदि-शति, न तु विषमताम् ।

एवं 'बालं पोष्य सती भवेत्' इत्यस्य खण्डनं 'पुत्ररूपेण भर्ता जीवतीति, पुत्रवतीनां नास्ति सहगमनं चिताप्रवेशलक्षणं' इत्यनेन श्रीवल्लभाचार्येणापि भागवतसुबोधिनीव्याख्यायां कृतम् ।

स्त्रीशिक्षाप्रतिषेधः

'स्त्रीशूद्रौ नाधीयाताम्' इतीयं प्रसिद्धा श्रुतिः सर्वत्र पठ्यते, प्रामाणिकत्वेन स्त्रीशूद्रशिक्षाप्रतिषेधबोधनाय समर्प्यते संस्कृतपण्डितैः, । अत्र किल स्त्रीपदेन सर्वासां स्त्रीणां ग्रहणं ज्ञातव्यम् । न तु केवलायाः शूद्रस्त्रियाः । सा तु शूद्रपदेनार्थाद् बोधितैव, यतः शूद्रस्त्री शूद्रैवास्ति, न तु तदितरा भवति ।

अतः स्त्रीपदं ब्राह्मणादिद्विजस्त्रीः एव बोधयति । तथा च समग्र-स्त्रीशिक्षाप्रतिषेधेन वर्तमानकालातिविरुद्धेन भारतीयार्याणां निखिलमर्धमङ्गमन्धकारग्रस्तमेव भवति । अतः प्राक्काले 'स्त्रियः सर्वथाऽध्ययनपराङ्मुखा एवासन्' इति प्राचीनव्यव-हाराद् विज्ञायते । अतः इदं तावद्विवेक्तव्यम्—स्त्रीशिक्षाप्रति-षेधः किं धर्मरूपो वाऽधर्मरूपो वा मन्तव्यः ? । पूर्वोक्तया श्रुत्या बोध्यतेऽतो धर्मरूपः स्यात् इति रूढिवादी संस्कृतपण्डितो वक्तुं शक्नोति । सर्वोदयाभिलाषी पक्षपातरहितः सज्जनस्तु तां मूर्खपण्डितकपोलकल्पितां श्रुतिमनादृत्याधर्मरूप एवास्तीति निर्भयतया ब्रवीति ।

अत एव शिष्टाः समाजहितचिन्तकाः समुन्नतं प्रशंसनीयं राष्ट्रं तदेव मन्वते – यत्रावस्थिताः सर्वेऽपि जनाः नरा नार्यश्च योग्यां सर्वविधां शिक्षां लभन्ते—'स्त्री वा पुमान् वाऽस्तु न कोऽपि राष्ट्रे, शिक्षां विना जीवितुमर्हतीह ।' स्त्रीशिक्षणमप्या-वश्यकम् – अन्यथा 'स्त्रीशिक्षणेऽभावपदं प्रयाते राष्ट्रं भवेत्के-वलमेकनेत्रम् । अतः प्राचीनतराः वैदिक्यः —'स्त्रियोऽपि शास्त्रा-ध्ययनं विधाय क्रमेण वैदुष्यमवापुरीड्यम् । पूज्या बभूवुश्च समाजमध्ये गार्ग्यादयस्तत्र निदर्शनानि ॥' एवं वेदसंहितासु तत्त-द्वेदमन्त्राणां दर्शनशालिन्यस्सद्बुद्धिप्रतिभासंयमादिसद्गुणाढ्याः ऋषिकाः सुशिक्षिताः स्त्रियो बहवोऽभिवर्तिणाः सन्ति । तथा च वर्तमाने प्रकाशमये युगेऽस्मिन् स्त्रीशूद्रशिक्षाप्रतिषेधः कथ्यमानः केवलं कथयितुः उपहासं मौढ्यञ्चैव सूचयसि ।

एवं 'न शूद्राय मतिं दद्यात्' इत्यनेन् किल शूद्राय = अमु-कजातिविशेषाय – अमुक समुदायविशेषाय च मतिं = अध्ययना-

दिजन्यं ज्ञानं न समर्पयेत्, इत्यर्थकेन ब्राह्मणलेखकानां हृदयेषु स्वोत्तमजातिसमुदायपक्षपातं, शूद्रजातिसमुदायविद्वेषश्च स्पष्टं विज्ञायते । वयमुत्तमा एव समुज्ज्वले प्रकाश एव सदाऽवस्थातुं योग्याः स्मः, स्वेभ्योऽन्येऽधमाः गाढान्धकारेऽनर्थबहुल एव सदा निमग्नाः मूढा एव सन्तस्तिष्ठेयुः इति तेषां गर्वघृणाबोधकं तात्पर्यं विभाति ।

स्त्रीनिन्दाप्राचुर्यम्

संस्कृतवाङ्मये तावत् 'द्वारं किमेकं नरकस्य नारी' इति प्रसिद्धा भणितिर्विद्यते स्त्रीनिन्दायै । या काऽपि नारी स्यात्, बाला वा, कन्या वा, युवती वा, वृद्धा वा, भगिनी वा, माता वा, जाया वा । सर्वाः नार्यो महादुःखप्रयोजकस्य नरकस्यैव द्वारम् । न तु प्रभूतसुखजनकस्य स्वर्गस्य द्वारम् । तासु तु संस्कृतपण्डिताः पौराणिका :– ' क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ' (भा० ९।१४।३६) इत्यनेन सुखाभावमर्थात् दुःखमेव प्रबोधयन्ति । दुःखप्रयोजकत्वाय तासां दुष्टत्वं विविधदोषनिधितयैव वर्णयन्ति —

'स्त्रियो ह्यकरुणाः क्रूराः दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥
विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः ।
नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥

(भा० ९।१४।३७–३८) इत्यादिना ।

दुर्मर्षाः = दुर्गतं मर्षः – सहनं यासां ताः, साहसं = बलात्कारलक्षणं कर्म प्रियं यासां ताः । अल्पार्थेऽपि = व्यभि-

चारलक्षणे तुच्छेऽर्थे समुपस्थिते सति। विश्रब्धं = विश्वासापन्नं, अलीकविश्रम्भं = कपटविश्वासं, पुंश्चल्यः = पुरुषमात्रभोक्त्र्यः; अस्यैव विवरणं – स्वैरवृत्तयः = स्वच्छन्दाचाराः इति। यथा वृकाणां हृदयं क्रूरं तथैव सर्वासां स्त्रीणां हृदयमपि क्रूरं मन्तव्यम्। अकरुणाः = दयारहिताः, क्रूराः = क्रूरस्वभावाः। दुर्मर्षाः = क्षमासहनशीलतारहिताः, प्रिये व्यभिचारादिलक्षणे निमित्ते साहसं स्वसामर्थ्यं यासां ताः प्रियसाहसाः। लोकपरलोकहान्यादि-कमविचार्यैव प्रवृत्तिर्यासां प्रवर्तते स्वेच्छाचारलक्षणा। पतिं भ्रातरमपि घ्नन्ति = विनाशयन्ति। अन्यान्नघ्नन्तीति किमुत वक्त-व्यम्, अत्र सन्देहो नास्ति, लोके प्रसिद्धत्वादित्याशयेनाह – हीति। अज्ञेषु = स्त्रीस्वभावानभिज्ञेषु। त्यक्तसौहृदाः = स्नेहरहिताः, नवं नवं कान्तं, अभीप्सन्त्यः = प्राप्तुं कामयमानाः स्वैरं = यथे-च्छवृत्तिर्यासां, तथा भवन्ति।

नराणां वैराग्याय नारीणां निन्दा क्रियते इति चेत् कश्चिद् ब्रूयात्, तदा तुल्यन्यायेन नारीणां नरेभ्यो वैराग्याय नराणामपि तादृशी निन्दा कर्तव्या भविष्यति। एवं परस्परनिन्दातः कुत्रापि प्राशस्त्यं नावस्थास्यते।

एवं यद्यपि लोकेऽस्मिन् पुरुषा अपि विविधदोषाढ्याः स्त्र्य-पेक्षया बाहुल्येनोपलभ्यन्ते। तथापि तेषां निन्दा – 'पुरुषाः अक-रुणाः क्रूराः दुर्मर्षाः प्रियसाहसाः। घ्नन्त्यल्पार्थेऽपि विश्रब्धां पत्नीं भगिनीमुत॥' इत्यादिना कथं न कृता? इत्यस्ति प्रभूता-श्चर्यम्। लेखकानां पुरुषत्वात् स्वपक्षपातोऽनेन विज्ञायते किम्?। एवं 'विज्ञान्महाविज्ञतमोऽस्ति को वा?, नार्या पिशाच्या न च वंचितो यः।' 'का शृंखला प्राणभृतां? हि नारी' 'विश्वासपात्रं

न किमस्ति ? नारी ।' किं तद्विषं भाति सुधोपमं ? स्त्री ।' (प्रश्नोत्तरी) 'सुमुखेन वदन्ति वल्गुना, प्रहरन्त्येव शितेन चेतसा । मधु तिष्ठति वाचि योषितां हृदये हालाहलं महद्विषम् ॥' (पञ्चतन्त्रं १९९) 'आवर्तः संशयानां, अविनयभवनं, पत्तनं साहसानां, दोषाणां संनिधानां, कपटशतगृहं क्षेत्रमप्रत्ययानाम् । दुर्ग्राह्यं यन्महद्भिर्नरवरवृषभैः सर्वमायाकरण्डं, स्त्रीयन्त्रं केन लोके विषममृतयुतं धर्मनाशाय सृष्टम् ॥' (पञ्चतन्त्र-२०१) 'एता हसन्ति च रुदन्ति च कार्यहेतोः, विश्वासयन्ति च परं न च विश्वसन्ति । तस्मान्नरेण कुलशीलवता सदैव, नार्यः श्मशान-घटिका इव वर्जनीयाः ॥' (प० त० २०३) इत्यादिभिः- यत्र तत्र स्त्रीनिन्दा प्राचुर्येणावलोक्यते । सर्वासां नारीणां पिशाची-त्ववञ्चकत्वबन्धकत्व - अविश्वसनीयत्व-विषमयत्व-संशयकापट्या-विनयसाहसादिप्रचुरदोषनिधानत्व - धर्मनाशकत्व-वर्जनीयत्वादि-लक्षणं गालीप्रदानमुक्त्वा स्पष्टतया सर्वाः नार्यः संस्कृतपण्डितैर्वि-निन्दिताः । अतएवैताद्दृशाः नार्यपमानसूचकाः दुष्टभावाः गौरव-शालिनः संस्कृतसाहित्यस्य कलंकभूता एव तत्त्वदर्शिभिर्विद्वद्भिर्-मन्यन्ते । धूर्तपण्डितानामेषा महती गर्ह्या दुष्टलेखनलीलाऽस्ती-त्यहं मन्ये ।

एवं महात्मतुलसीदासेन हिन्दीरामायणनिर्मात्रा अपि पूर्वोक्तसंस्कृतश्लोकाननुसृत्य बाहुल्येन यत्र तत्र स्त्रीणां निन्दा कृता दृश्यते—'नारीस्वभाव सत्य सब कहहीं, अवगुन आठ सदा उर रहहीं । साहस अनृत चपलता माया, भय अविवेक अशौच अदाया । जिमि स्वतन्त्र भये बिगरहि नारी ।' पाप उलुक-निकर सुखकारी, नारी निबिड रजनी अंधियारी । अवगुन मूल शूल-

प्रद, प्रमदा सब दुःखखानि ।' इत्यादिना ।

योगिनीमुनिमण्डनखण्डनम्

स्कन्दपुराणे नागरखण्डे तावत् काचन योगिनी देवी स्त्रीः प्रशंसति–'एतच्चराचरं विश्वं, स्त्रीभिः सन्धार्यते मुदा । इति । B तत्प्रशंसां श्रुत्वा कश्चन स्त्रीद्वेषी मुनिः ताः निन्दति–

स्त्रियो निन्द्यतमाः सर्वाः, सर्वावस्थासु सर्वदा ।
इह लोके परे चैव, ताभ्यः सौख्यं न लभ्यते ॥ इति।

एवं तन्निन्दां श्रुत्वा सा योगिनी साध्वी देवी तन्निवारणाय पुनः पुनस्ताः प्रशंसति, एवं स मुनिस्तत्प्रशंसानिवारणाय पुनः पुनर्निन्दति, एवं तयोः क्रमशः प्रशंसानिन्दे प्रवर्तेते–इत्थं–योगिनी वदति –

'अनिन्द्याः योषितः सर्वाः, नैता दुष्यन्ति कर्हिचित् ।
मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥१॥

मुनिः कथयति –

'स्त्रियः पापसमाचाराः, नैताः शुध्यन्ति कर्हिचित् ।
परकान्ते रति ह्यासामन्त्यजत्वं प्रयच्छति ॥२॥

यो०–'मा मैवं वद मूढात्मन् ! अमेध्या इति योषितः ।
अत्र श्लोकः पुरा गीतो मनुना तं निबोध मे ॥३॥
ब्राह्मणाः पादतो मेध्याः (पवित्राः) गावो मेध्यास्तु पृष्ठतः ।
अजाश्वा मुखतो मेध्याः, स्त्रियो मेध्याश्च सर्वतः ॥४॥

B स्त्रीभिः=भूमिभिः, धेनुभिः जननीभिः, धनधान्यादिरूपाभिः श्रीभिश्च ।

अतः—तस्य चिन्तामणिर्हस्ते, तस्य कल्पद्रुमो गृहे ।
कुबेरः किंकरस्तस्य, यस्य स्यात्कामिनी गृहे ॥५॥
मुनिः—तस्यापदोऽखिला नूनं, दुःखं तस्याखिलं गृहे ।
नरकः सर्वतस्तस्य, यस्य स्यात्कामिनी गृहे ॥६॥
यो०—यानि कान्यत्र सौख्यानि, भोगस्थानानि यानि च ।
धर्मार्थकामजातानि, तानि स्त्रीभ्यो भवन्ति हि ॥७॥
मुनिः—यानि कानि सुदुःखानि, क्लेशानि यानि देहिनाम् ।
यानि कष्टान्यनिष्टानि, स्त्रीभ्यस्तानि भवन्ति च ॥८॥
यो०—धर्मार्थकाममोक्षान् स्त्री, चतुरोऽपि चतसृभिः ।
वह्निप्रदक्षिणाभिस्तान् विवाहेऽपि प्रदर्शयेत् ॥९॥
मुनिः—संसारभ्रमणं नारी, प्रथमेऽपि समागमे ।
वह्निप्रदक्षिणान्याय - व्याजेनैव प्रदर्शयेत् ॥१०॥
यो०—के नाम न विरज्यन्ति ? ज्ञानाढ्या अपि मानवाः ।
मीनाक्षीं सुन्दरीं गौरीं, दृष्ट्वा पीनपयोधराम् ॥११॥
मुनिः—के नाम न नश्यन्ति, मूढज्ञानाः नितम्बिनीम् ।
रम्यबुद्ध्योपसर्पन्ति, ये ज्वालाः शलभा इव ॥१२॥
यो०—सुरम्यौ च कठोरौ च प्रोत्तुंगौ च पयोधरौ ।
स्त्रीस्तनौ सेवते धन्यस्तद्विमुखोऽतिपापभाक् ॥१३॥
मुनिः—आभोगिनौ मण्डलिनौ, तत्क्षणान्मुक्तकञ्चुकौ ।
वरमाशीविषौ स्पृष्टौ न तु नार्याः पयोधरौ ॥१४॥
यो०—न चासां रचनामात्रं, केवलं रम्यमङ्गिभिः ।

परिष्वङ्गोऽपि रामाणां सौख्याय पुलकाय च ॥१५॥
मुनिः—न चासां रचनामात्रं, रम्यं स्यात् पापदं दृशः ।
वपुःस्पृष्टं विनाशाय, स्त्रीणां प्रेत्य नरकाय च॥१६॥
यो०—को नाम न सुखी लोके, को नाम सुकृती न च ।
स्पृहणीयतमः को न, स्त्रीजनो यस्य रज्यते ॥१७॥
मुनिः-को न मुक्तिं व्रजेत्तत्र, को न शस्यतरो भवेत् ।
को न स्यात् क्षेमसंयुक्तः स्त्रीजने यो न रज्यते ॥१८॥
यो०— संसारान्तः प्रसुप्तस्य, कीटस्यापि प्ररोचते ।
स्त्रीशरीरं नरस्यात्र किं पुन र्न विवेकिनः ? ॥१९॥
मुनिः— अमेध्यजातस्य यथा, तथा तद्रोचनं कृमेः ।
मिथ्यासंसारमूढस्य स्त्रीशरीरे च कामिनः ॥२०॥
यो०— सौख्यस्थानं नृणां किञ्चिद् वेधसाऽन्यदपश्यता ।
शाश्वतं चिन्तयित्वाऽथ स्त्रीरत्नमिदमाहृतम् ॥२१॥
मुनिः—बन्धनं जगतां किञ्चिद् वेधसाऽन्यदपश्यता ।
स्त्रीरूपेण ततः कोऽपि पाशोऽयं स्त्रीमयःकृतः॥२२॥
यो०—अनृतं तद्वचः श्रुत्वा, योगिनी तथ्यमब्रवीत् ।
दुःखदा पाशरूपा चेत्, नारी देवोत्तमैः कथम् ॥२३॥
सेविता स्यात् तथा सा हि कथं स्यात् सहचारिणी ? ।
माता मान्या कथं सा स्यात्? शक्तिः पूज्या कथं भवेत्॥२४॥
पश्य तावत् महामूढ ! देवानां वृत्तमीदृशम् ।

विष्णुश्च सेवते लक्ष्मीं, गौरीं शम्भुः सरस्वतीम् ॥२५॥
ब्रह्मा च सेवते नित्यं, स्त्रियं को न हि सेवते ?।
सौख्यमोक्षप्रदानारी, सेव्या देवोत्तमैरपि ॥२६॥
मूढा एव न सेवन्ते, भाग्यहीनाः खरा नराः।
अवलोकय नेत्राभ्यां, स्वकीयं वृत्तमीदृशम् ॥२७॥
नार्यास्त्वं किं न जातोऽभूः ? किं न पीतं पयस्त्वया ?।
तच्छुभे चोदरे मूढ ! शयानोऽभून्न किं मुने ? ॥२८॥
निधायाङ्के निजे प्रेम्णा, लालितोऽभून्न किं भवान् ?।
रक्षितः पालितो मात्रा शिक्षितो वर्धितः पुनः ॥२९॥
प्रेमोपकारजातं तद् - अखिलं विस्मृतं त्वया।
मातृद्रोहकृतघ्नत्व-मिथ्यावादैश्च मानसम् ॥३०॥
विहितं दूरितैः पूर्णं तज्जातं गरलं यथा।
भगवत्याः महादेव्याः प्रभावं त्वं पुनः शृणु ॥३१॥
येन निन्दादिकालुष्यं, ध्वस्तं स्यात्तव भो मुने !।
एकैव देवता पूज्या जगन्माता भवान्यपि ॥३२॥
स्वसौन्दर्यप्रकाशाय त्रिरूपाणि बिभर्ति हि।
काञ्च्यामेकाम्रनाथस्य, प्रिया भूत्वा मनस्विनी ॥३३॥
कामाक्षीनाम बिभ्राणा मदनानन्ददायिनी।
मधुरायां महादेव - सुन्दरेश्वरवल्लभा ॥३४॥
मीनाक्षीनाम बिभ्राणा, नेत्रानन्दसमर्पिका।
विश्वनाथप्रियाभूत्वा, काश्यां सैव विराजते ॥३५॥

विशालाक्षीति नाम्ना सा, दत्ते दृष्टिञ्च तादृशीम् ।
लक्ष्मीरूपेण सा नारी हन्ति दारिद्र्यमेकतः ॥३६॥
शारदारूपमास्थाय, मौढ्यदुःखं ततोऽन्यतः ।
दुर्गाभूत्वा बलाढ्या सा, हन्ति दौर्बल्यमन्यतः ॥३७॥
दुर्गायाः बलवीर्याणि न ज्ञायन्ते त्वया हि किम् ? ।
नारी नारायणी साक्षात्, विश्वस्योद्भवकारिणी ॥३८॥
लालने पालने दक्षा सदा वन्द्या हि श्रद्धया ।
एवं स मुनिशार्दूलस्तयाऽतीव पराजितः ।
निरुत्तरीकृतः सम्यक् योगिन्या शास्त्रयुक्तितः ॥३९॥
मुनिरुवाच-त्वया सह न संवादो मया कार्योऽधुना क्वचित् ।
शास्त्रयुक्तिप्रहारेण त्वया मे खण्डितो भ्रमः ॥४०॥
भवतीं योगिनीं मन्ये, सर्वशास्त्रविशारदाम् ।
तेजोबोधसमायुक्तां, मां बोधयितुमागताम् ॥४१॥
तस्मान्नमे महाभगे ! स्वमतखण्डने कृते ।
जायते हि महामोदः कोपः स्वल्पो न विद्यते ॥४२॥

भारतवीराग्रगण्यो गुरुर्गोविन्दसिंहः

हिन्दुशास्त्रपुराणादीनां जन्मजातिमूलकविषमयोत्तमाधमभेदभाववव्यवहारेभ्यो नितान्तं समुद्विग्नो भारतवीराग्रगण्यो हिन्दुसमाजे, प्रशस्तक्षत्रियकुले च लब्धजन्मा श्रीगुरुर्गोविन्दसिंहो हिन्दुधर्मस्य जन्मत एव ब्राह्मणादिवर्णभेदनिरूपणपरान् विषमादेशान् हित्वा खालसापन्थनामकमभिनवं समुदारसिखधर्मं

प्रणिनाय । तेन किल स्वानुयायिभ्यः शिष्येभ्यः (शिक्खेभ्यः इति प्राकृतभाषायाम्) समत्वैकत्वसंघटनसाधकं सर्वेषु स्वशिष्येषु समानरूपेण ब्राह्मणादिवर्णचतुष्टयधर्मान् प्रशस्तज्ञानबलोद्योगसेवारूपान् संस्थापयितुं प्राकृतभाषायामित्थमुपदिष्टम्—

'गुरुघर जन्म तुम्हारे होये, पिछले जाति वरन सब खोये ।
चार वरन के एको भाई, धरम खालसा पदवी पाई ।
हिन्दु-तुरकते आहि निआरा, सिंहमजब अब तुमने धारा ।
मानस की जाति सब एको पहिचानो ।' इति

सः किल वीरवरो गुरुवरः श्रीगोविन्दसिंहः पुनरपीत्थं समुपदिदेश—दौर्बल्यमेवास्ति महत् पापम् । तत्खलु शारीरिकं वा स्यात्, मानसिकं वा स्यात् सामाजिकं वा स्यात्, राष्ट्रियं वा स्यात्, पारतन्त्र्यप्रयोजितं वा स्यात्, धनधान्यशस्त्राद्यभावप्रयुक्तं वा स्यात्, यत्किमपि स्यात्, तत्सर्वं युष्माभिः सर्वप्रकारेण हेयमेव । एवं सर्वविधं प्राबल्यमेव समुपादेयम् । संयमप्रधानं चारित्रिकं बलमेव मुख्यं बलं मन्तव्यम् । अतो यूयं मम शिष्याः सर्वेऽपि सबलाः दुष्टशत्रुविजयशीलाः पराक्रमशालिनो भवत । यूयं स्वकीयानीमानि शरीराणि सदा सुदृढानि पुष्टानि स्वस्थानि तेजोबलसंयुक्तानि च कुरुत । तदर्थं पौष्टिकं पर्याप्तमाहारञ्च संपादयत । मनांसि सदा शान्तिप्रसन्नतोत्साहपूर्णानि प्रफुल्लितानि च विधत्त । परमेश्वरप्रदत्तज्ञानबलधनादिशक्तीनां सदुपयोगं कुरुत, न तु दुरुपयोगम् । समानभावमवलम्ब्य पक्षपातस्वार्थान्धतादिदोषांश्च विहाय समाजसंघट्टनं साधनीयम् । यदाहुः— विज्ञवराः— 'संघे शक्तिः कलौ युगे ।' इति, अन्येषां प्रशस्तसेवायै यूयं तत्परा भवत ।

अनेकेश्वरवादं, विभिन्नदेवीदेवतावादञ्च परित्यज्य—एकेश्वर-वादमेव स्वीकुरुत। मिथो यूयं युष्मासु समानरूपेण बन्धुभावं संस्थापयत। यूयं सर्वे संमिलिताः भवत, यथार्थज्ञानं परमेश्वर-भक्तिञ्च संपादयत। निरन्तरं विश्वपितरं परमेश्वरं संस्मरत। तत्पावननामानि च जपत। आलस्यं प्रमादञ्च विहाय परोपकाररताः भवत। स्वगृहस्थजीवननिर्वाहाय न्यायो-पेतान् व्यवहारान् कुरुत। दुष्टानां दमनाय स्वप्रियराष्ट्रस्वात-न्त्र्यरक्षणाय च स्वहस्तेषु कृपाणादिशस्त्राणि विधारयत। क्षात्रं प्रशस्तं बलं धारयित्वा स्वप्रियदेशं विधर्मिविदेशिपारतन्त्र्यात् विमुक्तं कुरुत। एवं श्रीगुरुगोविन्दसिंहेन एकस्मिन्नेव स्वसिख-मानवे स्वयथार्थोपदेशद्वारा ब्राह्मणक्षत्रियवैश्यशूद्राणां चतुर्णां वर्णानां ज्ञानबलधनसंग्रहसेवादिरूपाः सद्गुणाः संस्थापिताः।

विकृतान् संस्कृतान् आर्यान् कर्तुं वेदादेशः

दासाः आर्याः कर्तव्याः, अधमाः उत्तमाः विधातव्याः, विकृताश्च संस्कृताः कर्तव्याः, प्रतिकूलाः शत्रवः, अनुकूलाः मित्राणि यथा स्युः, तथा प्रयतनीयम्। तदर्थं शोभना समुदारा सौजन्योपेता प्रज्ञाप्रतिभा संपादनीया, इत्येवंभावबोधकः सदुप-देशो भगवता ऋग्वेदेन विधीयते—तथाहि—

'आ संयतमिन्द्र ! णः स्वस्तिं,
शत्रुतूर्याय बृहतीममृध्राम्।
यया दासान्यार्याणि वृत्रा—
करो वज्रिन् ! सुतुका नाहुषाणि॥
(ऋ० ६।२२।१०)

अथमर्थः—हे इन्द्र ! शत्रुतूर्याय = शत्रूणां विरोधिनां

तारणाय-समुद्धाराय- वशीकरणाय, बृहतीं = महतीं- समुदारां, अमृध्रां = अहिंसितां-सर्वेषामनुकूलां-पक्षपातस्वार्थान्धतादिदोष-रूपहिंसावर्जितां, संयतं = संयतीं = सर्वेषां हितसाधनाय संगच्छमानां, स्वस्ति = क्षेमकल्याणलक्षणां प्रज्ञासंपदं, नः = अस्मभ्यं, आभर = संपादय–देहि । 'आ' इत्युपसर्गेण योग्यक्रियापदाध्याहारः, प्रसिद्धो वेदमन्त्रेषु चायम् । हे वज्रिन् = वज्रविधर्तः ! इन्द्र ! यया स्वस्तिलक्षणया प्रज्ञासंपत्त्या, दासानि = निकृष्टानि-विकृतानि, विरोधिप्रतिकूलानि मनुष्यजातानि, आर्याणि = उत्कृष्टानि– स्वसंस्कृतिसमुदारशुभधर्मकर्मयुक्तानि, त्वं करः = अकरोः । तथा नाहुषाणि = निकृष्टविकृतमनुष्यसम्बन्धीनि, नहुषा इति मनुष्यनामैतत् । वृत्रा = वृत्राणि, शत्रुत्वप्रयोजकानि दुर्गुणदुष्कर्मलक्षणानि–आचरणानि, सुतुका = सुतुकानि-शोभन-संस्कृतिसद्गुणसत्कर्मोपेतानि, करः = अकरोः इति ।

अत एव वेदमन्त्राणां द्रष्टारो निर्मातारः आर्याः महर्षयः अस्य विश्वस्य जगतीतलस्य सर्वाः दिशः वैदिकधर्मसंस्कृतिविज्ञानप्रचाराय प्रवव्रजुः, उत्तरध्रुवपर्यन्तमपि गमनं विधाय तत्रत्यमितिवृत्तं वेदमन्त्रेषु प्रदर्शयामासुः । अत एव तेषां 'कृण्वन्तो विश्वमार्यम्' इति पावनः समुदारः उद्घोष आसीत् । आर्यं = आर्यभावधर्मसंस्कृतियुक्तं विश्वं कृण्वन्तः = कृण्वन्तु कुर्वन्तु इत्यर्थः । अतो वेदमन्त्रेषु आदर्शमनुष्यं सुसंस्कृतं धार्मिकं जनं विचारोच्चाराचाराणां शुद्धतां विधाय विविधाभ्युदयलाभाय प्रयतमानमेवोद्दिश्यार्यशब्दस्य प्रयोगो विहितः ।

वीर्यानुसरणं योग्यतारुचिसमादरश्च

'वाग्वीर्याः ब्राह्मणाः भवन्ति, बाहुवीर्याः क्षत्रियाः

भवन्ति, धनवीर्याः वैश्याः भवन्ति, शारीरश्रमवीर्याः शूद्राः भवन्ति' (वासिष्ठस्मृतिः) इति स्मार्तन्यायेन ये किल वाक्-पराक्रमशालिनो बुद्धिमन्तो ज्ञानवन्तः सन्ति, ते ब्राह्मणाः वेदितव्याः। प्रकृष्टज्ञानमन्तरेण वाक्वीर्यलाभासंभवात्, तेनार्थात् ज्ञानमाक्षिप्यते। ज्ञानबलं वाग्वीर्यञ्च 'यः क्रियावान् सः पण्डितः' इति न्यायेन स्वपरहितसम्पादिकाः क्रियाः संसाधयेतां चेत्, तदैव तयोः साफल्यं मन्तव्यम्। एवं बाहुवीर्याः शूरवीराः अभिनवशस्त्रास्त्रप्रवीणाः स्वविशालराष्ट्रसमाजहितसाधनतत्पराः रक्षकाः क्षत्रियाः वेदितव्याः, एवं कृषिवाणिज्यगोरक्षणादिभिः धनधान्यवीर्यं ये संपादयन्ति, ते राष्ट्रपोषकाः वैश्याः, एवं शारीरश्रमवीर्याः शूद्राः वेदितव्याः, अनेन विविधवीर्यानुसरणेनापि गुणकर्मवाद एव सिद्ध्यति।

अत एव विभिन्नव्यक्तिषु पृथक्-पृथक् ब्राह्मणत्वादि,—वर्णलेबनानि संयोज्य तासां विभिन्नानि दलानि कृत्वा, तत्तद्वीर्यानुसरणञ्चोपेक्ष्य विषमताप्रदर्शनं कथमपि न कर्तव्यम्। अपितु विशाले हिन्दुसमाजे समतायाः एकतायाश्च स्थापनाय तत्तद्योग्यतावीर्यानुसरणरुच्यादिकञ्चानुरुध्य ताभ्यः तत्तच्छिक्षकरक्षकादिस्थानानि समर्पणीयानीत्यस्ति न्याय्यधर्म्यसंगतः पन्था।

किमस्ति पाकिस्तानम्

(१) हिन्दुस्थानस्य हिन्दुजातेश्चास्ति प्रबलं दौर्भाग्यम्।

(२) हिन्दुधर्मस्योच्चनीचभेदभावमयस्यास्ति कुत्सितमवाञ्छितं कटुतमं फलम्।

(३) स्वप्रियदेशस्य विदेशरूपेण परिणतो गर्हणीयोऽस्ति ह्रासः।

(४) हिन्दुस्थाने प्रादुर्भूतानां भूतवर्तमानभविष्यत्कालिकानां शंकराचार्यरामानुजाचार्यवल्लभाचार्यादिजगद्गुरूणामस्ति-क्रूरतम उपहासः ।

(५) हिन्दुस्थानस्य शाश्वतोऽपरिवर्तनीयः प्रबलतमोऽस्ति शत्रुः ।

(६) वैदिकपुरातनादर्शस्याभेदभावमयस्यावहेलनाजन्यो निन्दनीयोऽस्ति परिणामः ।

(७) उपनिषदादिशास्त्रप्रमाणोद्भासितस्य केवलाद्वैततत्त्वज्ञानस्य व्यवहारशून्यताप्रभवं व्यर्थताज्ञापकं मौढ्यात्मकमस्ति प्रचण्डं ध्वजोत्तोलनम् ।

(८) समुदारे सनातने वैदिकधर्मे बहुकालात् समारोपितानां यूथवाद—विविधमतवाद-अनेकेश्वरतावाद- विभिन्नसंप्रदायतावाद-श्रेष्ठताकनिष्ठतावाद-स्वार्थान्धतापक्षपातादिदुर्गुणानां फलरूपाऽस्ति प्रत्यक्षाऽसह्या विविधा क्लेशाभिव्यक्तिः ।

(९) नीचरूपेण शूद्ररूपेणास्पृश्यरूपेण चोपेक्षितानां सर्वथा तिरस्कृतानां हिन्दुभ्रातॄणां हिन्दुधर्मशिक्षादीक्षारहितानां-उच्चवर्णाभिमानिभि र्विधर्मिविदेशिरूपेण कृतोऽस्ति हिन्दुजातिपराभवज्ञापको विकासः ।

(१०) स्वदेशस्वधर्मस्वसंस्कृतिविध्वंसकमपरोक्षं शमनोपायवर्जितमस्ति हालाहलं विषम् ।

(११) गवाश्वाजगर्दभरूपेण विख्यातानां मिथो विजातीयानां ब्राह्मणादिवर्णानां संघटनाभावसूचकः स्वनिष्ठसमानबन्धुताप्रशस्तादर्शज्ञापकोऽस्ति कश्चन प्राक् स्वदेशोऽपि संप्रति विलोक्यमानो विदेशः ।

(१२) हिन्दुजातौ प्रविष्टायाः सहस्रसंवत्सरव्यापिन्याः समतैकताशून्यतायाः निर्वीर्यतायाः मूर्खतायाश्चास्ति प्रतीकम् ।

(१३) समुदारतर्कसंगतन्यायोपेतविचाराचारोच्चारशालीनां हिन्दुराष्ट्रसमतैकतावाञ्छावतामभिनवपरिष्कृतहिन्दूनां कृतेऽस्ति लज्जाखेदमयी शिरोऽवनतिः ।

(१४) हिन्दुधर्महिन्दुसंस्कृतिहिन्दुदेवरामकृष्णादिहिन्दुशास्त्रगीतोपनिषदादिकं परित्यज्य यवनधर्मतद्विकृतितत्पीरपैगम्बरतत्कुरानग्रन्थादिकं परिगृह्णतां भारतदेशोद्भवानां जनानां समूहेन विशालभारतात्सर्वथा पृथक् कृतः प्रदेशः ।

सत्यादिचतुर्युगमीमांसा, पतनोन्मुखी संस्कृतिश्च

बहवोजनाः विजिज्ञासन्ते—समुन्नतावनतरूपाणां सत्यत्रेताद्वापरकलिसंज्ञकचतुर्युगानां कल्पना वैदिकी विद्यते वा पौराणिकी वेति ? । वेदसंहितावचनेषु कुत्रापि चतुर्युगानामच्छानच्छोत्तमाधमरूपेण वर्णनस्यानुपलम्भात्, नास्ति वैदिकी कल्पना, अतः परिशेषात् पौराणिक्येव सा कल्पना मन्तव्येति केचन वदन्ति। सत्ययुगस्य प्रशस्तं महत्त्वं स्मृतिपुराणेषु विस्तरतो वर्णितम् । तत्कालीनाः सर्वेऽपि लोकाः सत्यधर्मपरायणाः प्रशान्ताः निर्वैराः प्रेमसद्भावकरुणादिसात्त्विकभावोपेता अतिदीर्घजीविन एवासन् । तत्समयोऽपि महान् अभ्यर्हणीय आसीत् । तत्र किल स्वेच्छानुसारेण पर्जन्यो वर्षति स्म । खाद्यसामग्री पर्याप्तरूपेण समुदपद्यत । लोकाः सर्वेऽपि सर्वथा सर्वत्र सुखिनएवासन् । किमपि दैहिकं भौतिकं दैविकं दुःखं नान्वभवन् इत्यादिकं सत्ययुगादेः प्रशस्तं वर्णनं विहितम् । तदुक्तं—मनुना—'चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे । नाधर्मेणागमः

कश्चित् मनुष्यान् प्रति वर्तते ॥ 'अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृतत्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥' (म० स्मृ० १।८१—८३) इति । तपोज्ञानयज्ञदानानां पादचतुष्टयेन निरूपितानां तत्र सम्पूर्णत्वात् । न सत्ययुगे कस्मिन्नपि मानवे तेषां लेशतोऽपि न्यूनता दृष्टा । अत एव निरूपिताः तपःप्रभृतयो धर्मास्तदा समग्राः सर्वत्र आसन् । सकलधर्मश्रेष्ठत्वात् सत्यस्य पृथक् ग्रहणम् । तथा चासत्यस्य सर्वथाऽभावात् सत्यधर्मयुक्तं कृतयुगमासीत् । तदा जन्मलाभमात्रेणैव सर्वे जनाः कृतकृत्याः भवन्तीति हेतोः तस्य युगस्य कृतनाम संपन्नम् । अधर्मेण = चौर्यासत्यमायादिना धनादेरागमः कश्चित् = उत्पादनं किमपि मनुष्यान् प्रति कदापि कुत्रापि नहि भवति । तदा सर्वेऽपि जनाः अरोगाः = शारीरिकमानसिकसम्पूर्णस्वास्थ्योपेताः आसन्, कुत्रापि न कोऽपि रोगोऽवर्तत । सर्वसिद्धार्थाः = सर्वेऽपि जीवननिर्वाहकाः धनधान्याद्यर्थाः अनायासतः सिद्धाः आसन् । न कस्याप्यर्थस्याभावप्रयुक्तं दैन्यमासीत् । तत्र च जनानां स्वाभाविकमायुः चतुर्वर्षशतात्मकं (४००) अभूत् । एवंभूताः मानवाः कृतयुगे भवन्ति, त्रेतादिषु पुनः पादं पादमायुरल्पं भवतीति भावः ।

सत्ययुगानन्तरं त्रेतायुगस्यारम्भो बभूव । तस्मिन् समये भगवान् मर्यादापुरुषोत्तमः श्रीरामोऽवततार । सत्ययुगापेक्षयाऽस्मिन् युगे किमपि प्रशस्तायास्तस्याः संस्कृतेः शान्तिसुखादेश्च पतनं संजातम् । ततो द्वापरयुगस्यारम्भो जातः । अस्मिन् युगे भगवान् लीलापुरुषोत्तमो गीतागायकः श्रीकृष्णः प्रादुर्बभूव । अत्रापि त्रेतायुगापेक्षया किमपि पतनं, सुखशान्त्या-

देश्च कोऽपि ह्रासोऽजायत । ततः कलियुगस्यातीवकुत्सितस्य प्रारम्भः । अयं तु महान् दुष्टः, अत्र किल पतनपरम्परैवाव-लोक्यते, नास्ति किमपि प्रशस्तस्याभ्युदयस्य दर्शनम् । श्रीमद्भा-गवतादिपुराणेषु कलियुगस्यास्यातीवगर्हास्पदस्य वर्णनं पौरा-णिकैर्मुक्तकण्ठं भयलज्जाशंकादिकं विहाय कृतम् । अत एव विदेशीयैर्विद्वद्भिः सनातनवैदिकधर्मस्य पतनोन्मुखी संस्कृतिरियं, नोर्ध्वाभ्युदयसाधिकेति निरूप्यते ।

निष्पक्षसमीक्षा

अत्र केचन सत्यतत्त्वान्वेषकाः निष्पक्षपाताः विद्वांसः समीक्षन्ते । ऋग्वेदस्य प्रादुर्भावः सत्ययुगेऽभूत् । अतः ऋग्वेद-वर्णितैव सर्वत आदिमा संस्कृतिर्मन्यते विज्ञैः । विश्वस्मिन् अ-स्मिन् ऋग्वेद एवादिमो धर्मग्रन्थः, अन्ये सर्वेऽपि धर्मग्रन्थाः ततो बहुतरोत्तरकालिका एवेति पाश्चात्याः विद्वांसोऽपि वदन्ति ।

इन्द्रो देवराजः स्वकीयं पितरं जघान, मातरं स्वकीयां विधवामकरोत्

परन्तु तत्कालीनानां विविधेतिहासानामवलोकनेन सत्ययुगस्याप्राशस्त्यं प्रतीयते—तस्मिन्नपि प्रशस्ते युगे कलि युगापेक्षयाऽप्यतीवदुष्टान् निन्दनीयान् व्यवहारान् विविध-दारिद्र्यादिदुःखौघांश्च जनानां वर्णयति—मुक्तकण्ठतो भगवान् ऋग्वेदः—तद्यथा—ऋग्वेदे तावत्सर्वदेवापेक्षया देवराजस्येन्द्रस्य प्रशस्तं विस्तृतं महत्त्वं वर्णितमुपलभ्यते-सोऽयमिन्द्रः स्वकीयं पूज्यं पितरं हतवान्, तेन तस्य माताऽदितिर्विधवाऽभूत्, तेन हि सर्वेऽपि देवाः तस्य विशिष्टसत्ताऽधीशस्यापि दुष्टस्येन्द्रस्य दर्शन-

भाषणसहगमनादिकं परितत्यजुः । तद्दुश्चरितस्य बोधकानि सन्तीमानि वचांसि—'कस्ते मातरं विधवामचक्रत्, यत्प्राक्षिणाः पितरं पादगृह्य ।' (ऋ० ४।१८।१२) वामदेवो महर्षिर्ब्रूते—हे इन्द्र ! यत्=यस्मात् कारणात् पितुः सकाशाद्भीतः तस्य कमप्यतीवदुष्टापराधमभिवीक्ष्य तत्र पितरि द्वेषक्रोधादिविशिष्टः सन् त्वं त्वदीयं पितरं पादगृह्य=पादेषु गृहीत्वा, प्राक्षिणाः= प्रकर्षेणावधीः, तस्मात् कारणात् ते=त्वत्तोऽन्यः को देवः मातरं = स्वकीयां जननीं विधवां = पितृवधेन पतिरहितां, अचक्रत्=अकरोत् ।

अतएवेन्द्रस्य तस्य माताऽदितिर्वदति—'अमी त्वा जहति पुत्र ! देवाः' (ऋ० ४।१८।११) इति । हे पुत्र ! =मदीय इन्द्र ! अतः कारणात् अमी वह्न्यादयो देवाः त्वा=त्वं पितृवधकारिणमतीवदुष्टं मत्वा जहति=परित्यजन्ति । अर्थात् तव दर्शनसंभाषणादिकमपि परिहरन्ति, तव च समीपे आगन्तुमपि बिभ्यतीति भावः । प्रसिद्धे सायणभाष्येऽप्ययमेवार्थो निरूपितो द्रष्टव्यस्स्पष्टावगतिकामेन ।

अत्र चिन्त्यम्—इन्द्रपितुः स्वपुत्रप्रयोजितवधप्रयोजकः को महान् अपराधो जातः, तस्य वर्णनन्तु ऋग्वेदेऽन्यत्र वा कुत्रापि नोपलभ्यते । केवलमनुमीयते—वधकारणरूपेणाभूत् कोऽप्यपराधो महान् इति । यतः कारणमन्तरा कार्यस्योदयः कथं स्यात् ? ।

एवमिन्द्रेणोच्छृङ्खलेनात्याचारिणा महानुभावस्य ब्रह्मविद्याचार्यस्य दधीचो महर्षेरपि निर्दयतया शिरश्छेदो विहितः । तस्येदृशोऽत्याचारः ऋग्वेदेऽपि वर्णितः—'दंस उग्रमाविष्कृणो-

मि तन्यतुरिव वृष्टिम् ।' (१।११६।१२) इत्यादिना 'दंसः' इति कर्मनाम, तस्येन्द्रस्याहं मन्त्रद्रष्टा महर्षिः दधीचः शिरच्छेदन-लक्षणमुग्रं कर्माविष्करोमि । यथा तन्यतुः = विद्युद्गर्जना वृष्टि-माविष्करोति, तथा ।

वामदेवमहर्षेरप्यतीवकष्टप्रदं दारिद्र्यमासीत्

सत्ययुगीनस्य वामदेवस्य प्रसिद्धस्य महर्षेरपि—अतीव-कष्टप्रदं दारिद्र्यमासीत् । सः किल शोभनान्नफलशाकादिखाद्या-भावात् शुनः श्वानस्यान्त्राणि भक्षणाय महाकष्टप्रदक्षुधानिवृ-त्तये च पपाच । तस्य जाया पत्न्यपि क्षुत्पीडितत्वादतिदुर्बलाऽ-शोभना आसीत् । इत्यप्यनेन मन्त्रेण विज्ञायते—

'अवर्त्या शुन आन्त्राणि पेचे, अपश्यं जायाममहीयमा-नाम् ।' (ऋ० ४।१८।१३) इति । अनयर्चा वामदेवो महर्षिः स्वकीयमनिष्टं दारिद्र्यं गर्हणीयं निषिद्धभक्षणञ्च विज्ञापयति—वामदेवोऽहं, अवर्त्या = जीवननिर्वाहोपायभूतशोभनान्नादिराहि-त्येन हेतुना शुनः = शुनकसम्बन्धीनि आन्त्राणि = पुरीतन्ति, पेचे = भक्षणायाहं अपचम् । अत एव जायां = स्वकीयां भार्यां, अम-हीयमानां = अश्लाघनीयामतीवदुर्बलां कृशगात्रां भोजनाभावेन मृतप्रायामशोभनां प्रक्षीणशक्तिकां, अपश्यं = अद्राक्षमिति ।

यदाऽसाधारणव्यक्तित्वस्य वामदेवस्य महर्षेरीदृशं दारिद्र्यमवलोकितम्, तदाऽन्येषां तदानींतनानां साधारणजनानां कीदृशं दारिद्र्यं कष्टप्रदमनशनञ्चावर्तत ? अनशनग्रस्ताः बहवो-जनाः मम्रुः इत्यत्र किमु वचनीयम् ? । अनेन वर्णनेन सत्य-युगस्य प्रशस्तं महत्त्वं अन्यान्ययुगापेक्षया श्रेष्ठत्वञ्च सर्वथा विलुप्तं बभूवेति स्पष्टं विज्ञायते ।

सत्ययुगीनोऽनेकपत्नीपरिग्रहलक्षणोऽन्यायः

'मर्यं इव युवतिभिः समर्षति सोमः' (ऋ० ६।८६।१६)

'परिष्वजन्ते जनयो यथा पतिम् ।' (ऋ० १०।४४।१) 'समस्मिन् जायमान आसत ग्नाः' (ऋ० १०।६५।७) 'यस्यां बीजं मनुष्याः वपन्ति, यस्यामुशन्तः प्रहराम: शेपम् ।' (ऋ० १०।८५।३७) इत्यादिभिः—ऋग्वेदीयवचनैः सत्ययुगीयाः पुरुषा अपि कलियुगीयादिवत्—अतीवकामाकुलाः सन्तः अनेकपत्नीपरिग्रहमुपभोगाय चक्रुः । स्त्रियस्तु गाव इव सर्वथा पराधीनाः सत्यः कमपि प्रतिकारं कर्तुं न शेकुः । स्वतन्त्रपुरुषविहितस्वातीवप्रतिकूलोच्छृङ्खलव्यवहारान् शब्दैः प्रकटयितुमपि सर्वथा न प्राभवन् ।' एवमुच्छृङ्खलाः अतीवकामातुराः स्त्रियोऽप्यनेकपुरुषैः सह समागमं चक्रुरित्यपि 'यस्यां बीजं मनुष्याः वपन्ति' इत्यादिना स्पष्टं विज्ञायते ।

एवमनेकमनोरमनारीरमणस्य तस्योच्छृङ्खलदुष्टव्यवहारस्य च विधानमनुमोदनञ्च—

'सुचारुवेषाभिरलंकृताभिः मदोत्कटाभिः प्रियदर्शनाभिः ।
रमस्व योषाभिरुपेत्य कामं, कामो हि राजन् ! परमो भवेन्नः ॥'
(म० भा० १६७।३८)

इत्यादिमहाभारतवचनैः—विहितमिति प्रभूताश्चर्यं प्रतिभाति विदुषां धर्म्यन्याय्यभावविस्ताराभिलाषावताम् । एवं विविधपुराणेष्वपि महानुभावानां सत्ययुगादिषु वर्तमानानां महर्षीणामपि बहुपत्नीपरिग्रहोऽपि विशदरूपेण वर्ण्यते ।

एवं कालिदासेन महाकविनाऽपि शाकुन्तलनाटकेऽभिवर्णितः शकुन्तलां प्रति कण्वमहर्षेरुपदेशोऽयमपि— 'सपत्नीजनं

प्रति सखीभावः प्रेमसद्भावः स्थापनीयो न तु द्वेषादिकं करणीयमीति प्राक्कालिकस्य प्रवर्तमानस्य बहुपत्नीपरिग्रहस्य समर्थनं विज्ञापयति ।

तथा च कलियुगापेक्षया सत्ययुगस्य कोऽपि विशेषो नावगम्यते । अत एव सत्ययुगादेः सर्वोत्तमरूपेण संयमसत्यदयादिप्रशस्तगुणगणालंकृतत्वेनासुरीमोहिनीप्रकृतिभावविवर्जित – त्वेन एवं कलियुगस्यातिगर्हणीयत्वरूपेण च वर्णनन्तु पौराणिकानां मिथ्याकपोलकल्पनामात्रविजृम्भितमेवास्तीति निष्पक्षपाताः समीक्षकाः विद्वांसो विजानन्त्येव ।

देवश्रेष्ठस्येन्द्रस्यापि निषिद्धगोमांसमदिरादि-सेवनशीलत्वम्

असौ किल देवेन्द्रोऽसुरकुलसम्बन्धात् गोमांसमदिरादिकं सिषेवे । यतोऽस्य माताऽपि विकुण्ठाऽसुरकुलजा आसीत् । तत्पत्नी चेन्द्राणी शचिः पुलोमासुरजा चासीत् । यदाह-वेदविज्ञः पण्डितमधुसूदनोऽपि–'इन्द्रोऽयमसुरकन्यागर्भज एतस्य पत्नी च । अस्ति पुलोमासुरजा तत इन्द्रोऽश्नाति गोमांसम् ॥' (इन्द्रविजये काव्ये) इति । आसीत् किल तदानींतना परिपाटीदृशी– देवा ऋषयश्चासुरकन्याः पत्नीत्वेन गृह्णन्ति । परन्तु स्वकन्याः असुरेभ्यो न ददते । यतोऽसुरापेक्षया तयोः समुत्कृष्टत्वात् । उत्कृष्टेभ्यो निकृष्टाः स्वकन्याः ददति, नोत्कृष्टाः निकृष्टेभ्यः इति नियमोऽद्यापि प्रचलितो दृश्यते। अत एव पुलस्त्यस्य ऋषेः एका भार्या राक्षसकुलजाऽप्यासीत् । तद्गर्भात् रावणादीनां समुत्पत्तिर्बभूव । बीजप्राधान्यमपेक्ष्य तेषां ब्राह्मण्यमपि व्यवहृत-

मासीत्। योनिप्राधान्यात् राक्षसगुणकर्मस्वभावादिप्राधान्याच्च राक्षसत्वमपि। राक्षसजातिरपि असुरजातिवत् निकृष्टाऽऽसीत्। परन्तु प्रकृतस्येन्द्रस्य देवराजस्यासुरकन्यागर्भजतया तत्पतितयाऽपि च बीजप्राधान्यं देवगुणादिप्राधान्यञ्चापेक्ष्य देवत्वं किं देवश्रेष्ठत्वमेवासीत्।

असुरकुलस्यासुरमित्रस्य च सम्बन्धात् देवश्रेष्ठस्यापीन्दस्य सत्ययुगीनस्यातिनिषिद्धं गोमांसभक्षणादिकं भगवान् वेदोऽपि विज्ञापयति—

'वृषाकपायि ! रेवति ! सुपुत्रे ! आदु सुस्नुषे ! ।
घसत्त इन्द्र ! उक्षणः प्रियं काचित्करं हविः, विश्वस्मादिन्द्र उत्तरः ।' (ऋ० १०।८६।१३)

हे वृषाकपायि !=कामनां वर्षकत्वात् अभीष्टदेशगमनाच्चेन्द्रस्यापि नाम वृषाकपिः तस्य पत्नी ! हे इन्द्राणि !। अनेनावगम्यते—तत्सख्युः प्रियस्यासुरेन्द्रस्यापि वृषाकपिनामधेयं, नामैक्यादपि सख्यमेतयोरभवत्। अत एवायं वृषाकपिरसुरः सौत्रामणियज्ञं कृत्वा पातुं देवेन्द्राय सुरामपि न्यवेदयत्। सत्येवमनिन्द्राः—इन्द्रभिन्ना देवाः ऋषयश्च 'इन्द्रः सुरां पिबति सौत्रामण्यामिष्टौ' इति जानाना इन्द्रस्य घोरविरोधं निन्दाञ्च प्रचक्रिरे। अत एव देवाः इन्द्रस्थाने वरुणमेवाराधयन्तः स्तुवन्ति नेन्द्रम्। असुरा अपि—'इन्द्रः सुरां पिबति, हन्त वयं यथेष्टं सोमं पिबामः, इत्यभिप्रेत्य तेऽनिन्द्रा असुराः बलात्सोममहरन्। इन्द्रनिवेदितमपि सोमं यज्ञादपहृत्य तं पातुं वृषाकपिमसुरं न्ययुञ्जत। असावपि तत्प्रियपुत्रतामवाप्य सोमं पीत्वाऽमाद्यत्। इन्द्रोऽपि यथेष्टं सुरां पिबन् तेनासुरेण साकं गोमांसभक्षणमपि

कृतवान् इति ।

यद्वा हे वृषाकपायि ! वृषाकपे मम तव प्रियपुत्रभावमापन्नस्यासुरस्यापि मातः ! इत्यर्थः, अस्मिन्पक्षे इदं वृषाकपेरसुरस्य वचः । हे रेवति ! = धनवति ! हे सुपुत्रे ! = शोभनपुत्रे ! हे सुस्नुषे = शोभनस्नुषे ! हे इन्द्राणि ! एतैः सम्बोधनविशेषणैः इन्द्राण्याः देवराजपत्न्याः प्रभूतधनपुत्रतद्वधूप्रभृतिवैभवशालित्वमभिहितम् ।

संप्रतीन्द्रस्य गोमांसभक्षणमाह—ते = तवायमिन्द्रः, उक्षणः = सेचनसमर्थान् युववृषभान्, आदु = अनन्तरमेव-शीघ्रमेवेत्यर्थः, घसत् = प्राश्नातु—अर्थात् संस्कृतं तन्मांसं यथेष्टं भुङ्क्तामिति यावत् । अत एव काचित्करं = कं—सुखं तस्य अचित् = संघः—समुदायः तत्करं—सुखसमूहसम्पादकं गोमांसं संस्कृतं प्रियं हविः, यदिन्द्रस्यातीवेष्टमस्ति, तत्कुरु—सम्पादयेति शेषः । वाचको गोशब्दोऽस्ति पुंगवेष्वपि नारीगवीवत् । अत एव विश्वस्मात् = सर्वस्मात्—पुरुषसमुदायात् मम पतिः—देवराज इन्द्रः उत्तरः = उत्कृष्टः बलेन रूपेण प्रज्ञया च ।

इदमपि विज्ञेयमिन्द्रस्य वचः गोमांसभक्षणविषयकमृग्वेदीयं—उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।

उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे,

विश्वस्मादिन्द्र उत्तरः ॥' (ऋ० १०।८६।१४)

मे = मदर्थं, पञ्चदश = पञ्चदशसंख्याकान्, विंशतिं = विंशतिसंख्याकांश्च उक्ष्णः = वृषभान् पुंगवान् साकं = सह मम भार्ययेन्द्राण्या प्रेरिताः संस्कर्तारः पाचकाः पचन्ति = अग्निना परिपक्वान् अत्तुं योग्यान् कुर्वन्ति । उत = अपि च,

पक्वं संस्कृतं तद्गोमांसं अहमद्मि = अहं भक्षयामीत्यर्थः। जग्ध्वा चाहं पीव इत्=स्थूलः पुष्टो दर्शनीयो गवेन्द्र इव भवामीति शेषः। किञ्च मे=मम, उभा=उभौ, कुक्षी पृणन्ति =पूरयन्ति केन ? इत्याकांक्षायां सोमेन वा सुरया वाऽभीष्ट-पेयेन खाद्येन वेति योग्याध्याहारः।

इन्द्राणी कामकुला सती दृष्टान्तमात्रं ब्रुवाणाऽर्थात् स्वरमणं विज्ञापयति

अनेन वेदमन्त्रेणेन्द्रं प्रतीन्द्राणी वदति—

'वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत्।
मन्थस्त इन्द्र ! शं हृदे यं ते सुनोति भावयु-
र्विश्वस्मादिन्द्र उत्तरः।' (ऋ० १०।८६।१५)

तिग्मशृङ्गः=तीक्ष्णशृङ्गः, वृषभो न=यथा तीक्ष्ण-शृङ्गाभ्यां दर्शनीयः परिपुष्टो गवेन्द्रः, यूथेषु=गोसंघेषु, अन्तः मध्ये, रोरुवत्=कामाकुलतया शब्दं कुर्वन् गा अभिरमयति। तथा हे इन्द्र ! मां कामसन्तप्तां अभिरमयेति स्त्रीसुलभलज्जा-वशात् दार्ष्टान्तमब्रुवाणाऽर्थात् ज्ञापयति। अपि च हे इन्द्र ! मन्थः=दध्नो मंथनदण्डः, तद्वत् मम गुह्येन्द्रिययोनिमन्थनशीलः तव शेपः, ते=तव, हृदे=हृदयायार्थात् मम हृदयाय च, शं= शंकरः—रतिसुखकरो भवतु इति शेषः। किञ्च ते=तुभ्यं, यं= पेयपदार्थं सोमसुरादिकं भावयुः= यद्विषयकं भावं-अभिरुचि-मिच्छन्तीन्द्राणी, सुनोति=अभिषुणोति—अभिषवं करोति, सोऽपि पेयपदार्थः, आवयोः शंकरो भवत्वित्यर्थः।

इन्द्राण्याः स्वप्रशंसा, अश्लीलकथनं, स्वस्याश्चातिकामुकत्वबोधनम्

इन्द्राणी कथयति—

'न मत्स्त्री सुभसत्तरा, न सुयाशुतरा भुवत् ।
न मत्प्रतिच्यवीयसी, न सक्थ्युद्यमीयसी,
विश्वस्मादिन्द्र उत्तरः ॥ (ऋ० १०।८६।६)

मत्स्त्री = अर्थात् मत्तोऽन्या स्त्री = नारी, सुभसत्तरा = अतिशयेन सुभगा-अतिशयितसौन्दर्यलावण्ययौवनोपेता न भुवत् = न भवति—नास्तीत्यर्थः । अर्थात् अहमेव पतिरिन्द्र इव विश्वस्मात्—सुन्दरनारीसमुदायात् उत्कृष्टतरा परमसुन्दरी सुभगाऽस्मि । इति स्वात्मप्रशंसा स्वयैव क्रियते । एवं मत्तोऽन्या स्त्री सुयाशुतरा = सु-सम्यक्-अतिशयेन याशूनि = संभोगाः विद्यन्ते यस्याः सा सुयाशुतरा । यद्वा यश इति प्रजनननाम, तत्सम्बन्धीनि मैथुनगर्भधारणसुखप्रसवस्वस्थसन्तानोत्पादादीनि कर्माणि याशूनि-अतिशयेन सुष्ठु विद्यन्ते यस्याः सा सुयाशुतरा न भुवत् = नास्ति, अर्थात् अहमेवेतादृशी अस्मि । किञ्च मत् = मत्तोऽन्या स्त्री, प्रतिच्यवीयसी = पुंमासं प्रति स्वशरीरस्यात्यन्तं च्यावयित्री = नीचैः पातयित्री नास्ति, अर्थात् अहमेव स्वशरीरमधःपातयित्वा पुंमासमतिसंभोगसुखं दातुं गृहीतुञ्च समर्थाऽस्मि । किञ्च मत्तोऽन्या स्त्री सक्थी, उद्यमीयसी = संभोगेऽत्यन्तमुत्क्षेप्त्री न अस्ति । न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुणं स्वसक्थ्नोः उद्यमनं कौशलेन कर्तुं प्रभवति, अहमेव निधुवननिपुणा तत्कर्तुं प्रभवामीत्यर्थः । अनेनेन्द्राण्याः अतिकामुकत्वं,

अश्लीलप्रवादेऽपि स्त्रीसुलभायाः लज्जाया अभावश्चाभिव्यज्यते । तथा चाहमपि मम पतिरिन्द्र इव सौन्दर्ये यौवने संभोगे वैभवे चाति उत्कृष्टास्मीति ध्वन्यते ।

समालोचना

एतैः पूर्वोक्तै वेंदवचनैः स्पष्टं विज्ञायते—सत्ययुगीनः इन्द्रोऽयं मांसमदिरामदिरेक्षणादिविषयसेवनशीलः कश्चन पृथिव्यां त्रिविष्टपा (तिवत्त) दिषु स्थलेषु वर्तमानो विषयी पामरो राजा एवासीत् । तत्पत्नी इन्द्राण्यपि तादृश्येव मांसमदिरा-मैथुनादिकमभिरुच्या सेवमाना प्राकृता सुन्दरी नार्येव सिद्ध्यति । तयोः आसुरतामसभोजनविहारादिकर्तृ तया दैवगुणानां संयमदया शान्तिप्रभृतीनां सद्भावो नावलोक्यते । देवाः सन्ति मांसादि कस्य मनसाऽप्यादरमकुर्वाणाः सात्त्विकाः । देवत्वबाधकविरुद्ध-धर्मशालितया तयोः सुतरां देवत्वं कथमपि न सिद्ध्यतीति वयं पर्यालोचयामः । अत्र किं तथ्यमिति सर्वेश्वरो भगवानेव विजानाति, तथापि विद्वांसः तथ्यान्वेषणशीला इमान् मन्त्रान् विचारयन्तु

वेदविज्ञः श्रीमैथिलमधुसूदनपण्डित इत्थं ब्रवीति-देवाः इन्द्रादयः सुमधुरं पेयं बलपुष्टिसमर्पकं सोमं पीत्वा बलवन्तो भूत्वा पुनः पुनः स्वशत्रून् असुरान् पराजयन्ते स्म । तमिमं देवबलकारणं सोमं विदित्वा असुराः विषप्रयोगेण समन्ततो हिमवदादिपर्वतेषु वर्तमानाः सोमलताः विनाशयमासुः । देवा अपि असुरविहितं सोमनाशं बुद्ध्वा सोमस्थानीयां बलादिसमर्पिकां वारुणीं मदिरां जनयामासुः । इन्द्रप्रियसोमप्रतिद्वन्द्वितया वरुणेन देवेन तस्याः निर्माणात् 'वारुणी' इत्यभिधानं जातम् ।

अत एवासुरवदेव देवा आर्याश्चापि तां वारुणीं मदिरां पातुं क्रमात् प्रक्रमन्ते स्म इति ।

चत्वारो विभागाः

केचन विद्वांस इत्थं निरूपयन्ति—सत्ययुगादिषु देवजनाः आर्यजनाः, असुरजनाः, राक्षसजनाश्चेति चत्वारो विभागाः आसन्निति । तेषु चतुर्ष्वपि विभागेषु गुणकर्माद्यनुसारेण ब्राह्मण-क्षत्रियादिरूपेण च चत्वारो विभागा आसन् । तत्र तावद् देव-जनेषु देवब्राह्मणो बृहस्पतिः पुरोहितः, देवक्षत्रिय इन्द्रो यज-मानः, देववैश्यो वसुः, देवशूद्रः पूषा चासन् । आर्यजनेषु मनुष्येषु आर्यब्राह्मणो वसिष्ठादिः, आर्यक्षत्रियो मन्वादिः श्री-रामादिश्च । एवमसुरजनेषु आसुरब्राह्मणः शुक्राचार्यः, असुर-क्षत्रियो वृषपर्वप्रभृतिः । एवं राक्षसजनेषु राक्षसब्राह्मणो राव-णपिता पुलस्त्यादिश्चासीत् । तथैव मार्कण्डेयपुराणेऽपि वर्ण्यते-

'ब्राह्मणान् भोजयामास, रक्षःकुलसमुद्भवान् ।
एवंविधा हि राजानो बभूवुः सूर्यवंशजाः ॥'
(मा० पु० १३७।३६)

एवंविधाः = रक्षःकुलसमुद्भवाः । अत एव राक्षस-नामश्रवणेन कदापि न तेषु घृणा कार्या, तेषां दुष्टाचरण-वशात् । सदाचरणशीला राक्षसा अपि सन्ति । तथैव मार्कण्डे-यपुराणे बलाकनामा राक्षसः उत्तमनामानमार्यमनुजं राजानं प्रत्युवाच—

'न वयं मानुषाहाराः, अन्ये ते नृप ! राक्षसाः ।' (७०।१६)

अत एवास्माकं राक्षसानां गृहेषु वैभवसम्पन्नेषु वर्त-मानाः राक्षस्यो रूपवत्योऽतिसुन्दर्यः स्त्रियः सन्ति । तदपेक्षया

मानुषस्त्रियो निकृष्टरूपवत्यः सन्ति ।—

सन्ति नः प्रमदाः भूप ! रूपेणाप्सरसां समाः ।
राक्षस्यस्तासु तिष्ठत्सु, मानुषीषु रतिः कथम् ॥
(मा० पु० ७०।१९)

अप्सरसां = देवस्त्रीणां सुन्दरीणां समाः = तुल्याः प्रमदाः = नार्यः सन्ति । अत एव देवब्राह्मणबृहस्पतिपुत्रेण कचेन स्वनिष्ठोत्तमत्वं संभाव्य स्वापेक्षयाऽसुरब्राह्मणशुक्राचार्यपुत्री-देवयानीनिष्ठाधमत्वञ्च विज्ञाय तया तस्योत्तमस्य परमसुन्दरस्य कचस्य पतिरूपेण वरणाय समुद्यतया सह स्वविवाहसम्बन्धः प्रतिषिद्धः । पश्चात् तस्याः देवयान्याः आर्यक्षत्रियेण ययातिना राज्ञा सह विवाहः संजात इति महाभारतभागवतपुराणादिषु तदितिहासः प्रसिद्धोऽस्ति ।

शकुन्तलावृत्तान्तः

अत एव महाभारते आनुशासनिके पर्वणि कण्वाश्रमेऽभिर्वधितया देवनारीमेनकापुत्र्या महर्षिविश्वामित्रवीर्यजन्यया शकुन्तलया दुष्यन्तमार्यमनुजं राजनं—'नाहं जाने त्वामि' त्यनृतवादिनं तया सह कृतगन्धर्वविवाहं प्रतिक्रुद्धया विहित इत्थमधिक्षेपः—आर्यमनुजापेक्षया देवजनानामुत्कृष्टत्वं विज्ञापयति । तथाहि—

'राजन् ! सर्षपमात्राणि, परच्छिद्राणि पश्यसि ।
आत्मनो बिल्वमात्राणि, पश्यन्नपि न पश्यसि ॥
मेनका त्रिदशेष्वेव, त्रिदशाश्चानुमेनकाम् ।
ममैवोद्रिच्यते जन्म दुष्यन्त ! तव जन्मनः ॥'

त्रिदशेषु = देवजनेषु मेनका सुन्दरी देवनारी मम माता,

उद्रिच्यते = उद्रिक्ता श्रेष्ठा विद्यते, अतः तव मनुजार्यस्य निकृष्टजन्मापेक्षया मम देवनारीजन्यायाः जन्म श्रेष्ठं विद्यते। मेनकां = मम सुन्दरीं मातरमनु = अनुसरणशीला भवन्ति त्रिदशाः = इन्द्रादयो देवाः। यतस्तस्याः सौन्दर्यलावण्यादिविशेषगुणोपेतत्वात्। इमेऽपि च मम तव चोत्कृष्टत्वनिकृष्टत्वे विलोक्य त्वमिति वदति शकुन्तला रूपयौवनोत्कृष्टजन्मगर्विता—

'क्षितावटसि राजेन्द्र! अन्तरिक्षे चराम्यहम्।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव॥
महेन्द्रस्य कुबेरस्य, यमस्य वरुणस्य च।
भवनान्यनुसंयामि, प्रभावं पश्य मे नृप!॥

अर्थात् यादृशः प्रशंनीयो ममान्तरिक्षादौ गमनादिलक्षणः प्रभावो देवयोनिजन्यायाः विद्यते, तादृशस्तव निकृष्टस्य मनुजार्यस्य कदापि कुत्रापि नैव विद्यते। यथा मेरुः पर्वतो महान् उत्कृष्टस्तदपेक्षया सर्षपस्तु सर्वथाऽत्यल्पो निकृष्टस्तुच्छः, तथा मम महत्त्वं तव च तुच्छत्वं त्वं पश्य।

'विरूपो यावदादर्शे, नात्मनः पश्यते मुखम्।
मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम्॥
अनृते चेत्प्रसंगस्ते श्रद्दधासि न चेत्स्वयम्।
आत्मनो हन्त गच्छामि त्वादृशे नास्ति संगतम्॥
त्वामृते चापि दुष्यन्त! शैलराजावतंसिकाम्।
चतुरन्तामिमामुर्वीं पुत्रो मे पालयिष्यति॥'
(म० भा० आ० प० ७४) इति।

अनेन वृतान्तेन देवजनार्यजनयोः उत्कृष्टत्वनिकृष्टत्वलक्षणौ विभागाववगम्येते। कुशन्तलया स्वस्याः, स्वपुत्रस्य

भरतस्य च बीजापेक्षया योनिप्राधान्यमपि विज्ञापितम्। अनया किल स्वमातरं स्वगर्भभारखेदखिन्नां मेनकां सुन्दरीं देवनारीं परित्यज्यान्यत्र गतवतः स्वपितुर्जनकस्य स्वकर्तव्यभारात्पलायनशीलस्य विश्वामित्रस्य प्रसिद्धस्य महर्षेः लज्जाखेदवशात् मातरमुत्कृष्टामपेक्ष्य निकृष्टजन्मवत्त्वाद्वा पितृत्वेन नामापि न गृह्यते।

सत्ययुगादावपि विधवाः पतिद्वेषिण्यो नार्यो दुष्टाः पापा नरकगामिनो जनाश्चासन्

यदि सत्ययुगादौ सर्वेऽपि जनाः पुण्यकर्माणः सच्चरिताः स्वर्गगामिन एवासन्, तदा-ऋग्वेदादौ दुष्टानां पापानां नरकगामिनां वर्णनं कृतं कथमुपलभ्येत ?। ऋग्वेदे तावत् सत्यादियुगेष्वपि वर्तमानानां पापानां नरकगामिनां दुष्टानामपि वर्णनं सुस्पष्टमुपलभ्यते। तद्यथा—

अभ्रातरो न योषणो व्यन्तः, पतिरिपो न जनयो दुरेवाः।
पापासः सन्तो अनृता असत्याः इदं पदमजनता गभीरम्॥'
(ऋ० ४।५।५)

अयमर्थः—अभ्रातरः = भ्रात्रादिबन्धुरहिताःयोषणो न = गतभर्तृकाः विधवाः दुर्भाग्यशालिन्यो योषित इव। ताः यथा भर्तृगृहात् पितृगृहं प्रत्यायन्ति, तद्वत् व्यन्तः = गच्छन्तः, यज्ञादीनि शुभकर्माणि अपहाय अमार्गे दुष्टकर्मादिकरणाय गमनशीलाः दुष्टा जना इत्यर्थः। तथा पतिरिपो न जनयः = पतिद्वेषिण्यः स्त्रियः इव। दुरेवाः = दुष्टगतयो दुष्टमतयो दुराचाराः, अत एव पापासः = पापाः—दुश्चरिताः परापकारिणः सन्तः अनृताः = मानससत्यविचाररहिताः, असत्याः = वाचिकसत्य-

रहिताः, मनसा वाचाऽग्निदेवमभजमानाः यज्ञादिकं शुभं कर्म अकुर्वाणाः, इदं = पापिभिरनुभूयमानतया प्रसिद्धं गभीरं = अगाधं, पदं = नरकस्थानं प्रबलदुःखानुभवप्रयोजकं, अजनत = अजनयन्तः-उत्पादयन्ति ।

अनेन स्पष्टं विज्ञायते—सत्ययुगादौ दुर्भाग्यशालिन्यो विधवाः, पतिद्वेषिण्यो व्यभिचारिण्यश्च नार्योप्यासन् ।'यन्मे माता प्रलुलुभे, विचरन्त्यपतिव्रता ।' इति मनुदर्शितश्रुत्या व्यभिचारिण्याः मातुर्वर्णनमुपलभ्यते । कश्चित् पुत्रो वदति—यत्प्रलुलुभे = परपुरुषं प्रति संजातलोभाऽभूत्, विचरन्ती = परगृहान् गच्छन्ती, अपतिव्रता = परपुरुषं कामयते भुंक्ते च । दुष्टाः कितवाः पापाः नराश्च । अत एव सत्ययुगे कितवानां द्युतकारिणामनृतान्यायप्रियाणां खलनां बाहुल्यं दृष्ट्वा 'अक्षैर्मा दिव्यः' (ऋ० १०।३४।१३) इत्यनेन द्युतनिषेधो विहितः । 'जाया तप्यते कितवस्य हीना' (ऋ० १०।३४।१०) इत्यादिना तत्र प्रत्याक्षानर्थजनकत्वं निरूपितम् । सति चैवं 'आहूतो न निवर्तेत द्यूतादपि रणादपि ।' इति क्षत्रियस्य कृते विहितं द्यूतमपि-वेदविरुद्धत्वात्-अधर्मरूपं मन्तव्यम् । द्यूतविधायकं तत्स्मार्तवचनमपि-मूर्खपण्डितकपोलकल्पितत्वाद् अप्रामाणिकमेव प्रत्येतव्यम् । तथा च कलियुगसत्ययुगयो र्नामवैषम्येऽपि प्रायः समानतैवावगम्यते । अच्छानच्छजनानां सुकालदुष्कालदुःखसुखादीनाञ्चोभयत्र सद्भावस्य दर्शनात् ।

सत्ययुगीनस्य हरिश्चंद्रस्य वृत्तान्तः

ऋग्वेदीये ऐतरेयब्राह्मणे त्रयस्त्रिंशाध्याये (३३) प्रथमखण्डे हरिश्चन्द्रस्योपाख्यानमित्थं प्रदर्शितम्—'हरिश्चन्द्रो ह

वैधस ऐक्ष्वाको राजाऽपुत्र आस, तस्य ह शतं जाया बभूवुः, तासु पुत्रं न लेभे, तस्य ह पर्वतनारदौ गृह ऊषतुः, स ह नारदं पप्रच्छ।' (ऐ० ब्रा० ३३।१) इति।

हरिश्चन्द्रो नाम राजर्षिः, स च वेधसो नृपतेः पुत्रो वैधसः, ऐक्ष्वाकः = इक्ष्वाकुवंशोद्भवो राजा पुत्रहीन आस = बभूव। स च शतसंख्याकानां जायानां मध्ये कस्यांचिदपि जायायां पुत्रं न लेभे = प्राप्तवान्। हरिश्चन्द्रः सत्यवादित्वेन प्रसिद्धो हि राजा सत्ययुग एव संबभूव इति प्रायो विनिश्चितम्। तस्मिन् प्रशस्ते सर्वोत्कृष्टे शोभनगुणकर्मालङ्कृते समयेऽपि हरिन्चन्द्रस्यैकस्य राज्ञः शतं भार्याः उपभोग्याः पत्न्यो बभूवुः। कीदृशोऽयं प्रत्यक्षोऽन्यायोऽत्याचारश्च हरिश्चन्द्रेण सत्यधर्मनिष्ठेन ? शतानां भार्याणामुपरि कृत इति निष्पक्षपाता विपश्चितो विदाङ्कुर्वन्त्वेव। तेन किल शतभार्यापरिग्रहेण हरिश्चन्द्रस्यातीवकामाकुलता संयमसन्तोषशून्यता विषयलाम्पट्यप्रचुरता चावगम्यते। स्त्रीणाञ्च सर्वथाऽजाविसंघवत् सर्वथापराधीनता, प्रबलपुरुषकृतात्याचारपरम्परायाः मूकभावेन सहनशीलताऽबलानां तासां गर्हणीयदुर्बलता च। सपत्नीनां प्रचुरसन्तापस्य वर्णनन्तु-ऋग्वेदीये सपत्नीबाधनसूक्ते स्पष्टतया कृतम्। अत एव प्रक्षीणप्रभूतवीर्यशक्तित्वादेव तस्या सन्तानाभावः संजात इत्यवर्णलभ्यमेतत्।

पुत्रपुत्र्योर्गर्हणीयविषमता, पुत्रस्यातीवप्रशंसा च

तस्य राज्ञो हरिश्चन्द्रस्य गृहे पर्वतनारदनामानौ विरक्तौ ब्रह्मर्षी निवासं चक्रतुः। तयोर्मध्ये सः नारदमृषिं पप्रच्छ। 'सर्वेऽपि देवमनुजादयः पश्वादयोऽपि च पुत्रमिच्छन्ति। 'पुत्रेण

प्रशंसनीयेन कानि कानि फलानि पिता लभते ?' इति मह्यं त्वं ब्रूहि । नारदः प्रत्युत्तरं दत्तवान् । पुत्रे तावत् पिता सर्वं लौकिकं वैदिकञ्च स्वकीयमृणं समर्पयति । तेनामृतत्वं मुक्ति-पदं गच्छति पिता । अर्थात् पुत्रोऽत्यन्तसुखजनको विद्यते । यदाह—'पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयोः ।' इति ।

'पुदिति नरकस्याऽऽख्या, दुःखञ्च नरकं विदुः ।
पुत्तस्त्राणात्ततः पुत्र-मिहेच्छंति परत्र च ॥
पुत्रोऽस्ति तावद् दुःखातितरणहेतुभूता नौः ।

'किं नु मलं ? किमजिनं ? किमु श्मश्रूणि ? किं तपः ? ।
पुत्रं ब्रह्माणः ! इच्छध्वं, स वै लोकोऽवदावदः ॥ (ऐ ब्रा० ३३।१)

मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगान्मलशब्देन गार्हस्थ्यं विवक्षितम् । कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षिमम् । क्षौरकर्मराहित्याच्छ्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम् । तपःशब्देन संयमादिप्रधानं पारिव्राज्यं विवक्षितम् । ते मलादयः किं नाम सुखं करिष्यन्ति, न किञ्चिदित्यर्थः । अतो हे ब्रह्माणः ! = विप्राः ! सर्वे यूयं सुखहेतुत्वात् पुत्रमिच्छध्वम् । स वै = स एव पुत्ररूपो लोक एव, अवदावदः = दोषराहित्यान्निन्दाऽनर्हः । वदितुमयोग्यानि निन्दावाक्यानि अवदाः तैर्वाक्यैर्नोद्यते, न कथ्यते इत्यवदावदः ।

'अन्नं ह प्राणः, शरणं हि वासः, रूपं हिरण्यं, पशवो विवाहाः ।
सखा ह जाया, कृपणं दुहिता, ज्योति र्हं पुत्रः परमे व्योमन् ॥
(ऐ० ब्रा०)

शरीरे प्राणावस्थितिहेतुत्वादन्नमेव प्राणः, वासः = वस्त्रं शीतोपद्रवाद् रक्षकत्वेन शरणं गृहसमानं रक्षकम् । हिरण्यं =

सुवर्णं कर्णाभरणकंकणादिकं दृष्टिप्रियत्वाद्रूपसम्पादकम्। पशवो गवादयः, विवाहाः = निर्वाहकाः। जाया = स्त्री भोगे सहकारित्वात्सखा ह = सखिस्वरूपैव। एवमेते सुखहेतुत्वेन प्रसिद्धा अपि तात्कालिकमेव सुखं प्रयच्छन्ति। दुहिता = कन्या ह पुत्रीति कृपणं = केवलदुःखकारित्वाद्द दैन्यहेतुः। तथा च स्मर्यते—

संभवे स्वजनदुःखकारिका, संप्रदानसमयेऽर्थहारिका।
यौवनेऽपि बहुदोषकारिका, दारिका हृदयदारिका पितुः॥'इति।

दारिका = कन्या, हृदयदारिका = चिन्तादुःखवशात् पितुः हृदयविदारणहेतुः। पुत्रस्तु ज्योतिःस्वरूपं दुःखरूपतमोनिवारकत्वात्, स हि पितरं परमे व्योमन् = उत्कृष्टे आकाशे ब्रह्मणि अवस्थापयति। पुत्रः स्वस्मादन्यो न भवति, पितैव पुत्ररूपेण प्रादुर्भवति। अतः—'नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः।' लोकः = लोकजन्यं सुखं, पुत्ररहितस्य जनस्य नास्ति। पुत्रदर्शनेन यत्सुखं लभ्यते, तदन्यदर्शनेन क्वचिदपि न दृश्यते इति पशवोऽपि जानन्ति। अतः पशुः पुत्रोऽपि स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थमधिरोहति।

समीक्षा

नारदेन देवर्षिणा तावद्द 'अपुत्रस्य गति र्नास्ति, अतस्त्वं पुत्रमिच्छ' 'पुत्रो ह ज्योतिः' इत्यादिभिः पुत्रं प्रशंसता 'कृपणं दुहिता' इत्यनेन वचनेन कन्यानां पुत्रीणां निन्दा कृता। तया किलार्थात् ज्ञापितम्—अप्रशस्तत्वात् पुत्रीच्छा न कर्तव्या, यदि निन्दितानां पुत्रीणां प्रादुर्भावो जगतीतले न स्यात्, तदा तदभावे सति केवलैः पुत्रैर्दाम्पत्यसुखं कथं लब्धं स्यात्? संसारप्रवृत्तिश्च समवरुद्धा भवेत्। अत्र तु पुत्रपुत्र्योर्मध्ये गर्हणीयं

वैषम्यं समुपदिष्टम् । पुत्रस्य दुःखस्वरूपत्वन्तु—वेदान्तस्य पञ्च-दश्यादिग्रन्थेषु विस्तरतो वर्णितम् । अतः केवलस्य पुत्रस्य सुख-स्वरूपत्वेन वर्णनन्तु—मौढ्यविलसितमेव । पुत्रो यदि ब्रह्मनिर्वाण-मोक्षसम्पादने समर्थः स्यात्, तदा तु पुत्रवन्तो जनाः साधन-सम्पादनमन्तरा धन्याः कृतकृत्या भवेयुरिति । तथा च धन्योऽयं सत्ययुगसमयः, तदानींतनाः सत्यधर्मोपदेशकाः नारदपर्वतादयो महर्षयोऽपि धन्या एव ।

वरुणदेवस्य वृत्तान्तः समीक्षा च

इत्येवं नारदेन हरिश्चन्द्रप्रदत्तान्नभोजिना पुत्रमहत्त्वं समुपदिष्टम् । पुनर्नारदो हरिश्चन्द्रराजमित्थमुवाच—'अथैनमुवाच-वरुणं राजानमुपधाव, पुत्रो मे जायतां तेन त्वां यजा इति' (ऐ० ब्रा०) अथ = पुत्रलाभकथनानन्तरं, एनं = पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच—हे हरिश्चन्द्र ! वरुणं राजानं उप-धाव = समीपं गत्वा प्रार्थयस्व । हे वरुण ! त्वत्प्रसादान्मे पुत्रो जायतां = समुत्पद्यतां, ततस्तेन पुत्रेण त्वां यजै = त्वामुद्दिश्य यज्ञं करवाणीति । नारदोपदेशमङ्गीकृत्य हरिश्चन्द्रो वरुणं प्रार्थयामास । प्रार्थनातः प्रसीदता वरुणेनेदमुक्तम् मत्प्रसादात्सं-जातेन पुत्रेण त्वया मद्यजनं क्रियेत चेत्, तदाऽहं पुत्रो दास्या-मीति । अर्थात् मदीये प्रारब्धे वरुणयज्ञे संजातपुत्रस्याजादि-पशुवत् शस्त्रेण हननं कृत्वा मदीयतत्तन्मन्त्रैर्मृ तस्य पुत्रस्य शिरो-वक्षःप्रभृत्यङ्गानि समर्पणीयानि भवेयुश्चेत्, पुत्रलाभो भविष्य-तीति । हरिश्चन्द्रेण स्वपुत्रदर्शनलालसेनेदं सर्वथाऽनिष्टमति-कष्टकरमपि स्वीकृतम् । यदा पुर्वोक्ता प्रतिज्ञा हरिश्चन्द्रेण कृता तदा वरुणप्रसादात् तस्य पुत्रोत्पत्तिर्जाता । उत्पन्नस्य तस्य

पुत्रस्य 'रोहितः' इति नामाभूत् ।

उत्पन्ने पुत्रे सति तं हरिश्चन्द्रं राजानं समीपमागत्य वरुण उवाच—हे हरिश्चन्द्र ! ते पुत्र उत्पन्न एव, अनेन पुत्रेण मामुद्दिश्य यागं कुरु । अर्थात् यस्मिन् दिवसे पुत्रः संजातस्तस्मिन्नेव दिवसे वरुणेन निर्दयेन कथितम्—मामनेन यज शीघ्रं, विलम्बं मा कुरु, इति । अनेन वरुणपुत्रवरदानेन को लाभस्तस्य हरिश्चन्द्रस्य सम्पन्नः ? वरदानमिदं वा शापदानं वेदम्, जातेन पुत्रेण सुखलाभः सम्पन्नो वा दुःखलाभो वेति विद्वद्भिर्न ज्ञायते । पुत्रजन्मसुखापेक्षया तन्मरणदुःखस्यातिबहुलत्वात् । एकस्मिन्नेव तज्जन्मदिवसे पुत्रजन्मसुखन्तु तन्मरणप्रभूतदुःखसमाक्रान्तत्वात् घनच्छन्नसूर्यवत् न दृष्टं स्यात् । लाभसमय एवानिष्टायाः हानेः प्रादुर्भावात्, लाभोऽलाभ, एव तस्य समपन्नः, पुत्रजन्मसुखं तत्कालमेव तन्मरणप्रभूतदुःखरूपेण परिणतमेवाभूत् इति विचारकाणां मतिमतां स्पष्टं प्रतिभाति ।

हरिश्चन्द्रवरुणयोः संवादाः

हरिश्चन्द्रेण राज्ञा स्वमनसीत्थं विचारः कृतः—केनापि प्रकारेणास्य संजातस्य प्रियस्य पुत्रस्य जीवनं सुरक्षितं कर्तव्यम्, अतोऽस्मै वरुणाय विविधाः व्याजाः निर्देष्टव्याः इति । अत एव यदा वरुणेन—'अनेन सद्यः संजातेन पुत्रेण मामुद्दिश्य यज्ञं कुरु' इत्युक्ते सति हरिश्चन्द्रः प्रत्युवाच—भो वरुण ! यागार्थः—यागे समर्पणीयः पशुर्यदा निर्दशो भवति, तदा सः पशुर्मेध्यो यागयोग्यो भवति । निर्गतानि-अशौचदिनानि दशसंख्याकानि यस्मात्पशोः सोऽयं निर्दशः । तस्मादयं क्षिप्रं निर्दशोऽस्तु । अनन्तरं त्वामहं यजै इत्येतद्वाक्यं वरुणस्तथाऽस्त्वित्यङ्गीचकार ।

यदा स ह निर्दशो दशदिनायुष्को रोहितो बभूव, तदा समीपमागत्य तं हरिश्चन्द्रं वरुण उवाच—अयं निर्दशोऽभूत् अनेन मां यजस्वेति । स होवाच—यदा वै पशोः रोहितस्य दन्ताः जायन्तेऽथ स मेध्यो भवति। अस्य दन्ताः जायन्तां, अथ त्वामनेनाहं यजै इति । यथा दशदिनाशौचापगमे शुद्धत्वात् यागयोग्यः स्यात्, तथा दन्तोत्पन्नत्वात् अवयवसम्पूर्त्या याग-योग्यो मेध्यः स्यादिति हरिश्चन्द्रस्य स्वपुत्रजीवनरक्षणकामस्या-भिप्रायो व्याजमूलकः ।

तस्य दन्ताः जज्ञिरे, तं हरिश्चन्द्रमुवाच वरुणः—अस्य रोहितस्य दन्ताः जाताः, यजस्व माऽनेनेति । स होवाच—यदा वै पशोः दन्ताः पतन्ति, अथ स मेध्यो भवति, अतोऽस्य दन्ताः पतन्तु, अथ त्वां यजै इति । प्रथमोत्पन्नानां दन्तानामस्थायित्वेन मुख्यपश्ववयवत्वाभावात्, तत्पाते सत्येव पशोर्मेध्यत्वं स्यादि-त्यभिप्रायः । तस्य ह दन्ताः पेदिरे, तं होवाच वरुणः-अस्य दन्ताः पतिताः, यजस्व माऽनेनेति । स होवाच—यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति, अतोऽस्य पुनर्दन्ताः जायन्तामथ त्वा यजै इति । तस्य रोहितस्य सुकोमलबालस्य दन्ताः पुनर्जज्ञिरे, तं होवाच—अस्य दन्ताः पुनः समुत्पन्नाः, अतोऽनेन मां यजस्वेति । पश्वन्तरस्य पुनर्दन्तोपत्तिमात्रेण मेध्यत्वेऽपि, अस्य पशोः क्षत्रि-यत्वान्मनुजत्वाच्च स्वजात्युचितधनुर्बाणकवचादिसंनाहशालित्वे सत्येव जात्युचितव्यापारसम्पूर्तौ सत्यामेवास्य मेध्यत्वं स्यात् । तस्मादयं पुत्रो रोहितस्तव यज्ञस्य पशुः क्षिप्रमेव संनाहं प्राप्नोतु, अनन्तरमहं त्वामनेन यजै इति । तदुत्तरं वरुणस्तथैवाङ्गीचकार ।

मृत्युभयात्-स्वजीवनरक्षणकामनया च रोहितस्यारण्यगमनम्

संनाहप्राप्तेरूर्ध्वं सः पिता हरिश्चन्द्रो वरुणोक्तिमङ्गीकृत्य युवानं प्रियपुत्रं रोहितमेकान्ते-आमन्त्र्यैवमुवाच—हे तात ! प्रियरोहित ! अयमेव वरुणो राजा पुनः पुनः स्वयज्ञकरणाय मत्समीपे आगमनं कुर्वाणः—मह्यं त्वां पुत्रवरेण दत्तवान् । हन्त ! हृष्टोऽहमस्मि, इमं वरुणं त्वया पुत्रेण यजै=यागरूपां पूजां करवाणि । अर्थात् यज्ञे तव मनोहरं सुन्दरं कोमलमतिप्रियं युवत्वापन्नं शरीरं यूपे बद्ध्वा तस्य शस्त्रेण खण्डशश्छेदनं कृत्वा यज्ञकुण्डाग्नौ वरुणमुद्दिश्य तव शरीरस्य छिन्नान्यङ्गानि समर्प्य वरुणस्य देवस्य यजनमहं करवाणीति हरिश्चन्द्रस्य रोहितं प्रत्युक्तिः ।

सः खलु रोहितः पुत्रो युवा स्वपितुर्वाक्यं श्रुत्वा वरुणयजनाय स्वशरीरस्य विध्वंसो भविष्यतीति विज्ञाय मृत्युभयात् पितुर्वाक्यं निषिध्य स्वजीवनरक्षणार्थं पितरं पितृगृहञ्च विहाय धनुर्बाणांश्च स्वीकृत्यारण्यं प्रत्युपगतोऽभूत् । कस्मिँश्चिदरण्ये नैरन्तर्येण सः रोहितः संवत्सरं चचार ।

वरुणस्य क्रोधः, हरिश्चन्द्रस्य च तत्कृतजलोदररोगपीडा

अथ स्वयज्ञे समर्पणीयस्य रोहितपशोः अरण्ये गमनं श्रुत्वा क्रुद्धो वरुणो हरिश्चन्द्रस्योदरमतिपीडाकरेण रोगरूपेण जग्राह । वरुणेन क्रुद्धेनोक्तं—स्वयैव तच्छरीररक्षणाय पुत्रस्य

रोहितस्यारण्यगमनं निर्दिष्टमिति। तस्यापराधस्य दण्डं विधातुमतिकष्टप्रदं जलोदरव्याधिं तस्मै दत्तवान् वरुणः।

रोहितस्य पुनः पुनः स्वगृहं प्रत्याजिगमिषा, इन्द्रकृतश्च तदागमनप्रतिषेधः

अथ हरिश्चन्द्रस्य पितुः उदरं कष्टकरेण जलेन पूरितं जातम्। महोदरनामकरोगग्रस्तोऽभूत् सः। स्वपितुर्वृत्तान्तमरण्ये स्थितो रोहितः पुत्रो मनुष्यमुखाच्छुश्राव। श्रुत्वा च स रोहितः पितृस्नेहवशात् पितरं द्रष्टुमरण्याद् ग्रामं प्रत्याजगाम। आगच्छन्तं रोहितं मार्गमध्य एव दयालुः इन्द्रः केनचिद्ब्राह्मणपुरुषरूपेण प्राप्य कमपि विचरणादिरूपपरिश्रमोपदेशं कृत्वा रोहितस्य पितृसमीपगमनं निवारयामास। एवं प्रतिसंवत्सरं रोगग्रस्तस्य दुःखिनः पितुः समीपगमनाय समुद्युक्तं रोहितमिन्द्रो देवो ब्राह्मणवेषेण निवारयामास। अरण्ये त्वं चरैव चरैव, न तु पितृसमीपे ग्रामे निवासं विधेहि, इत्येवं पञ्चवारं पञ्चसंवत्सरपर्यन्तमिन्द्र उपदिदेश। तत्र गमनं कृतं चेत्, तदा वरुणयागद्वारा तव शरीरं विनङ्क्ष्यतीति भयं महत्प्रदर्शितं तेन, ततो रोहितः ग्रामगमनात् प्रतिरुद्धो बभूव।

समालोचना

कोऽयं वरुणो देवः ? संवादादिकर्तृत्वेन पुनः पुनर्गमनागमनतृत्वेन च कश्चन हस्तपादमुखादिमान् मनुज इव प्रतिभाति वरुणो देवः, मनुजापेक्षया देवयोनेरुत्कृष्टत्वात्, तेन किं हरिश्-

चन्द्रनारदादिसंमत्या नियोगद्वारा हरिश्चन्द्रस्य कस्याश्चिद्भार्यायां स्ववीर्येण पुत्र उत्पादितो वाऽन्यप्रकारेण वा पुत्रजन्म सम्पादितम्। किं कृतमिति सर्वेश्वरो भगवान् एव विज्ञातुं समर्थः स्यात्। प्राक्काले नियोगधर्मस्य प्रचलितत्वात् लोकानां तत्र घृणाऽभावाच्चासमर्थो वीर्यहीनो जनः पुत्रोत्पादनाय समर्थोत्तमपुरुषाय स्वभार्यां नियुयुजे, इत्यपि ज्ञातुं वक्तुश्चोचितमेव प्रतिभाति। कुन्तीमाद्रीप्रभृतिनारीषु नियोगस्य दृष्टत्वात्, तेनोत्पादितानां पाण्डवादीनां प्रसिद्धत्वाच्च।

तथापि कोऽयं क्रूरो वरुणो देवता ?। सुकोमलसुन्दरपुत्रहननसंयुक्तयजनेन तस्य का तृप्तिः सुस्वादुमिष्टान्नभक्षणवत् सम्पद्यमाना भवतीति वरुण एव वक्तुं समर्थः स्यात्। तस्य देवत्वे तु 'न देवा अश्नन्ति, न पिबन्तीति' श्रौतवचनस्य का गतिः ? दुर्गतिरेव स्यात्। ऋणप्रदातृकृपणवणिग्वत् पुनः पुनः अधमर्णहरिश्चन्द्रपुत्रयाञ्चाप्रवृत्तिः-उत्तमर्णस्य तस्य वरुणस्य तद्यजनजन्यं कञ्चन विशिष्टं प्रभूतं लाभं सूचयति। स च लाभः कीदृशोऽस्तीति नान्यैर्ज्ञातुं शक्यते, वरुणं विहाय। अनेन वृत्तान्तेन सत्ययुगादौ यज्ञेऽजादिपशुविध्वंसवत् मनुष्यस्यापि मिथ्याधर्मभावनया विध्वंसं पुरोहिताः यजमानाश्चाकार्षुरिति स्पष्टं निःसंशयं प्रतिभाति। निष्पक्षपालाः विद्वांसो विचारयन्ति-कीदृशोऽयं प्रशस्तः सत्ययुगः, तत्कालीनो वरुणो देवो दयाविहीनः क्रूरकर्मा आसीत्, यस्य प्रवृत्तिः स्वयजमानस्य स्वाराधकस्य दुःखमेव दातुं न तु सुखं–प्रभवति। अत एव वरुणेन दुष्टेन रोहितं युवानं पुत्रं स्वजीवनरक्षणायारण्यं गतं दृष्ट्वा क्रुद्धेन-तस्य यजमानस्य हरिश्चन्द्रस्योदरं जलोदररोगेण प्रभूतदुःखजन-

केन समाक्रान्तम् ।

अपि च वरुणयज्ञे रोहितशरीरस्य विनाशो न स्यात्, तदा हरिश्चन्द्रस्य पूर्वोक्तानि व्याजवचनानि, भयाद्रोहितस्यारण्यगमनं, इन्द्रकृतगृहगमनप्रतिषेधश्च सर्वथा अनुपपन्नाः स्युः । यज्ञे कृता हिंसा हिंसैव न भवतीति शास्त्रलोकप्रवादोऽपि तादृशयज्ञधर्मस्य किमधर्मस्यान्धश्रद्धां मूढानां विज्ञापयति । सा हि-प्रभूतमनर्थमेव जनयति ।

अजीगर्तब्रह्मर्षिचरितम्

तस्मिन् अरण्ये 'अजीगर्तनामा कश्चन ब्रह्मर्षिनिवासमकार्षीत् । स चान्नफलशाककन्दमूलाद्यलाभेन महान् दरिद्रः क्षुधया पीडितश्चासीत् । अनेनानुमीयते-तदरण्यमुषरमरुप्रदेशवत् कन्दमूलफलशाकादिवर्जितमेवासीत् इति । अन्यथा तस्य महर्षेः क्षुत्पीडितत्वं कथं सम्पद्येत ? । पौराणिकैस्तु सत्ययुगीनारण्यानां महती प्रशंसा विहिता, परन्तु-अत्र तु तद्वैपरीत्यमेवावगम्यते । नद्यादिप्रभूतजलानामभावोऽप्यासीत् तत्र तदानीं, अन्यथा जलभूमिसंयोगेन काऽपि खाद्यसामग्री सम्पादिता भवेत् ।

'तस्य ह त्रयः पुत्राः आसुः, शुनःपुच्छं, शुनःशेपः,शुनोलाङ्गुलं इति । (ऐ० ब्रा० ३३।३) इति । तस्य=सूयवसपुत्रस्याजीगर्तनामकस्य ब्राह्मणस्य ऋषेः त्रयः पुत्राः बभूवुः । एषां नामानि तु विलक्षणानि, प्रसिद्धार्थस्वीकारे तु घृणोत्पादकानि-आसन् । शोभननामविधाने, तस्य महर्षेः कोऽवरोधोऽभूत् ? । अशोभननामकरणे किं प्रयोजकं कारणं जातमिति स महर्षिः एव वक्तुं समर्थः ।

तं पुत्रवन्तं महर्षि रोहितो राजकुमार उवाच—हे ऋषे!

तुभ्यमहं गवां शतं ददामि, दत्त्वा चाहमेषां पुत्राणां मध्ये-एकेन केनचित्पुत्रेण क्रीतेन मम शरीरं वरुणात् मोचयामि, अर्थात् गोशतरूपं मूल्यं दत्त्वा तव कस्यचिदेकस्य पुत्रस्याहं क्रयणं करोमि । क्रीतस्तव सः पुत्रो वरुणयागे पशुर्भविष्यति । तस्य च वरुणप्रीत्यर्थं यज्ञे प्रज्वलितकुण्डे समर्पणमृत्विजो यजमानश्च करिष्यन्तीति । पिता अजीगर्त उवाच—इमं मम ज्येष्ठं पुत्रं शुनःपुच्छं त्वहं न ददामि । ममातिप्रियत्वादिति । ततो माता कनिष्ठं पुत्रं हस्तेन गृहीत्वैवमुवाच । इमं शुनोलाङ्गुलं ममातिप्रियं पुत्रं सर्वथैवाहं न ददामीति । ततस्तौ मातापितरौ मध्यमं पुत्रं शुनःशेपं रोहितात् गवां शतं मूल्यरूपेण गृहीत्वा तस्मै दत्तवन्तौ । ततः सः रोहितः क्षत्रियराजकुमारः तेन क्रीतेन शुनःशेपेन ब्रह्मर्षिकुमारेण सहारण्यात् स्वकीयं ग्रामं पितृसमीपे प्रत्याजगाम । स रोहितः पितरमागत्यैवमुवाच—हे तात ! अयं शुनःशेपो मया क्रीतः, तेन वरुणात् स्वशरीरमहं मोचयामि । शुनःशेपमहं यागे वरुणाय समर्पयिष्यामीति मम शरीरविमोचनात् तव च मम च प्रहर्षः सम्पन्न इति प्रत्यक्षमेतत् ।

समीक्षा

तेन महादरिद्रेण ब्रह्मर्षिणाऽजीगर्तेन रोहितशकाशात् मूल्यरूपेण गवां शतमादाय स्वकीयस्य मध्यमस्य मातापित्रति-स्नेहवर्जितस्य शुनःशेपसंज्ञकस्य पुत्रस्य विक्रयः कृतः । अनेन वर्णनेन—सत्ययुगकालीना निन्दनीया क्रीतदासप्रथाऽप्यवगम्यते, नियोगप्रथावत् । किमपि यथेष्टं मूल्यं गृहीत्वा पिता गवादिपशु-वत् स्वपुत्रादिकं विक्रीणीते तदानीं । पुत्रोऽपि मूल्यदातुः सर्वथाऽऽधीनो भवति । तेन या येष्टा वाऽनिष्टा वाऽऽज्ञा कृता,

तस्याः पालनं तेन क्रीतेन दासेनावश्यकर्तव्यमासीत् । क्रीतस्य दासस्य तत्स्वामी शस्त्रेण हननमपि कर्तुं शक्नोति । लोकेन वा सत्ताधीशेन राज्ञा वा तदपराधो न मन्यते ।

शुनःशेपस्योपाख्यानम्

पूर्वोक्तं पुत्रस्य रोहितस्य कथनं श्रुत्वा हर्षितः स हरिश्चन्द्रो वरुणदेवमुपेत्यानेन शुनःशेपेन ब्राह्मणकुमारेण त्वां यक्ष्यामीत्युक्तवान् । स वरुणोऽपि तथेत्यङ्गीकृत्यैवमुवाच—क्षत्रियात्तव पुत्राद्रोहितादप्ययं ब्राह्मणो भूयान्—अभ्यधिकः सुस्वादुः सन् ममातिप्रियो भविष्यतीति । इत्थमुक्त्वा तस्मै हरिश्चन्द्राय कर्तव्यत्वेन राजसूययज्ञमुपदिदेश । स हरिश्चन्द्रो राजा राजसूयं यज्ञं प्रक्रम्य, तस्मिन् सवनीयपशुत्वेन शुनःशेपं ब्राह्मणकुमारमालब्धुं निश्चितवान् ।

हरिश्चन्द्रस्य वरुणप्रीत्यर्थं राजसूययज्ञानुष्ठानम्

'तस्य ह विश्वामित्रो होताऽऽसीत्, जमदग्निरध्वर्युः, वसिष्ठो ब्रह्मा, अयास्य उद्गाता, तस्मै उपाकृताय नियोक्तारं न विविदुः, स होवाच—अजीगर्तः सौयवसिः, मह्यमपरं शतं दत्त, अहमेनं नियोक्ष्यामीति, तस्मै अपरं शतं ददुः, तं स निनियोज इति ।

'तस्मै उपाकृताय नियुक्तायाऽऽप्रीताय पर्यग्निकृताय विशसितारं न विविदुः, स होवाचाजीगर्तः सौयवसिः मह्यमपरं शतं दत्त, अहमेनं विशसिष्यामीति तस्मै अपरं शतं ददुः, सोऽसिं निःशान एयाय इति ।' (ऐ० ब्रा० ३३।४)

विश्वामित्रादयो महर्षयस्तस्य हरिश्चन्द्रस्य यागे राज-

सूये होत्रादयश्चत्वारो महर्त्विज आसन् । तत्र जमदग्निरध्वर्युः— अभिसेचनीये सोमयागे तं शनुःशेपं सवनीयत्वेनोपाकृतवान् । बर्हिर्युक्तया प्लक्षशाखया मन्त्रपुरस्सरं समुपस्पृश्य स्वीकार उपाकरणम् । तत ऊर्ध्वं यूपबन्धनं नियोजनम् । तस्य क्रूरकर्मत्वात् अध्वर्यु र्न नियोजने प्रवृत्तः । तत उपाकृतायास्मै = उपाकरणेन संस्कृतस्य शुनःशेपस्य नियोक्तारं = यूपे रज्ज्वा कण्ठादिप्रदेशेषु बन्धनकर्तारं क्रूरं दयाविहीनं पापात्मानं न कञ्चिदपि पुरुषं न विविदुः = न लेभिरे ।

अजीगर्तः क्रूरः पिता स्वपुत्रं शुनःशेपं पुनर्गवां शतमादाय रज्ज्वा यूपे बध्नाति

तदानीं सूयवसस्य पुत्रः अजीगर्तः शुनःशेपस्य पुत्रस्य गवां शेतन विक्रेता क्रूरः पिता स उवाच—मह्यं पूर्वस्माच्छतादपरं गोशतं हे यजमानर्त्विजः !दत्त = दानं कुरुत ततोऽहमेनं शुनःशेपं स्वपुत्रं यूपे नियोक्ष्यामि = रशनया सुदृढया कण्ठ्यां, शिरसि, पादयोर्बद्ध्वा रशनाग्रस्य यूपे बन्धनं नियोजनं तदहं करिष्यामीति । तद्वचनं श्रुत्वा हरिश्चन्द्रादयस्तस्मा अजीगर्तायापरं गोशतं ददुः । तं च शुनःशेपं सोऽजीगर्तो निनियोज, धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दसः ।

पुनर्गवां शतं गृहीत्वा बद्धं शुनःशेपं पुत्रं क्रूरः पिताऽसिं गृहीत्वा मारयितुं प्रवृत्तः

अथ विशसनस्य-हिंसनस्य प्रवृत्तिं दर्शयति-तस्य शुनःशेपस्य यज्ञीयस्य पशोः उपाकरणं नियोजनञ्च संवृत्तम् । आप्रीसंज्ञिताभिः—एकादशभिः प्रयाजाज्याभिर्यद्यजनं तद् आप्रीणनम् ।

दर्भरूपेणोल्मुकेन त्रिःप्रदक्षिणीकरणं तत्पर्यग्निकरणम् । तथाविधसंस्कारचतुष्टययुक्ताय तस्मै = अर्थात् तस्य शुनःशेपस्य विशसितारं = हिंसितारं—तस्य शस्त्रेण शरीरछेदनकर्तारं पुरुषं क्रूरात्मानं पापिष्ठं कञ्चिदपि न लेभिरे । ततोऽजीगर्तः पिता पूर्ववद् अपरं गोशतं गृहीत्वा मारयितुं असिं = खङ्गं, निःशानः = निशितं—तीक्ष्णं कुर्वन्नेव, इयाय = जगाम ।

सत्ययुगकलियुगयोः समीक्षा

अत्र विद्वद्भिः समीक्ष्यते-कीदृशः स भयंकरो-गर्हणीयः समयः सत्ययुगनाम्ना शोभनेनालङ्कृत आसीत् । यस्मिन् किल ब्रह्मर्षिणा न त्वधमेन तुच्छेन शूद्रेण—क्षुधया पीडितेन स्वपुत्रस्य निर्दयतया निःस्नेहतया च विध्वंसाय विक्रयः कृतः । कीदृशास्ते तत्कालीनाः यज्ञधर्मप्रचारकाः प्रसिद्धनामानो विश्वामित्रवसिष्ठजमदग्निप्रभृतयो मिथ्याधर्मसंमूढचेतसस्सद्विवेकविचारवर्जिताः आसन् । ते हि किल धर्मरूपे यज्ञे ब्राह्मणकुमारस्य शुनःशेपस्य यूपे रज्ज्वा बन्धनाय, बद्धस्य तस्य शस्त्रेण विनाशाय चोपदेशमनुमोदनञ्च विदधुः । कीदृशः स महालोभी ब्रह्मर्षिनाम्नः कलंकयिता निर्दयी पिता, यः किल स्वपुत्रं बन्धनाय मारणाय च प्रवृत्तोऽभूत् ।

अस्मिन् वर्तमानसमये कश्चन धर्मध्वजी कलियुग नाम्नाऽशोभनेनालङ्कृते—एवंप्रकारकं यज्ञं कुर्याच्चेत् । तादृशयज्ञस्य प्रयोक्तारो वेदविज्ञाः ऋत्विजो यजमानाश्च यदि स्युः । एवंभूतः पिता च यदि स्यात् । तदा सर्वत्र महान् कोलाहलः प्रभवेत् । समाचारपत्राणि च तादृशयज्ञस्य तत्कर्तुः तत्कारयितॄणां वेदज्ञपण्डितानाञ्च महतीं निन्दां समालोचनाञ्च मुक्तलेखिनीतः समारभेरन्, तच्चित्राणि च प्रकाशयेयुः । तादृशे

यज्ञे मनुष्यविध्वंसस्य प्रयोक्तॄणां सर्वेषामेव स्वतन्त्रसर्वकारेण कारागारे निक्षेपो भवेत् ।

यूपे बद्धस्य मरणाय समुद्यतस्य शुनःशेपस्य स्वरक्षणोपायाः

शुनःशेपस्य पश्चाद् वृत्तान्तं दर्शयति—

'अथ ह शुनःशेप ईक्षाञ्चक्रे, अमानुषमिव वै मा विशसिष्यन्ति, हन्ताहं देवता उपधावामीति ।' (ऐ०ब्रा० ३।३।४) इति ।

अथ = पितुः पुत्रमारणोद्योगानन्तरं शुनःशेपः पुत्रो मनस्येवमीक्षाञ्चक्रे = विचारितवान् । अमानुषमिव = मनुष्यव्यतिरिक्तमजादिपशुमिव, एते तु मां विशसिष्यन्ति = मारयिष्यन्ति, हन्त = हा ! कष्टमेतत्सम्पन्नम् । अहमितः परं स्वरक्षार्थं देवता उपधावामि = प्रार्थयामि—भजामीति विचार्य, प्रथमं तावत् प्रजापतिमेव—'कस्य नूनमि' त्यृचा उपससार = शरणं जगाम—सेवितवान्—प्रार्थयामास । प्रार्थनया प्रसन्नः प्रजापतिस्तं सेवकं शुनःशेपमेवमुक्तवान् । अग्निः सर्वेषां देवानां नेदिष्ठः = हविर्वहनेनातिसमीपवर्ती अस्ति, अतस्तमेव प्रार्थयस्व-उपास्स्वेत्युक्तः शुनःशेपः— 'अग्ने वयं' इत्यृचाऽग्निमुपासितवान् । प्रार्थनया प्रसन्नोऽग्निस्तमुवाच—सवितारं प्रार्थयस्व 'त्वा देव ! सवितः !' इत्यनेन तृचेन । तं प्रसन्नः सवितोवाच-'त्वं वरुणाय वै राज्ञे नियुक्तोऽसि, तमेव प्रार्थयस्व' एकत्रिंशत्संख्याकाभिः—ऋग्भिः । प्रसन्नो वरुणस्तमुवाच—अग्निं त्वं पुनः स्तुहि । सः द्वाविंशतिसंख्याकाभिः ऋग्भिः अग्निं तुष्टाव ।

तमग्निरुवाच–विश्वान्नु देवान् स्तुहि। अथ त्वामुत्स्रक्ष्यामः—अर्थात्तव बन्धनमरणमुक्तिं करिष्यामः। सः वराकः शुनःशेपो निरपराधी विश्वान् देवान् तुष्टाव–'नमो महद्भ्यो नमो अर्भकेभ्यः' इत्येतया ऋचा। प्रार्थनया प्रसन्नाः विश्वे देवास्तमुचुः-'त्वमिन्द्रं स्तुहि' इन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमोऽस्ति। स इन्द्रं तुष्टाव पञ्चदशाभिः ऋग्भिः। स्तूयमानः प्रीत इन्द्रः–मनसा कल्पितं हिरण्यरथं ददौ तस्मै शुनःशेपाय। तं रथं स मनसैव प्रतिजगाम। 'यादृशी शीतला देवी, वाहनोऽप्यस्ति तादृशः।' इति न्यायेन कल्पितस्य पदार्थस्य कल्पितमेव ग्रहणं वेदितव्यम् मिथ्यावन्ध्यापुत्रस्य सत्यदर्शनं कथं स्यात्?। कल्पितरथदानद्वारा तस्य को लाभः सम्पन्नः इति शुनःशेपः इन्द्रश्च ज्ञातुं प्रभवेताम्। तमिन्द्र उवाच—अश्विनौ स्तुहि त्वं, 'अश्वावत्या' इति तृचेनाश्विनौ स्तुतवान्। तमश्विनौ प्रसन्नौ ऊचतुः—उषसं स्तुहि। स उषसं तुष्टाव तृचेन। एवं सर्वासां देवतानामनुग्रहेण शुनःशेपस्य बन्धमोक्षः सम्पन्नः, जीवनरक्षा च संजाता, हरिश्चन्द्रस्य चारोग्यं सम्पन्नम्।

समीक्षा

अयं किल क्रूरस्य लोभिनः पितुः पुत्रः शुनःशेपो वेदज्ञो विद्वान् प्रतिभाति। अन्यथा वेदमन्त्रैर्देवतास्तुतिमन्तरा तस्य जीवनरक्षा कथमपि न सिद्ध्येत्। अन्येऽविद्वांसो वराकाः क्रीतदासाः निरपराधिनो देवतास्तुतिमकुर्वाणाः मनुजपशवस्तु बलात् यज्ञे देवताः उद्दिश्य ऋत्विगादिभिर्निर्दयतया विध्वस्ताः स्युः। तादृशः खल्वतिशोभनो यज्ञधर्मः। यः किल वरुणदेवद्वारा

पुनःपुनर्यज्ञे विध्वंसाय याचितः, तस्य संपन्नस्य बुद्धिमतो रोहितस्य राजकुमारस्य गोसम्पत्तिप्रदानद्वारा सहजतो रक्षा सम्पन्ना। सम्पत्तिरेवास्य रक्षिका संजाता, तदभावे तु तस्यापि वरुणो देवः स्वयज्ञे बलिदानमकरोदेव ।

शुनःशेपस्य विश्वामित्रपुत्रत्वाङ्गीकारः

इत ऊर्ध्वं क्रूरं पितरं परित्यज्य 'कस्य श्रेष्ठस्य महर्षेः पुत्रोऽहं भूयासमि' ति शुनःशेपस्य विदुषो मनसि विचारे प्रवृत्ते सति–अत्र विषये त्वदीयैच्छैवनियामिका, स्वतन्त्रोऽसि त्वं सर्वथा, स्वकीयाभिनवप्रशस्तपितुर्वरणे, इति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छयैव विश्वामित्रस्य गायत्रीमन्त्रद्रष्टुः ब्रह्मक्षत्रोभयशक्तिसमन्वितस्य सर्वोत्तमस्य पुत्रत्वमङ्गीकृत्य सहसा पश्यतां वसिष्ठजमदग्निप्रभृतिमहर्षीणां समक्षं तदीयमङ्कमाससाद । पुत्रो हि सर्वत्र निर्भयतया पितुरङ्के निषीदति । विश्वामित्रेणापि समुदारहृदयेनातिबहुलपुत्रसम्पत्तिमतापि कृपालुना स्वनिष्ठं तत्पितृत्वं स्वीकृतम् ।

अजीगर्तस्य कथनम्

तद् दृष्ट्वा अजीगर्तो विश्वामित्रं प्रत्येवमुवाच–हे महर्षे ! मदीयं पुत्रमेनं मह्यमेव देहीति । स विश्वामित्रो 'नेति' वचसा हस्तेन च निराकृत्यैवमुवाच–प्रजापत्यादयो देवा एवेमं शुनःशेपं मह्यं दत्तवन्तः, तस्मात्तुभ्यमहं न ददामीति । स च शुनःशेपो देवैः प्रजापत्यादिभिर्विश्वामित्राय रातत्वात् दत्तत्वात् 'देवरातः' इत्यभिनवनामधारी विश्वामित्रपुत्र एवाभूत् ।

अजीगर्तशुनःशेपयोः संवादः

विश्वामित्रेण निराकृतः सः अजीगर्तः शुनःशेपं प्रत्येवमुवाच—हे पुत्र ! त्वमेव विश्वामित्रादपगतः सन् अस्मद्गृहेगच्छ। त्वदीया माता चाहञ्चावां तवाह्वानं करवावहै। शुनःशेप उवाच—हे अजीगर्त ! यज्ञे मद्वधाय खड्गहस्तं त्वां सर्वेऽपि दृष्टवन्तः। यत्क्रूरं कर्म-अत्यन्तनीचेषु शूद्रेष्वपि न दृष्टं, तादृशं क्रौर्यं कर्म त्वया कृतम्। मां निमित्तीकृत्य गवां त्रीणिशतानि त्वमतिलोभाभिभूतः सन् स्वीकृतवानसि। अजीगर्त उवाच—हे शुनःशेप ! मया यत्पापं कर्म कृतं, तन्मां संतप्तं करोति। अतस्तत्पापं पश्चातापेन परिहरामि। मया गृहीतानि गवां त्रीणिशतानि तुभ्यमहं ददामि। तच्छ्रुत्वा शुनःशेपोऽनया गाथया प्रत्युत्तरं ददौ—

'यः सकृत्पापकं कुर्यात्, कुर्यादेनत्ततोऽपरम्।
नापागाः शौद्रान्न्यायाद्, असंधेयं त्वयाकृतम्॥'

(ऐ. ब्रा. ३।३।५) इति

यः पुमान् धर्मशास्त्रभीतिरहितः सन् सकृत् = एकवारं पापकं कर्म कुर्यात् सः पुमान् ततः पापादन्यद् एनत् = पापं तदभ्यासवशात् कुर्यादेव। त्वं तु शौद्रान्न्यायात् = नीचजातिसम्बन्धिनः क्रूरादाचरणात् नापागाः = अपगतो न भवसि। असंधेयं = अप्रतिसमाधेयं पापं स्वपुत्रविक्रयबन्धनमारणरूपं पापं त्वया कृतमित्येषा शुनःशेपस्य प्रत्युक्तिः, अतस्तव पुनः पुत्रोऽहं नैव भविष्यामि। अहं तु संप्रति विश्वामित्रपुत्र एवाभवम्, इति।

विश्वामित्रशुनःशेपयोः संवादः

विश्वामित्रः शुनःशेपमभिनवपुत्रं प्रत्येवमुवाच—अयमजीगर्तो महाक्रूरो भयङ्करोऽस्ति । हस्तेन खड्गं तीक्ष्णमादाय तव हिंसनं कर्तुमवस्थितवान् । अतो हे शुनःशेप ! एतस्य पापिष्ठस्य पुत्रो मा भूः । किन्तु ममैव पुत्रतामुपेहि । शुनःशेपो विश्वामित्रमभिनवपितरं श्रद्धेयमुत्तमं प्रत्येवमुवाच—यथा त्वं प्राक् क्षत्रियोऽपि तपोमहिम्ना क्षत्रियत्वं विहाय ब्राह्मणश्रेष्ठत्वेन त्वं ज्ञायसेऽन्यैश्च व्यवह्रियसे । तथाऽहमिदानीं अङ्गिरागोत्रं परित्यज्य तव पुत्रत्वं विश्वामित्रवंश्यत्वमुपयामि । यदाह—

'पुराऽऽत्मानं नृपं विप्रं तपसा कृतवानसि ।
एवमाङ्गीरसं मां त्वं वैश्वामित्रमृषे ! कुरु ॥' इति ।

विश्वामित्र उवाच—हे शुनःशेप ! त्वं मे पुत्राणां मध्ये ज्येष्ठः पुत्रो भव । मह्यं विश्वामित्राय प्रसन्नैर्देवैर्दत्तं पुत्रत्वरूपं दायं त्वं प्राप्नुहि ।

समीक्षा

अत्र किलेदं समीक्ष्यते—निष्पक्षपातेन मनसा विद्वद्भिः । ईदृशं यज्ञपशुत्वेन प्रकल्पितस्य ब्राह्मणकुमारस्य शुनःशेपस्य यूपे रशनया बन्धनात्मकं, बद्धस्य तस्य शस्त्रेण च हननात्मकमतीवक्रूरं कर्म दृष्ट्याऽपि विलोकनानर्हं प्रशस्ततमयज्ञधर्माङ्गभूतं कथं स्यादिति ? । यद्यपि तस्मिन् यज्ञे श्रेष्ठमहर्त्विक्-पदेषु प्रतिष्ठितैर्विश्वामित्रवसिष्ठजमदग्निप्रभृतिभिः प्रसिद्धैः श्रेष्ठतमैर्महर्षिभिः-तत्क्रूरं कर्म बन्धनमारणादिरूपं साक्षात् स्वयं न कृतम् । तथापि तैर्यज्ञधर्माङ्गरूपेण तस्योपदेशोऽनुमोदनञ्च विहितमेव । कृतत्वाभावेऽपि पुरोहितत्वेन तत्कारयितृत्वन्तु तेष्वनि-

वार्यमेवायाति, तत्केनाऽपि नापलपितुं शक्यते। इति चैवं दुष्ट-कर्मकर्ता यथा दोषभाक्-अपराधी निन्दितश्च भवति। तथा तस्य कारयिता अनुमोदयिताऽपि च भवत्येवेति धर्मशास्त्रेषु निरूपितो न्यायसंगतः पन्था।

तथा च यथाऽजीगर्तः क्रूरकर्मकर्तृत्वेन निन्दितः समुपेक्षणीयश्च बभूव, तथा विश्वामित्रवसिष्ठादयोऽपि तत्कारयितृत्वेन कथं न निन्दिताः समुपेक्षणीयाश्च बभूवुः ? इति समीक्ष्यताम्। विश्वामित्रादयस्तु सर्वथा निर्दोषा एवावस्थिताः आसन् इति प्रतिभाति। अत एव शुनःशेपेन सदोषत्वादेवाजीगर्तं पितरं परित्यज्य निर्दोषत्वादेव विश्वामित्रस्य पितृत्वाभ्युपगमः कृतः इति। अनेन वृत्तान्तेन सुस्पष्टं ज्ञायते-सत्ययुगे यथा यज्ञेऽजादिपशूनां देवताप्रीत्यर्थं हननं धर्मबुद्धयान्धश्रद्धावशात् यजमानाः पुरोहिताश्चाकार्षुः, तथा मनुष्याणामपि यज्ञपशुत्वेन प्रकल्पितानाम्। तथा च कलियुगापेक्षया सत्ययुगस्य प्रशस्तत्वं कथं सिद्धयतीति विद्वद्भि र्न ज्ञायते।

अयमेव शुनःशेपो देवरातः प्रसिद्धस्य याज्ञवल्क्य-महर्षेः पिताऽभूत्

अत एव क्रूरं कर्म कर्तारं ब्राह्मणं पितरं परित्यज्य यशस्विनो विश्वामित्रस्य पुत्रत्वं तेन शुनःशेपेनाङ्गीकृतम्। अयमेव शुनःशेपो विश्वामित्राय देवैः इन्द्रादिभिः रातत्वाद् देवरातनाम्ना प्रसिद्धोऽभूदिति प्रागुक्तम्। अयमेव शुनःशेपः प्रसिद्धस्य जनक-राजसभायामनेकमहर्षिविजेतुः—ब्रह्मनिष्ठस्य याज्ञवल्क्यस्य प्रशस्त-कुलपतेः—पिताऽभूत्। अतएव तस्य शुक्लयजुर्वेदाविष्कारकस्य

विशालशतपथब्राह्मणग्रन्थनिर्मातुः याज्ञवल्क्यस्य विश्वामित्र-वंश्यत्वमेव प्रसिद्धमभूत ।

याज्ञवल्क्यचरितम्

कश्चन नासिकनिवासी पण्डितप्रवरः श्रीधरशास्त्री ब्रवीति-असौ मुनिर्याज्ञवल्क्यः शुनःशेपपुत्रः चमत्कारपुरं वृद्धनगरं—बडनगरनाम्ना प्रसिद्धं गुर्जरदेशेऽधिवसति स्म । तस्य मातुः नाम 'सुनन्दा' इत्यासीत् । अयं किल षट्सहस्रसंवत्सरेभ्यः (६०००) पूर्वं संजातः । जनकराजसभायां शास्त्रार्थेऽनेकंमहर्षीन् प्रसिद्ध-गार्गीविदुषीमपि च विजित्य, जनकराजप्रदत्तसालंकृतगोसहस्र-दानञ्च गृहीत्वा, तस्मै जनकराजाय ब्रह्मज्ञानोपदेशञ्च विधाय, तस्य गुरुत्वमङ्गीकृत्य, तदानीं बिहारप्रदेशस्थितां मिथिलानगरीमप्यध्युषितवान् इति ।

विश्वामित्रस्यैकशतं पुत्राः आसन्, पञ्चाशत्पुत्रेभ्यश्च शापप्रदानम्

तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः । ये मधुच्छन्दसोज्येष्ठाः पञ्चाशत्संख्याकाः पुत्रा आसन् । ते शुनःशेपस्य विश्वामित्रज्येष्ठपुत्रत्वं समीचीनरूपेण नाङ्गीकृतवन्तः । अतः क्रुद्धो विश्वामित्रस्तान् अशपत् । यूयं शबरा आन्ध्राः पुलिन्दाः चण्डालाः नीचजातिविशेषा भवत । तेऽनेकविधा विश्वामित्रसंततिजास्तच्छापवशात् तस्कराणां मध्येऽत्यधिकदुष्टाः अभवन् ।

विश्वामित्रसमीक्षा

अयं किल विश्वामित्रो महर्षि र्बहुकालव्यापिन्यां संयम-योगप्रधानायां तपश्चर्यायां निरत आसीद्वा, शतपुत्रोत्पादने मेनका-

दिवत्तदर्थमनेकभार्यापरिग्रहे च निरत आसीद्वेति ज्ञातुं न शक्यते। भोगे योगे चोभयत्र प्रबलपराक्रमशाल्यासीदिति तच्चरितेन स्पष्टं विज्ञायते । विविधसिद्धिमतां झटितिः शापवरदाने च दातुं समर्थानां क्षणे रुष्टानां क्षणे तुष्टानाञ्च महर्षीणां कृते किं दुष्करं ? सर्वं कर्तुं तेऽनिवार्यतया शक्नुवन्तीति श्रद्धया मत्वा सन्तोष्टव्यं समीक्षकैः ।

विश्वामित्रवृत्तान्तेन ज्ञायते–तदानीं सत्ययुगे–स्वल्पस्या–पराधस्य कृते भूयांसं दण्डप्रहारं तदानींतनाः शापादिरूपेणाकार्षुः। यथा विश्वामित्रेण महर्षिणा स्वप्रियपुत्रेभ्यः शापो विहितः— यूयं मदाज्ञोल्लङ्घनकर्तारो दुष्टाः नीचाश्च भवत। शापोऽपि बलात् स्वानिष्टं फलं तेष्वनिच्छत्स्वपि जनयत्येव । इत्येवं शापस्य महत्त्वं विज्ञायते। शापोऽप्ययमपराधसमानोऽस्ति वाऽसमानोऽस्तीति वा तदानीं प्रबलाभिमानवशगाः श्रेष्ठजना न विचारयामासुः न्यायौचित्यम् । शापसाफल्येन स्वनिष्ठवर्तमानाखर्वगर्वत्वमन्यत्र शापभयञ्च सर्वत्र प्रख्यापयामासुः । समुन्नतानामधःपातेन किं श्रेष्ठत्वं प्रख्याप्यते ? नैव, किन्त्वधःपतितानां विकृतानां समुन्नति-संस्कृतिसाधनेन श्रेष्ठत्वमवश्यं लभ्यते इत्यस्ति विसंवादरहिता विवेकसरणिः । शापं विहाय यदि ते क्षमासहिष्णुतोदारता-प्रेमसद्भावादीन् सद्गुणान् प्रकटयेयुः, तदा तेषां श्रेष्ठत्वं समीक्षका अप्यवश्यं स्वीकुर्युः ।

विश्वामित्रस्याप्यन्यवसिष्ठादिमहर्षिवत् – शापप्रयोगास्तु बाल्मीकिरामायणादिष्वप्युपलभ्यन्ते-तद्यथा - 'अथ तस्याश्च शब्देन गीतेनाप्रतिमेन वा ।दर्शनेन च रम्भायाः मुनिः संदेहमागतः॥ सहस्राक्षस्य (इन्द्रस्य) तत्सर्वं विज्ञाय मुनिपुंगवः (विश्वामित्रः)।

रम्भां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ यन्मां लोभयसे रम्भे ! कामक्रोधजयैषिणम् । दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ! ॥ तस्य शापेन महता रम्भा शैली तदाऽभवत् ॥' (वा० रा० बालकाण्डे-अ० ६४। श्लोक-१२-१३-१५) इति । समर्थस्य तस्य शापोऽपि सद्यः सफलोऽभूत् । चेतना नारी तत्कालमेव जडपाषाणरूपेण परिणता जातेति ।

परन्तु यदा तपस्यतो विश्वामित्रस्य मेनकानामाप्सरसः संदर्शनं जातम् । दृष्ट्वा च मदनवशगस्य तस्य दशवर्षपर्यन्तं तया प्रेयस्या रूपयौवनसौन्दर्यवत्या सह योगसाधनाय निर्मिते स्वाश्रमे भोगसाधनाय निवासो विहितस्तदा केनापि प्रबलापराधिने विश्वामित्राय तस्मै शापो न समर्पितः इत्याश्चर्यम् । अन्यत्र सुन्दरयुवत्यबलादौ तादृशमपराधं दृष्ट्वा कुपितो महर्षिः शापं दातुं प्रभवति । परन्तु स्वस्मै तादृशापराधकारिणे कोपं कृत्वा स्वयं शापं दातुं कथं न समर्थो भवति ? । तत्रत्याः श्लोका इमे द्रष्टव्याः—

'तां ददर्श महातेजा मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥
कन्दर्पदर्पवशगो मुनिस्तामिदमब्रवीत् ।
अप्सरः स्वागतं तेऽस्तु, वस चेह ममाश्रमे ॥
अनुगृह्णीष्व (भोगदानेन) भद्रं ते मदनेन विमोहितम् (मां) ।
इत्युक्ता सा वरारोहा (श्रेष्ठजघना) तत्रावासमथाकरोत् ।
तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च (दश) राघव ! ॥

व्यतीतानीति शेषः । (वा० रा० बालकाण्डे अ० ६३) इति ।

अबलाः वराक्यः सुन्दर्यः तादृशं कल्मषं वीक्ष्यापि तत्कर्तृभ्यो महर्षिभ्यः शापादिकं दातुं कथं प्रभवेयुः ? असमर्थत्वा-

तासाम् । अत एव ताभिस्तद्वशवर्तितैव बलात् संपाद्या भवति । प्रबलैर्दुर्बला एव सदा सर्वत्र तिरस्क्रियन्तेऽभिभूयन्ते हन्यन्ते च । संप्रत्यपि तथैव दृश्यते । अतस्सर्वं बलवतः पथ्यमिति न्यायं स्मृत्वा सन्तोष्टव्यम् ।

देवो दुर्बलघातकः

अस्ति किलेयं सूक्तिः— 'अजापुत्रं बलिं दद्यात्, सिंहपुत्रं न कश्चन ।' इति, ये सन्ति ज्ञानेन, बलेन धनेन सत्तया च प्रबलाः, ते तु ज्ञानबलधनादिहीनान् दुर्बलान् जनान् विमर्दयन्ति । तेषां विमर्दन एव स्वपौरुषं पराक्रमलक्षणं तैर्मन्यते । अयमेव सदाचारः प्रबलानां, दुर्बलविमर्दनलक्षणः । ये चास्मान् दुर्बलान् विमर्दयन्ति, ये च किल स्वनिष्ठोत्तमत्वपूज्यत्वादिकं वर्णयित्वाऽन्येषु चास्मासु कनिष्ठत्वाधमत्वशूद्रत्वादिकं निरूप्य पुष्पितान् कर्णप्रियान् धर्मालापान् समुपदिशन्ति । त एवास्माकं पूज्याः श्रेष्ठाः आराध्याश्च भवन्ति । ईदृश एवास्माकं भारतदेशस्येतिहासो वर्तते ।

वरकन्याव्यवहारनिरीक्षणम्

कन्यापरीक्षणाय युवकाः आगच्छन्ति । ताभ्यस्ते विविधान् प्रश्नान् कुर्वन्ति । तदङ्गानां केशकलापस्य देहयष्टिमानस्य तत्स्वरसंगीतस्य तच्छिक्षणस्य च तत्तत्प्रश्नैः परीक्षणं कुर्वते । परन्तु कन्यकाः समागततद्युवकानां परीक्षणं कर्तुं नोत्सहन्ते । यतस्ताः सन्ति दुर्बलाः, प्रबलाश्च सन्ति युवकाः । अत एव पतिः परमेश्वररूपेण मान्य आराध्यः पूज्यश्च भवति पत्न्या । परन्तु

प्रबलेन पुरुषेण पत्या सा पत्नी परमेश्वरीरूपेण नैव मान्या भवति । सा तु परिचारिणी दासी स्वाज्ञावशवर्तिनी मर्दनीयैवासीत् अस्ति वा । पुरुष इच्छति मम भार्या पतिव्रता सीता स्यात्, परन्त्वहं – एकपत्नीव्रतधारी रामो भूयासमिति नैवाभिलषति । मम चरितन्तु रावणवदुच्छृङ्खलं भूयात्तत्र नास्ति कश्चन प्रतिरोधः इति विजानाति । मम पत्नी पुरुषमन्यमनुरागदृष्ट्या नैव पश्येदिति वाञ्छति । परन्त्वहमन्यसुन्दरनारीः स्नेहदृष्ट्या द्रष्टुं समर्थोऽस्मीति मनुते इत्याश्चर्यम् । यदि काचन कन्या युवकपरीक्षणं कृत्वा तद्वरणे स्वसम्मतिं प्रकटयेत्, तदा लोकाः कथयन्ति – कलियुगः समायातोऽस्तीति कन्ययाऽधर्माचरणं विहितमिति च । पित्रादिभिः–अयोग्यमप्यङ्गीकृतं पुरुषं स्वपतिरूपेण दुर्बलाः कन्याः मन्वत एव, तदनाचारं मूकभावेन पश्वादिवत् सहन्त एव । ईदृश्येवास्ति - अस्माकं - सनातनधर्मस्य गौरवशालिनी मर्यादा । ईदृशोऽस्ति-अस्माकं हिन्दुसमाजो महान् धन्यः, तन्महत्ता च प्रशस्ता ? ।

वराक्याः राजकुमार्याः माधवीदेव्याः महाभारतीयो वृत्तान्तः विश्वामित्रगालवयोः गुरुशिष्ययोःसंवादश्च

विश्वामित्रो गुरुः शिक्षकः, गालवस्तु शिष्य आसीत् । विश्वामित्रस्य गुरोः सकाशाद् गालवेन महर्षिणा वेदादिसकलशास्त्रविद्या सम्पादिता । असौ विश्वामित्रो महर्षिः–'क्षत्रभावादपगतो ब्राह्मणत्वमुपागतः ।' म० भा० उद्योगपर्वणि अ० १०६।श्लो० १८)

'विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः ।
शुश्रूषया च भक्त्या च प्रीतिमानित्युवाचह ॥१९॥
अनुज्ञातो मया वत्स ! यथेष्टं गच्छ गालव ! ।

अर्थात् दक्षिणाप्रदानं विनैव मया गुरुकुलात् स्वगृहगमनाय त्वमनुज्ञातोऽसि । तथापि स गालवः शिष्यः—इत्थमुवाच—

'प्रीतो मधुरया वाचा, विश्वामित्रं महाद्युतिम् ।
दक्षिणाः काः प्रयच्छामि, भवते गुरुकर्मणि ॥२१॥
दक्षिणाभिरुपेतं हि कर्म सिद्ध्यति मानद ! ।
दक्षिणानां हि दाता वै, अपवर्गेण युज्यते ॥२२॥
किमाहरामि गुर्वर्थं, ब्रवीतु भगवानिति ।
असकृद् गच्छ गच्छेति, विश्वामित्रेण भाषितः ॥२३॥
किं ददानीति बहुशो गालवः प्रत्यभाषत ।' इति ।

गालवस्य पुनः पुनर्दक्षिणायाञ्चाकथनेन—

क्रुद्धो विश्वामित्रो विशिष्टाश्वदक्षिणाः ययाचे

'किञ्चिदागतसंरम्भो विश्वामित्रोऽब्रवीदिदम् ।
एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् ॥
अष्टौ शतानि (८००) मे देहि, गच्छ गालव ! मा चिरम् ॥
(म० भा० उ०)

संरम्भः = क्रोध इत्यर्थः । तादृशतत्संख्याकाश्वानयनाय त्वं शीघ्रं गच्छ, ईदृशीमेव दक्षिणामहं याचे ।

गालवमहर्षिः स्वमित्रं गरुडं प्रत्युवाच—

गुरवे (विश्वामित्राय) संश्रुतानीह, शतान्यष्टौ हि वाजिनाम् ।
एकतः श्यामकर्णानां शुभ्राणां चन्द्रवर्चसाम् ॥

तेषां चैवापवर्गाय, मार्गं पश्यामि नाण्डज ! (गरुड ! पक्षिराज) । संश्रुतानि = प्रतिज्ञातानि । अपवर्गाय = तादृशाष्टशतहयदक्षिणा-समर्पणेन प्रतिज्ञाविमुक्तये, मार्गं = उपायं नैवावलोकयामीत्यर्थं ।

विश्वामित्रेणैव स मार्गः प्रदर्शितो गालवाय

'विश्वामित्रोऽथ तं दृष्ट्वा गालवं चाध्वनि स्थितः ।
उवाच वदतां श्रेष्ठो वैनतेयस्य (गरुडस्य) सन्निधौ ॥
यस्त्वया स्वयमेवार्थः प्रतिज्ञातो मम द्विज ! ।
तस्य कालोऽपवर्गस्य, यथा वा मन्यते भवान् ॥
प्रतीक्षिष्याम्यहं कालमेतावन्तं यथा परम् ।
यथा संसिद्ध्यते विप्र ! स मार्गस्तु निशम्यताम् ॥
(म० भा० उ०)

निशम्यतां = श्रूयतां—प्रतिष्ठाननगराधिपतिं नरपतिं ययातिराजं प्रति त्वं गच्छ । स एव तव मनोरथपूर्तिं करिष्यतीति । अत एव गालवगरुडौ तौ—

'प्रतिष्ठाने नरपतिं ययातिं प्रत्युपस्थितौ' इति

ययातिराजस्य महौदार्यम्

तादृशतत्संख्याकहययाचनाय स्वसमीप आगतं गालवं प्रति ययातिः राजा ब्रवीति । मम सन्निधौ न सन्ति तादृशाः तावन्तो हयाः । (अयं किल ययातिः शुक्राचार्यपुत्र्याः देवयान्याः पतिः प्रतिभाति) किन्तु मम कन्येयं सुन्दरी युवती माधवीना-मिका विद्यते । तां गृह्णातु भवान् । तस्याः माधव्याः पुनः पुनर्विवाहाय, तत्तद्भिन्नभिन्नपतिद्वारा तत्तदेकैकसुतोत्पादनाय

च प्रदाने कृते सति भवता तादृशाः तत्संख्याकाः हयाः तत्त-द्भिन्नभिन्नराजपुत्रद्वारा लब्धा भविष्यन्तीति। तत्रत्याः इमे श्लोकाः निरीक्षणीयाः ययातिराजस्य महौदार्यप्रदर्शकाः—

ययातिरुवाच—

तस्माच्चतुर्णां वंशानां स्थापयित्री सुता (माधवी) मम (ययातेः)।

इयं सुरसुत (देवकन्या) प्रख्या, सर्वधर्मोपचायिनी॥
सदा देवमनुष्याणामसुराणाञ्च गालव!।
कांक्षिता रूपतो बाला सुता मे प्रतिगृह्यताम्॥
अस्याः शुल्कं प्रदास्यन्ति, नृपाः राज्यमपि ध्रुवम्।
किं पुनः श्यामकर्णानां हयानां द्वे चतुःशते।
स भवान् प्रतिगृह्णातु ममैतां माधवीं सुताम्॥

चतुर्भिः पतिभिः एका भार्या माधवी राजपुत्री क्रमशः चतुरः पुत्रान् जनयामास

महाभारतस्योद्योगपर्वणि – शतपञ्चदशतमाध्यायादारभ्य शतविंशतितमाध्यायपर्यन्तं– (११५ से १२० तक) ययातिराजस्य सुन्दर्याः पुत्र्याः माधव्याः कथा वर्तते। तया क्रमशो गालवमहर्षिप्रयोजिताः चत्वारो विवाहाः कृताः एकैकस्मात् राजकुमारात् द्विशतद्विशतहयग्रहणाय। एवं चतुर्भि विवाहै-र्गालवेन महर्षिणाऽष्टशतसंख्याकाः तादृशाः हयाः विश्वामित्राय गुरवे प्रदानाय सम्पादिताः। सा च माधवी तत्तद्भिन्नपतिभिः एकैकपुत्रसन्तानान् जनयामास। प्रत्येकविवाहसमये साऽभिनव-पतिग्रहणाय पूर्वकालिकं पतिं परितत्याज। तथापीदं तथ्यमतीव-रोचकं विद्यते– तस्याः विवाहितायाः सन्तानवत्याः अभिनवेन

पत्या पाणिग्रहणे संकोचो वा लज्जा वा नहि विहिता तस्याः सौन्दर्यातिशयवशात् । तया किल स्वस्याः अन्तिमस्य चतुर्थस्य ऋषिविश्वामित्रस्य पत्युः परित्यागानन्तरं तत्पित्रा ययातिना तद्भ्रातृभिः पुरुयद्वादिभिश्च तस्याः पुनर्विवाहाय स्वयंवरसमारोहस्यायोजने कृतेऽपि सा पञ्चमाद्विवाहादुपरता सती तपो विधातुं वनं प्रवव्राज, अर्थात् तया पञ्चमो विवाहो न कृतः । चत्वार एव विवाहाः कृताः, चत्वार एव पुत्राः समुत्पादिताः ।

समीक्षा

वृत्तान्तमिदमलौकिकमिव प्रतिभाति । यद्वा 'मायायां सर्वसम्भवादि' ति न्यायेन तन्नास्ति दुष्करमशक्यं वा । यद्वा 'कथा इमास्ते कथिता महीयसां'............वचोविभूती नं तु पारमार्थ्यम् ।' (भा० १२।३।१४) इति श्रीमद्भागवतीयन्यायेन वाग्विलासमात्ररूपोऽयं वृत्तान्तः । न तु पारमार्थिको वास्तविकः । अनेन कल्पितेन वा यथार्थेन वा वृत्तान्तेन कीदृशः सत्ययुगीयो वा कलियुगीयो वाऽऽदर्शः समुपस्थाप्यते । सदाचारस्य वोच्छृङ्खलानाचारस्य वा शिक्षा प्रदीयते, इति सर्वज्ञं महाभारतकारं श्रीकृष्णद्वैपायनं विहाय सामान्यैर्विद्वद्भिर्न ज्ञायते ।

प्राक् पित्रा ययातिनैवास्याः माधव्याः चत्वारो विवाहाः कर्तव्याः इत्यादिकं सर्वमितिवृत्तं गालवमहर्षये तत्प्रदानसमये निर्दिष्टम् । माधवी स्वकन्या राजकुमारी-स्वस्याः पुनः पुनर्विवाहं, पुनः पुनः अश्वलाभार्थं विक्रयं, अभिनवपतिसंवरणं तत्तद्भिन्नपतिप्रयोजितसन्तानोत्पादनमित्यादिकं सत्यसनातनधर्मविरुद्धं वाञ्छति वा न वेति स्वकन्यासम्मतिस्तेन नैवासादिता । अनेन कन्यायाः सर्वथा पराधीनतैव ज्ञायते । 'न स्त्री स्वातन्त्र्य-

मर्हति' इति मन्वादेशं मन्वाना वराकी माधवी पित्रा वा गालवेन वा यद्यन्निर्दिष्टं तत्तत्सर्वमनुससार ।

माधवीसंमतिः

पित्रा ययातिना यन्निर्दिष्टं तदवश्यमेवाङ्गीकरणीयं विवादं वा विसंवादं वा विहायेति विभिन्नपतिसमागमेन कमप्यद्भुतरसास्वादलाभञ्च मन्वाना माधवी देवी स्वस्याः शिष्टधर्म्याचारत्वस्य रक्षार्थमिदं ब्रतीति—

'मम दत्तो वरः कश्चित् केनचिद् ब्रह्मवादिना ।
प्रसूत्यन्ते प्रसूत्यन्ते कन्येव त्वं भविष्यसि ॥
स त्वं ददस्व मां राज्ञे, प्रतिगृह्य हयोत्तमान् ।
नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि च ।
भविष्यन्ति तथा पुत्राः मम चत्वार एव च ॥' इति

वरदानप्रभावात् विभिन्नतत्तत्पतिसमागमेऽपि तत्तत्पुत्रोपत्तावपि च मम कन्यात्वं सुरक्षितं भविष्यति निःसंशयम्, अतः केनापि तद्दूषितं नैव मन्तव्यम् ।

समीक्षा

परन्त्वत्र समीक्ष्यते—कन्यात्वस्य तया निश्चयो यथार्थो वा भ्रामको वा विहित इति सैव ज्ञातुं प्रभवेत्, नान्यः कश्चन । अन्यस्तु शरीरस्य स्तनादिबाह्यलिङ्गदर्शनेन निश्चेतुं शक्नोति-वस्तुतः कन्येयं वा भुक्ता भार्येति वा । तत्तत्पतयस्तु अस्माकमियं भोग्या भार्या जाता, अस्यामस्माभिः—पुत्राः समुत्पादिताः इति यथार्थतो विजानीयुरेव ।

समीक्षकास्तु यद्यथार्थं प्रतिभाति, तत्सर्वं मुक्तकण्ठतो वक्तुं

मुक्तलेखनीतो लिखितुं वा प्रभवन्त्येव । 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति न्यायेन प्रमाणपरिष्कृतेन तर्केण धर्मं धर्माभासं वा, सदाचारं कदाचारं वा विवेकतोऽनुसंदधते । अतस्तन्माधवीदृष्टान्तमुपादायाद्यतना काचन स्वैरविहारपरायणा व्यभिचारिणी स्त्र्यपि-एवं वक्तुं प्रभवेत्—यन्ममापि विद्यते कस्यचित्सिद्धस्य महात्मनो वरदानं । तत्प्रभावात् अहं सदा तत्तद्विभिन्नाभीष्टजनसमागमलक्षणे व्यभिचारे कृतेऽपि-निष्पापा पवित्रा ब्रह्मचारिण्येव स्थास्यामीति ।

तस्याः प्रथमः पतिर्हर्यश्वनामा राजर्षिः, तस्यां तेन वसुमनोनामकः पुत्रश्च समुत्पन्नोऽभूत्

गालवो महर्षिः—हर्यश्वं राजानं माधव्याः राजकन्यायाः पत्नीरूपेण ग्रहणाय, तस्याञ्चैकस्य पुत्रस्योत्पादनाय, तदर्थं द्विशतश्रेष्ठहयसमर्पणाय च प्रेरयामास । तत्रत्या इमे श्लोकास्तावद् द्रष्टव्याः—

'हर्यश्वं पृथिवीपालमिदं वचनमब्रवीत् (गालवः) ।
इयं कन्या नरश्रेष्ठ ! हर्यश्व ! प्रतिगृह्यताम् ॥
चतुर्भागेन शुल्कस्य जनयस्वेकमात्मजम् ॥

चतुर्भागेन—अभीष्टद्विशतहयभागेन । तेन तस्यां वसुमना जातः पुत्रः । हर्यश्वः सत्यवचने स्थितः प्रददौ माधवीं (स्वभार्यां) पुनः ।

एकपुत्रोत्पादनप्रयोजकमेवास्या माधव्याः शुल्कं द्विशतहयसमर्पणात्मकम् । ततोऽधिकहयाभावात् शुल्कं समाप्तम् ।

अतो गालवाय माधव्याः राजकन्यायाः समर्पणमेव हर्यश्वस्य राजर्षेः सत्यवचनेऽवस्थिति र्वेदितव्या । गालवेन शिष्येण तस्माच्छुल्करूपेण गृहीतानां तेषां द्विशतहयानां समर्पणं विश्वामित्राय गुरवे कृतमेवाभूदित्यर्थाल्लभ्यं स्यात् । ततः परमन्यद्विशतहय-लाभाय सा माधवी कन्या गालवप्रेरिता सती द्वितीयपतिमवृणोत् ।

तस्याः द्वितीयः पतिः काशीनरेशो दिवोदासोऽभूत्, तस्यां तेन प्रतर्दननामको द्वितीयः पुत्रश्च समुत्पादितः

द्वितीयः पतिः काशीनामीश्वरः प्रभुः । दिवोदास इति ख्यातः । दिवोदास उवाच—

'अहमप्येकमेवास्यां, जनयिष्यामि पार्थिवं (पुत्रं) ।
तथेत्युक्त्वा द्विजश्रेष्ठः (गालवः) प्रादात् कन्यां महीपतेः॥

अर्थात्— अभीष्टद्विशतहयरूपशुल्कं गृहीत्वेति शेषः ।

विधिपूर्वं च तां राजा कन्यां प्रतिगृहीतवान् ।
रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः ॥
तथा तु रममाणस्य दिवोदासस्य भूपतेः ।
माधवी जनयामास पुत्रमेकं प्रतर्दनम् ॥

पश्चात्-कन्यां (गालवाय) निर्यातयामास स्थितः सत्ये महीपतिः ॥

तस्याः तृतीयः पतिः उशीनरो नृपतिरभूत्, तस्याञ्च तेनं शिविनामा पुत्रः समुत्पादितः

गालवाय शुल्करूपेण द्विशतहयान् दत्त्वा, माधवीञ्च

भार्यारूपेण एकपुत्रोत्पादनाय गृहीत्वा उशीनरो नृपतिः एवमुवाच—

'अहमप्येकमेवास्यां जनयिष्यामि गालव ! (पुत्रमितिशेषः)।
उशीनरं प्रतिग्राह्य (माधवीं) गालवः प्रययौ वनम् ॥
रेमे सः तां समासाद्य कृतपुण्य इव श्रियम् ।
ततोऽस्य समये जज्ञे पुत्रो बालरविप्रभः ॥
शिबिर्नाम्नाऽभिविख्यातो यः स पार्थिवसत्तमः ।

चतुर्थो विश्वामित्रो महर्षिः स्वयं माधव्याः पतिरभूत् तस्याञ्च तेनाष्टकनामा पुत्रः समुत्पादितः

विश्वामित्रं प्रति गालवो ब्रवीति—

अस्यां (माधव्यां) राजर्षिभिः पुत्राः जाता वै धार्मिकास्त्रयः ।
चतुर्थं जनयत्वेकं भवानपि नरोत्तमम् (पुत्रमिति शेषः) ।
माधवीमिमां भार्यारूपेण गृहीत्वेतिशेषः ।
'स तया रममाणोऽथ विश्वामित्रो महाद्युतिः ।
आत्मजं जनयामास माधवीपुत्रमष्टकम् ॥

विश्वामित्रस्याभिनवभार्यापुत्रलालसा

विश्वामित्रो ब्रवीति—गालवं शिष्यं प्रति-त्वया भो शिष्य ! इयं माधवी ययातिसुता पूर्वं कथं मह्यं न प्रदर्शितेति ।

'किमियं पूर्वमेवेह न दत्ता मम गालव ! ।
पुत्राः ममैव चत्वारो भवेयुः कुलभावनाः ॥

यदि पूर्वमेव मह्यमियं प्रदर्शिता स्यात्तदाऽहमेक एवास्याः पति-

भूत्वाऽस्यां चतुरः पुत्रान् अहं समुत्पन्नान् कुर्यासम् । परन्तु सः समयस्तु प्रागेव व्यतीतः, अतोऽहं—

'प्रतिगृह्णामि ते कन्यामेकपुत्रफलाय वै ।'
(म० भा० उ० ११६।१६-१७) इति ।

अष्टकस्यैकस्य पुत्रस्य समुत्पत्त्यनन्तरं विश्वामित्रः—

'निर्यात्य कन्यां शिष्याय (गालवाय) कौशिकोऽपि (विश्वामित्रोऽपि) वनं ययौ ।

माधव्याः चत्वारः पुत्राः विभिन्नगुणकर्मस्वभावाः आसन्

'जातो दानपतिः पुत्रस्त्वस्याः शूरस्तथाऽपरः ।
सत्यधर्मरतश्चान्यो यज्वा चापि तथाऽपरः ॥

दानपतिः = वैश्यस्वभावः । शूरः = क्षत्रियस्वभावः । सत्यधर्मरतः एवं यज्वा = ब्राह्मणस्वभावः । अतः प्राचीनसमये-एकस्मिन्नेव परिवारे कश्चन विद्याव्यासंगतया शमदमादि-प्रकृतिको ब्राह्मणो भवति, कश्चन शस्त्रास्त्रादिनिपुणतया शौर्यादिस्वभावतश्च क्षत्रियो राजा भवति । कृषिवाणिज्यादि-कर्तृत्वेन वैश्यो भवति, एवं श्ववृत्तिसमाश्रयेण शारीरकश्रमा-ङ्गीकृतत्वेन च विद्याविमुखः शूद्रो भवति, श्रीमद्भागवते महा-पुराणे भगवतः ऋषभदेवस्य केचन पुत्राः राजानः क्षत्रियाः संजाताः, केचन पुरोहिताः ब्राह्मणाश्च संवृत्ताः, केचन योगेश्वराः संन्यासिनो बभूवुः इत्यादिकं श्रूयमाणं प्राक्कालिकं विवाद-रहितं वृत्तं पूर्वोक्तं कथनमुपोद्बलयति ।

पित्रा कृतो माधव्याः चतुर्वारं विवाहितायाः चतुष्पुत्रजनन्याः पुनः स्वयंवरविवाहसमारोहः, तमनादृत्य सा तपश्चचार

'स तु राजा (ययातिः माधवीपिता) पुनस्तस्याः (माधव्याः) कर्तुकामः स्वयंवरम् । उपगम्याऽऽश्रमपदं गंगायमुनसंगमे ।

गृहीतमाल्यदामां तां रथमारोप्य माधवीम् ।
ऋषिभिर्ब्रह्मकल्पैश्च समन्तादावृतं वनम् ।
निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी ॥
वरानुत्क्रम्य सर्वांस्तान् वरं वृतवती वनम् ।
उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ॥ इति

समीक्षा

केचन विद्वांसः कथयन्ति—संप्रति समुपलभ्यमानो महाभारतग्रन्थः प्रथमं—'ततो जयमुदीरयेत्' इति प्रसिद्धमहाभारतीयमंगलवचनावगतेन जयनाम्ना संक्षिप्तोऽत्यल्पकाय आसीत् । पश्चात् भूयोभिः पण्डितैर्मिलित्वा तत्तत्किंवदन्तीजातमवलम्ब्य 'जयग्रन्थो' भूयसीनां कथानां तत्र संयोजनं कृत्वाऽधिककलेवरो भारतनाम्ना प्रसिद्धः कृतः । तदनन्तरं तैरेवाधिकतमकायो महाभारतभिधानं कृत्वा निर्मितः । तथा चैतादृशीकथासंयोजनं विधाय तैः पण्डितलेखकमहानुभावैः किमधुना युरोपामरीकादिपाश्चात्यदेशेषु समुपलभ्यमानायाः दुराचारलक्षणाया उच्छृङ्खलताया अनुमोदनं क्रियते ? भारतोऽपि देशः तथा स्यात्, इति किं विद्यते तेषां मनीषा ? इति यथार्थतो न निर्धार्यते विद्वद्भिः ।

मोहमयी (बम्बई) प्रभृतिनगरीषु तत्तत्कालेजकन्यकादीनां पाश्चात्याङ्गलशिक्षावेषभूषाऽऽहारविहारादिप्रभावेणार्यसंस्कार-सदाचारमर्यादादिनाशकेन श्रूयतेऽत्यधिको दुराचारः । अत एव तदुद्दिश्य कथ्यते तद्वृत्तमित्थं स्कन्दपुराणे नागरखण्डेऽपि-'कन्यकाः प्रसविष्यन्ति, कन्यकाः सुरतोत्सुकाः । कन्यकाः प्रकरिष्यन्ति पुरुषैः सह संगतिम् ॥ भर्तारं वञ्चयिष्यन्ति, कुलीना अपि योषितः ॥' इति

शंका-समाधानम्

ननु—भो ! ऐतरेयब्राह्मणे तावत्—

'कलिः शयानो भवति, संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति, कृतं संपद्यते चरन् चरैवेति ॥'

इत्युपदिष्टमिन्द्रेण रोहितं राजकुमारं प्रति (ऐ० ब्रा० ३३ अ०)

अयमर्थः—चतस्रः पुरुषस्यावस्थाः भवन्ति, निन्द्रा, तत्परित्यागरूपं जागरणं, उत्थानं संचरणञ्चेति । ताश्चोत्तरोत्तरश्रेष्ठत्वात्कलिद्वापरत्रेताकृतयुगैः समानाः सन्ति, ततश्चरणस्य परिश्रमरूपस्य सर्वोत्तमत्वाच्चरैव । अस्मिन् मन्त्रे किल चतुर्युगानामुत्तमाधमभावेन वर्णनस्योपलभ्यत्वाच्चतुर्युगकल्पना पौराणिक्येव विद्यते, न वैदिकीति न वक्तुं शक्यते ।

इति चेन्नैवम्—एतस्य यथार्थभावानवबोधात् । तथाहि-यथैकस्मिन् समये केचन मूढा अलसा जनाः निद्राणाः सन्तः परिश्रमविमुखत्वान्नेष्टं धनादिकं लभन्ते । अतस्सः समयस्तेषां कृतेऽधमतमः कलिरूपो निष्फलः संपद्यते । केचन विवेकिनो निद्रातः समुत्थाय जागरणमनुभूय विचारयन्ति–इष्टलाभाय कर्तव्यः पुरुषार्थ इति । तेषां कृते सः समयो नास्ति कलिसदृशः

सर्वथा प्रतिकूलः, किन्तु परिश्रमविचारप्रदातृत्वात् किञ्चिदनुकूलो द्वापररूपः संजातः। एवं तेभ्योऽपि विशिष्टाः जनाः विचारानन्तरं सद्यः स्वासनात्समुत्थाय परिश्रमं विधातुं सन्नद्धा भवन्ति, तेषां कृते सः कालस्ततो विशेषानुकूलस्त्रेतारूपः संजातः। एवं सर्वोत्तमाः जनाः पर्याप्तं परिश्रमं विदधानाः इतस्ततो विचरन्त इष्टलाभं सम्पादयन्ति। तेषां कृते स एव समयः सफलः सर्वोत्तमः कृतरूपः संपद्यते।

यथैक एव चन्द्रः केषाञ्चित्कृते सुखरूपः, केषांचित्कृते सुखदुःखोभयरूपः, केषांचित्कृते सर्वथा दुःखरूपः संपद्यमानो दृष्टः। यदाहुः कवयोऽपि—

'न रम्यं, नारम्यं, प्रकृतिगुणतो वस्तु किमपि।
प्रियत्वं यत्र स्यादितरदपि तद् ग्राहकवशात्॥
रथाङ्गाह्वानानां भवति विधुरङ्गारशकटी।
A पटीरारम्भःकुंभः स भवति चकोरीनयनयोः॥ इति।

तथैवैक एव समयो भूतवर्तमानभविष्यदात्मकः योग्यायोग्यजनानां कृतेऽनुकूलः कृतादिरूपो भवति, प्रतिकूलश्च कल्यादिरूपः संपद्यते। स एव समयः प्रशस्तादृष्टवशात् कस्यचिन्मुखविकासप्रयोजको भवति, यः किलाशुभादृष्टवशात् कस्यचिद् रोदनप्रयोजको भवति। अतो हर्षप्रदत्त्वात् सः समयस्तस्य कृते कृतयुगो भवति, दुःखप्रदत्त्वाच्च स एव समयोऽन्यस्य कृते कलिरूपो भवति। बभूव, भविष्यति वा।

A रम्यं=अनुकूलं, अरम्यं=प्रतिकूलं, इतरत्=अप्रियत्वं, योग्यायोग्यग्राहकाणां वशात् राथाङ्गः = चक्रः तत्संज्ञकानां चक्रवाकपक्षिणां कृते। विधुः = चन्द्रमा, पटीरः = चन्दनम्।

'पुत्रस्ते जातः, कन्या ते गर्भिणी जाते, त्युभयविधेष्टानिष्ट-समाचारवशात्-एक एव समयो युगपत्सुखदुःखोभयप्रयोजकतया कृतकल्युभयविधो भवति ।

अतस्तस्मिन् ऐतरेयब्राह्मणमन्त्रे किल-अलसमानवे कलि-रूपस्य निष्फलनिकृष्टव्यष्टिकालस्य, चरति अमिपुरुषे च कृतरूपस्य सफलोत्कृष्टव्यष्टिकालस्य च समारोपो विहितः । ईदृशाः अलसाः श्रमिणश्च अच्छा अनच्छाश्च मानवाः पूर्वस्मिन् काले वा वर्तमाने काले वा, भविष्यति काले वा सर्वत्र बभूवुः भवन्ति, भविष्यन्ति च । रामरावणलक्ष्मणकुंभकर्णकृष्णकंस-युधिष्ठिरदुर्योधनगान्धिजिन्नादेर्वृत्तान्तस्य नैकदापितु सर्वदा द्रष्टुं शक्यत्वात् ।

सति चैवं पूर्वोक्तैतरेयवचनेन न निर्णेतुं शक्यते—यत् पूर्वकालोऽतीवशोभन आसीत्, तत्रत्याः सर्वेऽपि जनाः सात्त्विका सुखिनश्चासन् इति । इन्द्रवामदेवादिवृत्तान्तविरुद्धत्वात् । एवं वर्तमानः कालः सर्वथाऽशोभनोऽस्तीत्यपि न वक्तुं शक्यते । अस्मिन् काले सर्वेऽपि जनास्तामसाः दुष्टाः दुःखिन एव सन्ती-त्यपि । महात्मगान्धितिलकमालवीय-रामकृष्णपरमहंसविवेका-नन्दारविन्दयोगि-रामतीर्थ-दयानन्दादिमहापुरुषाणां सात्त्विकानां शतसहस्रलक्षाणां संभूतत्वात् । अन्धकारमयपूर्वकालापेक्षया ज्योतिर्मये वर्तमानसमये-विशिष्टभवननिर्माण-रेलगाडी-मोटर-तार-टेलीफोन-रेडियो-टेलीविजन विद्युच्छक्ति-विशेषशिक्षाप्रसा-रादिसुखसाधनानां भूयसामाविर्भूतत्वात्-तदभावात् प्राक्कालिकाः जनाः विविधं महद्दुःखमन्वभवन्निति ।

तथा च विभिन्ने समये सत्यादियुगचतुष्टयस्योत्कृष्टनि-

कुष्टरूपेण वर्णनं पौराणिकी कल्पनैव विद्यते, न वेदे तावत् मन्त्रब्राह्मणोभयरूपे तस्य लेशतोऽपि वर्णनं समुपलभ्यते। अतो योग्यायोग्यजनानां कृते एक एवाखिलः समयोऽतीवविस्तृतो भूतवर्तमान भविष्यदात्मकः उत्तमाधमानुकूलप्रतिकूलतया कृत-कल्यादिरूपः सम्पद्यमानो बभूव, भवति, भविष्यतीति तद्वचन-मादाय कृतायाः शंकायाः समाधानमीदृशं वेदितव्यम्। अतएवोक्तं गरुडपुराणे ब्रह्मपुराणेऽपि च– 'भगवद्ध्यानमात्रेण सत्ययुगः प्रवर्तते। अशुभैः कर्मभिर्नूनं कलिः सद्यः प्रवर्तते॥ (१२।८) 'कलौ कृतयुगस्तस्य, कलिरेव कृते युगे। हृदि यस्य गोविन्दो यस्य चेतसि नाच्युतः॥' (३७।६) इति।

अतः—

'आस्ते भग आसीनस्य ऊर्ध्वस्तिष्ठति तिष्ठतः।
शेते निष्पद्यमानस्य चराति चरतो भगः, चरैवेति॥'

अस्मिन् प्रगतिबोधके मन्त्रे सोऽयमेक एव समयः कस्य-चित्कृते सौभाग्यस्य, एवं कस्यचित्कृते दौर्भाग्यस्य च प्रयोजको भवतीत्युक्तम्। अयमर्थः—भगः = सौभाग्यं, आसीनस्य = उपवि-ष्टस्य, आस्ते = तथैव निष्क्रियतया तिष्ठति, न तु वर्धते। अभिवृद्धिहेतोरुद्योगस्याभावात्। तिष्ठतः = उपवेशनं परित्य-ज्योत्थानं कुर्वतः पुरुषस्य भग ऊर्ध्वः = अभिवृद्धेरुन्मुखस्तिष्ठति। विद्यावित्तार्जनकृषिवाणिज्याद्युद्योगस्य संभावितत्वात्। निष्पद्य-मानस्य = भूमौशयानस्य भगः शेते = निन्द्रां करोति– विद्यमान-धनरक्षादिचिन्ताया अप्यभावात्सर्वथैव विनश्यति। चरतस्तेषु-तेषु देशेष्वर्जनार्थं पर्यटनं कुर्वतः पुरुषस्य भगः सौभाग्यं चराति-चरति = दिने दिने वर्धते। तस्मात्त्वं चरैवेति न त्वेकत्रालसः

सन् तिष्ठेतीन्द्रस्यायमुपदेशः ।

पौराणिककलिवर्णनसमीक्षा

कलियुगे तावत् पौराणिकाः कथयन्ति-'धेनवश्छागप्रायाः भवन्ति' (श्रीमद्भा० १२।२।१४)इति । परन्तु धर्मप्रधानं भारतं देशं विहाय युरोपामरीकादिविदेशाः निरीक्ष्यन्ताम्-तत्र विद्यमानाः धेनवो हस्तिकल्पाः प्रभूतपयः समर्पिकाः सन्ति । तद्देशीयाः जनाः तासां दुग्धनवनीतादिकं यथेष्टमुपभुञ्जानाः बुद्धिबलधनाढ्याः सन्तो विविधान्-आश्चर्यकरान्-अभूतपूर्वान्-आविष्कारान् कुर्वन्तीति प्रत्यक्षमुपलभ्यते । किं तेषु विदेशेषु कलियुगस्य दुष्टस्य गमनं न जातम् । तत्र गत्वा तेन किं तदवस्थितानां धेनूनां छागप्रायस्त्वं न विहितमित्याश्चर्यम् । अयं किल कलियुगस्य समयोऽस्ति भारते । अतो दुष्टकालस्वभावतो धेनवो गावोऽजातुल्याः अल्पकाया अत्यल्पदुग्धादिप्रदाः भवन्ति, भविष्यन्ति वा । अतो धेनूनां प्रगतये यथेष्टप्रभूतदुग्धनवनीतादिलाभाय च कोऽपि प्रयत्नो भारतीयै र्न विधातव्यः, इति कलिवर्णनं तेभ्यो यथार्थमुपदिशति । यद्वा यो देशः कलियुगं मनुते, तस्यैवोपरि स निर्दयतयाऽऽक्रमणं विदधाति, यो देशस्तं न मनुते, तस्माद्भीतः सन् सः तस्मात् प्रपलायते, इति कलियुगस्य चरितं 'भवदीयः श्वानो भवन्तमेवाक्रमति, नान्यमितीदृशमस्तीति प्रतिभाति । अन्यदेशीया बुद्धिबलधनादिमन्तो जनाः विकासशीलमेव समयमभ्युपयन्ति, अतस्ते स्वान्वेषणविकासाय चन्द्रमण्डलादिकमनुधावन्तीति साम्प्रतिकं प्रत्यक्षमेतत् । परन्तु-अधोऽधःपतनशीलां पौराणिकीं संस्कृतिमेवाभिमन्यमानाः भारतीयाः, तत्रापि भारतसमाजाग्रेसराः आचार्याः पण्डिताः साधवश्च कथं राष्ट्र-

समाजाभ्युदयसाधकाय विकासाय प्रयतेरन् ? तेषां मते त्वयं कलियुगो दुष्टः पतनपरम्परामेव साधयिष्यति, नाभ्युदयम् ।

कलौ सर्वे जनास्तावत्-'अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः, क्षुत्तृड्भ्यां व्याधिभिश्च सन्तप्स्यन्ते ।' (भा० १२।२।१०-११) इति । इदं चिन्त्यम्--निरुक्ते यास्काचार्य्येण तावत्--ऋग्वेदीयदेवापिवृत्तान्तः प्रदर्शितः । तत्समये सत्ययुगे द्वादशवर्षाणि देवो न ववर्ष, अर्थात् पर्जन्यरूप इन्द्रो द्वादशवर्षपर्यन्तं वृष्टिं न चकार । अर्थादतिदीर्घकालव्यापिन्यनावृष्टिः संजाता, अर्थात् तया पशुपक्षिमानवादिप्राणिनां भूयान् संहारः संवृत्त इति ज्ञायते । सम्प्रति तु ईदृशी भयंकराऽनावृष्टिर्नोपलभ्यते । कदाचिद्भारते-एकवर्षपर्यन्तमल्पवृष्टेः उपलभ्यत्वेऽपि-अन्यामरीकादिदेशेषु सर्वथा सुवृष्टेर्विद्यमानतया प्रभूतखाद्यसामग्री प्रादुर्भवति । तस्माद्भारतोऽपि देशः काममपि तां संपाद्य स्वखाद्यन्यूनतापूर्तिं सम्पादयति ।

नीचाः महत्त्वं गताः

इदमपि कलियुगस्य दुष्टस्य लक्षणम् । अर्थात् अधमा अधमा एव, तिष्ठेयुः, अशिक्षिता अपि च सदा तथैव । दुराचाराः अधःपतिताः कथमपि सदाचाराः सदुत्तमाश्च न स्युः, नीचाः कथमपि परमेश्वरप्रदत्तमानवताविकासं कृत्वा ज्ञानबलादिभिः उत्तमाः प्रशस्ताः न भवेयुरिति किं कलियुगः कथयति ? । अथवा कलियुगप्रचारकाः स्वमहत्त्वसंरक्षणकामाः परमहत्त्वघृणाप्रदर्शकाः वदन्ति किम् ? । ये च सन्ति शूद्राः अधमाः ते शिक्षायोग्यतादिभिः-- शिक्षकडाक्टरबेरिष्टरशासकमन्त्रिवैज्ञानिकलेखकोपदेशकत्वादिलक्षणं महत्त्वं यदि प्राप्नुयुस्तदा-उत्तम-

वर्णानां कृतेऽभिशापः प्रभवेदिति कलियुगो लक्षयति किं ? यद्वा परार्थविघातप्रयोजकं स्वार्थान्ध्यं बोधयति किं ? इति निष्पक्षपाताः विद्वांसो विवेचयन्तु । अर्थात् उत्तमवर्णानां धर्मशास्त्रप्रवर्तकानां हृदये एतादृशी दुष्टाभिसन्धिर्वर्तते, ये किलाधःपतिताः अधमाः सन्ति, ते कथमपि शोभनशिक्षादिकं लब्ध्वा स्वाभ्युदयं कर्तुं, समदृशः परमेश्वराल्लब्धायाः मानवतायाः प्रभूतं प्रशस्तं विकासं विधातुं च न शक्नुयुः, स्वसमानतां लब्धुं च कथमपि न प्रभवेयुरिति च । यदि ते स्वकीयमभ्युदयं कृत्वा महत्त्वं प्राप्स्यन्ति, तदाऽस्माकं महत्त्वस्य प्रलयो भविष्यतीति च ।

यश्च धर्मः, यानि च धर्मशास्त्राणि, ये च तदभिमानिनः उत्तमाः आचार्यब्रुवाः—येषां किल नीचत्वमधमत्वं शूद्रत्वमस्पृश्यत्वञ्च कथयन्ति, प्रबोधयन्ति च । तेषां खलु—यदि ते शिक्षिताः प्रबोधिताश्च स्युः तदा—तस्मिन् धर्मे कथं श्रद्धा स्यात् ?, तेषु धर्मशास्त्रेषु कथं प्रामाण्यबुद्धिः निष्ठा च प्रभवेताम् ? । तेषां तादृशेषु चोत्तमेषु कथं मान्यबुद्धिः समादरश्च स्यातामि ? ति निष्पक्षपाताः विद्वांसः स्वात्मौपम्येन विवेकतो विदाङ्कुर्वन्त्वेव ।

विचार्यतां तावत्—महत्त्वाकांक्षा कुत्र नास्ति ?, गृहिषु त्यागिषु, बालेषु वृद्धेषु नरेषु नारीषु च सर्वत्र सा दृश्यते । अतो महत्त्वाकांक्षावतां तेषामभिलाषां ये च धर्मादयः विविधैर्वचनैः प्रतिरुन्धन्ति, विमर्दयन्ति च । ते किल स्वाभाविकनियमात्-तेभ्यः कृतं स्वनिष्ठमन्यायादिकं वीक्ष्य तेभ्यो धर्मादिभ्योऽम्बेडकरादिवत् विद्रोहं चक्रुः, कुर्वन्ति, करिष्यन्ति च । स्वनिष्ठनीचत्वादिकं ब्रुवाणान् तान् धर्मादीन् सहसा परित्यज्य-अन्यस्मिन् समानभावालङ्कृते यवनादिधर्मे संमिलिताः, बभूवुः, भवन्ति,

भविष्यन्ति च । उत्तमाधमभेदभावतिरस्कुर्वाणान्-अन्यधर्मशास्त्र-कुरानादीन् प्रामाण्यबुद्धया श्रद्धया च जगृहुः, गृह्णन्ति, ग्रहीष्यन्ति च । तानेव भोजनविवाहादिव्यवहारेष्वपि समानभावं वितन्वानान् स्वबन्धुत्वेन जज्ञुः जानन्ति, ज्ञास्यन्ति चेत्यवर्णंलभ्यैषा वार्ता सिद्धयति ।

दृष्टमेतत् प्रत्यक्षतः—यथा दण्डिपरमहंससंन्यासिसम्प्रदाययोः—आचार्यसिद्धान्ताद्येकत्वेऽपि-मिथो भोजनादिव्यवहाराभावात्-ऊँचनीचत्वादिरूपविषमभाववत्त्वाच्च समानबन्धुत्वाभावलक्षणं विघटनं विद्वेषादिप्रयोजकम् । एवं 'शूद्र करहिं जप तप व्रत नाना, बैठि बरासन कहहिं पुराना ।' इत्यनेन श्रीतुलसीदासोऽपि कलियुगवर्णनप्रसङ्गे कथयति—शूद्रत्वेनाभिमतानामधमहिन्दूनां हिन्दुधर्मपावनमन्त्रजपे, मनःशोधकतपोव्रतादौ च वक्तुः श्रेष्ठासने स्थित्वा पुराणादिपठनेऽपि नास्त्यधिकारः इति । शूद्राणां जपादिकरणेन पुराणपठनादिना चोत्तमानां जपादिरहितानां स्वेच्छाचाराणां ब्राह्मणादीनां प्रशस्तमवस्थितं महत्त्वं नष्टं भविष्यतीत्यर्थात् ज्ञाप्यते तेन किम् ? । अथवा तेषु किं ब्राह्मणादीनां महत्त्वं लब्धं भविष्यतीति च । कोऽभिप्रायोऽस्तीति स्पष्टतो विद्वद्भि र्न ज्ञायते । यद्वाऽनेन शूद्राणामनधिकारचेष्टा एवं ब्राह्मणादीनां स्वाधिकारविनाशचेष्टा च बोध्यते । यद्वोच्चावचवर्णभेदभावस्य रागद्वेषादिविशिष्टाः प्ररूढसंस्काराः प्राक् एतादृशाः प्रबलाः आसन् सम्प्रत्यपि च प्रवर्तन्ते, ये हि दुष्टराक्षसादिवत् हिन्दुजातेर्निर्दयतया संहारं विदधुः, विदधति, विधास्यन्ति च ।

ब्राह्मणेतराणां संन्यासप्रतिषेधेऽपि-इदमेव कारणं नीचाः

महत्त्वं गमिष्यन्तीति। विरागवान् योग्यः साधक एव यः कोऽपि स्यात्, स एव संन्यासाधिकारीति न्यायसंगतो धर्म्यः पन्थाः। तथा च 'नीचाः महत्त्वं गताः' इति वचनन्तु स्पष्टतः-तैश्चोत्तमैः स्वमहत्त्वरक्षणलक्षणदुःस्वार्थसाधनाय, अन्येषु प्रतीयमानमहत्त्व-विषयकविद्वेषप्रदर्शनायैव च कलिवर्णनमिषेण प्रयुक्तमिति सर्वेऽपि शिक्षिताः शिष्टाः विजानन्त्येवेत्यलं जलताडनप्रयासेन।

स्त्रीस्तुतिनिन्दाविरोधः

मनुस्मृतौ भगवता मनुना तावत्—

'प्रजनार्थं महाभागाः, पूजार्हाः गृहदीप्तयः। स्त्रियः श्रियश्च गेहेषु, न विशेषोऽस्ति कश्चन ॥ उत्पादनमपत्यस्य, जातस्य परि-पालनम्। प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ अपत्यं धर्मकार्याणि, शुश्रूषा रतिरुत्तमा। दाराधीनस्तथा स्वर्गः पितृ-णामात्मनश्च ह ॥' (९।२६-२७-२८) 'पूज्याः भूषयितव्याश्च बहुकल्याणमीप्सुभिः।' यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः ॥ यत्रैतास्तु न पूज्यन्ते, सर्वास्तत्राफलाः क्रियाः। तस्मादेताः सदा पूज्याः भूतिकामै र्नरै र्नित्यम् ॥' (मनु० ३।५५-५६-५९) इत्या-दिभिः स्त्रीणां महती प्रशस्ता स्तुतिः कृता।

एतेषामयं भावः—एताः स्त्रियो महोपकाराः गर्भोत्पा-दनार्थं महाभागाः = बहुकल्याणभाजनभूताः प्रभूतसौभाग्यपुण्य-शालिन्यः सन्ति। अत एव पुरुषैस्तन्मनःतुष्टिकरविविधवस्त्रा-लंकारादिदानेन पूजार्हाः = संमानार्हाः समलंकरणीयाः, एवं ताः-गृहदीप्तयः = स्वगृहशोभाकारिण्यः श्रद्धेयगृहिण्यः गृहस्वामिन्यः सन्ति स्त्रियः, श्रियश्च = पूज्यभगवतीमहालक्ष्मीस्वरूपाः पावन-विभूतिमत्यश्च सन्ति। अपत्यस्य = अभीष्टसन्तानस्य, उत्पादनं

=जननं, जातस्य तस्य विविधं कष्टमगणयित्वाऽतिप्रेम्णा परिपालनं, प्रतिदिनं लोकयात्रायाः = बन्धुमित्रातिथिभोजनादेर्लोकव्यवहारस्य प्रत्यक्षं स्त्रीनिबन्धनं = भार्यैव निदानं कारणमस्ति । तदन्तरेण लोकयात्रानिर्वाहः कथमपि नैव भवति । धर्मकार्याणि = देवपूजाग्निहोत्रादीनि, शुश्रूषा = विविधा परिचर्या, रतिरुत्तमा = उत्कृष्टं रतिसुखं, यत्किल पुरुषः सततं कामयते, यद्विना स्वपुरुषजीवनं निष्फलं मन्यते । यल्लब्ध्वा स्वकीयं जीवनं धन्यञ्च मनुते ।

अत एव सा महाभागा नारी अपत्यजननादिना पितॄणां कृते स्वर्गं सम्पादयति, आत्मनः = स्वस्यापि, सर्वोत्तमरतिसुखस्वादुभोजनादिप्रदानेन स्वर्गमनुभावयति, अत एव प्रशस्तसुखनिधिस्वर्गरूपेण सा स्तूयते मनुना । बहुकल्याणं = बहुधनादिसम्पदं-अभ्युदयादिप्रभूतसुखं, ईप्सुभिः = प्राप्तुमिच्छद्भिः ताः स्त्रियः सर्वदा पूज्याः = समादरणीयाः-भूषयितव्याश्च = वस्त्राभूषणादिभिः अलंकरणीयाश्च भवन्ति । यत्र = कुले समाजे राष्ट्रे च नार्यः = स्त्रियः शोभनशिक्षादीक्षादिभिः पूज्यन्ते, तत्रदेवताः = ग्रामनगरराष्ट्रादिप्रत्यक्षदेवताः—विद्वांसः प्रसीदन्ति । यत्र पुनरेताः न पूज्यन्ते = न सत्क्रियन्ते किन्तु समुपेक्ष्यन्ते-तिरस्क्रियन्ते च, तत्र सत्काराद्यभावेन-उपेक्षाद्वेषकोपादिवैशिष्ट्याच्च सर्वाः रतिभोजनादिक्रियाः निष्फलाः भवन्ति । यस्मादेवं तस्मात्कारणादेताः सदा पूज्याः सत्कार्याः समृद्धिसुखकामैर्नरैर्नित्यं = सर्वदा ।

पुनः स एव स्तुतिकर्ता मनुमहाराजो निर्लज्जतया एतैर्वक्ष्यमाणैः श्लोकैः ताः प्रभूतं निन्दन् स्वनिष्ठं स्त्रीविद्वेष-

श्राविष्कुर्वन् तयोः स्त्रीस्तुतिनिन्दयो विरोधं विद्वद्भ्यः प्रकटयति–
'नैताः रूपं परीक्षन्ते, नासां वयसि संस्थितिः। सुरूपं वा वि-
रूपं वा पुमानित्येव भुञ्जते ॥ पौंश्चल्याच्चलचित्तत्वात्, नैस्नेह्या-
च्च स्वभावतः। रक्षिताः यत्नतोऽपीह, भर्तृष्वेता विकुर्वते ॥
एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम्। परमं यत्नमाति-
ष्ठेत् पुरुषो रक्षणं प्रति ॥ शय्यासनमलंकारं, कामं क्रोधमना-
र्जवम्। द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥ नास्ति
स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः। निरिन्द्रिया ह्यम-
न्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥' (म० स्मृ० ९।-१४-१५-
१६-१७-१८) इति।

एतेषामयं भावः—नैताः स्त्रियो रमणीयरूपं विचार-
यन्ति, 'कन्या वरयते रूपं' इति सूक्तिविरुद्धं दृष्टप्रतिकूलञ्चैत-
द्विदुषां प्रतिभाति। न चासां यौवनादिके वयसि श्रादरो भवति,
इत्येतदपि दृष्टविरुद्धम्। यौवनस्य स्वपरनिष्ठस्य प्रदर्शनाय
तत्संरक्षणाय च सर्वाः नार्यो बद्धपरिकराः दृश्यन्ते। सुरूपं वा
कुरूपं वा पुमानयमिति मत्वा तमुपभोक्तुं प्रवर्तन्ते। श्रर्थात्
सर्वासु स्त्रीषु भोगेच्छा इयती-प्रबलाऽनर्गला विद्यते, याः किल
पुरुषस्य रूपं सौन्दर्यं यौवनादिकञ्च किमपि नापेक्षन्ते, श्रयं
वृद्धोऽपि कुरूपोऽपि जीर्णोऽपि नीचोऽपि पुरुषोऽस्तीति मत्वा
तस्योपभोगाय सदा सन्नद्धा भवन्ति। यद्वाऽऽसां पुरुषस्योपभोग्य-
स्य यौवनादिके वयसि श्रादरो न भवतीति कथनमपि सर्वथा
दृष्टविरुद्धम्। नहि सुन्दर्याः युवत्याः वृद्धे कुरूपे च पुरुषे कथ-
मपि हृदयादरो भवतीति प्रत्यक्षम्। बलात्प्रतिरुद्धा सा वाचा-
ऽऽदरं प्रकटयन्त्यपि तस्याः हृदयं तदादरं नैव तनोति।

पौंश्चल्यात् = यस्य कस्यापि पुंसो दर्शने संभोगाद्यभिलाषशीलत्वात्, चलचित्ताच्च = चित्तस्थैर्याभावात्-चित्तनिष्ठात्यधिकचञ्चलतावत्त्वाच्च, स्वभावतः-नैस्नेह्याच्च = स्नेहसद्भावरहितत्वाच्च, ऐताः नार्यो यत्नेनापि लोके रक्षिताः सत्यो व्यभिचाराश्रयणेन भर्तृषु विकुर्वते = विक्रियां गच्छन्ति-विकृतिं सहसा प्राप्नुवन्ति, न तु संयमपातिव्रत्यादिलक्षणामार्यसंस्कृतिं रक्षितुं प्रभवन्तीत्यर्थः।

एवं = पूर्वोक्तश्लोकद्वयोक्तमासां नारीणां व्यभिचारादिलक्षणं स्वभावं हिरण्यगर्भसृष्टिकालजनितं ज्ञात्वा रक्षणार्थं प्रकृष्टं यत्नं पुरुषः कुर्यात् ।

शय्यासनं = शयनोपवेशनप्रियत्वं, अनेन तासु आलस्यप्रमादप्राचुर्यं सूच्यते । अलङ्कारं = अलङ्करणशीलत्वं, अनेन तासु रजोगुणाधिक्यं विज्ञाप्यते । कामक्रोधौ, अनार्जवं = सरलताऽभावं, अनेन कौटिल्यबाहुल्यं तासु कथ्यते । अकौटिल्यमार्जवमिति स्मरणात् । द्रोहभावं = परहृदयादिहिंसाशीलत्वं कुचर्यां = दुराचारो व्यभिचारादिलक्षणः, इत्यादिकान् दुर्गुणान् सर्गादौ, न तु कानपि सद्गुणान् मनुः स्त्रीभ्यः अकल्पयत् = स्वाभाविकतया कल्पितवान् निर्मितवान् । तस्माद्यत्नतो रक्षणीयाः,

स्त्रीणां = नारीणां, क्रिया = जातकर्मादिक्रिया, मन्त्रैः = वेदादिमन्त्रैः, नास्ति = न भवत्येषा विद्यते काचन शास्त्रमर्यादा व्यवस्थिता । ततश्च मन्त्रवत् संस्कारगणाभावान्न स्त्रियो निष्पापान्तःकरणाः, किन्तु ताः सर्वाः पापपूर्णहृदयाः सन्ति । अत एव ताः निरिन्द्रियाः = इन्द्रियं = धर्मप्रमाणं निर्गतं याभ्यस्ताः, धर्मप्रमाणश्रुतिस्मृत्याद्यध्ययनरहितत्वान्न सन्ति ताः धर्मज्ञाः, अर्थात् धर्मज्ञानाभावात् ताः सन्ति अधर्मव्याप्तचित्ताः । एवं ताः

सन्ति अमन्त्राः = वेदादिमन्त्रजपस्वाध्यायादिशून्याः, पापापनोदनमन्त्रजपादिरहितत्वाज्जातेऽपि पापे तन्निर्णेजनाक्षमाः, अतस्ताः स्त्रियः, अनृतं, अनृतवद् सर्वथा अशुभाः पापाः सन्तीति शास्त्रमर्यादा मनुना विज्ञाप्यते, तस्माद्यत्नतो रक्षणीयाः, अशुभाः दुष्टाः अपि ।

व्यभिचारशीलत्वं दुष्टत्वमशुभत्वञ्च स्त्रीणां स्वभाव इति स्वमतदार्ढ्याय तत्र श्रुतीः भूयसीः प्रमाणतयोपन्यस्यति-मनुमहाराजः—

तथा च श्रुतयो बह्वचो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥
यन्मे माता प्रलुलुभे, विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृक्तामित्यस्यैतन्निदर्शनम् ॥
(म० स्मृ० ९।१९-२०)

बह्वचः श्रुतयः = बहूनि श्रुतिवाक्यानि, 'न चैतद्विद्मो ब्राह्मणाः स्मोऽब्राह्मणा वे' त्येवमादीनि निगमेषु = वेदेषु, स्वालक्षण्यं = स्त्रीणां व्यभिचारशीलत्वादिकं तत्परिज्ञानार्थं पठितानि, तासां श्रुतीनां मध्ये या निष्कृतिरूपाः = व्यभिचारप्रायश्चितभूतास्ताः श्रुतीः शृणुत ।

कश्चित्पुत्रो मातुर्मानसव्यभिचारमवगम्य परगृहगमनादिना ब्रूते—मनोवाक्कायकर्मभिः पतिव्यतिरिक्तं पुरुषं या न कामयते, सा पतिव्रता, ततोऽन्याऽपतिव्रता । मम माता अपतिव्रता सती परगृहान् गच्छन्ती, यत्प्रलुलुभे = परपुरुषं प्रति संजातलोभाऽभूत्, तत्परपुरुषसंकल्पदुष्टं मातृरजोरूपं रेतो मम पिता वृक्तां = शोधयतु—निवारयतु, इत्यस्या प्रकृतस्य स्त्रिया व्यभि-

चारशीलत्वस्यैतदितिकरणान्तं मन्त्रपादत्रयं ज्ञापकम् । अयं च मन्त्रश्चातुर्मास्यादिषु विनियुक्तः ।

धन्योऽयं खलु मनुमहाराजः, पूर्वोक्तस्वकृतसकलस्त्रीनिन्दायां स्वनिष्ठसन्तोषाभावमभिव्यञ्जयन् भगवतीं श्रुतिमपि तां कर्तुं प्रयोजयति । परन्तु 'भूयसीनां श्रुतीनामहं प्रदर्शनं करोमी' ति स्वप्रतिज्ञां विस्मृत्य, तेनैकस्या एव श्रुतेः प्रदर्शनं कृतमिति पूर्वापरकथनप्रदर्शनविरोधप्रयोजितमाश्चर्यं विदुषां प्रतिभाति । तथापि मनुमहाराजः स्पष्टतयाऽनेन वक्ष्यमाणश्लोकेन स्त्रीदुःशीलत्वस्य प्रयोजकं तत्पुरुषदुःशीलत्वमस्तीति विज्ञापयति । अर्थात् पुरुषस्य दुःशीलत्वं दृष्ट्वैव स्त्री दुःशीला भवति,न स्वतः इति ब्रवीति । परन्तु पुरुषनिन्दा तेन नैव कृतेत्यपरमाश्चर्यम् । तथाहि—'यादृग्गुणेन भर्त्रा स्त्री, संयुज्येत यथाविधि । तादृग्गुणा सा भवति, समुद्रेणेव निम्नगा ॥' (म० ९।२२) इति । अयं भावः—यादृग्गुणेन = यादृशयादृशशुभाशुभगुणवता भर्त्रा = स्वामिना पुरुषेण साधुना सुशीलेनासाधुना वा दुःशीलेन स्त्री विवाहविधिना संयुज्यते, सा भर्तृसदृशगुणा वा तत्सदृशावगुणा वा भवति । पुरुषावगुणग्रहणे दृष्टान्तमाह—यथा क्षारजलेन समुद्रेण संयुज्यमाना निम्नगा = नदी स्वादूदकाऽपि क्षारजला जायते । तथा दुःशीलेन दुराचारिणा पुरुषेण संयुज्यमाना स्त्री सुशीला सदाचारिण्यपि दुःशीला दुराचारिणी भवति । तथा च दुराचारात् पापात् स्त्रीरक्षणाय तावत् पुरुषेण स्वकीयं सदाचारव्रतं महता प्रयत्नेन परिपालनीयम् । स्वयं दुराचारः पुरुषः स्वस्त्रियाः सदाचारव्रतं पातिव्रत्यञ्चाभिलषन् स्वयं रामविमुखो रावणः सन् स्वस्त्रियाः सीतात्वञ्चाभिकांक्षन् उपाहासास्पद एव संपद्यते ।

समीक्षा

'दुग्धधौतोऽपि किं याति वायसः कलहंसताम् ।' 'भूयोऽपि सिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति ।' 'या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ।' इति न्यायैः मनूक्तपूर्वप्रकारेण स्वाभाविकदुर्गुणाढ्याः सद्गुणशून्याः स्त्रियो यत्नतो रक्षिता अपि तान् स्वाभाविकदुर्गुणान्-सदुपदेशादिनोपायेनापि कथं परित्यक्तुं शक्ष्यन्ति । नहि स्वाभाविकं शैत्यं जलं विहातुं प्रभवति । न हि स्वाभाविकदुर्गन्धाढ्यान् पलाण्डुलशुनाद्यान् यत्नतः तत्परित्यागेन सुगन्धपूर्णान् कश्चनापि कर्तुं शक्तो भवति । तथा च पूर्वोक्तश्लोकैः—मान्यपूज्यमातृभूतानां—'शुद्धाः पूता योषितो यज्ञियाः इमाः' (अथर्व० ११।१।१७) इति वेदमन्त्रप्रदर्शितप्रशस्तगुणगौरवशालिनीनां स्त्रीणां महानिन्दाजन्यं महत्पापं मनुना कृतमिति विद्वद्भिर्मन्यते । पृच्छन्ति विद्वांसः—मनुं तं-किं सर्वेऽपि पुरुषास्तादृशदुर्गुणरहिताः सन्ति ? । मन्यामहे वयं-स्त्र्यपेक्षया तेषु कामाद्याः दुर्गुणाः बाहुल्येन पूर्वमप्युपलब्धाः आसन्, संप्रत्यपि चोपलभ्यन्ते तान्नापलपितुं केनापि शक्यते । यथा संयमप्रधानं वैधव्यव्रतं स्त्रियः पालयितुं क्षमाः भवन्ति, तथा वैधुर्यव्रतं पुरुषाः कथमपि रक्षितुं नैव प्रभवन्तीति प्रत्यक्षदृष्टमेतत् । ते तु संजातसन्ताना अपि एकस्यां पत्न्यां मृतायां सत्यामविलम्बेन द्वितीयायाः कुमार्याः पाणिग्रहणं कर्तुं प्रवर्तन्ते । तथा च पुरुषान् विहाय स्त्रीष्वेव तेषां दुर्गुणानां स्वाभाविकतया निर्माणप्रदर्शनं कथं कृतमिति मनुमहाराज एव विज्ञातुं वा वक्तुं वा शक्नोति ।

अथवा दोषशून्येष्वपि केनापि कारणेन प्रादुर्भूता दोष-

दृष्टिरेव स्वाभाविकतया निन्दां प्रयोजयति, एवं गुणरहितेष्वपि संजाता गुणदृष्टिः स्तुतिमित्यस्ति सार्वत्रिको नियमः, तमनुरुध्य तस्य दोषदृष्टिरेवास्ति दूषिता निन्दाप्रयोजिकेति विद्वद्भिर्मन्यते।

अपि च पूर्वोक्तप्रदर्शितश्रुतिवचनानुसारेण कस्यांचिदपि नार्यां दृष्टस्य पापस्य निर्दोषे निखिलस्त्रीसमाजे कृत आरोपः सर्वथाऽन्यायः समस्तस्त्रीसमाजविद्रोहश्चास्तीति मन्यन्ते विद्वांसः 'नान्यस्यैकस्यापराधेनान्येषां सर्वेषां दण्डमाचरेत्' इति न्यायमनुसंदधानाः।

एते खलु श्लोकाः पाठकानां विचारकाणां हृदयेषु-स्त्रीणां स्वभावतो नीचत्वमधमत्वं प्रदर्शयन्तस्तेषु तुच्छतां घृणाभावञ्चानिवार्यतयोत्पादयन्ति। एषु किल श्लोकेषु—स्त्रीणां स्वभावेषु प्रदर्शितानि लाञ्छनानि पापमयानि इयन्त्यतिकठोराणि-घोरान्यायपूर्णानि च सन्ति, एषां पठनादिना स्वात्मसन्मानयुक्तायाः शिक्षितायाः कस्या अपि देव्याः चक्षुर्द्वयं रक्तवर्णोपेतं, लेखकं मनुं प्रति रोषान्वितश्च बलाद्भवत्येव। 'कृते च प्रति कर्तव्यमेष धर्मः सनातनः' इति न्यायेन हठाज्जिह्वा तमुद्दिश्याऽश्लीलं यद्वा तद्वा वक्तुं प्रवर्तते।

अपि च पूर्वोक्तस्त्रीनिन्दकश्लोकान् पठित्वा 'नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः।' इति न्यायेन स्त्रियः स्वमनसीत्थं विचारयिष्यन्ति—प्रजापतिना मनुनाऽस्माकं हृदयेषु दुर्गुणा एव स्वाभाविकतया स्थापिताः सन्ति, अतस्तान् परित्यक्तुं वयं कथमपि नैव शक्ताः भविष्यामः। अस्मासु मधुरभाषणस्नेहसेवासदाचारपातिव्रत्यादिसद्गुणाः कथमपि नैव स्थातुं शक्ष्यन्ति। अतोऽनृतैः अशुभैः अस्वर्गीयैः अस्माभिः—कटुभाषण-

द्वेषोच्छृङ्खलताव्यभिचारादयो दुर्गुणा एव स्वाभाविकतया सेवनीयाः, तेषां परित्यागाय कथमपि निष्फलः प्रयासो नैव विधातव्य इति ।

विदुषां संमतिः

यः खलु महाभागो मनुमहाराजो नारीणां कृते प्रयुक्तैः-'महाभागाः' 'पूजार्हाः' 'गृहदीप्तयः' 'श्रियः' 'स्वर्गरूपाः' इत्यादिभिर्विशेषणैः स्तुतिकर्ता,—एवं 'उपाध्यायान् दशाचार्यः, आचार्याणां शतं पिता । सहस्रन्तु पितॄन् माता गौरवेणातिरिच्यते ॥' (म०२।१४५) अर्थात् दशोपाध्यायान् अपेक्ष्य, आचार्यो विशेषगौरवशाली मन्तव्यः । आचार्यशतमपेक्ष्य पिता, एवं सहस्रपितॄनपेक्ष्य माता जननी गौरवेण प्रशस्तेनातिरिक्ता विशेषगौरवशालिनी-अत्यधिकप्रशंसार्हा महामान्या भवति । इत्यनेन मातृभूतासु तासु स्त्रीषु प्रभूतस्य गौरवस्य प्रदर्शकश्च कथमकस्मात् ताः—प्रमत्त इव लज्जां मर्यादाञ्च विहाय तासु नीचतमकटुभावभावान् पूर्वोक्तान् प्रदर्श्य निन्दितुं प्रवृत्तः? इति, तस्येदृशनिन्दाप्रवृत्तिं स्ववचनविरुद्धत्वात् केऽपि विचारकाः विद्वांसः स्वीकर्तुं नैव समुत्सुकाः भवन्ति । अतस्ते विद्वांसः-'यत्किञ्चन मनुरवदत्-तद्भेषजं' इति ताण्डचमहाब्राह्मणवर्णितस्य मनुमहाराजस्य हितकरस्य भेषजमिव सदुपदेशस्य महत्त्वमनुस्मरन्तः कथयन्ति-केनापि नारीविद्वेषिणा धूर्तपण्डितेन विरचय्य प्रक्षिप्ताः इमे श्लोकाः तत्र सन्तीति । अतः—'यस्तर्केणानुसंधत्ते, स धर्मं वेद नेतरः ।' (म० मृ० १२।१०६) 'युक्तिहीने विचारे तु धर्महानिः प्रजायते ।' इत्यादीनि वचांसि समुपपद्यन्ते ।

श्रेष्ठतावादः समालोचना च

मनुना तावदिदमुक्तं प्रथमेऽध्याये—

'उत्तमाङ्गोद्भवाज् ज्यैष्ठ्याद्, ब्रह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः॥' (१।९३) इति ।

अयमर्थः—उत्तमाङ्गं = मुखं, तदुद्भवत्वात्—तस्मादुत्पन्नत्वात् । ब्राह्मणः प्रभुः—समर्थः श्रेष्ठतासंपादने । इदञ्च सर्वथा दृष्टविरुद्धम् । सर्वेऽपि ब्राह्मणब्रुवाः योन्युद्भवाः दृष्टाः, नहि मुखोद्भवत्वं कुत्राप्युपलभ्यते । तथा च क्षत्रियादिवत् तेष्वपि जन्मनिमित्तं साम्यमेवावलोक्यते, न श्रेष्ठताप्रयोजक वैषम्यम् । यदाहुः शिष्टाः विद्वांसः—'वस्तुतस्तु मुखाज्जन्म, नैव श्रुत्याऽवगम्यते । ब्राह्मणोऽस्य मुखमासीद् इत्येवास्ति श्रुतौ स्फुटम् ॥ ब्रह्मणो विश्वरूपस्य मुखं ब्राह्मण इत्ययम् । अर्थस्स्पष्टतरस्त्वत्र स्थूलबुद्धयापि बुध्यते ॥ मुख्यत्वात् मुखसादृश्यात्तद्गुणकर्मरूपणात् । 'मुखं ब्राह्मणः' इत्युक्तं न तज्जन्यतया श्रुतौ । मुखकर्मोपदेशादिसाधर्म्यादिति दर्शितम् ॥' इति । एतेन—मुखजननबोधनपराणि—'ब्राह्मणास्तन्मुखाज्जाताः क्षत्रियास्तस्य बाहुतः । तस्योरुदेशाद्वैश्याश्च पद्भ्यां शूद्राश्च जज्ञिरे ॥' (रेवाखण्डे) 'विप्रक्षत्रियविट्शूद्राः मुखबाहूरुपादजाः । वैराजात् पुरुषाज्जाताः॥' (भा०-११।५७) 'वक्त्राद्यस्य ब्राह्मणाः सम्प्रसूतास्तद्वक्षसतः क्षत्रियाः, वैश्याश्चोर्वोर्यस्य पद्भ्यां च शूद्राः सम्प्रसूताः ॥' (वायुपुराण-७१) 'ततः कृष्णो महाभाग ! पुनरेव युधिष्ठिर ! । ब्राह्मणानां शतं श्रेष्ठं मुखादेवासृजत् प्रभुः ॥ बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतः शतम् । पद्भ्यां शूद्रशतं चैव केशवो भरतर्षभ ! । स एवं चतुरो वर्णान् समुत्पाद्य महातपाः ।'(म०भा० शान्तिपर्वणि-

२४७) इत्यादीनि पुराणवचांस्यपि श्रुतिविरुद्धत्वात् निराकृतानि। एवं 'मुखं किमस्यासीद्' 'किं पादावुच्येते ।' (शु० य०,) इति प्रश्नोपक्रमानुरोधेन 'पद्भ्यां शूद्रोऽजायत । इति तदुत्तरमपि लाक्षणिकपद्धत्या समालोचितम् । ब्राह्मणादिवत् शूद्राणामपि पादोद्भवत्वस्य दृष्टविरुद्धत्वात् । 'अस्य मुखात्किं जातम्, बाहुभ्याञ्च किं समुत्पन्नमि' त्यादिरूपो यदि प्रश्नः स्यात्, तदा मुखोद्भवादेः उत्तररूपेण कृतं वर्णनं कथमपि संगतं भवेत् । परन्तु वेदमन्त्रे तस्मिन् नास्ति प्रश्नोऽपि मुखाद्युद्भवबोधकः, नोत्तरमपि तद्बोधकमिति विद्वांसो विदांकुर्वन्त्वेव ।

ज्यैष्ठ्यात् = क्षत्रियादिभ्यः पूर्वोत्पन्नत्वात् ब्राह्मणः श्रेष्ठः । अयमपि हेतुः—'ब्रह्म वा इदमग्र आसीत्' (बृ० उ० १।४।११) इति बृहदारण्यकश्रुतिप्रदर्शितरीत्या—सत्ययुगे प्रथमे ब्राह्मणवर्ण एक एवासीत्, इदं = क्षत्रियादिजातं संप्रति विभिन्नजातिरूपेण प्रतीयमानं तत्सर्वं, अग्रे = पूर्वं, एकमेव तदासीत्—ब्राह्मणवर्णाभिन्नमासीत् नासीत्तत्र क्षत्रियादिवर्णभेदः, पश्चात् रक्षोत्पादनादिभिन्नभिन्नव्यवसायमनुरुध्य तत एव ब्राह्मणवर्णात् क्षत्रियादयो विनिर्मिताः इति हेतो— ब्राह्मणवर्णस्य वर्ण्यमानं ज्यैष्ठ्यं 'सर्वेऽपि हिन्दवो भारतीयाः आर्याः तदा—'एकवर्णाः समाभाषा एकरूपाश्च सर्वशः ।' (वा० रा० ३०।२१) आसन् इति शेषः, इति वाल्मीकिरामायणोक्तमेव विज्ञापयति । एवं महाभारते शान्तिपर्वण्यपि—'ब्राह्मणाः प्रथमं प्रादुर्भूताः,ब्राह्मणेभ्यश्च शेषाः वर्णाः प्रादुर्भूताः।' 'विप्रश्चैको निश्चयं तेषु सृष्टः ।' (६०।४२) इत्युक्तं समुपपद्यते । तेषु = क्षत्रियादिषु ब्राह्मण एव सृष्टः = निर्मितः—रक्षण-

पालनाद्यर्थम् । अत एव—'क्षत्रं हि ब्रह्मसंभवम्' (म० स्मृ० २।१६८) इति मनुनाप्युक्तम् । ब्राह्मणेभ्य एव क्षत्रियादयः संजाताः इति तदर्थः ।

ब्रह्मणः = वेदस्य—निखिलज्ञानविज्ञाननिधेः—धारणात् = शब्दतोऽर्थतश्च स्वहृदये विधारणात् श्रेष्ठत्वं ब्राह्मणस्यावगम्यते । अयमपि हेतुः क्षत्रियादावतिव्याप्तिदोषग्रस्तः । यतः क्षत्रियादयोऽपि ब्रह्म विधारयन्ति, तेषामपि तदध्ययनाधिकारवत्त्वात् । अनेन—'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' (म०स्मृ० २।१६८) इति मानवोक्तादेशात् वेदधारणरहिताःअन्यश्रमनिरताश्च ब्राह्मणा एव न भवन्ति, किन्तु ते शूद्रा एव तद्धर्मधारणाद्भवन्तीति गम्यते । अन्यत्र = कृषिवाणिज्यश्ववृत्त्यादौ । सान्वयः = पुत्रपौत्रादिसहितः । शीघ्रं शूद्रत्वं गच्छति-शूद्रभावं प्राप्नोति । न तत्र लेशतोऽपि ब्राह्मण्यमवतिष्ठते । अधुना तु सहस्रे नवशतनवनवतिसंख्याकाः वेदधारणरहिताः अन्यश्रमनिरताः ब्राह्मणब्रुवा उपलभ्यन्ते । तथा च वेदज्ञानादिशुभगुणसदाचारादिशुभकर्मविशिष्टो ब्राह्मण एवास्यैव सर्वस्य क्षत्रियादिसर्गस्य ज्ञानसदाचारादिधर्मानुशासनेन हेतुना प्रभुः = समर्थो विश्वमान्यः सर्वपूज्यश्च भवति, नान्यः । अनेन गुणकर्मवादस्यैव प्राधान्यमवगम्यते, न जन्मजातिवादस्य गुणकर्मविहीनस्य ।

श्रेष्ठतावादस्य विफलाऽतिशयोक्तिः

एवं मनुस्मृतौ प्रथमे तावत्—'ब्राह्मणो जायमानो हि पृथिव्यामधिजायते । ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ सर्वं स्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम् । श्रैष्ठ्येनाभिजनेनेदं

सर्वं वै ब्राह्मणोऽर्हति ॥ स्वमेव ब्राह्मणो भुङ्क्ते, स्वं वस्ते स्वं ददाति च । आनृशंस्याद् ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥' (म० स्मृ० १।९९-१००-१०१) इत्यादिना ब्राह्मणश्रेष्ठतावादस्य मनुनाम्ना कृता विफलाऽतिशयोक्तिः उपलभ्यते । अयमर्थः- यस्माद् ब्राह्मणो जायमानः=समुत्पद्यमानः, पृथिव्यां=भूमौ, अधि=उपरि, श्रेष्ठतया भवति । सर्वभूतानां=निखिलदेशवास्तव्यानां, धर्मकोशस्य=धर्मसमूहस्य गुप्तये=रक्षायै, ईश्वरः =समर्थः प्रभुः भवति, अतः सर्वे धर्माः हिन्दुयवनक्रिश्चियनादिधर्माः ब्राह्मणोपदिष्टाः ब्राह्मणरक्षिता एव मन्तव्याः । अहो ! महदौदार्यं प्रदर्शितम्, सर्वधर्मसमन्वयभावश्च विबोधितः ।

यत्किञ्चिज्जगतीगतं=निखिलजगद्वर्ति- धनधान्यैश्वर्य- सत्ताशासनसौन्दर्यप्रासादज्ञानबलादिकं वर्तते, तत्सर्वं ब्राह्मणस्यैव स्वं=स्वकीयं स्वाधीनं मन्तव्यं, न परकीयं न च पराधीनं वेदितव्यम् । तस्माद् श्रैष्ठ्येन=अतिप्रशस्तेन, अभिजनेन= ब्रह्ममुखोद्भवत्वलक्षणेन जन्मना श्रेष्ठो ब्राह्मणः सर्वं वै=पृथिवीगतं धनादिकं अर्हति, परिश्रममन्तरेण स्वेच्छामात्रेण लभते, सर्ववस्तुजातग्रहणयोग्यो भवत्येव वै अवधारणे । अतो जगद्वर्तिधनादिग्रहणाय सः प्रतिरोधरहितो मन्तव्यः स्वेच्छया तदखिलमादातुं समर्थो भवतीति यावत् ।

अत एव लोकदृष्ट्या कदाचित् कुत्रचित् परेषामन्नं भुञ्जानोऽपि, परेषां वस्त्राणि परिदधानोऽपि, परेषां धनादिकञ्च गृहीत्वाऽन्येभ्यो ददानोऽपि, तत् स्वमेव=स्वकीयमेवान्नादिकं ब्राह्मणो भुङ्क्ते, न परकीयम् । स्वकीयमेव वस्त्रादिकं वस्ते= परिदधाति, स्वकीयमेव ददाति, न परकीयमिति मन्तव्यम् ।

यत एषां निखिलजगतीगतान्नवस्त्रधनादीनां स्वामित्वं ब्राह्मणस्यैवास्ति, नान्यस्य कस्यचित्स्वामित्वं मन्तव्यम्, अतः सः ब्राह्मणः स्वेच्छयाऽबाधितनिर्भयगत्या च तत्सर्वमन्नादिकं यथेच्छमादातुमुपभोक्तुञ्च समर्थो भवति। अन्नादिकमुपलक्षणमिदं प्रतिभाति, अतो निखिलविश्ववर्तिसुन्दरस्त्रीजातस्यापि स्वामित्वमुपभोक्तृत्वञ्च ब्राह्मणस्यैव स्वीकर्तव्यम्, नान्यस्य कस्यचिदिति।

एवं सति ब्राह्मणस्य श्रेष्ठाभिजनस्य सर्वभूतेश्वरस्य निखिलान्नादिभोग्यवस्तुस्वामिनः, आनृशंस्यात् = कारुण्यादेव, हि = निश्चयेन, इतरे जनाः = क्षत्रियादयो यवनादयश्च भुञ्जते = भोजनादिकं कुर्वन्ति। यदि ब्राह्मणस्तेषामुपरि करुणां न कुर्यात्, अन्नादिकञ्च न दद्यात्, तदा भोजनादिकं विना तेऽन्ये सर्वेऽपि जनाः क्षुत्पीडिताः सन्तो मरणशरणमेवोपपद्येयुः।

यदि ब्राह्मणः सर्वभूतानां = भारतवास्तव्यार्यहिन्दुजनानां वैदिकसनातनधर्मकोशस्य च रक्षणाय ईश्वरः प्रभूतशक्तिशाली समर्थः स्यात्तदा भारतवास्तव्यार्यहिन्दुजनाः सप्तदशकोटिलोऽप्यधिकसंख्याकाः जनाः कथं ब्राह्मणरक्षितं वैदिकधर्मं परित्यज्य यवनादिविधर्मं गृहीत्वा विधर्मिणो विरुद्धविकृतिधारिणो वैदिकधर्मविरोधिनः शत्रवो म्लेच्छाः कथं जाताः? इति तावद्वक्तव्यम्। कथञ्च प्रियदेशो भारतो विधर्मिविदेशियवनांग्रेजादिपरतन्त्रो बहुक्लेशभाक् बहुसमयपर्यन्तं दीनो हीनश्च कथं सम्पन्नः? इति कथनीयम्, विधर्मिविरोधिविदेशरूपेण भारतस्याखण्डस्य खण्डद्वयं कथं सम्पन्नमिति? प्रज्ञाचक्षुः समुद्धाट्य तावद् विचारणीयम्। ब्राह्मणब्रुवाणां तादृशं सामर्थ्यं कुत्र

गतम् ? परिशेषादिदमेव वक्तव्यं समाधानरूपेण प्रतिभाति निष्पक्षविदुषां-यत् गुणकर्मविहीनजन्मजातिवादग्रहणस्य प्रशस्त-गुणकर्मवादोपेक्षायाश्च वेदं सर्वं कटुतमं फलं मन्तव्यमिति ।

यदि जगतीगतं सर्वं वस्तुजातं ब्राह्मणस्यैव स्वाधीनं स्यात्, तदा तस्य परकीयधनादिग्रहणाय सदैन्ययाञ्चादिव्यवहारो यत्र कुत्रचिद् वृन्दावनादौ तीर्थक्षेत्रे च दृश्यमानः कथमुपपन्नो भवेत् ? आपणप्रासादादिस्थितमभीष्टं सुवर्णरजतादिकं स्व-कीयं मत्वा गृह्णतो ब्राह्मणस्य परप्रतिरोधचौर्याक्षेपराजदण्डादि-कं कथमपि करणीयं न स्यात्, यतस्तेन परकीयं नैव गृहीतम्, परकीयग्रहणे सत्येव परप्रतिरोधादिकस्य संभवात् । यदि ब्राह्मणो धर्मकोशरक्षणाय समर्थः स्यात्, तदा यवनैर्दुष्टैः कथं श्रद्धास्पदानि भारतस्थितानि तीर्थभूतानि धर्मस्थानानि मन्दिरा-दीनि भूयो भूयो विनाशितानि ? । तत्स्थाने निर्मितानि मस्जि-जदादीनि संप्रत्यप्युपलभ्यमानानि च कथं स्युः ? । तस्य रक्षण-सामर्थ्यं कुत्र पलायितमभूत् ? यवनशस्त्रभयात् रक्षण-समर्थास्ते कथं पलायितारोऽभूवन् ? । इति तावद्वक्तव्यम्, तस्मान्निष्पक्षैर्विद्वद्भिर्मन्यते-इयं किलास्ति गुणकर्मविहीन—ब्राह्मणश्रेष्ठतावादस्य विफलाऽतिशयोक्तिः इति ॥

अन्यनिष्ठहीनताऽधमतादिप्रदर्शनाय स्वश्रेष्ठतावादः

मनुस्मृतौ तावत्—इदमुक्तम्—

'ब्राह्मणं दशवर्षन्तु शतवर्षन्तु भूमिपम् । पितापुत्रौ विजानीयात्, ब्राह्मणस्तु तयोः पिता ॥' (२।१३५) इति । अर्थात् दशवर्षायुष्कं बालकं ब्राह्मणं, शतवर्षायुष्कं पुन र्भूमिपं = क्षत्रियमतिवृद्धं पितापुत्रौ जानीयात्, तयोर्मध्ये दशवर्षोऽपि

बालको ब्राह्मण एव क्षत्रियस्यातिवृद्धस्य शतवर्षस्यापि पिता भवति, तस्मात् पितृवद् असौ बालोऽपि ब्राह्मणस्तस्याति-वृद्धस्य क्षत्रियस्यातिश्रेष्ठत्वात् मान्यः पूज्यश्च भवति। अत्र किल स्पष्टतः क्षत्रियादिषु हीनताऽधमताकनिष्ठतादिकं प्रदर्शितम्। ब्राह्मणे चोत्तमतादिकम्।

एवं—'कार्पासमुपवीतं स्यात्, विप्रस्योर्ध्ववृत्तं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥' (म० स्मृ० २।४४) इत्युक्तम्। अत्रापि क्षत्रियवैश्यधृतशणाविकसूत्रापेक्षया कार्पास-सूत्रमयोपवीतस्य सुखस्पर्शत्वं, मृदुत्वं शुक्लत्वञ्च प्रसिद्धम्। तैश्च तस्मिन् तद्धारयितृषु ब्राह्मणेषु चोत्कृष्टत्वं ज्ञाप्यते। एवं शणाविकसूत्रनिर्मितोपवीतयोः दुःस्पर्शत्वात् कठिनत्वात् मलिन-त्वाच्च हेतोः तयोः तद्धारयितृषु क्षत्रियादिषु च निकृष्टत्वाधम-त्वादिकं द्योत्यते। परन्तु संप्रति क्षत्रियादयो विषमतानिवारणाय कार्पाससूत्रोपवीतमेव धारयमाणाः मनुमहाराजस्य विषमता-विधानमिदमुपेक्षमाणास्तेषामाचार्यश्च तिरस्कुर्वाणाश्च दृश्यन्ते।

एवं—'न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते।' (म० स्मृ० ३।११०) इत्युक्तम्। अर्थात् ब्राह्मणस्य गृहे क्षत्रि-यादयो नैवातिथयो भवितुमर्हन्ति, यतः क्षत्रियादीनां ब्राह्मणा-दपकृष्टजातित्वात्, परन्तु निकृष्टस्य क्षत्रियादे गृहे उत्कृष्टाः ब्राह्मणाः अतिथयो भवितुमर्हन्ति।

अतोऽनेन वैषम्यमिदं ज्ञायते—ब्राह्मणः स्वगृहे समाग-तानां क्षत्रियादीनामातिथ्यसत्कारादिकं न कुर्यात् किन्तु क्षत्रि-यादिः स्वगृहे समागतानां ब्राह्मणानां श्रद्धयाऽऽतिथ्यसत्कारादिकं कुर्यादेवेति।

यदि कश्चित् क्षत्रियादिर्दैवात् ब्राह्मणस्य गृहमतिथिरूपेणागच्छेत्, तदा विप्रगृहोपस्थितविप्रान् प्रथमं भोजयेत्, तेषु कृतभोजनेषु स्थितेषु पश्चात् तं क्षत्रियादिकमवशिष्टभोजनेन भोजयेत्, न तु तैः सह भोजनं कारयेत्, यतः उत्कृष्टनिकृष्टयोः पृथक्पङ्क्तावपि सहभोजनस्यात्र निषेधो बोध्यते।

अत्र किल 'समानी प्रपा सह वोऽन्नभागस्समाने योक्त्रे सह वो युनज्मि।' (अथर्व० ५।१६।६) इति वैदिकसमानताप्रशस्तादर्शविरुद्धं कुत्सितविषमत्वं प्रदर्शितम्। अतः श्रुतिविरुद्धत्वात् स्मार्तस्य विषमताविधानस्य हेयत्वं मन्यन्ते शिष्टाः विद्वांसः। एवं मनुस्मृत्यादौ तु वैदिकादर्शविरुद्धं विषमतासाम्राज्यस्य वर्णनं बहुलमुपलभ्यते। अत एव निष्पक्षपाताः विद्वांसः समाजसमताकामाः मन्यन्ते—बहुविधलेखनशैल्यादिगवेषणैः—यत् किल स्वयं न्यायपरायणो राजाधिराजः क्षत्रियप्रवरो मनुमहाराज ईदृशं क्षत्रियादिनिष्ठमधमत्वादिकं कथं विज्ञापयेत् ?, अतस्तन्नाम्ना केनचित् ब्राह्मणपण्डितेन मनुस्मृतिर्निर्मितेति। अथवा तत्रत्याः बहवो श्लोकाः प्रक्षिप्ता इति।

मिथोविरुधवादः श्रुतिविरुद्धवर्णनञ्च

मनुस्मृतौ समुदारबुद्ध्या तावत्—'स्त्रीरत्नं दुष्कुलादपि' (म० स्मृ० २।२३८) आददीत = गृह्णीयादिति शेषः। 'स्त्रियो रत्नान्यथो विद्याः'...........समादेयानि सर्वतः।' (२।२४०) इत्युक्तम्। अर्थात् बहुमूल्यसमुज्ज्वलमनोहररत्नवत् सौन्दर्यमाधुर्यलावण्यादिगुणान्विता मनोरमा स्त्री यतः कुतोऽपि समुपलभ्येत। आत्मापेक्षया निकृष्टकुलादपि, अधमजातितोऽपि, तां परिणेतुं स्वीकुर्यात्, न तु तस्याः निकृष्टकुलाधमजातिविधर्मवि-

देशादिकं विचार्य तस्य स्त्रीरत्नस्योपेक्षां तिरस्कारञ्च कुर्यात्, इति भावः ।

स्त्रियो रत्नानि च सर्वतो निकृष्टोत्कृष्टादिस्थानादपि समादेयानि, अत्र 'सर्वतः' इति पदेन स्वदेशीयविदेशीयविधर्मि-विजातीयादिस्त्रीणामपि समादेयत्वं प्रतिग्रहीतव्यत्वं सूच्यते । यथा बहुमूल्यं समुज्ज्वलं मनोरमं रत्नं नीचगृहस्थितमपि विवेकिभि र्न हि परित्यज्यते, किन्तु प्रेम्णा समुपादीयत एव । तथा स्त्रियोऽपि याः काः अपि स्युः, यदि रत्नवत् सौन्दर्यादिगुणान्विताः मनोऽनुकूलाः सुपरीक्षिताश्च भवेयुः,ताः सर्वाः समादेयाः स्वदेशविदेशनिकृष्टोत्कृष्टसजातीयविजातीयादिकमगणयित्वा ।

पुन र्मनुर्वदति—पूर्वोक्तात् स्ववचनाद्विरुद्धमिदं—'शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।' (म० स्मृ० ३।१७) 'हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः । कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥' (३।१५) इति । अर्थात् हीनजातिस्त्रियां रत्नवत् सौन्दर्यादिगुणान्वितायामाकर्षणप्रयोजको मोहस्तु द्विजातीनामुत्तमवर्णानामपि बलाज्जायत एव । तद्वशात् तामुद्वहन्तः = परिणयन्तो द्विजातयस्तत्रोत्पन्नपुत्रपौत्रादिक्रमेण कुलान्येव शूद्रतां नयन्ति = गमयन्ति । अत्र किल मनूक्ततत्तद्वचनेषु मिथः स्पष्टतया विरोधो विज्ञायते । पूर्वन्तु तेन समुदार बुद्धया विधानं क्रियते, पश्चात् कृपणबुद्धया निषेधः । तथा च मनुवचनेभ्यो मिथो विरुद्धेभ्यो न निर्णेतुं शक्यते—किं कर्तव्यम् ?, विदुषां न प्रतिभाति किमपि समाधानम् ।

एवं मनुना तावत्पूर्वमुक्तं—'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

(२।१६८) 'यथा काष्ठमयो हस्ती, यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ॥' यथा षण्ढोऽफलः स्त्रीषु, यथा गौर्गवि चाफला। यथा चाज्ञेऽफलं दानं, तथा विप्रोऽनृचोऽफलः ॥' (म० स्मृ० २।१५७-१५८) इति। अयं भावः—यथा काष्ठादिनिर्मितो जडो हस्ती गजः, यथा चर्मादिघटितो मृगः, एवं यश्च विप्रो = ब्राह्मणः, वेदादिकं नाधीते, किन्तु ज्ञानरहितो मूर्खः सन् अवतिष्ठते, त्रय एते नाममात्रं दधति, न तु ते वास्तविकगजमृगविप्राः सन्ति, न तु हस्त्यादिकार्यं कर्तुं क्षमन्ते। तथा विद्याविहीनाः विप्रा अपि स्वपराभ्युदयादिकार्यं कर्तुं नैव प्रभवन्ति। यथा च षण्ढः = नपुंसको मानवः स्त्रीषु निष्फलः स्त्रीतोषकरो नैव भवति। यथा च स्त्रीगवी गव्यामेव निष्फला भवति, गर्भाधानादिकार्यं कर्तुं नैव प्रभवति। यथा चाज्ञे = ज्ञानरहिते मूर्खजने कृतं दानं निष्फलं भवति। तथा विप्रः अनृचः = ऋगादिमनधीयानो वेदादिज्ञानरहितोऽफलः = निष्फलजीवनो मन्तव्यः। न तस्य सफलं जीवनमस्ति, श्रेष्ठत्वसन्मानादिरहितत्वात् तस्य जीवनस्य वैफल्यं वेदितव्यम्।

एवं तेभ्यो वचनेभ्यः सर्वथा विरुद्धमिदं मनुनाऽभिधीयते—'अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्। प्रणीतश्चाप्रणीतश्च यथाऽग्निर्दैवतं महत् ॥ श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति। हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ॥ एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु। सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥' (म० स्मृ० ९।३१७-३१८-३१९) इति।

'अविद्वान् अपि ब्राह्मणो दैवतं महत्, पूज्यश्च मन्तव्यः' इति मनूक्तं किल वच इदं—'सिरीतन्त्रं तन्वते अप्रजज्ञयः, न

ब्राह्मणासः' (ऋ० १०।७१।९) इति श्रुतिवचोविरुद्धत्वात् अप्रामाणिकं मन्तव्यम् । श्रुत्या तु स्पष्टमभिहितम्—ये किल अप्रजज्ञयः = वेदार्थानभिज्ञाः—अविद्वांसः सन्ति, अत एव ये सिरीः =सीरिणो हलकर्षणशीलाः भूत्वा तन्त्रं=कृषिलक्षणं कर्म-तन्त्रं तन्वते = विस्तारयन्ति—कुर्वन्तीत्यर्थः । ते न ब्राह्मणासः = सन्मान्याः ब्राह्मणाः न सन्ति, किन्तु ते वेदादिशास्त्रज्ञानशून्याः कृषिकर्तारो वैश्याः मन्तव्याः । यदा चाविद्वत्सु—अन्यश्रमनिरतेषु तेषु ब्राह्मणत्वस्यैव श्रुत्या निषेधः कृतस्तदा तत्प्रयुक्तस्य महत्त्वस्य दैवतत्वस्य पूज्यत्वस्य चावस्थानं कथं स्यात् ? नैव स्यात् । 'श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते । तत्र श्रौत्रं प्रमाणं स्यात् ।' इति न्यायात् श्रुतिविरुद्धं वचो यस्य कस्यापि महानुभावस्य स्यात्, तत्सर्वथा हेयमेव भवति । न तु प्रामाणिकत्वेन तत्स्वीकर्तव्यम् ।

एवं—'क्रव्यादमग्निं प्रहिणोमि दूरं, यमराज्ञो गच्छतु रिप्रवाहः । इहायमितरो जातवेदा देवो देवेभ्यो हव्यं वहतु प्रजानन् ॥' (ऋ० १०।१६।९) (यजु० ३५।१९) (अथर्व० १२।२।८) इति श्रुत्या श्मशानादिकुत्सितस्थानस्थितस्य मांस-भक्षकस्य पापप्रापकस्य शवदाहकस्याग्नेर्दूषितत्वं मत्वा दूरापसरणं क्रियते, तथा च—'श्मशानेष्वपि तेजस्वी पावको नैव दूष्यति' इति मनुवचनं श्मशानादिकुत्सितस्थानस्थितोऽग्निर्नैव दुष्टो भवतीति बोधकं पूर्वोक्तश्रुतिविरुद्धत्वात् कथमपि प्रामाणिकं नैव मन्तव्यम् । पूर्वोक्तश्रुतेरयमर्थः—क्रव्यं = मांसमत्ति भुङ्क्ते इति क्रव्यात् तं क्रव्यादं शवमांसादिभक्षकमग्निं श्मशानादि-स्थलस्थितमहं दूरं—अपुनरागमनाय प्रहिणोमि = प्रेषयामि । स

दूरे प्रहितो दूषितः क्रव्यादग्निः, यमराज्यं गच्छतु = यमस्य भयङ्करस्य राज्यं भयप्रदं प्रति व्रजतु । कथं तस्य दूरापसरणं क्रियते ? इत्याकाङ्क्षायामाह-रिप्रवाहः = 'रिप्रमिति पापनाम' (नि० ४।२१) रिप्रं = पापं-दुर्गन्धमयधूमोत्पादादिना दूषितपाप-मयपवनवाहकत्वात्-वहति प्रापयतीति । अयमितरः = क्रव्यादोऽपवित्रात् अन्यःपवित्रो जातवेदाः = जातप्रज्ञानोऽग्निः इहैव = अस्मिन्नेव मम गृहे सदने देवेभ्योऽर्थाय, तत्प्रसादाय हव्यं = हविः वहतु = प्रापयतु । किं कुर्वन् ? प्रजानन् = स्वाधिकारं जानानः । इति ।

यदा मनुनापि तावत् काष्ठमयहस्त्यादिदृष्टान्तैः—वेदादिशास्त्रविद्याविमुखस्यान्यश्रमनिरतस्य विप्रस्य निष्फलजीवनत्वं शूद्रत्वञ्च प्रतिपाद्यते, तदा निष्फलस्य निन्दितस्य तस्य परमदैवतत्वं मान्यत्वं पूज्यत्वञ्च कथमवतिष्ठेत ? इति निष्पक्ष-पाताः विद्वांसो विचारयन्तु । 'बाबावाक्यं सर्वं प्रमाणमिति' स्वीकृतिस्तु बुद्धेर्मौढ्यमेव सूचयति ।

अनिष्टसर्वपापमयकर्मकरणाय प्रोत्साहनं मिथ्या-प्रशंसा च

एवं मनुना तावद्यदुक्तं—अनिष्टेषु = चौर्यव्यभिचार-हिंसादिकुत्सितकर्मसु प्रवर्तमाना अपि ब्राह्मणाः पूज्या एव मन्तव्याः, अर्थात् तैर्दुष्टकर्मभिस्तेषां ब्राह्मण्यं नैव दूष्यति । तेषां पूज्यत्वस्य च विघातो नैव सम्पद्यते । अतस्सर्वप्रजाशासकेन राज्ञाऽपि तेषां पूज्यानां ब्राह्मणानामनिष्टानि कुत्सितानि मनोवाक्कायैः क्रियमाणानि पापकर्माणि समुपलभ्यापि तेभ्यो

दण्डप्रदानं नैव कर्तव्यम् । यतो दण्डप्रदानेन ते कुपिताः भविष्यन्ति, कुपिताश्च दुष्टा अपि ब्राह्मणाः दण्डयितु र्राज्ञस्तस्य सद्यो बलधनारोग्यविजयपरिवारादीष्टजातस्य विनाशं करिष्यन्ति अतो मनुना ब्राह्मणप्रवलशापभयभीतेनेदमादिष्टं, मिथ्याप्रशंसा च तेषामित्थं कृता—'परामप्यापदं प्राप्तो ब्राह्मणान् न प्रकोपयेत् । ते ह्येनं कुपिताः हन्युः सद्यः सबलवाहनम् ॥ यैः कृतः सर्वभक्ष्योऽग्निः, अपेयश्च महोदधिः । क्षयी चाप्यायितः सोमः, को न नश्येत् प्रकोप्य तान् ॥' लोकानन्यान्सृजेयु र्ये लोकपालांश्च कोपिताः । देवान्कुर्युरदेवाँश्च कः क्षिण्वंस्तान् समृध्नुयात् ॥ यानुपाश्रित्य तिष्ठन्ति, लोकाःदेवाश्च सर्वदा । ब्रह्म चैव धनं येषां को हिंस्यात्ताञ्जिजीविषुः ॥' (म० स्मृ ९। ३१३-३१४-३१५-३१६) इति । अयमर्थः—कोशक्षयादिना प्रकृष्टामप्यापदं, यद्वाऽन्यायादिना हेतुना महतीं यशःक्षतिरूपां विपत्ति प्राप्तोऽपि राजाऽनिष्टकर्मकर्तृ्नपि ब्राह्मणान् न प्रकोपयेत्, यस्मात्ते रुष्टाः सबलवाहनमेनं राजानं सद्य एव शापाभिचाराभ्यां हन्युः । यैः = ब्राह्मणैः, अभिशापेन सर्वभक्ष्यः (भक्षः) अग्निः कृतः । अनेनेदं ज्ञायते ब्राह्मणशापात् पूर्वमग्निः सर्वभक्षोनासीत्, घृतादिसुगन्धयुक्तपदार्थानेव दहन् भुञ्जानश्चासीत् । दुर्गन्धयुक्तकुत्सितशवादीन् नैव ददाह, नैव च बुभुजे इति । तथा च प्राचीनाः जनाः मृतशवशरीराणामग्निना दाहं कर्तुं नैव शेकुः । सत्येवं 'भस्मान्त्ँ शरीरम्'(शु० य० ४०।१५) इति यजुर्वेदोपदिष्टं—इदं मृतं कुत्सितं स्थूलं शरीरं चिताग्नौ हुतं सत् भस्मान्तं = भस्मरूपं भूयादिति विरुद्धचेत । अग्निना तस्य दाहाभावे कथं तद्भस्मरूपं स्यात् ? नैव स्यात् । तथा च श्रुति-

विरुद्धमिदं स्मार्तकथनमप्रामाणिकतया हेयं सत् निन्दाज्ञापिकां मिथ्याप्रशंसामेव बोधयति । अतः—'युक्तियुक्तमुपादेयं वचनं बालकादपि । अन्यत् तृणमिव त्याज्यमप्युक्तं परमेष्ठिना ॥' इति यथार्था निष्पक्षा भणितिरेव तस्येदृशीमालोचनां कर्तुं प्रवर्तयति ।

एवं शापेन समुद्रश्चापेयक्षारजलः चन्द्रश्च क्षययुक्तः पश्चात् पूरितः कृतः । अनेनापि ज्ञायते—'पूर्वं समुद्रः पेयमधुरजल आसीत्, चन्द्रमा च सर्वदोभयपक्षयोः परिपूर्णः क्षयरहितश्चासीत्, पश्चात् ब्राह्मणशापेन समुद्रोऽपेयक्षारजलोऽभूत् चन्द्रश्च क्षययुक्तः ।' इति कथनमपि प्रमाणविरुद्धं प्रतिभाति । अनादिकालतः समुद्रस्य चन्द्रमसश्च क्षारजलवत्त्वस्य वृद्धिक्षययुक्तत्वस्यावगमात् । अनादिनिधना भगवती श्रुतिस्तु 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।' इति स्पष्टतयोपदिशति-सूर्यचन्द्रादिपदार्थानां यथापूर्वमवस्थानम् । 'नहि स्वभावो भावनां व्यावर्तेतौष्ण्यवद्रवेः ।' इति न्यायात् । अत एवाधुनिकाः वैज्ञानिकाः—पृथिवीं मासेन परिक्रामतश्चन्द्रस्य सूर्यप्रकाशसम्बन्धासम्बन्धाभ्यां प्रकाशमानाप्रकाशमानयोर्भागयोः क्रमेण न्यूनाधिकयोरस्माभिः क्रियमाणाद्वीक्षणादतिरिक्तं न किञ्चित् क्षयवृद्ध्यादिकमुररीकुर्वन्ति । तत्र विप्रशापवचनं 'किं केन संगतमि' ति न्यायमेवानुकरोति ।

तान् ब्राह्मणान् दुराचारानपि कोपयित्वा को न नश्येत् ? । अत्र किलासंभवदृष्टान्तैः—उपहासप्रयोजिका ब्राह्मणानां मिथ्याप्रशंसा कृतोपलभ्यते । सा च प्रशस्तिं नहि, किन्तु निन्दामेवाभिव्यनक्ति इति विद्वांसो मन्वते । अतः—'श्रेष्ठत्वस्य प्रभावस्य

साधनाय मृषा च यत्। कथितं ह्युपहासस्य केनापि स्यात् प्रयोजकम् ॥' इति।

पुनरपि मनुस्तान् मुक्तकण्ठतः प्रशंसति-ये ब्राह्मणाः स्वर्गादिलोकान् अन्यान्=प्रत्यक्षाभिव्यक्तिविपरीतान् लोकपालान्=इन्द्रादिसमर्थदेवान् च सृजेयुः=स्रष्टुं शक्नुवन्ति, सृजन्ति वा, कोपिताः सन्तस्ते स्वकीयप्रभूतशक्तिं प्रदर्शयन्ति। संप्रति यदि ते पर्याप्तपर्जन्यस्यादातारं दुःखप्रदगर्हणीयदुष्कालसमयस्य निर्मातारं वर्षाऽधिष्ठातृदेवमिन्द्रं प्रति प्रकृष्टं कोपं कृत्वा ब्राह्मणाः प्रभूतहरितसस्यविविधधान्यसफलवृक्षलतादिपूर्णमिमं पृथिवीलोकं शीघ्रमभिनवं सृष्ट्वा स्वकीयां प्रकृष्टशक्तिं प्रदर्शयिष्यन्ति, तदा विविधान्नादिपदार्थाभावग्रस्तस्य महादरिद्रस्य स्वप्रियदेशस्य भारतस्योपरि महान्तं प्रशस्तमुपकारं करिष्यन्तीति मन्ये। कोपप्रयुक्तेन शापेन च ते देवान्-अदेवान्=मानुषादीन् कुर्युः=कर्तुं शक्नुवन्ति-कुर्वन्ति वा। तान् क्षिण्वन्=पीडयन् सत्यप्यपराधे दण्डप्रदानेन, कः=राजन्यः समृध्नुयात्=समृद्धिं प्राप्नुयात्? तेषां पीडनेन विद्यमानाया अपि समृद्धेः नितान्तं विनाशो भवतीति भावः। अपि च यान् ब्राह्मणान् उपाश्रित्य पृथिव्यादिलोकाः इन्द्रादयो देवाश्च तिष्ठन्ति=स्थितिं लभन्ते। ब्रह्म=वेद एव च येषां धनमस्ति, नान्यत्स्वर्णरजतादिकं धनं संग्रहणीयं वर्तते, इदन्तु यथार्थं साधूपदिष्टम्। तान् जिजीविषुः =जीवितुमिच्छन् राजादिः को हिंस्यात्, ब्रह्महत्यादिप्रबलपापसंभवात्।

इदमत्र समीक्ष्यते विद्वद्भिः—ब्राह्मणा अपि-यदा 'अविद्वानपि ब्राह्मणो दैवतं महत् भवति, लोकपूज्यश्च भवति'—इति

पूर्वोक्तं मन्वादेशं ज्ञास्यन्ति, तदा वेदादिविद्यालाभाय कथं परिश्रमः कर्तव्यः ? तदर्थं ब्रह्मचर्यादिव्रतं कथमनुष्ठातव्यमिति ? निश्चित्य विद्याविमुखा भविष्यन्ति । एवं विद्यारहिताः मूर्खाः उच्छृङ्खलाः विप्राः दण्डादिभयाभावात् अनिष्टकर्मसु निर्भयाः सन्तः प्रवर्तमाना भविष्यन्ति । तथा च 'एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु । सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ॥' इति कथनेन मनुः-अनिष्टसर्वपापमयकर्मकरणाय ब्राह्मणान् प्रोत्साहयति । यदा भूतलशासको राजा तदनिष्टकर्मदण्डप्रदानं कर्तुं नैव शक्नोति, तदा परलोकस्थितो यमराजोऽपि कथं तदनिष्टकर्मणां दुःखादिफलं दातुं समर्थः स्यादित्यपि वक्तुं शक्येत ।

अपि च 'योऽनूचानः स नो महान् ।' (म० स्मृ० २। १५४) 'विप्राणां ज्ञानतो ज्यैष्ठ्यं, क्षत्रियाणान्तु वीर्यतः । वैश्यानां धान्यधनतः ।' (म० स्मृ० २।१५५) इति यदुक्तं, तत्-'अविद्वानपि दैवतं महत्, पूज्यश्च' इति स्ववचनं विरुणद्धि । तत्र किल योऽनूचानः = साङ्गवेदाध्येता तदनुवचनकर्ता विद्वान् स ब्राह्मण एव,नः = अस्माकं मते महान् संमतः,तस्मिन् विदुष्येव महत्त्वं मन्तव्यम्; अर्थात् वेदाध्ययनादिरहितो अविद्वान् कथमपि महान् न भवितुमर्हतीति सूचितम् । एवं ब्राह्मणानां विद्ययैव ज्यैष्ठ्यं = श्रेष्ठत्वं महत्तरत्वं मन्तव्यम् । न तु विद्यारहितेन जन्मना । एवं वीर्यतः = बलपराक्रमरक्षणादिभिः क्षत्रियाणां ज्यैष्ठ्यं, एवं वैश्यानां धान्यधनतः = प्रभूतधान्यधनादिपोषकद्रव्येभ्य एव श्रेष्ठत्वं मन्तव्यम् । अर्थात् विद्याविनयसदाचारादिशुभगुणकर्मरहिता अन्यश्रमनिरताः ब्राह्मणाः, बलादिरहिता

क्षत्रियाः, धनधान्यादिरहिता वैश्याश्च कथमपि श्रेष्ठाः महान्तो नैव मन्तव्याः इति ।

अद्वैतब्रह्मनिष्ठः श्रीनारायणगुरुस्वामी

केरलप्रदेशेऽयं किल श्रीनारायणगुरुस्वामी परिव्राजकः सत्यसनातनधर्मोपदेशकतया, हिन्दुसंघटनकर्तृतया वीतरागविद्वत्संन्यासितया च प्रसिद्ध आसीत् । येन महानुभावेन तत्र वैदिकार्यसत्यधर्मप्रचाराय हिन्दुजातिसंरक्षणाय च संस्थापिताः शिवगिरिमठादयोऽनेके आश्रमाः पञ्चविंशतितोऽप्यधिकाः संप्रत्यपि वर्तन्ते । अस्माभिः केचन तदाश्रमाः अवलोकिताः । दक्षिणप्रदेशे तत्रापि विशेषतः केरलप्रदेशे च 'कलावाद्यन्तयोः स्थितिः' इति वचनेन कलियुगे केवलमुत्तमाः ब्राह्मणाः अधमतराश्च शूद्रा एव सन्तीति प्राचीनरूढिवादप्रचारकाः कृपणतमगर्हणीयमानसाः स्वनिष्ठमुत्तमत्वादिकमेवान्यत्राधमत्वनीचत्वादिकञ्च मन्वानाः अखर्वगर्वोन्नतमस्तकाः कथयन्ति । सति चैवं तत्र मुसलमानक्रिश्चियनमतवादे शूद्रतमत्वेनाधमत्वेनास्पृश्यत्वेन चाभिमताः रामकृष्णशिवेत्यादिभगवन्नामानि प्रेम्णा प्राक् अभिदधानाः उत्तमवर्णाभिमानिभिर्हिन्दुभिः सर्वथोपेक्षिताः तिरस्कृताः हिन्दुमन्दिरप्रवेशवर्जिताश्च हिन्दवो भूरिसंख्यया प्रविष्टाः बभूवुः, भवन्ति चेति निरीक्ष्य करुणाशाली सामुदारचेता महात्मा संन्यासी श्रीनारायणगुरुस्वामी हिन्दुवैदिकसनातनधर्मे शाश्वतकालादारभ्य विद्यमानस्य महत औदार्यस्य प्रकटनाय— 'एको (संप्रदायभेदवर्जितः) धर्मः, एका (उत्तमत्वाधमत्वादिभेदशून्या) जातिः, एक एव च परमेश्वरो मन्तव्यः, इत्युद्घोषं हिन्दुजातिधर्मसंरक्षणायाकार्षीत् । तच्छ्रुत्वा तदवधार्य च बहवः

केरलीयाः हिन्दवः विधर्मियवनेसाईजालपतनाद्विमुखाः भूत्वा सुरक्षिताश्च सन्तः स्वकीये हिन्दुधर्मे एवावतस्थिरेऽवतिष्ठन्ते च।

तत्रैतादृशतदुद्घोषो नाभवत् चेत्, तदा केरलप्रदेशस्य सद्यः—सिन्धुपञ्जाबबंगादिप्रदेशानां पाकिस्ताननिर्माणवत्, ईसाई-स्थानरूपेण निर्माणमभवत्। इत्येवं तेन प्रथितयशसा महानुभावेन यथार्थदर्शिना श्रीनारायणगुरुस्वामिना केरलदेशस्य हिन्दुजातेश्च प्रबलं संरक्षणं कृतम्। यद्यपि तदुद्घोषं श्रुत्वा रूढिवादिनः कृपणमानसाः तत्रत्याः पण्डिताः 'नास्तिकोऽयं, वर्णाश्रमधर्मनाशकोऽयं, हिन्दुधर्मविद्रोहकर्ताऽयमि' त्यादिभिः कठोरतमशब्दप्रहारैः पाषाणादिप्रहारैश्च तदुपरि महान्तमाक्रमणमकार्षुः। तथापि—विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,प्रारभ्य नोत्तमजनाः विरमन्ति कार्यात्।' इति न्यायेन तेन भारतमहापुरुषेण निर्भयहृदयेन क्षमासहनशीलताधैर्यब्रह्मनिष्ठावैराग्यभक्त्यादिसद्गुणशालिना संन्यासिना सर्वं तदुपद्रवजातं सोढ्वा हिन्दुधर्मौदार्यस्य प्रचारे विरामो नैव कृतः।

अत एव पण्डितप्रवरेण श्रीधर्मदेवविद्यामार्तण्डेन सः श्रीनारायणगुरुस्वामीत्थं स्तुतो वन्दितश्च—महापुरुषकीर्तनाभिधे काव्ये—

दलितपतितजनतायाः नित्यं मार्गदर्शको नेता,
अन्धतमिस्राजस्याजस्रं पाखण्डस्य विभेत्ता।
मद्यपानपशुहिंसायज्ञामिषसेवनविच्छेत्ता,
श्रीनारायणगुरुदेवाख्यो विद्वान् यतिर्नमस्यः॥
जातिभेदमस्पृश्यभावनां सततं दूरीकुर्वन्,

सर्वेष्वेव जनेषु हार्दिकं सौहार्दञ्च विजनयन् ।
एको देवो ह्येको धर्मश्चैका मानवजातिः,
सन्देशं ददतेतं वन्द्यो नारायणगुरुदेवः ॥ इति ॥

वर्कलास्थितश्रीशिवगिरिमठात् प्रकाशिते तत्पुस्तके—'मनुष्याणां मनुष्यत्वं जातिर्गोत्वं गवां यथा । न ब्राह्मणादिरित्येवं शास्त्रसिद्धान्त ईरितः ॥' इत्यादयस्तस्योपदेशाः विद्यन्ते । येन खलु 'श्रीनारायणधर्मपरिपालनयोगमि' ति नाम्नी प्रबला संस्था दलिताधमहिन्दुजनानामुद्धारार्थं संस्थापिताऽद्यापि समुदारवैदिकधर्मप्रचारहिन्दुजातिसंगठनकारितया प्रचलिता वर्तते ।

इत्येवं स्वामिविवेकानन्दादिवत् तस्य श्रीनारायणगुरुस्वामिनो महान्तमुपकारं स्मृत्वा, तत्कृतहिन्दुधर्मजातिसंरक्षणञ्च विज्ञायाधुना स्वतन्त्रभारतसर्वकारेण महताऽऽदरेण टपालटिकटचित्रं प्रकाशितम् । भारतीयकेन्द्रसंसदि च तस्मै सर्वैरपि तत्सदस्यैः श्रद्धया धन्यवादाः प्रदत्ताः ।

ब्रह्मक्षत्रसमाजः

समन्वितस्य ब्रह्मक्षत्रभावस्य सर्वेषु हिन्दुषु पक्षपातराहित्येनाविष्कारो विधातव्यः

केचन हिन्दुसमाजैकतामहत्तावादिनो महोदयाः हिन्दुसमाजस्य मध्ये गर्हणीयस्य जन्मत एवोत्तमाधमवर्णभेदस्य निवारणाय, अभ्यर्हणीयानां समतैकतामहत्तासंघट्टनानाञ्च स्थापनायेत्थं कथयन्ति । निखिलहिन्दुसमाजस्य विविधज्ञानबलाढ्यत्वेनाभिनवनिर्माणाय तत्र वर्तते प्रशस्तैकभावस्यावश्यकता । स चैकभावोऽस्ति ब्रह्मक्षत्रभावः, ब्रह्माभिन्नः क्षत्र-

भावः, क्षत्राभिन्नो ब्रह्मभावश्च ।

तद्भावसुदृढस्थापनाय प्राक् तावद् वागादिव्यवहारस्यैकरूपता विधातव्या, सा चेत्थं वेदितव्या—यदा कश्चन विदेशीयो विधर्मीयश्च कामपि हिन्दुव्यक्तिं पृच्छेत् 'कस्त्वमसि ?' इति । तदा तेनेत्थं सर्वत्र समभावज्ञापकं वचः वक्तव्यम् 'अहं हीनभावविमर्दको हिन्दुः अस्मि' 'श्रेष्ठगुणविधारक आर्योऽहमस्मि ।' इति । कीदृशो हिन्दुः आर्योऽसि त्वं ? तदापि तदुत्तररूपेण पुनर्वदेदित्थम्—'ब्रह्मक्षत्रोऽहमस्मि' इति' ।

इत्थं सर्वेऽपि हिन्दव आर्या विभिन्नविविधव्यवसायशालिनोऽपि समानभावरूपेण मिथो वा बाह्यान् प्रति वदेयुः 'वयं ब्रह्मक्षत्राः स्मः' इति । वर्णविभिन्नताबोधकानि—उत्तमाधमभावज्ञापकानि ब्राह्मणोऽहं क्षत्रियोऽह वैश्योऽहं शूद्रोऽहं वेत्यादिकानि वचांसि कदापि न कथयेयुः—न च लिखेयुः ।

'ब्रह्मक्षत्रोऽहमस्मि' इति वागादिव्यहारेऽपि तदर्थभावः स्वहृदग्रेऽवश्यमेव विभावनीयः प्रकटनीयश्चान्यत्र सर्वत्र । 'ब्रह्म' अर्थात् विविधं ज्ञानं, 'क्षत्रं' अर्थात् विविधं बलं मया संपादितम्, सम्पादनीयमपि च । विविधज्ञानबलयोश्च मयि समन्वयोऽस्ति, क्रियते च । न ह्यस्ति तयोः पार्थक्यम् । ऐक्ये सति महदभीष्टं सम्पद्यते, पार्थक्ये च सति महदनिष्टं प्रजायते । ऐक्येनार्थात्तयोः समन्वयेन विविधान् धर्मार्थादिपुरुषार्थान् निर्बाधतोऽयं निःसंशयं साधयितुं शक्नोति । यत्र किल बलरहितं केवलं ज्ञानं वर्तते, स हि दुर्बलो मनुजो धर्मार्थादिषु चतुर्विधपुरुषार्थेषु कमपि पुरुषार्थं साधयितुं न प्रभवति, एवं यत्र खलु ज्ञानरहितं बलं विद्यते, सोऽपि—अज्ञानान्धकारे निमग्नतया स्वेष्टपुरुषार्थलाभा-

द्वश्चित एव भविष्यति । अतो ज्ञानबलयोः अर्थात् ब्रह्मक्षत्रभावयोः अभीष्टलाभायानिष्टनिवारणाय च समन्वयः सर्वैरपि विधातव्य एव । अत एवास्मत्पूर्वजो विश्वविख्यातः प्रसिद्धगायत्रीमन्त्रद्रष्टा वेदविविधसूक्तनिर्माता महर्षिप्रवरो विश्वामित्रः स्वयमेकस्मिन्नेव ब्रह्मक्षत्रभावस्य समन्वयं द्योतितुमित्थं ब्रवीति स्म—

'अग्रतश्चतुरो वेदान् पृष्ठतः सशरं धनुः ।
धारयन् जयमाप्नोमि शापादपि शरादपि ॥ इति'

अत्र चतुर्थपादे 'ज्ञानादपि बलादपि' इति संशोधितः परिवर्तितः पाठः समीचीन इति मन्ये । यतः शापो हि नाम द्वेषक्रोधासहिष्णुतादिदुर्गुणप्रकटनपूर्वकः परानिष्टप्रयोजको व्यापारविशेषः, तादृशस्य शापस्य प्रयोजकं वेदधारणमनर्थायैव स्यात् । यदा हि शापेन दुष्टदलनात्मकव्यापारविशेष एव गृह्यते तदा शरेण गतार्थत्वात् तत्कथनं पुनरुक्तमेव स्यात् । तथा च शापेन पावनवेदधारणप्रकटितेन ज्ञानमेव पवित्रं लक्षणीयं, नान्यत् । सति चैवं निखिलभारतीयार्यपूर्वजे भगवति विश्वामित्रे राजर्षित्वब्रह्मर्षित्वयोः उभयोः प्रामाणिकतया सकलाभीष्टार्थसाधकतया च अवलोक्यमानः प्रशस्तसमन्वयः सर्वत्र ब्रह्मक्षत्रभावमेव समर्थयति । समन्वितब्रह्मक्षत्रभावधारणसामर्थ्येनैव— 'कुत्रापि कदापि केनापि कथमपि न पराभूतोऽभवं, किन्तु सदा विजयशील एवाभवमिति' स्पष्टं पूर्वोक्तवचनेन जगाद भगवान् विश्वामित्रः

अत एव शुक्लयजुर्वेदसंहितायां विंशत्यध्याये पञ्चविंशीतमे मन्त्रे सर्वेषामार्यमानवानां धारणाय ब्रह्मक्षत्रभावमवियुक्त-

भित्थं समुपदिशति—मन्त्रद्रष्टा महर्षिः—

'यत्र ब्रह्म च क्षत्रञ्च, सम्यञ्चौ चरतः सह ।
तं लोकं पुण्यं प्रज्ञेषं, यत्र देवाः सहाग्निना ॥'
(शु० य० २०।२५)

यत्र = यस्मिन् मानवे, ब्रह्म = ज्ञानं प्रशस्तं, क्षत्रञ्च = बलञ्च विजयशीलं, सम्यञ्चौ = संगतौ सन्तौ, लिङ्गव्यत्ययः समीची—सम्यक् अञ्चतः संगच्छतस्ते । चरतः = प्राप्नुतः–तिष्ठतः सह = अवियुक्तौ । चर गतिभक्षणयोः, गतेः प्राप्त्यर्थत्वमपि । तं = मानवं, पुण्यं लोकं = प्रत्यक्षतोऽवलोक्यमानपवित्रप्रभावविजयशालिशरीरविशिष्टं, अहं मन्त्रद्रष्टा महर्षिः प्रज्ञेषं = प्रजानीयाम् । जानातेः सिपीटि च रूपम् । तमवियुक्तब्रह्मक्षत्रभावधारकं मानवं पुनरपि प्रशंसति—यत्र = यस्मिन् मानवे, अग्निना = गौरवशालितेजस्विकान्त्या सह देवाः = विविधशक्तिमन्तः–इन्द्रवायुवरुणादयः अर्थाद्विविधैश्वर्यप्रशस्तस्फूर्तिसरसतादयः प्रतिष्ठिताः भवन्तीति शेषः ।

अत एव 'नायमात्मा बलहीनेन लभ्यः' (मु० ३।२।४)
'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।' (गी० ४।३८)
इति श्रुतिस्मृतिप्रामाण्याद् बलसमन्वितपवित्रज्ञानधारणसामर्थ्येनाहं—

'वैश्वानरज्योतिर्भूयासं, विभून्कामान्व्यश्नवै, भूः स्वाहा'
(शु० य० २०।२३)

'वैश्वानरज्योतिः भूयासम् । विश्वेभ्यो नरेभ्यो हितो वैश्वानरः यद्वा विश्वे = निखिलाः, नराः = जीवात्मानो विद्यन्ते यत्र तादात्म्येन सः परमात्मा, तद्रूपं ज्योतिर्ब्रह्मैव भूयासम् ।

'वैश्वानरः परं ब्रह्म' इत्याहुरौपनिषदाः । विभून् = महतोऽपि विविधान् कामान् = मनोरथान्—अभीष्टान् ऐहलौकिकान् पारलौकिकान् पारमार्थिकांश्च व्यश्नवै = प्राप्नुयाम् । भूः—स्वाहा = भुवनं भूः = सत्तामात्रं चित्सुखपूर्णं ब्रह्म निजस्वरूपं तस्मै स्वाहा = सुहूतमस्तु, भूरित्यव्ययम् ।

एवं शुक्लयजुर्वेदस्य शतपथब्राह्मणेऽप्यभिहितं—

'ब्रह्म वै ब्राह्मणः, क्षत्रं राजन्यस्तदस्य ब्रह्मणा क्षत्रेण चोभयतः श्रीः परिगृहीता भवति ।' ज्ञानं वै ब्राह्मणस्य वीर्यम्, युद्धं वै राजन्यस्य वीर्यम् ।' (श० ब्रा० १३।१।५।३-५)

अयमर्थः—ब्रह्म = ज्ञानमेव ब्राह्मणत्वस्य लक्षकं सम्पादकम् । तद्विहीनः कथं ब्राह्मणः स्यात् ? । एवं क्षत्रं = बलमेव शारीरकादि, क्षत्रियत्वस्य लक्षकं सम्पादकं वेदितव्यम् । बलेन रहितो दुर्बलः कथं क्षत्रियो भवेत् ? । तदस्य = तस्माद्धेतोः, अस्य = मनुजस्य निष्ठत्वं षष्ठ्यर्थः । उभयतः = अवियुक्तब्रह्मक्षत्रोभयभावधारणादेव, श्रीः = स्वास्थ्यशोभा, विविधैश्वर्यलाभः, प्रज्ञाप्रतिभासामर्थ्यं, शत्रुपराभवजन्यविजयश्रीः, सुयशः, प्रतिष्ठा, मोक्षसाम्राज्यलक्ष्मीश्च परिगृहीता = सम्पादिता भवति ।

अनेन विज्ञायते—ज्ञानबलयोः समन्वयेन सर्वेऽपि भारतीयाः आर्या हिन्दवः—प्रज्ञाप्रतिभामण्डिताः बलिनस्तेजःस्विनो गौरवशालिनो ब्रह्मक्षत्राः भवेयुः, समन्वितब्रह्मक्षत्रभावधारणेनैव हि सर्वविधोऽभ्युदयो लभ्यो भवतीति ।

एवं भगवान् मनुरपि तदेव प्रतिपादयति—

'नाब्रह्म क्षत्रमृध्नोति, नाक्षत्रं ब्रह्म वर्धते ।

ब्रह्म क्षत्रं च सम्पृक्तमिह चामुत्र वर्धते ॥
(म० स्मृ० ६।३२२)

अब्रह्म = ज्ञानरहितं, क्षत्रं = बल, न ऋध्नोति = नाभिवृद्धि याति—नाभ्युदयलाभं प्रयोजयति । एवं अक्षत्रं = बलरहितं, ब्रह्म = ज्ञानं न वर्धते = अभिवृद्धं सफलं-पुरुषार्थलाभसम्पादकं न भवतीत्यर्थः । किन्तु एकत्र ब्रह्मक्षत्रञ्चाविभक्ततया सम्पृक्तमिह लोके अमुत्र = परलोके च वर्धते = सर्वविधाभीष्टाभ्युदयप्रयोजकतया वर्धते इत्यर्थः ।

उत्तमाधमभावविशिष्टा तत्तद्गुणकर्मविहीना जन्मजातिविषयिणी हिन्दुसमाजरचनाऽस्ति दूषिता विविधानर्थजननी च

बहवोऽभिनवाः वदन्ति केचन—राष्ट्रसमाजनेतारः जन्मत एवोत्तमाधमवर्णभावविशिष्टा तत्तद्गुणकर्मविहीना हिन्दुसमाजस्य सम्प्रत्युपलभ्यमाना रचना पक्षपातदुःस्वार्थदुरभिमानान्यविषयकघृणाभावादिदुर्गुणयुक्ततया दूषिता वर्तते । यया किल विशालो हिन्दुसमाजः स्वदेश एव स्वपावनभूमावेव विधर्मिविदेशिदुष्टजनानां किङ्करो गुलामो भूत्वा, विविधां दुर्दशां जगाम । भारतस्य स्वदेशस्य बहुकालव्यापिपारतन्त्र्यं कथं जातं ? इति प्रश्नस्य सदुत्तररूपेणेदमेव वयं दृढं विनिश्चिनुमः । यत्र किल ज्ञानमासीत्, तत्र बलस्याभावोऽवर्तत, यत्र खलु बलमभूत्, तत्र ज्ञानशून्यताऽवलोकिता, ज्ञानबलयोः एकत्र समन्वयाभावादेव गर्हणीयस्य पारतन्त्र्यस्य प्रभूतानिष्टसम्पादकं

सकलेष्टार्थबाधकं बहुकालपर्यन्तं विधर्मिविदेशिदुष्टम्लेच्छप्रयुक्तं निरङ्कुशं ताण्डवं बभूवेति ।

तदैव प्रियदेशस्य भारतस्य स्वातन्त्र्यं सम्पन्नम्, यदा श्रीमहात्मगांधिपण्डितजवाहरलालस्वामिदयानन्दस्वामिविवेकानन्दस्वामिरामतीर्थप्रभृतिदेशधर्मनेतृ्णां समभावैकभावसम्पादिका ज्ञानबलसमन्वयकारिणी प्रामाणिकी हिन्दुसमाजहितकारिणी गर्जना हिन्दुसमाजेन विश्रुता विधारिता च, विषमभावभेदभावसम्पादिका पौराणिकी विघटनकारिणी दूषिता समाजरचना नितान्तमवहेलिता च ।

प्राक् किल हिन्दुसमाजे समभाव एकभावश्च सर्वथा नाभूत्, समग्रो हिन्दुसमाजः छिन्नो भिन्नो मिथः प्रेमभावबन्धुभावशून्य आसीत् । शते नवति (९०) संख्याकाः हिन्दवो हीनभावनाग्रस्ताः संघशक्तिरहिताः बुद्धिबलविहीना आसन् । अत एव ते 'वयं दीनाः हीनाः दुर्बलाः मूढाः शूद्राः स्मः' 'नास्ति ज्ञाने वा बले वाऽस्माकमधिकारः' इति मन्वानाः प्रबलानां दुष्टानां विधर्मिविदेशीयानां दुःसहविविधताडनान्येव मूकभावेनानुबभूवुः । अतस्ते विषमभावमयात् हिन्दुसमाजात् समुद्विग्नाः-दीनताहीनतानिवारणाय हिन्दुसमाजं परित्यज्य समभावैकभावविशिष्टे म्लेच्छादिसमाजे संमिलिताः भूत्वा परिशिष्टविच्छिन्नहिन्दुसमाजस्य प्रबलविरोधिनः सन्तः संजातपञ्चदशकोट्यधिकसंख्याकाः सम्प्रत्यपि समुपलभ्यमानाः हिन्दुसमाजस्य दूषितां समाजरचनामुपहसन्ति, तिरस्कुर्वन्ति च हिन्दुस्थान एव स्वकीयसभायां तन्नेतारः स्वकीयेस्लामकृश्चियनादिसमाजस्य समतामेकताञ्च प्रशंसन्ति, पक्षपातवर्जितस्य मिथोबन्धुभावस्य

महान्तं गौरवं निरूपयन्ति । प्रतियोगितया हिन्दुसमाजस्य विषमतां विच्छिन्नताञ्च प्रदर्शयन्तस्तस्य दुःस्वार्थदुरभिमानादि-प्रयोजितं मौढ्यमपि वर्णयन्ति ।

अत एव क्षत्रियप्रवरो वीराग्रगण्यो गुरुगोविन्दसिंहोऽपि हिन्दुसमाजस्य गर्हणीयोच्चनीचभेदभावमयीं दूषितां समाज-रचनामवलोक्य हिन्दुसमाजाद्बहिर्भूत्वा तस्य पुराणादिशास्त्रा-णि परित्यज्य, समभावैकभावपूर्णां शिखसमाजस्य पृथक् रचनां विदधौ । यत्र किल संमिलिताः सर्वेजनाः—'वयं शिखाः स्मः' परस्परं बन्धुभावविशिष्टाः सिंहवत् शूरवीराः स्मः, सर्वे वयं भोजनविवाहादिव्यवहारे समाना एव स्मः, अस्मासु नास्ति कश्चनोत्तमो वाऽधमो वा जन्मजातिप्रयुक्तः कश्चन नास्ति भेदभावो वेति मन्वानाः शिखधर्मस्य पक्षपातादिवर्जितं प्रशस्तमौदार्यं प्रदर्शयन्ति । वयं हिन्दवः स्मः' इति कथनेऽपि ते प्रभूतां लज्जामनुभवन्ति, तत्कथनमपि प्रतिषेधन्ति ।

हिन्दुसमाजे प्राक् यो महाशूद्रोऽस्पृश्य आसीत्, स एव शिखसमाजे संमिलितो भूत्वा 'सरदारसाहबः' इति गौरवशालि-नाम्ना विभूषितो भवति । तं कश्चनापि हीननीचदृष्ट्या द्रष्टुं न शक्नोति । सम्प्रति सः स्वं हीननीचभावनया न भावयति । समानगौरवशालिपदे विभूषितो भवति । अस्मादेवोच्चावचवर्ण-भेदवतो हिन्दुसमाजात् संभूतः शिखसमाजः ततः पृथक् भूत्वा हिन्दुसमाजं क्षयग्रस्तमकरोत् । एवं प्रशस्तपंजाबप्रदेशे हैन्दवी क्षत्रियशक्तिः सर्वथा विलुप्ता सती सा शिखसमाजे प्रदीप्ताऽभवत् । तदिदं महद् दौर्भाग्यं हिन्दुसमाजस्य विवेचकैर्वर्ण्यते ।

शिखसमाजस्य कीदृशमस्ति गौरवशालिसंघट्टनम् ? ।

कीदृशमस्ति च प्रशस्तमौदार्यम् । कीदृशोऽस्ति च सर्वत्र समानरूपेण वर्तमानः 'शिखोऽहमस्मी' ति शूरतावीरतासमुपेतः सुदृढो भावः । पश्यन्तु तावद्भवन्तः—यवनगृहे लब्धजन्मनोऽपि सन्तफतेहसिंहस्य शिखसमाजाग्रसरत्वनेतृत्वादिकम् । तदादेशानुसरणशीलत्वमविश्वासभयादिकमपहाय शिखसमाजस्य । एवं हिन्दुब्राह्मणगृहे लब्धजन्मनो मास्टरतारासिंहस्यापि कीदृशमस्ति कट्टरशिखत्वम् । यः किल पञ्जापप्रदेशे 'शिखस्थानस्य' निर्माणाय हिन्दुत्वराष्ट्रैकत्वविरोधिप्रयत्नपरम्परां वार्धक्येऽपि वितनोति । अतः हिन्दुसमाजेन, तद्धर्माधिकारिभिश्चाचार्य्यैः शिखसमाजात् औदार्यस्य, कट्टरत्वस्यैकभावस्य च काऽपि शिक्षा हिन्दुसमाजाभ्युदयलाभाय समुपादेया । अनौदार्यात् अदार्ढ्यभावात् विषमविषमयभेदभावाच्च दौर्बल्यं, औदार्यात् दार्ढ्यभावात्—समामृतमयैकभावाच्च प्राबल्यं सर्वस्मिन् समाजे सर्वैरप्यवलोक्यते । अतो हिन्दुसमाजस्य दौर्बल्यस्य क्षीणतायाश्च प्रयोजकत्वेन त एव पूर्वोक्ता हेतवः सुज्ञैः विज्ञाप्यन्ते । अतो हिन्दुसमाजाभ्युदयकामैः तत्प्रतिरोधकानां सर्वेषामनौदार्यादिमिथ्याभावानां सर्वथा समुच्छेदो विधातव्यः ।

एवमिस्लामधर्मस्य बौद्धधर्मस्य कृश्चियनधर्मस्य च सर्वेषु देशविदेशेषु व्यापकरूपेण प्रचारस्य स्वीकारस्य च हेतुभूताः पूर्वोक्ता एव—औदार्यैकभावादय एव हेतवो विज्ञेयाः ।

अतः उदारतमाद्वैतवेदान्तधर्मविशिष्टोऽपि हिन्दुधर्मोऽन्यदेशेषु कथं न प्रसरतां गतः ? स्वदेशेऽपि सः कथं क्षीणतां प्राप्तः ?, स्वजनाः परजनाः, सधर्माणो विधर्माणः, मित्राणि शत्रवश्च कथं संवृताः ? तत्र कारणमन्वेषणीयं हिन्दुधर्माधि-

कारिभिः ?। अन्विष्य च तन्निराकरणाय सबलः सफलः प्रयत्नो विधातव्यः।

एतेन—ब्रह्मक्षत्रसमाजनिर्माणेनेमे सर्वत्र प्रत्यक्षतो दृष्टाः हिन्दुसमाजाभ्युदयनिरोधकाः दोषाः निरस्ताः भवन्ति। ते हि निष्पक्षपातैर्विवेकविचाराढ्यैः समुपदर्शिताः ईदृशाः सन्ति। यथाहि—हिन्दुसमाजाग्रसरैः शिक्षितैर्धर्माधिकारिभिर्ब्राह्मणैरेव स्वस्वार्थस्य सिद्धये चतुर्षु वर्णेषु भोजनविवाहादिप्रतिषेधवर्णन-मुखेन मिथो महान्तो गर्हणीयाः गर्ताः निर्मिताः। तैं हिन्दुसमाजे कुत्रापि प्रशंसनीयस्यैकत्वस्य संगठनस्य च प्रशस्तं दर्शनं नोपलभ्यते। किन्तु सर्वत्र निन्दनीयायाः विच्छिन्नतायाः अनेकतायाः मनोवैज्ञानिकविषमतायाश्च कुत्सितं दर्शनमुपलभ्यते। विदेशीयानां विधर्मिणां म्लेच्छादिबर्बराणामाक्रमणसमये शते विंशतिसंख्यातोऽपि न्यूनाः क्षत्रिया एव तैः साकं योद्धुं प्रवर्तमानाः बभूवुः। अधिकसंख्याकाः ब्राह्मणाः वैश्याः शूद्राश्च युद्धेऽनधिकारत्वात् तच्छिक्षाऽभावाच्च तस्मात्पराङ्मुखाः भयभीतहृदया वेपमानाः पङ्गव एवावतिष्ठमाना आसन्। किमपि प्रतिकारं कर्त्तुं न शक्ताः बभूवुः, अजाविसंघवत् दुष्टयवनपराधीनता मौनभावेन स्वीचक्रुः।

अत एव गुर्जरराजस्य पाटणनगराधिपतेः कर्णसिंहस्य प्रबलम्लेच्छसैन्यात् संजातं स्वकीयक्षत्रियसैन्यक्षयं वीक्ष्य स्वराज-प्रासादनगरपरिवारादिकं हित्वा ततः पलायनसमये तस्य कमलावतीप्रभृतीनामनेकासां सुन्दरयुवतीनां राजमहिषीनामबलानां तैरेव विजयशीलैर्यवनैः तस्मिन्नेव बहुसंख्यकब्राह्मणादिहिन्दुनगर एव बलात् म्लेच्छतां विधाय देहलीदुष्टबादशाहस्याल्लाउद्दीनस्य-

'इमाः सर्वाः सुन्दर्यः राजपत्न्य उपभोग्याः बेगमाः भविष्यन्ति, म्लेच्छसन्तानान् जनयिष्यन्ति' इत्युद्धोष्य तदर्थं तासां वाद्यसङ्गीतादिसमुपेता महती शोभा यात्रा तैर्यवनैर्विहिता, ब्राह्मणादिहिन्दुभिः स्वचक्षुर्भिः निरीक्षता इति गुजरातदेशेतिहासविदः इमं वृत्तान्तं विजानन्ति। ईदृशान्येवानेकविधानि कारणानि मिलित्वा भारतीयराजपुत्रराजानां पराजयसम्पादने प्रयोजकानि बभूवुः। मुसलमानवादशाहानां विजये भारते तेषां शासनस्थापने च यवनसमाजसंघटनोत्तमाधमभेदाभावाबाधितभोजनविवाहादिसम्बन्धशस्त्रधारणादीनि कारणानि बभूवुः इति सर्वत्र यत्र तत्र समुद्घाटितनयनाः विद्वांसो विजानन्ति।

अत एवायं जन्मजातिमूलो ब्राह्मणादिवर्णविभेदो भारतस्य हिन्दुसमाजस्य च कृते न हि धर्मरूपो वरदानात्मको बभूव, किन्तु कुत्सितशापात्मकोऽधर्मरूपो निखिलदोषकोशपोषकः एव संजात इति ते निर्भयतया वर्णयन्ति।

अत एव सम्प्रति समुदारविचारशीलाः हिन्दव आर्याः यत्र तत्र किमपि समानशिक्षाव्यवसाययोग्यकुमारकुमारीप्रेमसम्बन्धादिकं वीक्ष्य विभिन्नब्राह्मणवैश्यादिपदवाच्यानामपि मिथः क्रियमाणं भोजनविवाहादिसम्बन्धं प्रशस्ततया स्वीकुर्वाणाः हिन्दुसमाजस्य विषमं विघटनं निवारयन्ति।

संशोधनं परिवर्तनञ्च

द्रष्टव्यं तावत्—अग्निपृथिवीजलवायुप्रभृतिजडपदार्थानां तत्कार्याणाञ्च प्रथमापेक्षया मानवैः कियत् परिष्करणात्मकं संशोधनं परिवर्तनञ्च विहितमिति। प्राक् तावद्वयं वैद्युताग्निं

नभस्येव क्षणिकप्रचण्डप्रकाशरूपेण ददृशिम। तं दृष्ट्वा तस्माद्वयमतीव बिभयाञ्चक्रम। सम्प्रति तत्स्वरूपं, तत्प्रभवस्थानानि, तल्लाभसाधनानि, तत्सामर्थ्यञ्च वयं विजानीमः। अत एव तस्य विविधं संशोधनपरिवर्तनादिकं विधाय तस्माद्विविधान् लाभान् सम्पादयामः। तद्यथा-क्षणिकतया भासमानस्य तस्य वैद्युताग्नेः स्थायिप्रकाशाः अस्मद्गृहादिषु प्रवर्तन्ते। प्रोष्णतां निवारयितुं यन्त्रद्वारा सः पवनं प्रकृष्टमुत्पादयति। शतसहस्र योजनस्थान् अतिदूरप्रभवान् समाचारादेशसंगीतादिरूपान् विविधान् शब्दान् रेडियोट्रांजिस्टरादियन्त्रमाध्यमेन श्रावयति। रेफ्रिजेटरमंजुषायां एरकंडिशनापवरके च स्थितः सन् सोऽभीष्टं शैत्यं जनयति। इत्येवं प्रकारेण वयं तस्य वैद्युताग्नेः संशोधन-परिवर्तनादिकं विधाय तस्मादनिष्टनिवारणाभीष्टलाभप्रयोजकानि विविधानि कार्याणि साधयामः।

तथैवास्माभिः—पृथिवीविकारपाषाणजन्यस्य कार्ष्णायसस्यापि विविधं परिष्करणं विहितम्। तेन विविधानि यन्त्राणि रेलमोटरविमानसाईकलादीनि वाहनानि च विनिर्मितानि। प्राक् तावत्-स लोहधातुः अपरिष्कृतरूपेणातिष्ठत्। तस्माद्वयं ज्ञानाद्यभावात् विशेषान् लाभान् नैव सम्पादयाञ्चक्रम। सम्प्रति तज्ज्ञानं संपाद्य विविधपरिश्रमेण तस्य परिष्करणपरिवर्तनादिकं विधाय तस्माद्विविधान् लाभान् संपादयामः।

प्रथमं तावद्वृषभशकटमश्वरथञ्च समारुह्य मानवो मन्दातिमन्दगत्या सभयां कष्टसाध्यां बहुविलम्बिनीं यात्रां चक्रे। प्रावृट्समये नद्यादिप्रकृष्टजलावरोधान् अतिक्रमितुं सर्वथाऽसमर्थः सन् यात्राया उपरम्य कस्मिंश्चित्स्थाने निवासं विधाय दूयमानेन

मनसा वर्षाकालसमाप्तिप्रतीक्षामंकरोत् । परन्तु वर्तमानसमयेऽतिद्रुततमगत्या रेलमोटरविमानादिवाहनमारुह्य लोहसीमेन्टादिनिर्मितसुदृढतमसेतुसहायेनानायासतः प्रभूतनद्यादिजलमतिक्रम्य निर्धारितसमय एव सफलामनायासां ससुखां यात्रां करोति । विचार्यतां—तावत्कीदृशं महत्परिवर्तनमवलोक्यत इति । आधुनिको हि मानवो विविधज्ञानविज्ञानपरिश्रमादिकं कृत्वाऽग्नि लोहादिजडपदार्थशक्तीनां विकासं विधाय प्रागनुभूतविविधकष्टानां निवारणं विविधेष्टलाभानाञ्च सम्पादनं विदधातीत्यवर्णकथितमेतत् ।

प्राक् तावन्नार्यः स्वमस्तकेषु कुम्भान् संस्थाप्य कूपवाप्यादितो रज्ज्वा तान् बद्ध्वा जलं गृहीत्वाऽतिपरिश्रमेण तैर्जलानयनं विदधुः । सम्प्रति लोहनलिकाभिः संशोधितं स्वच्छं जलं निर्बाधतः सर्वत्र प्रवहति, स्वगृहेष्वेव तल्लाभमनायासतः सर्वे नरा नार्यश्च संपादयन्ति । इत्येवं जलानयनपद्धतौ महत्परिवर्तनमवगम्यते ।

यदा तत्तज्जडपदार्थाः संशोधनपरिवर्तनादिना परिष्कृताः भवन्ति, तदा चेतनमानवाः स्वयं संशोधनादिना परिष्कृताः कथं न भवेयुः ? । ये हि जनाः सहस्रवर्षपूर्वप्रभवं काल्पनिकं रूढिवादमाश्रित्य बुद्धिबलेन कायबलेन च परान् पीडयित्वाऽपि स्वपुत्रबान्धवादीनामेव क्षेममुत्प्रेक्षमाणाः विषमयोच्चावचजन्मजातिमिथ्याभेदभावमवलम्ब्य मानवजातिपरिष्कारं प्रतिरुन्धन्ति, तदभ्युदयलाभाय च न प्रयतन्ते, ते सज्जनाः न किन्तु शैलसाराशयाः दुर्जना एव वेदितव्याः ।

अतः सर्वेषु चेतनमानवेषु समानरूपेण स्थितानां विविध-

ज्ञानबलादिशक्तीनामनेकविधयोग्यतानाञ्च विकासाय-मिथ्याधर्मवचनानि प्रमाणतया पुरस्कृत्य स्वनिष्ठदम्भदुःस्वार्थदुरभिमानसम्मानधनादिलाभसंरक्षणकामैः पण्डितमानिभिः क्रियमाणः प्रतिरोधो न धर्मरूपः किन्तु नितान्तः अधर्मरूप एव प्रत्येतव्यः ।

विकासनिरीक्षणं विभ्रमनिवारणञ्च

अद्यतनो विविधक्षेत्राणां विकासलक्षणोऽभ्युदयोऽस्माभिः प्रत्यक्षमवलोक्यते । चिकित्साक्षेत्रस्य तावत्प्रभूतो विकासो द्रष्टव्यः । प्राक् भारतवर्षस्य मानवोऽल्पायुः आसीत् । विविधरोगाणां समाक्रमणेन समुचितौषधिसेवन-दुष्टांगछेदनादिज्ञानाभावात् स्वल्पसमय एव कालकवलितोऽभवत् । शीतलायाः देव्याः प्रकोपं मत्वाऽप्रतिविधानात् चेचकरोगद्वारा लक्षातिगाः बालहत्याः प्रतिवर्षं समभवन् । तत्रास्माकं कियान् अन्धविश्वासः आसीत् । परन्तु संप्रति चिकित्साज्ञानस्य पाश्चात्यविशेषज्ञानां सहायेन महान् विकासः संसाधितः । तेन सहस्रवर्षेभ्योऽपि पुरातनीनां मिथ्यान्धविश्वासमयीनां मान्यतानामुपरि समूलोच्छेदकं कुठाराघातं विधाय तस्य चेचकरोगस्य निवारणाय सफलः औषधिप्रक्षेपो विहितः । तेन हि लक्षातिगानां बालकानां रक्षा साधिता । शीतला माता तु स्तुतिप्रार्थनादिभिरपि तेषां रक्षां विधातुं न समर्थाऽभवत्, किन्तु क्रूरतमराक्षसीवत् तेषां भक्षणमेव साऽकार्षीत् ।

तथापि विचार्यतां तावत् स्नेहवती पुत्रवत्सला शीतला माता स्वकीयेषु निरपराधेषु प्रियबालकेषु ·कारणमन्तरेण कोपं कृत्वा कथं तेषां विविधकष्टप्रदानप्राणहरणादिकं राक्षसीकृत्यं

विदध्यात् ? ।

परन्तु—मूढाः लोकाः अन्धविश्वासादिवशात् तं चेचकं रोगं शीतलां मातरं मेनिरे । तस्याः मन्दिराणि विधाय तां पूजयामासुः प्रार्थयामासुः च । संप्रति वयं—'सा मिथ्या मान्यतैवासीत्, नास्ति तत्र किमपि तथ्यमि' ति प्रामाणिकतया विजानीमः । इत्येवमाधुनिकयथार्थपरिष्कृतचिकित्साक्षेत्रेण प्राचीनचिकित्सायां महत् संशोधनं परिवर्तनञ्च विहितम् । इत्येवमिञ्जक्शनौपरेशनादिभिः परिष्कृतपरिवर्तितोपायैर्विविधरोगाणां शमनं विधाय भारतीयमानवैरपि स्वकीयमायुः प्रवृद्धं कृतमिति समाचारपत्रपाठकानां कृते तदेतन्न तिरोहितम् ।

शब्दशक्तिविकासः

तथैव प्रशिक्षितविदेशीयमानवैः A शब्दशक्तेः कियान् महान् विकासः संसाधितः इति प्रत्यक्षमवलोक्यताम् । तस्य लाभोऽद्यतनैर्भारतीयैरपि सम्पाद्यते । प्राक् इन्द्रप्रस्थ (दिल्ली) स्थितोऽखिलभारतवर्षस्य सम्राट् महाराजो युधिष्ठिरोऽपि स्वबान्धवानां द्वारकापुरीस्थितानां परस्परं कलहायमानानां सुरापानादिदुर्व्यसननिरतानां शस्त्रादिभिर्मिथो विघाताय प्रवृत्तानां श्रीकृष्णबलरामप्रद्युम्नानिरुद्धप्रमुखानां यादवानां षण्मासपूर्वप्रभवं विध्वंसं, सुवर्णमयसुन्दरतमद्वारकायाः समुद्रे विलयञ्च शब्दशक्त्याविष्कारप्रयोजकयन्त्रादिनिर्माणज्ञानाभावात् यदा न विवेद, तदा तत्समाचारबोधाय प्रेषितोऽर्जुनः शीघ्रं

A शब्दशक्तेः— अर्थात् आकाशस्य अन्तर्निलीनशक्तेः—शब्दशक्तिशब्दस्याभिधादौ रूढत्वात् एवं विवरणं लिखितम् ।

नायातस्तदा भीमसेनं प्रतीत्थमुक्त्वा विचिन्तयामास—

'संप्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया ।
ज्ञातुं पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥
गताः सप्ताधुना मासाः भीमसेन ! तवानुजः ।
नायाति कस्य वा हेतो र्नाहं वेदेदमञ्जसा ॥

(भा० १।१४।६-७) इति ।

पुनः सः स्वबान्धवयादवानिष्टसूचकान् विविधान् उत्पातान् पश्यन् इत्थमुवाच—

'ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग ! पुनः पुनः ।'
'शिवैषोद्यन्तमादित्यमभिरौत्यनलानना ।'
'वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ।
'असृग् वर्षन्ति जलदा बीभत्समिव सर्वतः ॥'
'सूर्यं हतप्रभं पश्य ।' 'न पिबन्ति स्तनं वत्साः'
'रुदन्त्यश्रुमुखा गावः' 'दैवतानि रुदन्तीव'
'इमे जनपदा ग्रामाः पुरोधानाकराश्रमाः ।'
भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः ॥'

(भा० १।१४) इति ।

यदा परिशिष्टकतिपययादवविधवापत्नीः कतिपयान् यादवबालाँश्च समादायार्जुन इन्द्रप्रस्थमाजगाम, तदा तमातुरमधोवदनमब्बिन्दून् स्वनयनाब्जयोः सृजन्तमर्जुनमनुजं विलोक्योद्विग्नहृदयोऽज्ञाततद्विशेषवृत्तान्तो युधिष्ठिर इत्थं पृच्छति स्म । युधिष्ठिर उवाच—'कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते?।' 'शूरो मातामहः कच्चित् स्वस्त्यास्ते-? ।' 'मातुलः सानुजः कच्चित्कुशल्यानकदुन्दुभिः ? ।' 'प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते

महारथः ? । गम्भीररयोऽनिरुद्धो वर्धते ? ।' 'कच्चिदास्ते सुखं रामो भगवान् सात्वतां प्रभुः ? ।' भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः । कच्चित् पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥' (भा० १।१४) इत्यादिना ।

महाराजस्य युधिष्ठिरस्य स्वबन्धुयादवकुशलताज्ञापकान् इष्टान् प्रश्नान् इमान् श्रुत्वा प्रखिन्नहृदयोऽर्जुन इत्थमुवाच— 'राजंस्त्वयाऽभिपृष्टानां सुहृदां नः सुहृत्पुरे । विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥ वारुणीं मदिरां पीत्वा मदोन्मथित चेतसाम् । अजानतामिवान्योऽन्यं चतुःपञ्चावशेषिताः ॥' (भा० १।१५।२२-२३) इति । इत्यादिनाऽर्जुनेन सर्वेऽपि यादवाः विनष्टाः भगवानपि स्वकलेवरं जहौ ।' इत्यभिहितम् ।

अनेन वृत्तान्तेन ज्ञायते-प्राक् शब्दातिशीघ्रतमप्रसारणोपायं प्राक्तनैः सर्वथा न ज्ञातम्, तदाविष्काराद्भुतसाधनान्यपि च नैव ज्ञातानि । संप्रति तत्सामर्थ्यस्य लाभो विविधरेडियोतारटेलिफोनादियन्त्रद्वारा सर्वैरपि सम्पाद्यते । अत्रापि संशोधनपरिवर्तनादिकं स्पष्टतो विज्ञायते । एवं गृहभवनादिशस्त्रास्त्रादिनिर्माणेऽपि संशोधनपरिवर्तनादिकं वेदितव्यम् ।

इदं चिन्त्यम्—कतिपयानां श्रीकृष्णपुत्रसाम्बादियुवकानामुद्धतानां प्रवञ्चनोपहासाद्यविनीतव्यवहारेण खिन्नैः प्रकुपितैर्विप्रैः ऋषिभिः—सर्वेषां यादवानां सुवर्णमयद्वारकापुर्याश्चापि विनाशप्रयोजकः शापो दत्तः । स हि स्वल्पस्यापराधस्य कृते महान् दण्डो विचारकाणां पक्षपातरहितानां घोरान्यायरूप एव प्रतिभाति । दयासहिष्णुताक्षमारहिताः क्रोधवशानुगाः विप्राः शापमेव ददते, विनाशाय च प्रवर्तन्ते । तेषां दुष्टानां

दौष्ट्यं निवार्य तान् सज्जनान् सुबुद्धिशालीन् विधातुं ते न प्रभवन्ति किम् ?। विनाशाय प्रयोजितं तेषां सामर्थ्यं, रक्षणायानुग्रहाय च कथं न प्रभवति ?। विनाशकापेक्षया सर्जकानां रक्षकाणाञ्चास्ति प्रसिद्धं प्रशस्तं महत्त्वम्। वक्तुरेव हि तज्जाड्यं यत्र श्रोता न बुध्यते।' इति न्यायेन शिक्षकाणां गुरुत्वाभिमानवतां विप्राणामेवायं जाड्यलक्षणोऽपराधो मन्तव्यः, यत्तैः स्वशिष्याणां यादवानां मदिरापानादीनि दुर्व्यसनानि, द्वेषेर्ष्याक्रोधादीन् दुर्गुणान् दुष्टाचारांश्च सदुपदेशैः स्वादर्शचरित्रप्रभावैः स्वयोगादिसामर्थ्येन च विनिवार्य तेषु प्रेमसद्भावौदार्यक्षमादिसद्गुणान् सदाचारांश्च संस्थाप्य ते सज्जनाः कथं न कृताः, शापसामर्थ्यं तदनुग्रहे कथं न योजितं तैः ?। यद्वा क्षत्रियापेक्षया ब्राह्मणानां प्राबल्यप्रदर्शनायेत्थं विप्रशापस्यास्ति कल्पनं किम् ?। एवं पुराणेषु सर्वत्र तल्लेखकैः स्वसंघस्यैव यया कयाऽपि रीत्या महतीं प्रशंसां विधाय समुत्कर्षः प्रदर्शितः, अर्थतोऽन्यक्षत्रियादिसंघस्य हीनत्वमपि।

राज्यशासनपरिष्कारः

एवमधुना राज्यशासनेऽपि महत् परिवर्तनं संशोधनञ्चावगम्यते। प्राक् किल यः कोऽपि राजा वा महाराजो वा मूढो वा दुष्टो वा व्यसनी वा दुराचारी वा सधर्मा वा विधर्मा वा स्यात्, तं किल 'नराणाञ्च नराधिपः' (गी० १०।२७) इति न्यायेन तं भगवत्प्रत्यक्षमहाविभूतिरूपं मत्वा तस्य दुष्टशासनानि, पापमयासह्यबलात्कारादीन् व्यवहारांश्च प्राक्तना दुर्बलाः संघशक्तिरहिताः जनाः मौनभावेन कमपि प्रतिकारमकृत्वा

'तेजस्विनां न दोषाय वह्निः सर्वभुजो यथा।' (भा०) 'समरथको नहि दोष गुंसाई' (तुलसी० रा०) इत्यादीनि शास्त्रवचांस्यभिधाय ममृषुः। संप्रति—'बहुपाय्ये स्वाराज्ये यतेमहि।' (ऋ० ५।६६।६) इति निष्पक्षयथार्थश्रौतोपदेशमनुसृत्य 'संघे शक्तिः कलौ युगे।' इति न्यायेन संघशक्तिं सम्पाद्य राष्ट्रीयजनपरिषत्समितिभ्यां निर्वाचिताः संमिलिताः एव राष्ट्रहितैषिणो विशिष्टाः जनाः राज्यशासनं संवहन्ति। तैर्नृपपरम्पराः प्राक्तनाः सर्वथा विध्वस्ताः।

कन्याशिक्षणादिविकासः

प्राक् खलु कन्यकाः नार्यश्च सर्वथाऽक्षरज्ञानरहिताः वाचनलेखनबहिर्मुखाः विविधवस्त्रालङ्कारावगुण्ठिताः स्पष्टदर्शनशून्याः सत्यो मौढ्यान्धविश्वासरूढिवादादिवशात् यद्वा तद्वा समाचेरुः। एवं प्रियराष्ट्रस्य समग्रस्यार्धमङ्गं गाढान्धकारग्रस्तमासीत्। संप्रति प्रायः सर्वाः कन्यकाः नार्यश्च स्कूलकोलेजादिशिक्षणालयेभ्यः शिक्षिताः सत्यः राष्ट्रस्याप्यनेकविधानि कार्याणि विदधति। चिकित्सक-शिक्षक-मन्त्रिप्रभृतिविशिष्टस्थानेष्वपि समारूढाः सत्यः राष्ट्रस्वातन्त्र्यस्य किमपि विशिष्टं फलं ता अपि भुञ्जते। मौढ्यप्रभवां मुखावरणप्रथां सर्वथा परित्यज्य निर्भयाः सत्यः इतस्ततः स्वातन्त्र्येण गमनागमनादिकं कुर्वन्ति। 'स्वयं सा मित्रं वनुते जनेचित्'(ऋ० १०।२७।१२)इति श्रौतादेशमनुसृत्य रूढिवादज्ञातिवादादिकमपहाय साहसमवलम्ब्य च स्वातन्त्र्येण स्वेष्टं पतिमभिवृणुते। समाजराष्ट्रसुधारणाय मिथ्याऽनिष्टकररूढिवादनिवारणाय च समाचारपत्रादिषु विविधान् लेखान् लिखन्ति

सभायां भाषणानि च कुर्वते, समानाधिकारतायाः लाभं संपाद्य दुष्टपुरुषपारतन्त्र्यादेरनिष्टं फलं सहसा परिहरन्ति, कोलेजीय-कन्यकाः एन्० सी० सी० कक्षायामर्थात् स्वदेशसंरक्षणकक्षायां राईफलादिशस्त्रप्रयोगादिशिक्षां गृहीत्वा दुर्गादेवीदुर्गावतीझांसी-राण्यादिवत् स्वकीयं शौर्यादिकं प्रदर्शयन्त्यो रूढवादादिप्रयुक्ताबला-त्वं निरस्यन्ति । इत्येवं तास्वपि कीदृशं महत् परिवर्तनादिकमव-लोक्यते इति, पश्यन्तु सर्वस्मिन् स्वतन्त्रभारते दृशौ विस्तार्यं भवन्तः ।

परमाणुशक्तिविकासः

एवं परमाणुशक्तिविकासं, तदर्थं निर्मितानि विशाल-कारखानानि चावलोकयन्तु भवन्तः । प्राक्तनाः न्यायशास्त्रिणः परमाणुं विभागशून्यमखण्डं मेनिरे । परन्तु आधुनिकाः सुविच-क्षणाः वैज्ञानिकाः परमाणोरपि अनेकान् सूक्ष्मतरादपि सूक्ष्म-तमान् विभागान् कुर्वन्तस्तं खण्डयन्ति । परमाणुसामर्थ्यं विदित्वा तत्साहाय्येन नभोमण्डले विलक्षणमतिद्रुततमगतिकं यानमधिरुह्य तत्र विविधानि यन्त्राणि संयोज्य शतलक्षयोजनाद-प्यतिदूरस्थं यानं तत्स्थं मानवञ्चाधःस्थिताः जनाः पश्यन्ति, तेन साकं वार्तालापञ्च कुर्वन्ति । यस्माद्गतं यानं, तन्निर्दिष्ट-स्थान एव निर्दिष्टसमय एव प्रत्यागच्छति । कीदृशमस्त्यद्भुत-बुद्धिचातुर्यं पाश्चात्यविदुषाम् । प्राचीनाः जनास्तु स्वमौढ्यात् वृषभाश्वादिकं विना शकटं कथमपि प्रचलितुं शक्तं न भवतीति मेनिरे । सर्वतः प्रथमं विलोकितं रेलशकटं कृष्णवर्णं तदेञ्जि-नञ्च दृष्ट्वा कालिकादेवीशक्त्यैवेदं प्रचलतीति स्वकीयमुपहासास्पदं

सूक्ष्मदर्शित्वमन्येभ्यो विज्ञापयाञ्चक्रुः । 'निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।' इति न्यायेन त इत्थं तन्मूर्खमण्डले स्वकीयं पाण्डित्यं प्रदर्शयामासुः । परन्तु-संप्रति - अभिनवपरिष्कृत-विवेकविचाराढ्याः जनाः 'यन्त्राग्निजलादिसंयोगेन कीदृशं सामर्थ्यं प्रादुर्भवतीति' विजानन्तस्तत्रापि प्रतिदिनं विविधं संशोधनादिकं कुर्वन्तस्तस्माद्विविधान् लाभान् सम्पादयन्ति । एवं 'कोऽयमस्ति प्रभूतदूरस्थितोऽपि विलोक्यमानः चन्द्रमाः, के चेमे सन्ति मंगलादयो ग्रहाः, तत्र कीदृशमस्ति वातावरणम्' इत्यादेर्यथावद्बोधाय, प्रतिकूलवातावरणादिनिवारणाय च प्रयतन्ते । इत्येवं सन्ति पृथिव्यग्न्यादिजडपदार्थानां संशोधनपरिवर्तनादौ प्रत्यक्षोदाहरणानि ।

चेतनमानवविकासोऽप्यत्यावश्यकः

यथाऽस्माभिः — तत्तज्जडपदार्थशक्तियोग्यतादिविकासः संशोधनादिना संसाधितः, तथा चेतनमानवशक्तियोग्यतादिविकासोऽप्यवश्यमेव संसाधनीयः । यावज्जडपदार्थेषु संशोधनपरिवर्तनादिकमपेक्षितमस्ति, तावत्, तस्मादप्यधिकं च चेतनमानवेष्वपि । अतो रूढिवादप्राचीनपरम्परादीनां फल्गुदम्भदुःस्वार्थदुरभिमानादिदोषमूलकानि मिथ्याधर्माभासवचनानि श्रुत्वा सहस्रवर्षेभ्यः पूर्वं यथा यत्र वयमवस्थितास्तथैव तत्रैवावस्थानं विधाय तत्तन्निष्ठशक्तियोग्यतादिविकासञ्चाकृत्वा स्वकीयमौढ्यप्रदर्शनं कर्तुं कथमपि नोत्सहन्ते स्वतन्त्रविचारकाः स्वपरजनसमाजराष्ट्रहितचिन्तकाः सज्जनाः ।

सर्वोदयसाधकादेशप्रचारः कर्तव्यः

अतः 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' (क० ३।१४) 'उत्थातव्यं जागृतव्यं योक्तव्यं भूरिकर्मसु ।' इति सर्वोदयसाधकस्य शुभादेशस्य सर्वत्र निष्पक्षपातं प्रचारं विधाय स्वकीयविविधशक्तियोग्यतादिविकासाय सर्वैरपि भारतीयैः समानरूपेण प्रयतितव्यम् । कथमपि कदापि कस्यापि कुत्रापि पक्षपातमवलम्ब्य तत्तच्छक्तियोग्यतादिविकासः केनापि नावरोद्धव्यः। सर्वोदयमार्गे सर्वैरपि समानभावमवलम्ब्य हीनतादीनतादिप्रयोजकान् मिथ्याभावान् समुत्सार्याग्रादप्यग्रेऽभिवृद्धिः संसाधनीया । निखिलस्य भारतीयसमाजस्य स्वसमुदारप्रशस्तसंस्कृत्यनुरूपं हितकरं संशोधनपरिवर्तनादिकं विधाय परिष्कारः कर्तव्यः, तेन हि विविधोऽभ्युदयो यशस्करः संपादनीयः, ताभ्यां हि प्राणप्रियस्य स्वराष्ट्रस्य यथा स्वातन्त्र्यं गौरवञ्चावतिष्ठेत, स्वकीया पावना वैदिकसंस्कृतिश्च यथा सुरक्षिता स्यात्, विदेशिविधर्मिदुष्टजनानाञ्चाक्रमणं यथा न प्रभवेत्तथा सर्वैरपि भेदभावं विहाय प्रशस्तसमभावैकभावञ्चावलम्ब्य प्रयतितव्यम् ।

'दासो वा दासपुत्रो वा, यो वा को वा भवाम्यहम् ।
दैवाधीनं कुले जन्म, मदायत्तन्तु पौरुषम् ॥' इति महावीरस्य समुदारचेतसो दान्युत्तमस्य कर्णस्यायं सिंहनादः सर्वत्र प्रचारयितव्यः, स्वपुरुषार्थेन ज्ञानबलादिविविधशक्तीः संपाद्य यः कोऽपि भारतीय आर्यो हिन्दुर्भवतु, 'अहं ब्रह्मक्षत्रोऽस्मी' ति समुन्नतभावनां स्वहृदये दृढं बद्ध्वा, शब्दैः जिह्वया च तामभिव्यञ्ज्य विविधसाधनव्यवसायशिक्षणादिभ्यः स्वाभ्युदयः सर्वथा सम्पाद-

नीय एव। स्वशिक्षणयोग्यतामनुरुध्य स्वरुचिञ्चानुपरुध्य यत्किमपि विद्याक्षेत्रं बलक्षेत्रं धनक्षेत्रं कृषिक्षेत्रं, श्रमक्षेत्रञ्च स्वीकर्तुमानुकूल्यं स्यात्, तत्क्षेत्रमेकं वा द्वे वा त्रीणि वाऽवलम्ब्य स्वविकासः संसाधनीयः, तत्र कथमपि कुत्रापि कदाचिदपि कस्याप्यमुकस्य ज्ञातिविशेषस्याधिकारो वा प्रतिषेधो वा न मन्तव्यः। योग्यतारुच्यनुसारेण सर्वैरपि भारतीयै र्विद्याबलादिक्षेत्रेषु यः कोऽपि व्यवसायः स्यात्, तस्यावलम्बनं निःसंशयं सफलं कर्तव्यम्।

अतः—प्रमाणमूर्धन्या पूर्वोक्ता भगवती श्रुतिः सर्वान् भारतीयान् समानरूपेण समुपदिशति – हे मानवाः! यूयं सर्वे उत्तिष्ठत सर्वविधस्वाभ्युदयलाभाय पक्षपातदुःस्वार्थादिदोषविशिष्टानां धर्माभासवचनानां परित्यागः, आलस्यप्रमादादे र्वर्जनञ्चास्ति समुत्थानम्। अज्ञानमिथ्याज्ञानयोश्च निराकरणमस्ति जागरणम्, मुखबाहूदरपादानां स्वाङ्गानां ज्ञानबलधनश्रमशक्त्याधानरूपविकासश्च। वरान् = श्रेष्ठान् पक्षपातादिरहितान् समुदारचेतसो ज्ञानवतो बलवतो महापुरुषान् प्राप्य तत्समीपं गत्वा तेषां प्रामाणिकान् समाजराष्ट्रहितकरान् सदुपदेशांश्च श्रुत्वा निबोधत = स्वाभ्युदयमार्गं यथावद्विजानीत, ज्ञात्वा तथैव समाचरत। विश्वनियन्त्रा भगवता तस्याद्भुतसामर्थ्यशालिन्या प्रकृत्या देव्यापि च न कोऽपि कुत्रापि कदापि पक्षपातो विहितः। तेन तया च सर्वत्र समभावमेकभावञ्च संस्थाप्य विविधानां शक्तीनां योग्यतानाञ्च दानं विहितम्। तयोः लाभस्य शिक्षणादीनि विविधानि साधनानि समालम्ब्य ज्ञानबलादीनामाविष्कारः सर्वै र्विधातव्यः इत्येषः परमार्थः।

शब्दार्थव्यवहारपरिवर्तनम्

प्रारम्भे वैदिकयुगे वर्णार्थवाचकाः ब्राह्मणादिशब्दाः सर्वथा पाचकादिशब्दवत् यौगिका एवार्थात् प्रकृतिप्रत्ययार्थसम्बन्धादेवागताः आसन्। यथा पाचकशब्दः पाककर्तृ वाचक एव भवति, पाककर्तृत्वशून्ये न सः प्रयुज्यते। तथा ब्रह्म = वेदं अधीते शब्दतो, वेत्ति चार्थत इति, यद्वा ब्रह्माध्ययनाय शोभनबुद्धि- वाक्पाटवाध्ययनयोग्यतारुचिसरलतानिष्कपटतादिशुभसंस्कारांश्च बिभर्तीति ब्राह्मणो भवति। अत एवाज्ञातपितृगोत्रस्य वारवनितायाः अर्थात् वारस्य जनसमूहस्य साधारण्येन वध्वायाः वेश्यायाः पुत्रस्य सत्यकामजाबालस्य सत्यार्जवादिशुभगुणयोगेन वेदाध्ययनयोग्यतागुरुकुलवासरुचिप्रशस्तबुद्धिशोभनवर्णाकृत्यादिना च ब्राह्मणवर्णत्वं संस्थापितं तदानींतनैः पूज्यैर्महर्षिभिरिति तदितिहासः प्रसिद्धो छान्दोग्योपनिषदि। सामवेदसंहितोपनिषदः प्रास्तविके वक्तव्ये चास्माभिस्तदितिहासस्य स्पष्टं विवेचनं कृतम्, तत एवावगन्तव्यमधिकमवगन्तुकामैः। तथा च वेदाध्ययनादिगुणशून्ये मानवे ब्राह्मणशब्दस्य व्यवहारस्तदा नाभवत्।

एवं क्षतत्राणपरो देशधर्मादिरक्षकः शूरवीरः क्षत्रियो भवति। एवं धनधान्यादिलाभाय कृषिवाणिज्यादिकर्मसु विशति-प्रविशतीति उद्योगसंचालको वैश्यो भवति। मूर्खत्वात् बुद्धिशून्यत्वात् वाक्पाटवसत्यार्जवादिगुणशून्यत्वाच्च यः शुचा = शोकेन दुर्गुणेन प्रयुक्तः सन् द्रवति - धावति श्रमसाध्यभारवहनादिकर्मकरणायेति शूद्रः।

ततः पश्चात् स्मृतिपुराणयुगे ब्राह्मणादिवर्णवाचकाः

शब्दाः पंकजादिशब्दवत् योगरूढाः सन्तः प्रवृत्ताः अभवन् । योगः = अवयवशक्तिः, रूढिः = समुदायशक्तिः, तदुभयशक्त्या च यथा पंकजशब्देन पङ्कजन्मकर्तृत्वरूपावयवार्थविशिष्टपद्मत्व-विशिष्टार्थस्य बोधः सम्पद्यते। उभययोगरूढार्थबोधनाच्च पङ्कजाते कुमुदादौ, स्थलजाते पद्मे च न तत्पदप्रयोगप्रसंगः ।

ततोऽनन्तरं-घटगवादिशब्दवत् ब्राह्मणादिशब्दाः रूढार्थ-बोधका एवाभवन् । रूढिरस्यास्तीति रूढः, प्रकृतिप्रत्ययार्थमनपेक्ष्य समुदायशक्त्याऽर्थबोधकः शब्दो रूढो व्यवह्रियते । यथा घटः, गौः, इत्यादयः शब्दाः सर्वथा रूढार्थमेवावबोधयन्ति। एषु प्रकृति-प्रत्ययार्थाः सर्वथा उपेक्षिताः भवन्ति । 'घट चेष्टायां' धातुतो निष्पन्नो घटशब्दः घटते चेष्टते इति घट इति चेष्टार्थं नापेक्षते, चेष्टाशून्यं कमपि रूढं जडभूतार्थमेवामुकाकृतिविशिष्टं बोधयति। एवं 'गम्लृ गतौ' धातुतो निष्पन्नो गोशब्दो गमनकर्तृमानवाद्यर्थ-मुपेक्षते, रूढं कमपि पशुव्यक्तिविशेषञ्च बोधयति । अत एव रूढार्थबोधनाभिप्रायेणैव—'अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः ।' इत्यादयः प्रलापाः सनातनधर्मरूपेण प्रवृत्ताः अभवन् ।

परन्तु वर्तमानकालिकाः—विशालस्यार्यहिन्दुसमाजस्या-भ्युदयसंगठनसमानबन्धुत्वादिसंस्थापनकामाः— 'पोषणस्य प्रति-ष्ठायाश्च लाभः सर्वेषां योग्यतामनुरुध्य समानरूपेण मिलनीयः, गुणकर्मशून्यायाः जन्मजातिप्रयुक्तायाः असमानतायाश्च निरासो-विधातव्यः' इति यथार्थोपदेशप्रदानतत्पराः— सनातनवैदिकार्य-हिन्दुधर्माचार्याः स्वामिविवेकानन्दरामतीर्थदयानन्दप्रभृतयो महानुभावाः, स्वराष्ट्रस्य प्रियभारतस्य कर्णधाराः— अग्रगण्याः

महात्मगान्धितिलकविनोबागुरुगोलवलकरप्रभृतयो नेतारश्च तत्तद्गुणकर्मार्थबोधका एव सन्ति ब्राह्मणादिशब्दाः— इति वैदिकयथार्थदर्शियुगवत्-मन्वते ।

अन्ये पण्डितनेहरूप्रभृतयो राष्ट्रस्योग्रनेतारस्तु—'उत्तमाधमादिवर्णभेदभावः संप्रदायधर्मभेदभावश्च स्वराष्ट्रस्य महदिदं समाजाभ्युदयप्रतिरोधकं स्वार्थान्धितापक्षपातमिथ्याभिनिवेशादिदोषपोषकं विषमताविषप्रसारकं निन्द्यं कलङ्कमस्ति, अत एव तस्य प्ररूढासह्यकष्टप्रदरोगवत् सपदि निरासः कर्तव्यः' इति मन्वानाः, हिन्दुस्थानं हिन्दुधर्मनिरपेक्षं राष्ट्रं विदधानाश्च ब्राह्मणादिवर्णसंज्ञाः डित्थडवित्थादिशब्दवत् निरर्थकत्वेनाभ्युपगच्छन्ति । 'डित्थः काष्ठमयो हस्ती, डवित्थस्तन्मयो मृगः' इत्युक्त्या काष्ठनिर्मितयोः जडीभूतयोः हस्तिमृगार्थयोः यदृच्छावशात् प्रवर्तमानौ डित्थडवित्थशब्दौ यथा निरर्थकौ मन्येते । तथा ब्राह्मणादिशब्दाः अपि निरर्थका एव मन्तव्याः । अत एव यथा कश्चन निरक्षरो मूर्खो विद्यापतिनाम्ना, यथा च कश्चन महादरिद्रो दीनः श्रीपतिनाम्ना, यथा च कश्चन महादुर्बलो भीरुः, महावीरनाम्ना च व्यवहृताः भवन्ति, लोकास्तेषां संज्ञाः उपहासप्रयोजकाः निरर्थकत्वेनाभ्युपगच्छन्ति ।

परन्तु गीतायाः श्रीकृष्णस्य भारतप्रियदेवस्य यथार्थं प्रामाणिकं हितकरमुपदेशं मन्वानाः समुदारवैदिकसनातनधर्मसंस्कृतिप्रियाः विवेकविचारशीलाः आस्तिकाः सज्जनाः राष्ट्रसमाजसमानतासंरक्षकं गुणकर्मवादलक्षणं यौगिकं मध्यमं मार्गं स्वीकुर्वन्ति । 'आश्रयेत् मध्यमां वृत्तिं, अति सर्वत्र वर्जयेत्' इति न्यायात् ।

अत एव—,जन्मनैव महाबाहो ब्राह्मणो नाम जायते ।' 'विद्याबलं वयो वित्तं वर्णश्चैव विरञ्चिना । पञ्चैतानि हि सृज्यन्ते, गर्भस्थस्यैव देहिनः ॥' इत्याद्याः सूक्तयोऽपि गुणकर्मवादमेव समर्थयन्ति, न तु तद्विहीनजन्मजातिवादम् । अर्थात् यो ब्राह्मणो भवितुमर्हति, सः खलु जन्मसमयादेव ब्राह्मणगुणकर्मभिः संयुक्तः सन् प्रादुर्भवति । वर्णः = शुक्लादिवर्णः, ब्राह्मणत्वाद्युपाधिलक्षणश्च । अत एव—'वर्णो रूपेऽक्षरे भेदे यशोगुणकथासु च ।' इति कोशप्रामाण्याद् वर्णशब्दस्य विविधार्थाः अवगताः भवन्ति ।

अपि च तत्तत्कुलजातिमनुसृत्य जन्मना वर्णं मन्यमाना गुणकर्मप्राधान्यमनिच्छन्तोऽपि वस्तुस्थितिमवेक्ष्य बलात्तत्स्वीकुर्वन्त्येव । विलोक्यतां तावत् विवेकनेत्रं समुद्घाट्येदं—कश्चन जन्मना ब्राह्मणादिवर्णः स्यात्, यदि तेन इस्लामधर्मं यद्वा कृश्चियनधर्ममङ्गीकृतं भवेत्, यवनादिवत् तत्संस्कारगुणान् बिभृयात् तत्कर्माणि च कुर्यात्, तदा जन्मजातिमते तस्य ब्राह्मणादिवर्णत्वमेवाङ्गीकरणीयं स्यात्, सति चैवं भारते ये प्राक् ब्राह्मणादिवर्णाः हिन्दव आसन्, पश्चात् ते यवनादिधर्मं—स्वीकृत्य यवनादयः संवृत्ताः, तेऽपि यवनादिरूपेण व्यवहृता एव न भवेयुः, परन्तु ते यवनकृश्चियनादिरूपेणैव व्यवहृता भवन्ति । ब्राह्मणादिरूपेणव्यवहृताः न भवन्ति । तत्कस्य हेतोः—गुणकर्मादिपरिवर्तनात्, इति परिशेषात् लोकव्यवहारतश्च वक्तव्यं स्यात् । तेन किल जन्मजातिवादस्य प्राधान्यं खण्डितं, गुणकर्मवादस्य च प्राधान्यं स्वीकृतं बभूव ।

अतएवास्मद्धर्मशास्त्रेष्वपि गुणकर्मवादस्य वर्णविभेद-

प्रयोजकत्वेन स्पष्टतः प्राधान्यमित्थं स्वीकृतं द्रष्टव्यम् —

'चतुर्धा भेदिता जातिर्ब्रह्मणा कर्मभिः पुरा ।
न जात्या ब्राह्मणश्चात्र, क्षत्रियो वैश्य एव न ॥
न च शूद्रो नैव म्लेच्छो भेदिता गुणकर्मभिः ।
ब्रह्मणस्तु समुत्पन्नाः, सर्वे ते किन्नु ब्राह्मणाः ? ।
न वर्णतो न जनकाद् ब्राह्मं तेजः प्रपद्यते ॥
ज्ञानकर्मोपासनाभि र्देवताराधने रतः ।
शान्तो दान्तो दयालुश्च ब्राह्मणश्च गुणैः कृतः ॥
लोकसंरक्षणे दक्षश्शूरो दान्तः पराक्रमी ।
दुष्टनिग्रहशीलो यः, स वै क्षत्रिय उच्यते ॥
क्रयविक्रयकुशला ये नित्यं स्युः पण्यजीविनः ।
पशुरक्षाकृषिकरास्ते वैश्याः कीर्तिता भुवि ॥

इत्यादिभिः, इत्यलं पल्लवितेन ।

हिन्दुसमाजे विषमभावघृणाभावादेः सन्ति दृश्यमानानि विविधोदाहरणानि

यः किलोच्चतमज्ञातीयो ब्राह्मणादिः स्वात्मानं निम्न-ज्ञातिभ्यः शुभोत्तमगुणकर्मादिकं विनाऽपि समानशिक्षणव्यवसा-यादिशालित्वेऽपि नाममात्रेण सर्वोत्कृष्टं, स्वेतरांश्च निकृष्टान् मनुते । बाहुल्येन तद्दुरभिमानमपि स्वात्मनि बिभर्ति, सर्वत्र भाषणादिना तनुतेऽपि च ।

यथा रेलशकट्यां फस्ट-सेकेन्ड-इन्टर-थर्ड-क्लासरूपाः चतुर्विधाः उच्चावचाः कक्षाः सन्तिः, तथैव हिन्दुसमाजे गुण-कर्मादिपार्थक्यं विनाऽपि विषमभावभेदभावप्रयोजकाः ब्राह्मण-

क्षत्रियवैश्यशूद्ररूपाः चतुर्विधाः वर्णभेदाः दुरभिमानघृणाभावादिप्रयोजका अपि ते धर्मरूपाः दुःस्वार्थिभिर्मन्यन्ते। अयमस्ति भारतवर्षस्य पावनः! वर्णाश्रमधर्मः इति ते भूयो भूयः समुद्घोषयन्ति। यैः किल वेदग्रन्थानां दर्शनमपि नैव कृतम्! कुतः पठनादिकं? ते किल वयं चतुर्वेदिनः त्रिवेदिनो द्विवेदिनश्च स्मः इति-उपहासात्मकं- 'महादरिद्रस्य कोट्याधीशनामवत्' स्वकीयं गौरवशालिविशेषणं प्रदर्शयन्ति। अतएव ते'वयं सर्वोत्तमाः ब्राह्मणाः स्मः' 'इमे किल निकृष्टाः शूद्राः सन्ति' इत्यादिकान् विषमभावान् सर्वत्राविष्कुर्वन्ति।

सर्वत्र दृष्टचरमिदं यत्—स्वस्मिन् दुरभिमान एवान्यत्र घृणाभावं तुच्छभावञ्च जनयति, एतद्विषयेऽस्माभिः भारतेऽस्मिन् विविधाः दृष्टान्ताः अवलोकिताः।

दक्षिणभारतयात्रा

ते यथा— दक्षिणभारतयात्रासमये—चेट्टिश्रेष्ठिभिर्निर्मिते संरक्षिते च विशाले कोईलुरसंज्ञके मठेऽवस्थितानामस्माकं समीपे तदा कश्चन तन्मठविद्यालयस्य संस्कृताध्यापको ब्राह्मणो विद्वान् समागत्योवाच—'भवन्तोऽस्मिन् शूद्रमठे कथं समायाताः? अत्र तु सर्वे शूद्रा एव साधवः तिष्ठन्ति, अत एवास्मिन् पत्तने समायातेन शृङ्गगिरिपीठाधिष्ठितेन शंकराचार्यनृसिंहभारतीस्वामिना—इमानुद्दिश्येत्थमुपदिष्टम्—भवद्भिः शूद्रसाधुभिः कथमपि कदापि संस्कृतभाषायाः संस्कृतवेदोपनिषद्गीतादिग्रन्थादीनामध्ययनादिकं नैव कर्तव्यम्, किन्तु प्राकृततामिलभाषाग्रन्थादीनामेवाध्ययनं कर्तव्यम्, अन्नत्यान् ब्राह्म-

णाँश्चोद्दिश्योपदिष्टं तेन जगद्गुरुणा—'शूद्रप्रतिष्ठितं लिङ्गं ब्राह्मणो नैवार्चयेत् ।' इत्यादिशास्त्रप्रमाणमभिधाय शूद्रप्रतिष्ठितस्य महादेवस्यापि शूद्रत्वात्, तन्नमस्कारपूजनादिकं कथमपि ब्राह्मणै नैव कर्तव्यमिति ।

अस्माभिस्तदोपहासरूपेण—तुल्यन्यायेन - शूद्रसमर्पितद्रव्यग्रहीतॄणां शंकराचार्यादीनामपि शूद्रत्वं कथं न सिद्ध्येत् ? यतः शूद्रा अपि चेट्टिश्रेष्ठिनः शंकराचार्यादिब्राह्मणेभ्यः सुवर्णमुद्रादिरूपां प्रभूतां दक्षिणामौदार्येण ददते, ते त्वतिप्रेम्णा तां परिगृह्णन्ति, इति भवताऽधुनैवोक्तमिति ।

तदाऽस्माभिः— आश्चर्येण पृष्टमिदं-वयन्तु-पावनगंगातीरवासिन औदिच्याः स्मः, अतो दाक्षिणात्यानामत्रत्यानां समग्रं वृत्तान्तं न विद्मः, किमत्र भवदीये देशे शौर्यप्रकृतिकाः क्षत्रियाः, धनादिसम्पन्नाः वाणिज्यादिकुशलाः वैश्याश्च न सन्ति । अस्माकमुत्तरभारते तु क्षत्रियाः वैश्याश्चापि विद्यन्ते । अस्माभिस्तु श्रुतमवलोकितञ्च चेट्टिसंज्ञकाः सन्ति धनादिसम्पन्नाः वैश्याः श्रेष्ठिन एवेति । तेन पण्डितेन सहसोक्तम्—ते न सन्ति वैश्याः किन्तु शूद्रा एव । अतो भवद्भिः– अत्र कदापि न स्थातव्यम्, अन्यथा भवत्स्वपि शूद्रत्वादिकं सेत्स्यति । एवमुक्त्वा स ततो जगाम ।

पश्चादस्माभिः—तन्मठाध्यक्षाय महन्तसंज्ञकाय महात्मने तदुक्तं सर्वं निवेदितम् । रोषान्वितेन तेनाध्यक्षेण सः पण्डिताध्यापकः स्वसमीपे समाहूतः—पृष्टं किं भवता महामण्डलेश्वरस्वामिनः प्रतीत्थमभिहितमिति । तेन भयभीतेन ब्राह्मणब्रुवेण सहसाऽनृतमेवोक्तं–'नैव नैवेत्थं मयोक्तं–शपथेन वच्मीति ।'

तमादाय स महन्तमहात्माऽस्मत्समीपमागतः—अस्माभिः कथितं-कथमनृतं त्वयोच्यते ?, परन्तु भयभीतहृदयोऽनृतवादी लज्जयाऽधोमुखः सः पुनः पुनः क्षमाप्रार्थनामेवाकार्षीदिति ।

अस्माभिस्तदा विचारितम्—शौर्यादिसम्पन्नानां क्षत्रियाणामभावे कथं प्रियराष्ट्रस्य स्वातन्त्र्यरक्षणादिकं प्रभवेत् ? धनादिसम्पन्नानां वैश्यानाञ्चाभावे कथं प्रशस्तस्यास्य देशस्य दारिद्र्यं निवर्तेत ?। कीदृशोऽयमध्यापकः पण्डितः—स्वराष्ट्राभ्युदयविमुखो मिथ्याऽभिमानी, सः किलानृतकथनादिना स्वराष्ट्रस्य पारतन्त्र्यदारिद्र्याधिलक्षणमनिष्टजातमेवाभिरक्षितुं प्रवर्तेत इति ।

गुर्जरदेशावलोकनम्

एवं गुर्जरदेशोऽस्माभिः— अवलोकितम्— आणंदस्टेशने केचनभक्ताः श्रेष्ठिपटेलादिसंज्ञकाः— महात्मदर्शनाय समायाताः, 'ॐ नमो नारायणाय' इति मन्त्रोच्चारणपूर्वकान् श्रद्धाढ्यान् नमस्कारान् महात्मभ्यः कृत्वा यदा जग्मुः, तदा तस्यां रेलगाडी-डब्बायामस्मत्समीपे स्थितः कश्चन ब्राह्मणब्रुवः सीगरेटधूम्ररसप्रियस्तेषु गतेषु भक्तेषु घृणाभावं प्रकटयन् अवादीत् 'शूद्राः इमे ॐ कारमन्त्रस्योच्चारणं कुर्वन्तीति ।' अस्माभिस्तदोक्तम्—भवता कोऽध्यवसायः क्रियते ?, वेदाध्ययनं च कृतं न वेति । तेन कथितम्—अस्मिन् रेले इतस्ततो गमनागमनादिकं विधाय यात्रिजनटिकटान्वेषणादिकं कार्यमर्थात् रेलकुम्पनीनौकरीं करोमि, चत्वारः सन्ति वेदाः इत्येवं जानामि कुत्र वेदग्रन्थाः मिलन्ति ? इत्यपि न जानामि, अतस्तदध्ययनं किं दर्शनमपि

न मया सम्पादितं मया किं मम पित्रा पितामहेनापि च वेद-ग्रन्थदर्शनं न कृतमिति। तद्वचनं श्रुत्वाऽस्माभिस्तदाऽभिहितमिदं-'भवदीयो बाणो भवन्तमेव प्रहरती' ति न्यायेन प्रतिषिद्धां श्व-वृत्तिं नौकरीं कुर्वाणस्य - 'अनधीत्य द्विजो वेदान् अन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥' इति मानववचनप्रमाणानुरोधेन वेदाध्ययनविमुखस्य निषिद्धसिगरेटधूम्रपानरतस्य च भवतः कथं ब्राह्मणत्वमवतिष्ठेत ? बलाच्छूद्रत्वमेव सिद्धयेत् इति। सत्संगरताः धर्मनिष्ठाः वेदान्तश्रवणप्रियाः विद्याधनादिसम्पन्नाः सदाचाराः कथं नु शूद्राः भवेयुरिति च। तच्छ्रुत्वा सो मिथ्याभिमानी ब्राह्मणब्रुवः प्रभूतां लज्जामन्वभवत्। मौनं गृहीत्वा सोऽन्यं स्थलमगात्।

गुर्जरद्राविडादिदेशे देवपूजायज्ञादिविषये पूजकयाज्ञिक-पण्डितानां विषमभेदभावाः इत्थं दृष्टाः—ब्राह्मणेतरगृहेषु ते ॐ मन्त्रस्य स्थाने 'ह्रीं' मिति तान्त्रिकबीजमन्त्रं ब्रुवते, न वैदिकं प्रणवमन्त्रम्। एवं यज्ञस्थलेऽपि ब्राह्मणेतरयजमानमभिवीक्ष्य तस्य यज्ञं पौराणिकश्लोकान् नतु वेदमन्त्रान् उच्चार्यैव कारयन्ति। डाकोरतीर्थक्षेत्रे-याज्ञिकाः ब्राह्मणाः तद्यजमानेषु शूद्रत्वं समारोप्य—यतो यजमानाः कथमपि शूद्राः न भवन्ति, शूद्रेषु यजमानतायाः शास्त्रप्रतिषेधश्रवणात्, सप्तशतीग्रन्थस्य दुर्गादेवीमहिम्नो बोधकान् 'दुर्गे स्मृता हरसि भीतिमशेषजन्तोः' 'मेधासि देवि ! विदिताखिलशास्त्रसारा, दुर्गाऽसि दुर्गभवसागरनौरसंगा।' इत्यादिकान् श्लोकान् संगीतोच्चस्वरेणाभिधाय महाविष्णुयज्ञस्य पूर्णाहूतिं कुर्वाणाः अवलोकिताः। वैदिकपुरुषसूक्तविष्णुसूक्तश्रीसूक्तहिरण्यगर्भसूक्तादीनां पठनं शूद्रश्रवणभीति-

सर्वंयाज्ञिकमुखपाठाभावादिना हेतुना नैवाकार्षुः। अस्मिन् यज्ञे किं केन संगतमर्थात् सर्वमसंगतमेवावलोकितम्। यतो यज्ञाधिष्ठाताऽस्ति महाविष्णुः परन्तु ते याज्ञिकाः देवीं दुर्गामभिष्टुवन्ति, यजमानो विष्णुप्रीत्यर्थंद्रव्यव्ययकर्ता वाञ्छति 'अनेन यज्ञेन ममेष्टदेवो महाविष्णुः प्रसीदतामिति' परन्तु तत्स्तुत्यभावात् कथं महाविष्णुः प्रसीदेत ? यतोऽविधिनाऽसंगतं कृतं सर्वं निष्फलमेव सम्पद्यते ।

विदेशीयाः म्लेच्छाः अंग्रेजजर्मनादिशब्दवाच्याः कामं वेदान् पठन्तु नाम, समालोचयन्तु मुद्रापयन्तु च, इत्यत्र तेषां ब्राह्मणब्रुवाणां कथमपि नास्ति कश्चन प्रतिकारः। वराकास्ते प्रतिकारं कर्तुं कथं हि शक्नुयुः ?। परन्तु स्वगृह एव स्वदेशधर्मबन्धून् श्रद्धालून् यजमानत्वेनाऽभिप्रेतान् प्रत्येव तेषामस्ति वेदश्रवणादेः प्रतिषेधः किमाश्चर्यमतःपरम्। मौढ्यस्य पक्षपातस्य च पराकाष्ठाऽवलोक्यते ।

इत्येवं हिन्दुसमाजसंघट्टनसमभावैकभावस्नेहसद्भावादिविध्वंसकाः गर्हणीयाः विषमभावाः घृणाभावाश्च यत्र तत्र भूयांस उपलभ्यन्ते, ग्रन्थविस्तरभिया तान् अत्रोल्लिखितुं न शक्नुमः।

स्वतन्त्रभारतसर्वंकारस्यास्ति संप्रति सर्वोदयायोच्चावचज्ञातिबन्धूनां समानरूपेण शिक्षणरक्षणव्यवसायादिक्षेत्रेषु यथेच्छं शोभनं संयोजनम्।

अयमस्ति किल समुदारनिष्पक्षपातमनसां सर्वजनहितेरतानां महानुभावानां कृते महान् हर्षस्यावसरः। यतः समग्र-

भारतीयजनतया विनिर्मितः स्वतन्त्रः सर्वकारः संप्रति सर्वेषा-मुच्चावचज्ञातित्वेन निर्दिष्टानां समानरूपेणाभ्युदयाय स्कूलकोले-जादिशिक्षणालयेषु समानं शिक्षणं ददाति। तत्र कश्चन भेद-भावो विषमभावश्च नावलोक्यते। कामं तत्रत्यः छात्रो विद्यार्थी ब्राह्मणादिज्ञातीयः स्यात् यद्वा हरिजनादिज्ञातीयः स्यात्, यः कोऽपि भवेत्, एकस्मिन्नेव पङ्क्तौ स्थित्वा समानाध्यापकेभ्यः स्वस्वयोग्यतानुरूपं सर्वेऽपि शिक्षिता भवन्ति। एवं यं कमपि व्यवसायं स्वस्वयोग्यतारुच्यनुसारेण कर्तुं शक्नुवन्ति। तत्र नास्ति कश्चन प्रतिरोधः। विद्याक्षेत्रमङ्गीकृत्य कामं शिक्षकाः अध्यापकाः प्रोफेसरा भवन्तु नाम। राजनीतिक्षेत्रमभ्युपगम्य शासकाः मन्त्रिणो न्यायाधीशाः वाक्कीलबेरिस्टरकलक्टरगवर्न-रादयश्च भवन्तु। बलक्षेत्रं स्वीकृत्य यथेष्टं शस्त्रास्त्रादिनिपुणाः भूत्वा संरक्षका मिलिटरीजनाः भवन्तु नाम। एवं वाणिज्यवि-विधपदार्थोत्पादनादिक्षेत्रं स्वीकृत्य श्रेष्ठिन उद्योगपतयो धान्या-द्युत्पादकाः कृषिबलाश्च यथेष्टं भवन्तु। मिलकारखानादौ गत्वा श्रमिणो भवन्तु, अन्यमपि व्यवसायं चित्रकलासिनेमासंगीत-नृत्यवस्त्रशिवनादिकं यथेष्टं कुर्वन्तु नाम। नास्ति तत्र तत्तदुच्चा-वचज्ञातिप्रयुक्तः कश्चन प्रतिषेधः। स्वेच्छां स्वयोग्यतामेव चाभिलक्ष्य विदधतु तत्तद्व्यवसायं वर्गहीनसमाजवादप्रियाः भार-तीयाः, इत्यस्ति स्वतन्त्रभारतसर्वकारस्य घण्टाघोषः।

इदमपि तावन्न्यायसंगतमेव प्रतिभाति—यदा ब्राह्मण-ज्ञातीयः शर्माबूटफ्रेक्टरीं निर्माय चर्मादिनिर्मितपादत्राणादिलक्षणं चर्मकारव्यवसायं परिगृह्णाति, तदा हरिजनज्ञातीयो ब्राह्मणव्यव-सायं मन्दिरपूजनकथावाचनशिक्षणादिकं कथं न गृह्णीयात्?।

'त्वया मे लुञ्चितौ पक्षौ, मया ते मुण्डितं शिरः ।' 'कृते च प्रतिकर्तव्यमेष धर्मः सनातनः ।' इत्यादिकानि तुल्यन्यायविद्योतकानि भूयांसि प्रमाणानि जाग्रति, इति विद्वांसो निष्पक्षपाताः विदांकुर्वन्त्वेव ।

मरुद्गणाः श्रेष्ठमानवा अपि भवितुमर्हन्ति

भगवत ऋग्वेदस्य बहुषु सूक्तेषु मरुद्गणानां वर्णनमुपलभ्यते । तत्र मरुत्सूक्तेषु कृतं श्रेष्ठानां प्रज्ञावतां वीराणामैश्वर्यवतां पुरुषार्थपरायणानां सौजन्यशालिनामाख्यानमिव तेषां महानुभावानां मरुतां वर्णनं नितरामाह्लादमुद्भावयति । अत एव निरुक्ते 'कल्याणकर्माणो वा कल्याणप्रज्ञा वा' (नि० ११।१४।१) मरुतः सन्तीति व्याख्यातम् । ऋग्वेदीयाः मरुद्गणाः सन्ति ज्येष्ठकनिष्ठादिविषमभावरहिताः मिथोभ्रातृभावयुक्ताः । इमे सर्वे विश्वपितुर्भगवतो रुद्रस्य समानबन्धुत्वादर्शाः पुत्राः सन्ति । एषां समेषां सुन्दराः आकृतयो विद्यन्ते, समानानि रूपाणि, समानाः वेषभूषाः, समानाः व्यवहाराः, समानानि हृदयानि च । एते सर्वे सन्ति विशिष्टप्रज्ञाशालिनः परिष्कृतधियो धनधान्याद्यैश्वर्यवन्तः परिश्रमनिष्ठाः शत्रुध्वंसकाः शूरवीराः विजेतारोऽपराजिताश्च । ते किल तत्तत्कल्याणकर्मसु मनआनन्ददायिनीं निरवद्यां क्रीडां समाचरन्ति । ते ही कर्मसंभारैः समुद्विग्नतां नानुभवन्ति । मानवजीवने मनोरञ्जनस्यापि विशिष्टं स्थानं ददते । इमे मरुतो निर्भयाः सिंहा इव गर्जन्ति । दुर्मदा गजा इव मनोहरगत्या चलन्ति । शक्तिशालिनोऽश्वा इव इतस्ततो धावन्ति । दर्पवन्तो वृषभा इव सुन्दराः स्वच्छाः मोहकाश्च सन्ति । सूर्य इव तेजस्विनः, चन्द्र

इव प्रसन्नाः आह्लादकाश्च विद्यन्ते। शुक्लवर्णा हंसा इवाकाश-संचारियानेभ्यो भूमाववतरन्ति। धनवन्तो युवान इवैते तत्तदुत्स-वेषु प्रयान्ति, विविधैरुपहारैः सर्वान् मादयन्ति। ते प्रियां वनितां कामयन्ते। परमेश्वरस्तुतिगानमिव युद्धगानं प्रियमेषाम्। सङ्घं निर्माय यात्रां कुर्वन्ति, शत्रुभ्यो दुष्टेभ्यः प्रहारान् शत्रुप्रदेशेषु आक्रमणानि चाचरन्ति। सज्जनसमाजे प्रीतिं दुष्टसमाजे भीतिं च जनयन्ति। ते खलु वस्त्राणि शुक्लानि केशरवर्णानि च शुद्धानि परिदधते। विविधानि तीक्ष्णायुधानि दुष्टदमनाय धारयन्ति, अलङ्कारैः स्वपुष्टशरीराणि दीपयन्ति। एते मरुतः समानभावाः सन्तः एकस्मिन् देवसदने निवसन्ति। एते किल निर्मलप्रज्ञानवन्तः कवयो मधुरशोभनजिह्वाः मित्रनन्दनाः सन्ति, भैषज्यविज्ञाः छिन्नं भिन्नं वाऽङ्गं प्रपूरयन्ति। मरुतः शिरस्त्राणं धारयन्ति, कौशेयमूष्णीषमपि शिरसि बध्नन्ति। येषां विविधा रथाः स्थले, गगने, पर्वते, जले च सर्वत्रैव संचरन्ति। अश्वाश्च साधिताः सुशिक्षिताश्च भवन्ति। शिल्पविद्यानिष्णाता ऋभवः खल्विमे मनु-जधर्माणोऽपि देवजनकृपया देवराष्ट्रनागरिकाः भवन्ति। शोभ-नकृषिकर्माणः प्रभुतखाद्यपदार्थोत्पादनेऽतीवदक्षाः गोपालकाश्च सन्तोऽन्नादिदानेन प्रशस्तां कीर्तिं वर्धयन्ति, सर्वान् आनन्दयन्ति च। हीनभावनारहिताः लघुताग्रन्थिशून्याः सन्तः त इमे शान्तिसुख-सम्पन्नाः गौरवाढ्याः वर्तन्ते। एते सदैव प्रज्ञाशालिभिः श्रेष्ठैः सद्भिः सह सङ्गतिमिच्छन्ति। विश्वजनहितैषिणश्च सन्तः सदैव शुभे कर्मणि युञ्जन्ति। मातृभूमिं गां प्रति च मातृतुल्यां प्रीतिं कुर्वन्ति। अमृतमयं स्वाराज्यसुखं लभन्ते, अनुशासनं प्रियमेषाम्। कस्मैचिदपि-अन्याय्यं नैव कुर्वन्ति, नान्येषां लेशतोऽप्यन्याय्यं

सहन्ते ।

हसामुदः मरुतो वीणावादनेऽपि कुशलाः सन्ति । एकतस्तेषां ताः कोमलमधुरस्वराः वीणाः सुकुमारभावं, अन्यतश्च सुधन्वनामिषुमतां निषङ्गिणां वीराणां कान्तिमन्त्यायुधानि तानि वज्रबाहुताश्च प्रबोधयन्ति । अत एवैतेषां प्रकृष्टस्य स्नेहस्य शौर्यस्य च परम्परा मनोहारिणी विद्यते ।

एतेषां शरीराणां पुष्टिं स्फूर्तिं सौन्दर्यञ्च वीक्ष्येदं वक्तुं वा निर्णेतुं वोचितं प्रतिभाति विदुषां यत् - तदा मृङ् धातुः कान्तौ-आह्लादकारिण्यां शोभायां वर्तमान आसीत् । 'युद्धे विशारदाः शस्त्रपाणय एते स्वराष्ट्रस्य स्वसमाजस्य स्वधर्मस्य च रक्षणाय मरणे मारणे च तत्पराः सन्तिः, अतो मरुतो भवन्ति' इति विज्ञाय तादृशं तच्चरितञ्च निभाल्य वैयाकरणो महर्षिः पाणिनिः तेषां निर्वचनाय मृङ् प्राणत्यागे धातुः स्मरति ।

यतो मरुत्सूक्तेषु बहवो मन्त्रास्तेषां सौन्दर्यं साजसज्जा-भूषणादिकञ्च निरूपयन्ति, अतो विनिश्चीयते—कदापि काले मृङ् धातुः कान्तावपि स्यात् । यस्मान्निष्पन्नो मारशब्दः सांप्रतमपि प्रकृष्टसौन्दर्यलावण्यार्थबोधके कामदेवे वर्तते, अतो निघण्टौ स्वर्ण-नामसु रूपशौन्दर्यनामसु च मरुच्छब्दः समाम्नायते ।

तत्र 'के सन्ति मरुतः ?' इति विचारावसरे यास्को महर्षिः कथयति – 'मरुतः प्रथमगामिनो भवन्ति, मरुतो मित-राविणो वाऽमितरोचिनो वा' (नि० ११।२।१) इति । अर्थात् प्रकृष्टोत्साहशक्तिप्रज्ञाशालिनो मरुतः कल्याणकर्मसु प्रथमगामिनः =अग्रगामिनो भवन्ति । एतेन तेष्वालस्यप्रमादादिकं नास्तीति, तत्तत्कर्मकरणाय श्रमदानतत्पराः भवन्तीति च ज्ञायते । 'महा-

न्तो मितभाषिणः' इति न्यायेन तेषां मरुतां मितरावित्वं, स्वनिष्ठशोभनगुणकर्मप्रयुक्तं प्रशंसनीयं महत्त्वमभिव्यनक्ति। संयमेन, सदाचारेण, सत्यन्यायोपेतव्यवहारेण, सन्तोषेण, सात्विंकमनःप्रसन्नतापौष्टिकसात्त्विकाहारसेवनव्यायामादिहेतुभिश्च तेषां वदनादिषु विशिष्टप्रभावव्यक्तित्वाभिव्यञ्जकममितरोचित्वं प्रतीयते।

अत एव शतपथतैत्तिरीयब्राह्मणादिषु—'प्राणा वै मारुताः (श० ब्रा० ५।४।३।१७) 'विशो मरुतः' (श० ब्रा० २।५।२।६) 'कीनाशा आसन् मरुतः' (तै० ब्रा० २।४।८।७) इत्यादिकं व्याख्यातम्। यत्र किल संयमादिना साधनेन प्राणशक्तिः प्रबला स्वस्था प्रसन्ना च विद्यते, ते हि मरुतो भवन्ति, विशः = मनुष्याः मरुतः सन्ति। यतो निरुक्ते मनुष्यनामसु 'मनुष्याः नरः विशः' (नि० ३।७।१) इत्युक्तम्। 'विशे विशे यज्ञियाय' (ऋ०-१।२।२३) इति ऋग्मन्त्रेऽपि विशे=मनुष्याय इति सायणदुर्गाचार्यादिभि र्व्याख्यातम्। कीनाशाः = कृषिकर्मतत्पराः कर्षकाः श्रमिण इत्यर्थः।

इदमत्रावधेयम् — अनेकविधप्रमाणबलेन भवन्तु नाम मरुतः केचन देवगणाः स्तुतिभिः प्रसादनीयाः, तथापि पूर्वोक्तप्रमाणसद्भावात् - 'मरुद्गणाः श्रेष्ठमानवा अपि भवितुमर्हन्ती'ति शीर्षकं समुचितमेव मन्ये। तथा च भगवतो वेदस्य वर्ण्यमानं बहुमुखत्वं, भूदेवाः, जनदेवाः, धनदेवाः, श्रमदेवाः, देववाणी' इत्यादिप्रयोगेषु श्रेष्ठान् मानवानुद्दिश्य कथ्यमानं देवत्वञ्च सुतरामुपपद्यते। देवत्वपक्षेऽपि तेषां पूज्यानां देवानां प्रशंसनीयचरितस्य तदनुयायिभि र्मानवैः समनुकरणं विधाय स्तुत्यः सर्व-

मानवोदयः प्रसाधनीयः इति मरुत्सूक्तेभ्यस्तादृशीं प्रशस्तां शिक्षां समादाय 'मनुष्याधिकारत्वाच्छास्त्रस्य' इति वचनस्य सार्थक्यं विधेयम् ।

अतएव यास्कीये निरुक्तेऽपि – 'एको याज्ञिकपक्षः, द्वितीय आख्यानपक्षः, तृतीय ऐतिहासिकपक्षः, चतुर्थोऽध्यात्मपक्षः, पञ्चमश्च नैरुक्तपक्षः' इत्येवं पठ्यमानाः विविधाः पक्षाः वेद-मन्त्राणां महनीयं गौरवं प्रदीपयन्ति । इति सर्वमनाविलम् ।

धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः सः पन्थाः।

समयपरिवर्तनानुरोधेन मानवजीवनव्यवहारप्रकारा अपि पविर्तन्ते इति प्रत्यक्षमेतत् । अत एव देशकालवयोऽवस्थाबुद्धि-शक्त्यनुरूपतो भैषज्यमिव धर्मोपदेशोऽपि परिवर्तते । अतो धर्मो-ऽप्यभिनवं परिष्कृतं रूपं परिगृह्णाति । वस्तुतः स एव धर्मो वेदितव्यः, यः किल मानवानां व्यक्ति-परिवार-समाज-राष्ट्र-विश्वजीवनगतं विविधं सर्वजनसम्मानहितप्रयोजकमभ्युदयं वित-नोति । 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' (वैशेषिकसूत्रं २) इति प्रामाण्यात् । अतः समाजजीवनाभ्युदयानुकूलतयैव धर्मो नवनवाभिरूपैः सर्वत्र सदा प्रतिभाति ।

प्राचीनाः धर्मग्रन्थाः भवन्तु नाम महत्त्वशालिनः । तथापि तेषां वचनैः विवेकज्ञाननेत्राण्यपिधाय मूढग्राहेण देशकालादि-प्रतिकूलतयाऽपि चाभ्युदयविरुद्धो विकटो मार्गो नावलम्बनीयः। यथा डॉक्टराः औषध्यादिषु विविधं संशोधनं विधाय चिकित्स्य विविधरोगपरीक्षणप्रयोजितं विविधानुभवञ्च सम्पाद्याभिनव-चिकित्साप्रकारान् परिगृह्णते, वितन्वते च। तथैव महद्भिः सद्भि-

विद्वद्भिः समाजराष्ट्रहितसाधनतत्परैः प्राचीनवेदादिधर्मग्रन्थे-तिहासपुराणादीनि च समभ्यस्य, देशकालपरिस्थित्यादीनि चाभिवीक्ष्य विवेचकहितबुद्धया विविधाभ्युदयसमर्पकाः अभिनव-धर्मप्रकाराः समुपदेष्टव्याः प्रचारयितव्याश्च। अभ्युदयकामेन समाजेनापि—

पुराणमित्येव न साधु सर्वं, न चापि नूनं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः॥'

इति कविकुलगुरुणा श्रीकालिदासेन प्रदर्शितो मध्यम-मार्गः परीक्ष्य परिगृहीतव्यः। को धर्मः कश्चाधर्मः, का संस्कृतिः का च विकृतिः, इत्यादे विनिर्णयः पूर्वापरनिरीक्षणेन निष्पक्ष-विद्वदनुमत्या च सम्पादनीयः। अन्धश्रद्धावशात् कश्चन विवेचक-बुद्धिशून्यो मानवो देशकालादिप्रतिकूलं पन्थानमभ्युदयविरुद्धमपि धर्मबुद्धया परिगृह्णाति। कश्चन दुराग्रही च मौढ्यमत्या यदहं करोमि, वदामि च, तदेव धर्मवचनाभिप्राय इत्यप्यभिमनुते। परन्तु विवेचकबुद्धिशाली शिष्टस्तु प्रतिकूलप्राचीनधर्मग्रन्थवचने-ष्वन्धश्रद्धामपि न बध्नाति। न च दुराग्रहादिवशात् यद्वा तद्वा समाजसमयपरिस्थतिविरुद्धं किमपि वदति न च करोति। अत एव शिष्टैर्निष्पक्षैर्विद्वद्भिः - 'धर्मस्य तत्त्वं निहितं गुहायामि' त्युक्तम्। न तु कथितं धर्मरहस्यं केवलं प्राचीनग्रन्थवचनेष्वेव निहितमित्ति। अर्थात् निष्पक्षनिरवद्यविवेचकसद्बुद्धिगुहास्वेव तदवस्थितमिति विज्ञेयम्। राष्ट्रसमाजहिततत्पराः महान्तो जनाः येनानुकूलेन संकटहरेण सुखसम्पत्करेण मार्गेण गताः, स एव धर्मपन्था भवतीत्युपदिष्टम्। सति चैवं हितशासकानि शास्त्राणि केवलं प्राचीनग्रन्थवचनान्येव न मन्तव्यानि, किन्तु सर्वोत्कृष्ट-सर्वोदयसाधक-धर्मभावनातः प्रकटितानि वर्तमानसम-

यानुकूलपरिस्थित्यनुरूपाणि तटस्थनिष्पक्षानुभवशालि-समाज-कल्याणहितचिन्तक-शिष्टविद्वज्जनानां सूचनान्येव शास्त्राणि वेदितव्यानि । अत एवोक्तं– 'श्रुतयोऽपि भिन्नाः स्मृतयोऽपि भिन्नाः, नैको ऋषिर्यस्य मतं न भिन्नम् ।' इति । अनेन क्वचित् क्वचित् श्रुत्यादिशास्त्रवचनानि प्राचीनानामृषीणामपि च वचनानि मिथो विरुद्धानि प्रदर्श्य सुन्दोपसुन्दन्यायेन सन्ति तानि परस्परमुपहतानीत्यर्थात्कथयित्वा धर्मस्य तत्त्वं महाजनानां निर्मलहृदयगुहायां सत्परिष्कृतविचाररूपेणावस्थितमित्युपदिष्टम् :

यथा प्राचीनवेदादिधर्मग्रन्थेषु यज्ञश्राद्धादीनि कर्माण्युद्दिश्य तत्र अग्निषोमीयं पशुमालभेतेत्यादिभिः विविधपशुमांससमर्पण-भक्षणादिकं विहितम् । पश्चात् –'पञ्च पञ्चनखाः भक्ष्याः ब्रह्म-क्षत्रेण राघव ! ।' (वा० ४।१७।३९) इति तदन्यनिवृत्त्याभिप्रायेण काचन मर्यादा बोधिता । ततः पश्चात्–'मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्‌म्यहम् । एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥' (म० स्मृ० ५।५५) इत्यादिना सर्वत्र मांसभक्षणादौ प्रभूतमनर्थं प्रदर्श्य–'अहिंसा परमो धर्मः' इत्युद्घोष्य सर्वथा यज्ञादावपि तत्प्रतिषेधो विहितः ।

प्राक्कालिकाः–अस्मत्पूर्वजाः इन्द्रादिपदवाच्याः ऋष्यादिपदवाच्याश्च गान्धारत्रिविष्टपाद्यतिशीतप्रदेशेषु वर्तमानाः– 'उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् । उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे, विश्वस्मादिन्द्र उत्तरः ॥' (ऋ०-१०।८६।१४) 'शुनः आन्त्राणि पेचे' (ऋ० ४।१८।१३) इत्यादिवेदादिवचनेभ्यो विविधपशुमांसं पप्सुः इति विज्ञायते । 'यज्ञार्थं पशवः सृष्टाः' इति धर्मवचनं पुरस्कृत्य सर्वपशुहिंसनं धर्मतया

च मेनिरे ।

अत एवेन्द्रविजयकाव्ये पण्डितप्रवरेण मैथिलेन मधुसूदनेन – 'इन्द्रोऽयमसुरकन्यागर्भज एतस्य पत्नी च । अस्ति पुलोमाऽसुरजा तत इन्द्रोऽश्नाति गोमांसम् ॥' इत्युक्तम् । अर्थात् देवेन्द्रस्य माताऽपि - असुरकुलजा विकुण्ठा, तत्पत्नी चेन्द्राणी पुलोमासुरजाऽस्ति । प्राक्कालिकाः देवाः ऋषयश्चासुरकन्याः पत्नीत्वेन परिजगृहुः । अतः आसुरभावसमन्वितमातृभार्यासम्बन्धेनेन्द्रस्यापि गोमांसभक्षणं पूर्वोक्तवेदवचनेनावगम्यते । अनेन विभिन्नजातीयानामपि प्राक् विवाहसम्बन्धः प्रवर्तमानोऽभूदिति विज्ञायते ।

अपि च 'अग्निषोमीयं पशुमालभेत' इति प्राचीनतमवेदब्राह्मणवचनमनुरुध्य यदि कश्चनाद्यतनो मानवः अग्निषोमदेवताप्रसन्नतामुद्दिश्य कमपि यज्ञं कृत्वा पशुहिंसनलक्षणमालम्भनं कुर्यात्, तदा वर्तमानकालिकाः शिष्टाः लोकाश्च तं धार्मिकं स यज्ञो धर्ममयोऽस्तीति च कथमपि नैव मन्वते । प्रत्युत तं जनं यज्ञञ्चोद्दिश्य हिंसारूपपापप्रयोजकत्वेन निन्दन्ति । प्राचीनास्तु 'अशुद्धमिति चेन्न शब्दात्' (ब्र० सू० ३।१।२५) इति ब्रह्ममीमांसोक्तन्यायेन तत्र हिंसारूपाशुद्धिमपश्यन्तस्तं यज्ञे पशुहिंसकं निरवद्यतया प्रशशंसुः, इति प्राचीनार्वाचीनलोकशिष्टमतयो मिथो वैपरीत्यमेवावलोक्यते ।

एवं महाभारतादिशास्त्रेषु–सर्वासां स्त्रीणां स्वतन्त्रतया कामाचारविहारस्य स्वच्छन्दतो हासपरिहासविलाससहवासादिलक्षणस्य सनातनधर्मतया प्रतिपादकेन– 'स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः ।' (म० भा० आ० प० १२२।८) इति

वचनेन, सप्तानामृषीणां युगपदेव पतित्वेन ग्रहणं कुर्वन्तीं, गौतमगोत्रोत्पन्नां जटिलानाम्नीं, अनेकपतिसम्बन्धवतीं वार्क्षी-समाख्यां नारीञ्च दृष्टान्तीकृत्य द्रुपदराजकुमार्याः पाञ्चाल्याः अपि पञ्चपतिसम्बन्धमुपादेयतया धर्मविदामग्रगण्यः सत्यवादी महाराजो युधिष्ठिरः प्रतिपादयामास । द्रौपदीपित्रे महाराजाय च निखिलविद्वच्छिरोमणि भगवान् कृष्णद्वैपायनव्यासोऽपि च तादृशसम्बन्धं सनातनधर्मतया च 'ततो द्वैपायनस्तस्मै नरेन्द्राय महात्मने । आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता ।' (म०-भा० आ० प० १९८।२३) इति वचनेन समर्थयामास ।

संप्रति तद्वचनानि प्रमाणतयाऽभ्युपगम्य तत्तच्छास्त्र-वचनेषु श्रद्धाविश्वासौ विधाय यदि काचित् कश्चनश्चैवं व्यव-हारं कुर्यात्, तदा लोकाः शिष्टाश्च ताञ्च तञ्च महानर्थकर-प्रभूताधर्मकर्तृत्वेन गर्हयन्ति । शास्त्रप्रमाणतयोपदिष्टमपि तं कथमपि विवेचकबुद्धिशालिनो लोकाः गर्हणीयतमत्वेन हेतुना न परिगृह्णन्ति । यतस्तत्तत्त्वस्याधुना शिष्टजनबुद्धिगुहायामन्निहि-तत्वात् ।

एवं कतिपयव्यवहारप्रकाराः वेदभारतादिकाले धर्मतया समीचीना आसन् । पश्चात् तत्त्वदर्शिभि र्महर्षिभिस्ते व्यवहार-प्रकाराः देशकालपरिस्थित्यादिप्रतिकूलत्वेन हेतुना कलिवर्ज्य-तया प्रतिषिद्धाः बभूवुः । तेषु संन्यासाश्रमोऽपि प्रतिषिद्धोऽभवत् । ततः पश्चात् महानुभावै र्बुद्धशंकराचार्यादिभिस्तस्य प्रतिषिद्धस्य प्रोत्साहनं कृत्वा ततो विविधलाभमनुसन्धाय कलौ युगेऽपि धर्म-तया विधानं कृतम् ।

प्राचीनार्वाचीनमतवादगुणदोषसमीक्षणं कर्तव्यम्

अतः पूर्वोक्तस्य सर्वस्य संदर्भस्य समीक्षयेदं तात्पर्यं विदुषामवभाति-यत्-निरवद्यस्य निष्पक्षपातस्य शिष्टजनपरिगृहीतस्य विविधप्रमाणैः परीक्षितस्य राष्ट्रसमाजहितकरस्य धर्मस्य प्रामाण्यन्तु स्वीकर्तव्यम्, परन्त्वन्धश्रद्धया मिथोविरुद्धानां देशकालादिप्रतिकूलानां शास्त्रप्रमाणवचनानां प्रामाण्यं कथमपि नाङ्गीकर्तव्यम् । अतो बाबावाक्यं प्रमाणं न मन्तव्यम्, किन्तु सर्वत्र गुणदोषसमीक्षालक्षणा परीक्षा कर्तव्या । अत एव कश्चन महानुभावो विद्वान् स्वाभिप्रायमेवं प्रकटयति—

'जनोऽयमन्यस्य मृतः पुरातनः, पुरातनैरेव समो भविष्यति ।
पुरातनेष्वित्यनवस्थितेषु कः पुरातनोक्तान्यपरीक्ष्य रोचयेत् ॥
विनिश्चयं नैति यथा यथाऽलसः, तथा तथा निश्चितवान् प्रसीदति ।
अवन्ध्यवाक्याः ऋषयोऽहमल्पधीः इति व्यवस्यन् स्ववधाय धावति ॥'

अयमर्थः—पुरातनः = अतीतः समयो मृतः = विनष्टो बभूव । सः पुरातनानामेव कृतेऽनुकूलो बभूव, नाद्यतनानाम् । अन्यस्य = कालस्य वर्तमानस्य भविष्यतश्चायं जनः तमेव पुरातनं कालं, अर्थात् तत्र प्रवर्तमानव्यवहारान्-अविचार्य गृह्णाति चेत्, तदा सोऽपि पुरातनैः = अतीतै विनष्टै र्जनैः समो मृतो भविष्यति । पुरातनेष्वपि जनेषु विचारादीनां नास्त्येकरूपाऽवस्थितिः, तेषु विविधमतविवादादिदर्शनात् । अतः कः = मतिमान् पुरातनोक्तानि वचांसि अपरीक्ष्य = परीक्षामकृत्वा-गुणदोषविवेचनमकृत्वा रोचयेत् = तत्र रुचिं विदध्यात् न कोऽपीत्यर्थः । स्वयं परीक्षणे विचारे चालसः = प्रमादी, नैति = विनिश्चयं समाजराष्ट्रादि-

हितकरं न प्राप्नोति, अतो निश्चयाभावात् संशयविपर्ययादिग्रस्तत्वाच्च न प्रसीदति, किन्तु समुद्विजते। तथा निश्चितवान्=परीक्ष्य निश्चयशाली विवेकविचाराढ्यः प्रसीदति। यो मूढो जनः एवं मनुते—पुरातना एव ऋषयः अवन्ध्यवाक्याः=सफलार्थबोधकवाक्याः आसन्, अहमल्पधीरस्मि, स्वयं परीक्षितुं विज्ञातुञ्चासमर्थोऽस्मि, एते पुरातना एव महाबुद्धिमन्त आसन्, विशिष्टशक्तिप्रज्ञाशालिनो बभूवुः, वर्तमानकालिकाः सर्वे मन्दबुद्धयः अल्पशक्तयश्च सन्ति, अतस्तैः पुरातनैर्यदुक्तं तत्सर्वं समीचीनमेव, वर्तमानकालिकै र्जनै र्यदुच्यते तत्सर्वं तुच्छमेव विफलमेवास्ति, इत्येवं व्यवस्यन्=विनिश्चिन्वन् स्ववधाय=स्वनाशं स्वसमाजराष्ट्रहानिञ्च कर्तुं धावति। एवं मन्तव्यं विनाशायैव प्रभवतीति भावः। अतो वर्तमानकालिके धर्मव्यवहारप्रकारलक्षणे रथेऽतीतकालिकाः धर्मवचनलक्षणा अश्वाः न योक्तव्याः, किन्तु तत्र वर्तमानकालिकानेव महाजनहृदयगुहाप्रकटित - परीक्षित - निरवद्य-हितकरधर्मव्यवहारप्रकारलक्षणान् प्रशस्तान् अभिनवान् अश्वान् योक्त्वा मतिमताऽभ्युदयलक्ष्यलाभाय तेन प्रयाणं विधातव्यम्। इत्यलं पल्लवितेन

केरलीयब्राह्मणपण्डितानां मौढ्यम्, धूर्तस्य कृश्चियनपादरीसाधोः प्रचारकुचक्रकौशलञ्च।

दक्षिणभारते केरलप्रदेशे त्रिवेन्द्रनगरस्य समीपे 'क्यूलोन' संज्ञकमेकं लघुभूतं रमणीयं नगरं समुद्रतटेऽवस्थितं वर्तते। भारतवर्षे तावत् अस्मिन्नेव नगरे सर्वतः प्रथमः ईसाईधर्मस्य प्रादुर्भावः संजातः। तत्रत्यां प्रचलितां कथां प्रामाणिकमान्यताञ्चानुरुध्य—

'तन्नगरनिवासिनः 'डीनोवेली' नामकस्य कस्यचिदेकस्य धूर्तस्य दुष्टस्य - ईसाईपादरीसाधोः धूर्ततादम्भादिलक्षणेन कुचक्रेण समाक्रान्ताः सन्तः स्वकीयं प्राणप्रियं महान्तं हिन्दुधर्मं परित्यज्य कथ कृश्चियनाः संजाताः ?' इत्ययं ज्ञायमानो वृत्तान्तो केरलीय-ब्राह्मणपण्डितानां मौढ्याद्दूरदर्शित्वेर्ष्याद्वेषादिदुर्गुणानां, क्षमा-कृपौदार्यात्मभावहिन्दुत्वसंरक्षणादिसद्गुणाभावस्य च सूचको महान् रोमाञ्चकारी वर्तते ।

ईसाईधर्मप्रचारकाः विदेशीयाः केरलप्रदेशेऽपि स्वकुत्सि-तधर्मप्रचाराय सर्वत्र सन्नद्धा अभवन् । तस्मिन्नपि नगरे पूर्वोक्त-पादरी स्वमतविस्ताराय समागतः । परन्तु सः स्वोद्देश्यसिद्धये लेशतोऽपि सफलतां नैवावाप । तत्रत्याः सर्वेऽपि स्वधर्मनिरताः लोकाः स्वकीयप्रशस्तवैदिकसनातधर्मस्य श्रेष्ठतायाः समक्षं अन्य-स्य कस्यचिद् धर्मस्य कामपि वार्तां श्रोतुं नैव तत्पराः बभूवुः ।

अन्ते सः धूर्तः पादरी निराशो भूत्वा शिखां यज्ञोपवीतं ललाटे त्रिपुण्ड्रञ्च विधार्य, अहं कश्चन कुलीनः कर्मनिष्ठो भार-तीयः काश्मीरको ब्राह्मणपण्डितोऽस्मि, इति सर्वत्र घोषणाम-कार्षीत् । अतएव तेन किल संस्कृतभाषायाः, तच्छास्त्राणाञ्च पण्डितब्राह्मणेभ्यः प्रभूतं धनं समर्प्य सम्यक् प्रकारेणाध्ययनं कृत्वा-उच्चकोटीयं वैदुष्यं समवाप्तम् ।

तदीयं शास्त्रज्ञानगौरवं देववाण्युच्चारणसौष्ठवञ्च तत्र-त्यानां ब्राह्मणानां विदुषामपि स्वमहत्त्वं प्रत्याकर्षणाय च समर्थं संजातम् । सः खलु ब्राह्मणवेषधारी ब्राह्मणब्रुवो धूर्तः पादरी यत्र तत्रानेकस्थलेऽनेकवारं प्रतिमासं ब्राह्मणपण्डितान् आहूय धार्मिकयज्ञोत्सवप्रवचनसंकीर्तनशोभायात्राप्रसादवितरणादीना -

मायोजनं करोति स्म। तत्र सम्मिलितुं पुण्यलाभं समावाप्तुञ्च दूरस्था अपि धर्मनिष्ठाः श्रद्धालवो हिन्दवः समागमन्। ते हि सरलहृदयाः धर्म-प्रेममग्नाः भूत्वा तस्य धूर्तस्यामृतमयीमधुर-वाण्याः रसास्वादनमलभन्त। पर्याप्तं मिष्टान्नभोजनमपि भगवत्प्रसादरूपेण तेऽवाप्नुवन्ति स्म। अमूल्यसरसभोजनलाभोऽपि तद्दातारं प्रति बलात् श्रद्धाजनको भवत्येव।

इत्येवं तेन धूर्तेन कतिपयसंवत्सरादूर्ध्वं प्रभूतहिन्दुजनानामुपरि स्वकीयशास्त्रीयज्ञानभक्तिकर्मनिष्ठायाः उदारतायाश्चामितः प्रभावः संस्थापितः। स्वं प्रति लोकानां प्रभूतश्रद्धाविश्वास-भावना तेन समर्जिता। सः किल प्रतिदिनं सर्वान् लोकान् स्व-महत्त्वं प्रत्याकर्षितुं-पूजापाठसंध्यागायत्रीजपादिकं दरिद्रेभ्योऽनाथेभ्योऽपि चान्नादिदानमकरोत्, ब्राह्मणेभ्यः प्रभूतदक्षिणाश्चादात्।

यदा तेन स्वमनसि स्वकीयलक्ष्यसफलतायाः प्रकार-निश्चयो विहितः—तदा तस्मिन्नगरे विशालस्य यज्ञमहोत्सवस्यायोजनं कृतम्। तत्र सम्मिलितुं सः प्रभूतसंख्याकान् ब्राह्मण-पण्डितान् समीपवर्तिक्षेत्रेभ्योऽपि तदितरांश्च हिन्दुजनान् आमंत्र-यामास। तदामंत्रणं लब्ध्वा तन्महत्त्वं प्रति जातश्रद्धाः बहवो जनाः समागमन्। यज्ञसमारोहः सप्ताहःपर्यन्तं प्रचलितोऽभवत्। यज्ञस्य पूर्णाहुतिसमये ब्राह्मणादिहिन्दवस्तत्र विविधमिष्टान्नशूप-शाकादिव्यंजनरूपयज्ञप्रसादग्रहणाय समुपविष्टा अभवन्। यदा तेषां भोजनसमाप्तिः संजाता तदा तेन धूर्तेन स्वहस्ताञ्जलिं बद्ध्वा कथितं त्विदम्।

अस्य विशालस्य प्रभूतद्रव्यव्ययसाध्यस्य यज्ञस्यायोजनं कृत्वा भवतां सर्वेषामभीष्टभोजनञ्च कारयित्वाऽहं किल स्वात्मानं

धन्यं मन्ये, सम्प्रति मम जन्मनः साफल्यं जातम् । परन्तु मदीयँ-काऽन्तिमा पुण्यभावनेदृशी वर्तते-यत्-अहं स्वहस्ताभ्यां पक्वशालि-तण्डुलमिश्रितं स्वादिष्टं सुगन्धि पायसं भवद्भ्यः प्रदाय प्रभूत-पुण्यसंचयं कर्तुं वाञ्छामि' इति । इत्युक्त्वा तेन धूर्तेन सर्वेषां भोजनपात्ररूपकदलीपर्णेषु भक्षणाय क्षीरसमर्पणं कृतम् । यदा प्रेमावेशवशीभूताः विश्वासाढ्याः द्विसहस्रेभ्योप्यधिकाः लोकास्-तस्य भक्षणारम्भमकार्षुः । तदा तेन स्वहस्तौ प्रक्षाल्य ब्राह्मण-वेषञ्च परित्यज्य पादरीसाधुवेषञ्च धृत्वा पायसभोजनकुर्वाणान् ब्राह्मणादिहिन्दून् प्रति स्वकीयौ हस्तौ ऊर्ध्वौ कृत्वेत्थं कथितं—शृण्वन्तु भवन्तः सावधानेन मनसा—

भगवान् इशुमसीहो भवतां सर्वेषामुपरि अतीवकरुणा-शाली—आस्ते, भवतां समेषां स्वागताय सः किलातुरनयनाभ्यां प्रेमकरुणामयीं प्रतीक्षां कुर्वन् वर्तते । अतो भवन्तः सर्वेऽपि अत्र भोजनाय समुपविष्टाः अद्यारभ्य तस्यैव पावनं शरणमुपयान्तु । तस्य महतः कृपालोः समुदारं धर्मं गृहीत्वा भवन्तः सद्यः तदनु-यायिनो भवन्तु । तद्धर्मग्रहणेन भवन्तः परमां शान्तिं लप्स्यन्ते, अस्य लोकस्य परलोकस्य च सफलतां प्राप्स्यन्ति' इति ।

पुनस्तेन कपटिनेत्थमुच्चस्वरेणाप्यभिहितम्—'हम भी भाई तुम भी भाई । अपने आपमें सब हैं ईसाई ।' अर्थात् वयमपि भ्रातरो यूयमपि भ्रातरः, मिथःसर्वेऽपि प्रेमपाशसंबद्धाः समान-भावाः ईसामतानुगाः सन्ति । इत्येवं तस्य धूर्तस्य कथनं श्रुत्वा भोजनपङ्क्तौ समुपविष्टाः ब्रह्मणादिहिन्दवः प्रभूताश्चर्यचकिताः भूत्वा तं ददृशुः । तस्येदृशीं दुष्टतां धूर्ततां च विज्ञाय तेषां हृद-याद्यङ्गेषु सपदि प्रभूतस्य क्रोधानलस्य तीक्ष्णा ज्वाला समुद्भूता

अतस्सद्यस्तैर्मुष्टिलगुडादिप्रहारेण तस्य वञ्चकस्य पादरीसाधोः संहारः कृतः। परन्तु तदा तेषां ब्राह्मणादिहिन्दूनां कृते तत्करलब्धपायसभक्षणजन्यविकृतिनिन्दास्वधर्मभ्रष्टतादिरूपाः अनेकाः जटिलाः समस्याः उपस्थिताः बभूवुः। अन्ये च ब्राह्मणादिबन्धवस्तान् तद्दत्तपायसभक्षकान् ब्राह्मणादिहिन्दून् घृणातिरस्कारबहिष्कारमयीदृष्टिभिः अपश्यन्। अकथयँश्च 'यूयं हिन्दुधर्मात् ब्राह्मणधर्माच्च सर्वथा पतिताः अभवत अतो हिन्दुधर्मे भवतां स्थानं नास्ति। हिन्दुधर्मस्य सर्वाणि द्वाराणि भवतां कृते पिहितान्यभवन्, भवत्करस्पृष्टं जलान्नादिकं कोऽपि हिन्दु ग्रंहीतुं नैव शक्नोतीति।

तदा तेषां विनष्टधूर्तपादरीप्रपञ्चजालपतितानां ब्राह्मणादिहिन्दूनां महती दयनीया दशा संजाता। तेऽन्येषां स्वकीयब्राह्मणादिबन्धूनां समक्षं महत् रोदनमकार्षुः, स्वोद्धाराय पुनः पुनस्तान् प्रार्थयामासुः। प्रायश्चित्तार्थं शुद्ध्यर्थञ्चोपायान् पप्रच्छुः। दयाभिक्षाञ्च ययाचिरे।

परन्तु तैः वज्रवत् राक्षसादिवच्च कठोरतमहृदयैः क्षमादयादिसद्गुणशून्यैः महामूर्खैः केरलीयब्राह्मणपण्डितैः तेषां दयनीयानां धूर्तवञ्चितानां स्वब्राह्मणादिहिन्दुबन्धूनामुद्धारस्य सर्वथाऽवहेलना कृता। स्वश्रेणिषु पूर्ववत् तैः तेषां स्थानं नैव दत्तम्। ईसाईक्षीरभक्षणेनेमे सर्वेऽपि हिन्दुत्वात् ब्राह्मणत्वाच्च प्रच्युता सन्तो बलात् ईसाईधर्मे प्रविष्टाः अभवन्। इत्युद्घोषं भेरिनिनादवत् यत्र तत्राकुर्वन्।

B काश्मीरबंगालगुर्जरादिप्रदेशब्राह्मणपण्डितवत् तैरपि स्वकीयानां स्वमित्राणां परकीयत्वस्वशत्रुत्वसम्पादने दक्षत्वं किं ? महामौढ्यं प्रदर्शितम् । हिन्दुधर्मस्य रक्षकास्ते भक्षकाः बभूवुः । अन्ततो गत्वा सर्वथा हताशास्सन्तस्ते ईसाईधर्मस्य शरणमुपययुः ।

एवं स धूर्तः ईसाईपादरीसाधुः स्वप्राणस्य बलिदानं कृत्वाऽपि द्विसहस्रसंख्यातोऽप्यधिकान् ब्राह्मणादिहिन्दून् ईसाई-धर्मे सम्मिलितान् अकरोत् । तेषां तादृशी संख्या तत्र सम्प्रति चत्वारिंशल्लक्षतोऽप्यधिका संजाताऽवलोक्यते ।

B रमणीयः शीतप्रधानो भगवदमरनाथाधिष्ठितोऽनेकविधसुरम्या-रामसरोवरादिसुशोभितः काश्मीरप्रदेशः पुरा वाराणसीवत् संस्कृतविद्यायाः सर्वोत्कृष्ट आवास आसीत् । तत्र किल कैयट-मम्मट-उवट-जगद्धरभट्ट-सदानन्द-कल्हणप्रभृतयो विख्याता उद्भटा विद्वांसोऽभवन् । यैः विद्वद्वरेण्यैः विनिर्मिताः संस्कृतग्रन्थाः सम्प्रत्यपि विद्यन्ते, विद्वद्भिश्च पठ्यन्ते । यस्य-किल शासकाः क्षत्रियप्रवराः सम्राट्-ललितादित्यप्रभृतयो महाराजाः आसन् । यत्र खलु एकस्यापि अनार्यस्य यवनादे निवासो नाभवत् । यस्यै-तादृशेतिहासः राजतरंगिणीप्रभृतिसंस्कृतग्रन्थेषूपलभ्यते ।

तस्य काश्मीरप्रदेशस्याधुना कीदृशी दुर्दशाऽवलोक्यते । तत्र किल संस्कृतविद्यायाः स्थानं ऊर्दू भाषया ग्रहीतम् । वराकी संस्कृतविद्या तु सर्वथैव विनष्टा । संस्कृतविदुषां तु तत्र नामापि न श्रूयते । शते नवतितोऽ-प्यधिकास्तत्रानार्याः विकृता म्लेच्छा एवावतिष्ठन्ते । हिन्दुमन्दिराणि विनाश्य तेषामेव काष्ठपाषाणादिभि र्निर्मितानि मस्जिदानि सर्वत्रोप-लभ्यन्ते । अत्यल्पसंख्याकाः ब्राह्मणपण्डिताः भयसंकटदारिद्र्यादिसमाक्रान्ताः सन्तो निवसन्ति केचन ततः पलायन्त्येऽपि । तेषां बलात्कन्याऽपहरणलगुड-प्रहारकारागारनिवासतिरस्कारादिरूपा महती पीडा समाचारपत्रादौ वर्ण्यते । तस्य सर्वस्य स्वर्गदृश्यस्य नरकदृश्यरूपेण परिवर्तनस्य लज्जा-खेदमयस्य मूलकारणन्तु पूर्वजानां ब्राह्मणपण्डितानां मौढ्यमेव विनिश्चीयते । इत्यलं व्यर्थेन रोदनेन, अधिकन्तु अत्र अस्याश्च प्रथमखण्डे द्रष्टव्यम् ।

इत्येवं केरलीयब्राह्मणपण्डिता एव ईसाईधर्मविस्ताराय तद्धर्मस्य 'एजन्ट'रूपाः, हिन्दुधर्मप्रक्षयाय च कारणभूताः बभूवुः। स्वल्पस्यापराधस्य कृते प्राणघातसर्वस्वविनाशसदृशस्य महतो दण्डस्य प्रदातारो निर्दयाः राक्षसास्तेऽवश्यमन्यायात्याचारमित्रद्रोहरूपमहापापसमन्विताः सन्तो नरकगामिनोऽभवन् इत्यत्र नास्ति मतिमतां कश्चन सन्देहः। तदा दयनीयानां भ्रान्तानां दुःखिनां प्रभूतं पश्चात्तापं कुर्वाणानां स्वधर्मबन्धूनामुपरि दयाक्षमासहानुभूतिशुद्ध्यादिकरणस्थाने तैः महामूर्खैः ब्राह्मणपण्डितैः घृणातिरस्कारबहिष्कारद्वेषक्रोधादिप्रदर्शनं कृत्वा स्वनिष्ठं राक्षसत्वं दुष्टत्वमधमत्वमेव च प्रदर्शितम्।

अधुनाऽपि कतिपयविशिष्टहिन्दूनां धार्मिकदृष्टिः पक्षपातस्वार्थान्ध्यविद्वेषादिनिर्मुक्ता उदारतैकतादिसद्गुणसंयुक्ता विशुद्धा नैव संजातेति महतः खेदस्यावसरः सर्वथा नैवापगतोऽस्ति। प्रतिदिनं हिन्दूनां संख्या क्षीणा, विधर्मिणां यवनेसाईबौद्धादीनां संख्याऽभिवृद्धा च सती स्वतन्त्रे भारतेऽप्यवलोक्यते। पूर्वोक्ता सत्यघटना हिन्दुत्वसंरक्षणायेतादृशीं प्रेरणां ददाति यत्—हिन्दुजातिषु व्याप्तं मिथ्याभेदभावं, संकुचितां दृष्टिञ्च निरस्य सर्वान् हिन्दून् मिथः समानबन्धुत्वादर्शयुक्तान् एकत्र समवेतान् कृत्वा तत्र ज्ञानबलधनश्रमरूपचतुष्टयशक्तीः संस्थाप्य सशक्तान् सुरक्षितान् कुर्वन्तु इति। समयानुसारं द्रुतगत्या हिन्दुत्वसंरक्षणकार्यं यदि तदग्रेसराः धर्माचार्याः नैव करिष्यन्ति, तदा हिन्दुधर्मस्य का दशा भविष्यतीति सर्वज्ञो भगवानेव विजानीयात्। इत्यलमतिपल्लवितेन।

(अयं किल लेखो हिन्दीभाषायां 'जो मरकर भी भारत

में ईसाई धर्म की नींव सुदृढ़ कर गया' इति शीर्षकः 'हिन्दुविश्व' इति नामके मासिकपत्रे मुम्बापुरीतः प्रकाशिते तृतीयवर्षस्य द्वितीयाङ्के 'श्रीबद्रीप्रसाद भोरुका' महोदयेन लिखितोऽस्माभिः पठितः, संस्कृतभाषया तदनुवादं कृत्वाऽत्र समनुबद्ध इति)

वैदिकसनातनधर्मस्य महत्त्वमेकत्वञ्च

निर्दोषं हि समं ब्रह्म, तद्धि सर्वत्र संस्थितम् ।
इति विज्ञाय धर्मेऽस्मिन् , निर्दोषे पावने शुभे ॥१॥
समेन ब्रह्मणादिष्टे, सर्वमानवमोक्षदे ।
वैदिके शाश्वते या हि , समता चैकता शिवा ॥२॥
ब्रह्मणि संस्थिता सैव, विज्ञेया सर्वसिद्धिदा ।
वैषम्यं तत्र यत् दृष्टं , दुष्टभावप्रदायकम् ॥३॥
तत्तु हेयं प्रयत्नेन , कूपमण्डूकतानिभम् ।
स्वजनक्षयकर्तृत्वात् , विधर्मिजनवर्धकम् ॥४॥
सर्वमानवसंग्राह्यं , समत्वं गौरवास्पदम् ।
समाजस्य च राष्ट्रस्य , शिरोन्नतिविधायकम् ॥५॥
महता पूजनीयेन , निगमेन प्रबोधितम् ।
सर्वस्मिन् आर्यभावस्य , स्थापकं दुष्टमर्दकम् ॥६॥
प्रसार्यञ्चोपदेश्यञ्च , समीचक्षि विचक्षणैः ।
विशाले भारते नूनं , धर्मशुद्धिप्रबोधकैः ॥७॥
समत्वेन च साकं यत् , सदाचारादिकं तथा ।
श्रीरामस्य च कृष्णस्य , बलशौर्यादिकं शुभम् ॥८॥

वसिष्ठव्यासयोश्चैव, ज्ञानौदार्यव्रतादिकम् ।
उपादेयं स्वधर्मेऽस्मिन्, दौर्बल्यस्य विनाशकम् ॥६॥
अज्ञानस्य च मौढ्यस्य, निर्भयत्वादिसंपदः ।
समुदारस्वभावस्य, स्थापकं शिष्टसंमतम् ॥१०॥
महान् धर्मः स विज्ञेयः, साधयेद्योऽखिलोदयम् ।
सर्वेषां समभावेन, प्रतिष्ठां पोषणञ्च यः ॥११॥
मनःसंकीर्णतां यश्च, वारयेदनुदारताम् ।
घृणागर्वादिदोषान् यः, प्रेमौदार्यञ्च वर्धयेत् ॥१२॥
एवं भूतोऽस्ति धर्मो यः, शाश्वतो वैदिकः खलु ।
विश्वाचार्यतया स्तुत्यः, प्रशस्तो जयतेतराम् ॥१३॥
राष्ट्रधर्मपदे चेमे, सहयोगित्वबोधके ।
विना धर्मञ्च राष्ट्रस्य, महत्त्वं नास्ति कर्हिचित् ॥१४॥
विना राष्ट्रञ्च धर्मस्य, गौरवं नावलोक्यते ।
संयुक्तौ राष्ट्रधर्मौ च, प्रददेते च मंगलम् ॥१५॥
राजसत्ता यदा नासीत्, धर्मो लोकान् ररक्ष ह ।
'न राजाऽऽसीद् नवा राज्यं, न दण्डो न च दाण्डिकः ॥१६॥
धर्मेणैव प्रजाः सर्वाः, रक्षन्ति स्म परस्परम्' ।
भारतं वच इत्याह, धर्मगौरवबोधकम् ॥१७॥
धर्म एव समाजस्य, बलं प्राहु र्मनीषिणः ।
तस्याध्यात्मिकसद्भावः, स्थिरां शान्तिं ददाति च ॥१८॥
संयमः सत्यनिष्ठा च, निर्भयत्वं विनम्रता ।

पात्रदानमहिंसा च , सत्संगश्च दयालुता ॥१६॥
राष्ट्रभक्तिश्च धैर्यञ्च , स्वाध्यायोऽक्रोध एव च ।
प्राहुः इत्यादिरूपाणि, धर्मस्यास्य विवेकिनः ॥२०॥

आर्यहिन्दुसमाजस्य महत्त्वमेकत्वञ्च

आर्यहिन्दुसमाजोऽयं, समुदारो महान् खलु ।
तस्य देवस्य रामस्य, वृत्तान्तोऽयं विलोक्यताम् ॥१॥
प्रेमसद्भावसौजन्यं , विजातीये प्रदर्शितम् ।
वानरादौ च साजात्यं, महता येन चार्पितम् ॥२॥
स्वीयत्वं परकीयेभ्यो , दत्त्वौदार्यञ्च बोधितम् ।
शकहूणादयो बाह्या , आत्मसात् येन वै कृताः ॥३॥
आर्यहिन्दुसमाजेन , महता च यशस्विना ।
हिन्दुभ्यस्तद्विभिन्नत्व - मद्य कै र्नावलोक्यते ॥४॥
तदाचार्येण पूज्येन , शंकरेण विपश्चिता ।
बौद्धानां विहितो योगः, चास्मिन् एकत्वसाधकः ॥५॥
गंगायामिव कालिन्दी , योगो हन्ति विभिन्नताम् ।
पश्चात् सर्वत्र गंगेयं, कथ्यते पापहारिणी ॥६॥
यमुनायाश्च नामापि, नोच्यते कैः कदाचन ।
गंगायां मिलिताः सर्वे, प्रवाहास्तत्स्वरूपताम् ॥७॥
विन्दन्ते नैव पार्थक्यं , भजन्ते हि कदाचन ।
आर्यहिन्दुसमाजस्य , वाञ्छन्ति तद्धितैषिणः ॥८॥

शक्ति पुष्टि समृद्धि ये , शान्तिसौभाग्यदायिनीम् ।
ऐक्यभावेन गंगावत् , ते चलन्तु महाशयाः ॥९॥
यथा गंगा तथा योगः , सर्वत्रैक्यप्रदायकः ।
गंगायाः यमुनायाश्च , भिन्नं योगं कदाचन ॥१०॥
वाञ्छन्तु क्लेशदं नैव , भेदोऽयं भयकारकः ।
प्रान्तभाषादिभेदाँश्च, ध्वंसन्तां भयकारकान् ॥११॥
आददन्तामभेदञ्च , धर्मादेः शुभकारकम् ।
एकतेयं समाजस्य , राष्ट्रस्योन्नतिकारिणी ॥१२॥
मिथो मंगलवाञ्छाऽतः , प्रभवेदिष्टसाधिका ।
एकत्वमागताः यान्ति , महत्त्वं लोक्यतामियम् ॥१३॥
अणवो लघवो नूनं , घटयन्ति वसुन्धराम् ।
मिलिताः बिन्दवस्सन्तो , रचयन्ति महानदीम् ॥१४॥
सरघाणाञ्च कीटानां , तृणानां पक्षिणां तथा ।
एकत्वं संघशक्तिश्च , समादेयाऽऽर्यहिन्दुभिः ॥१५॥
संयुक्तास्तन्तवस्सन्तः , साधयन्ति महापटम् ।
आर्यहिन्दुसमाजस्य , संस्कृतिः ऐक्यसाधिका ॥१६॥
भक्तिविज्ञानसम्पन्ना , सर्वशक्तिसमन्विता ।
राष्ट्रगौरवदा युक्ता , क्रान्त्युत्क्रान्तिप्रशान्तिभिः ॥१७॥
अवरोधान् विहायातो , मिथ्याकल्पनयोत्थितान् ।
भारतीयैः समस्तैस्तु , मुदा धार्या प्रयत्नतः ॥१८॥

परमेश्वरस्य महत्त्वमेकत्वञ्च

परमेश्वर एकोऽस्ति, नानेकोऽसौ कदाचन ।
श्रुतिगीतादयो ग्रन्थाः, तदेकत्वं वदन्ति हि ॥१॥
इति निश्चित्य भिन्नत्वं, नोपेयं तस्य कर्हिचित् ।
तस्यैकस्यैव विज्ञेयाः, शिवरामादयोऽभिधाः ॥२॥
विभिन्नाः विग्रहाः येऽपि, चतुर्भुजादयश्च ते ।
अतो विभिन्ननामादि – भेदस्तत्रास्ति कल्पितः ॥३॥
स्तुत्यो मुख्यश्च विज्ञेयो, ह्यभेदः परमार्थतः ।
निराकारो गुणैर्हीनः, साकारस्सगुणस्तथा ॥४॥
एकस्यैव वदन्तीमान्, रूपभेदान् परात्मनः ।
अवताराश्च विज्ञेयाः, जगतो हितकारकाः ॥५॥
इति मत्वैव सर्वत्र, भेदभावो विवर्जयेत् ।
प्रादुर्भावः प्रपञ्चस्य, पञ्चभूतैर्विलोकितः ।
अतस्तेषामधीशा ये, शिवविष्णवादिकाः शुभाः ॥६॥
पञ्च देवाः उपास्याश्च, सन्ति कल्याणकारकाः ।
तेषां भेदो न मन्तव्यः, एकत्वान्मूलरूपतः ॥७॥
बहुधैकं महद्ब्रह्म, बहुविग्रहनामभिः ।
विप्राः मेधाविनः प्राहुः, वदतीति श्रुतिः किल ॥८॥
रुचिप्रत्ययभेदानां लोकानां हितकामुका ।
कल्पितानेकतां तत्र, चैकतां पारमार्थिकीम् ॥९॥


विभिन्ने संप्रदायेऽतः समत्वं स्थाप्यतां मुदा ।
मतभेदेऽपि विद्वेषो , नैव कुर्यात् कथञ्चन ॥१०॥
औदार्यं मुख्यमेकत्वं , सहिष्णुत्वञ्च धार्यताम् ।
महादेवस्य सर्वं तत्, दृष्ट्या स्तुत्या विलोक्यताम् ॥११॥
एकत्वञ्च समत्वञ्च , सर्वेशस्याखिलात्मनः ।
ताभ्यां भारतराष्ट्रस्य , हिन्दुधर्मसमाजयोः ॥१२॥
प्रशस्तं गौरवं नूनं , सिद्ध्येत् कल्याणकारकम् ।
निन्द्यो मिथ्याविभेदोऽपि, विध्वस्तस्स्योद्भयावहः ॥१३॥
तस्यैकस्य परेशस्य , प्रार्थनां कीर्तनं तथा ।
विश्वासञ्च दृढां भक्तिं, कुर्वतां मिलिताः मुदा ॥१४॥
तस्य शुद्धस्वरूपस्य , चिन्तयन्तु निजात्मताम् ।
अभेदेनाद्वयस्यैव , ब्रह्मणः सच्चिदात्मनः ॥१५॥
धर्मभक्तिसुबोधैश्च , साफल्यं जायते खलु ।
मानवानामभीष्टं तत् , जीवनस्य विवेकिनाम् ॥१६॥

महोपसंहारः

इत्येवं चात्र धर्मस्य , समाजस्य परात्मनः ।
एकत्वञ्च समत्वञ्च , संक्षेपेण प्रदर्शितम् ॥१॥
यत्नेनानेन विश्वात्मा , भगवान् संप्रसीदतु ।
भारतस्य स्वदेशस्य , कल्याणं वितनोतु सः ॥२॥
स्वामिमहेश्वरानन्द—यतीन्द्रेण यथामति ।
भारताभ्युदयायैव , खण्डोऽयं विहितो मुदा ॥३॥

गुणयुग्मखयुग्माङ्क (२०२३) मिते वैक्रमवत्सरे ।
पूर्णिमायां शरत्काले, चाश्विनस्य समाभवम् ॥४॥
गंगातीरे समारब्धो, रेवातीरेऽपि गौर्जरे ।
लिखितः पूर्णतां यातो, मुम्बापुर्यामियं शुभः ॥५॥

इति कनखल-हरिद्वार-वास्तव्य-श्रीमत्परमहंसपरिव्राजकाचार्य-
महामण्डलेश्वर-श्रोत्रिय-ब्रह्मनिष्ठ—अनन्तश्रीविभूषित-
स्वामिश्रीमहेश्वरानन्दमहाराजप्रणीतः-चातुर्वर्ण्य-
भारत-समीक्षा (द्वितीयखण्डः)
सम्पूर्णः ।
शिवमस्तु सर्वेषां, शिवोऽहं शिवः सर्वम्,



॥ श्री हरिः शरणम् ॥

चातुर्वर्ण्यभारतसमीक्षामुद्दिश्य विद्वद्वरैः परिव्राजक-महानुभावैः प्रकटितानि स्वानुमोदनाभिनन्दन-सम्मत्यादीनि चात्र प्रदर्श्यन्ते—

माधव ॥६३
१८।२।५०

सोमवारः

हृदयोद्गारप्रदर्शनम्

स्वस्ति श्रीः—

अयि सनातनवैदिकधर्मप्रचारचतुरचूडामणयः ! परसो-द्धारमनसस्तत्रभवन्तो भवन्तः कनखलश्रीगिरिशानन्दाश्रमाध्यक्ष-महोदयाः ! पूज्यपादमहामण्डलेश्वरमहानुभावाः ! स्वामि-महेश्वरानन्दजीमहाराजाः !

सादरं नः प्रणामाञ्जलयो मिलिन्दायन्ताम् ,

वेदतात्पर्यदर्शनदर्पणमिव, सनातनवैदिकधर्ममर्मप्रकाश-नालंकर्मीणं, नैकविधगम्भीरविषयविवरणचातुरीधुरीणं, पाथेय-मिव मुमुक्षोः, मित्रमिव जिज्ञासोः, मार्गदर्शक इव भवाध्वनीनानां, प्रमोदप्रपेव त्रिविधतापतप्तानां पुस्तकद्वयं 'शुक्लयजुर्वेदसंहितो-पनिषच्छतकम्' 'ऋग्वेदसंहितोपनिषच्छतकम्' इति च नाम्ना प्रसिद्धं, सम्यगवालोकि, सादरमपाठि च। पठित्वा चानन्दतुन्दि-लमनसो मे मुखादकस्मान्निरगमन्नमी व्याहाराः—

अहो धन्याः खलु भारतीयभूमण्डलमण्डनायमाना यतिमण्डलमार्तण्डाः पण्डिताखण्डला वीतरागचक्रचूडामणयोऽनन्तश्रीविभूषिताः श्रीपूज्यपादमहेश्वरानन्दमण्डलेश्वरा यैर्वैदिकविद्यानुरागिणां कृते सरलया गीर्वाणवाण्या वेदतत्त्वरहस्यं करतलामलकवदकारि, विशेषस्तु—

प्रारिप्सितं च जिज्ञासूनां संस्कृतप्रेमिणामस्मादृशां गीताप्रवचनादिकर्तृणां कृते सदुपयोगमूल्यात्मकममूल्यमस्य वितरणम्।

सुवर्णे सौगन्ध्यसम्बन्ध इवेदमतीव प्रमोदपारावारसमवगाहनजनकमिति प्रमोमुदीति नश्चेतः।

हन्त ! परमौदार्यं दानवीराणां, प्रशंसनीयं धैर्यं धीरवराणां यदेतादृशे कराले कलिकाले वेदविद्यानुरागिणां कृते परमानन्दसम्पादकमेतादृशं परमपवित्रं सत्कर्म। अनन्यसाधारणं खल्वेतत्।

वैदिकमन्त्राणां कण्ठस्थत्वेऽपि तेषामाध्यात्मिकरहस्यविवरणमिदं, पिपासितस्य शीतलजलमिव, निदाघतप्तस्य हिमानीसांनिध्यमिव, वेदान्तरसावसेकशीतलमनसो ममेदं परमाह्लादमदात्।

नैकविधग्रामनगरादिषु गीताप्रवचनार्थं परिभ्रमतो मे परमसुन्दरमिदमवलम्बनम्।

प्रवचने चैतदीयान् विषयानुपन्यस्य धर्मतत्त्वप्रचारः श्रीमदाचार्यचरणकारुण्यञ्चेति द्वयमपि सम्पादितं स्यादिति मन्ये, तत्कृपया पुस्तकद्वयं सामवेदसंहितोपनिषच्छतकमथर्ववेदसंहितोपनिषच्छतकञ्च यदि प्रकाशितं स्यात्-तदा तत्-सत्वरं संप्रेष्य समनु-

गृह्णन्तु गीर्वाणवाणीप्रणयिनमिमं जनमिति साञ्जलिवन्धं प्रार्थये-
विज्ञेषु किमधिकम् । पोस्टव्ययः प्रेष्यत एव पत्रेण सह ।

विदुषां वशंवदः
भालचन्द्रशर्मा

संकेतस्थानम्
भालचन्द्रविनायकमूले शास्त्री
गीताप्रवचनकारः कुशावर्ततीर्थं के पीछे,
मु० पो० श्री त्र्यम्बकेश्वर, जि० नासिक (बम्बई)

ता० १५।५।६६ ज्ञानसाधनाश्रम, भृगुकच्छ
गुर्जरप्रदेशतः
प्रेषितम्

विरोधिताडनं स्वगौरवरक्षणञ्च

(गुजराती भाषा)

कुमति द्वारा कुपात्रो थई चुकेला कुत्तराओ भले भस्याज करे, ओ ओमनी प्रकृतिज छे। आपणे आपणी सांस्कृतिकगजगति नुं गरिमायुक्त गौरव जाणववुंज-

भवदीय
चिदेहानन्द तीर्थ

(तदनुवादः)

स्वामिविदेहानन्दतीर्थमहोदयस्येदं वचः शास्त्रप्रमाण-तर्कादिपरिष्कृतां चातुर्वर्ण्यभारतसमीक्षामुद्दिश्य-

स्वकीयकुमतिद्वारा कुपात्रोत्वेन प्रसिद्धिं प्राप्तवन्तः शुनका यथेष्टं यद्वा तद्वा प्रलपन्तु नाम तेषां निन्द्या प्रकृतिरेषाऽनिवार्या।

परन्तु वयं स्वकीयं विशुद्धसांस्कृतिकगजराजप्रगतिशीलं गौरवं दिव्यगम्भीरक्षमौदार्यशालि सुरक्षिष्याम एव ।

ॐ नर्मदे ! हर !

श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोत्रियब्रह्मनिष्ठस्य सनातनवैदिकधर्मोपदेशकस्य वेदाचार्यस्य वेदाश्रमप्रतिष्ठापकस्य विद्वद्वरेण्यस्य वेदपाठनिरतस्य श्रीस्वामिदयानन्दमहाराजस्य

प्रशस्तानुमोदनम्

विध्वस्तसंसाररागादिदोषाः ! प्रशान्ताः ! ज्ञानानन्दतृप्ताः ! विद्वद्वरिष्ठाः ! पूज्यपादाः ! श्रीमत्परमहंसपरिव्राजकाचार्याः ! श्रोत्रियब्रह्मनिष्ठाः ! श्रीयुताष्टोत्तरशतसंख्याविभूषिताः ! श्रीमत्स्वामिमहेश्वरानन्देतिस्वनामधन्याः ! महामण्डलेश्वराः ! तत्रभवद्भ्यो भवद्भ्यः सप्रश्रयं ॐ नमो नारायणायेति मन्त्राभिवादनं समर्पयामि ।

अयि भोः ! भवद्भिर्लिखिता विविधप्रमाणोपबृंहिता राष्ट्रसमाजहितसंगठनसाधिका 'चातुर्वर्ण्यभारतसमीक्षा' मया सावधानेन मनसा समधीताऽवधारिता च ।

अहं किल मन्ये-भवद्भिर्महानुभावैर्यत्किमपि लिख्यते, तदखिलममृततुल्यमास्वादनीयं सन्तृप्तिजनकमेव वर्तते, तदध्ययनेनापारस्य परमानन्दस्यानायासेन लाभः सम्पद्यत एवेति । एवं भवदीयानि ऋग्वेदादिमन्त्राणामध्यात्मज्योत्स्नाव्याख्यानानि प्रागपि संस्कृतवाङ्मयानि ममान्तर्गतस्य शाश्वतस्य परमानन्दस्य समुद्बोधकानि बभूवुरिति । तथा च पक्षपातादिदोषान्विहाय समुदारया विश्वजनहितसुखकारिण्या प्रशस्तया भावनया लिखिता ग्रन्था निष्पक्षविद्वज्जनसमादृताः प्रेयःश्रेयःप्रदाश्च भवन्त्येवेति मेऽस्ति दृढा मान्यता ।

विश्वोद्धारपरायण ! स्वामिन् ! वेदादिसच्छास्त्रबोधिते, ऋषिपुङ्गवैश्च श्रद्धया सेवितेऽतिप्रशस्ते कल्याणमयसमुदारमार्गे गच्छन्तो मानवाः परमं प्रेयश्च श्रेयश्च सदा सर्वत्र प्राप्नुवन्त्येव, प्रसन्ना आनन्दिनश्च भवन्त्येवेत्यवधार्य श्रीमद्भिर्महानुभावैर्यः खलु चातुर्वर्ण्यभारतसमीक्षायां प्रदर्शितोऽस्ति स्तुत्यो मार्गः, तेन गच्छतां समेषां मानवानां सुतरां कल्याणं भवत्येवेत्यहं मन्ये !

ब्राह्मणादयो वर्णा जन्मनैव मन्तव्या वा तत्तद्गुणकर्मभिरेव वेति, उभयविधप्रमाणोपलम्भेन महाविवादास्पदविषयोऽयं वर्तते । परन्तु अहो ! धन्यवादार्हा विद्वद्धौरेयाः श्रीस्वामिपादाः सन्ति, यैर्भूयसा परिश्रमेणेमं विषयं समालोच्य भारतीयहिन्दुसमाजस्वराष्ट्रहिताय निगमागमादिशास्त्रप्रमाणपुरस्कृतान् विविधान्वादान्सम्प्रदर्श्य, शास्त्रीयमावश्यकीयं गूढरहस्यं समुद्घाटितम् ।

तत्र किल गुणकर्मवादस्य मुख्यत्वं जन्मजातिवादस्य च गौणत्वं प्रदर्शितम् । यतः सर्वेषु पदार्थेषु किमुत वर्णेषु तत्तद्गुणकर्मणामेव स्वजन्मसाफल्यसम्पादकानां प्रशस्तं प्राधान्यं प्राबल्यञ्च दृश्यते । पश्यतु तावदिमं विश्वप्रकाशकं भगवन्तं सूर्यं- स किल यदि स्वकीयमुष्णतालक्षणं गुणं, प्रकाशलक्षणञ्च कर्म परित्यजेत्तदा तस्य मरणमेव सम्पद्येत, तस्य महत्त्वं च सर्वथा विलुप्येत । एवमयं पवनोऽपि स्वकीयं प्रवहनशीलं कर्म जीवनप्रदानलक्षणं गुणञ्च विहाय स्वास्तित्वं कथमपि सम्पादयितुं न शक्नोति । इत्येवमग्निचन्द्रादिपदार्था अपि स्वस्वगुणकर्मधारणेनैव स्वकीयं गौरवमभिरक्षितुं प्रभवन्ति । तथैव ब्राह्मणादयो वर्णा अपि तत्तद्गुणकर्मधारणेनैव गौरवान्विता भवन्तीति

स्वामिपादैश्चातुर्वर्ण्यभारतसमीक्षायां विस्तरतो निर्धारितम् ।

अत एव भगवत्पादो जगद्गुरुरादिमाचार्यः श्रीशंकरो मुख्यं गुणकर्मवादमेव समाश्रित्य विकृतान्पञ्चदशकोट्यधिकसंख्याकान्बौद्धादीन्संशोध्य वर्णविभागभूयिष्ठे सर्वत्राविभक्तब्रह्मभावसमलंकृते समुदारवैदिकसनातनधर्मे संयुयोज ।

अत एव ब्राह्मणादिवर्णेषु विद्यमानं वर्णत्वं तत्तद्गुणकर्मसु स्वकीयां रुचिं योग्यतां कर्तव्यताञ्च बोधयति । ताभिरेव तत्तद्वर्णसाफल्यं सम्पद्यते नान्यथा । एवं शिक्षाविभागसञ्चालकाः शिक्षका ब्राह्मणा भवन्ति, रक्षाविभागसञ्चालका रक्षकाः क्षत्रियाः, कृष्याद्युद्योगविभागसञ्चालकाः पोषका वैश्याः, श्रमविभागसञ्चालकाः सेवकाश्च शूद्रा भवन्तीति लोके शास्त्रे च कथ्यमानं वचस्तत्तद्गुणकर्मणामेव प्राधान्यं प्रदर्शयति । अयमेव श्रुतिस्मृतिपुराणादिशास्त्राणामभिप्रायः श्रीमन्महामण्डलेश्वरमहाभागैर्विपश्चित्प्रवरैश्चातुर्वर्ण्यभारतसमीक्षाग्रन्थे प्रदर्शितः । तदस्य प्रशस्तस्य राष्ट्रसमाजहितसम्पादकस्य पुस्तकस्य सर्वत्र विविधभाषानुवादैः प्रभूतः प्रचारो भूयादिति वयं विश्वनियन्तारं भगवन्तं प्रार्थयामहे, मुक्तकण्ठतश्च तं प्रामाणिकं श्रद्धेयमभिप्रायमनुमोदामहे, तद्ग्रन्थप्रणेतॄन्स्वामिपादान्महामण्डलेश्वरमहानुभावानसंख्यधन्यवादैश्चालङ्कुर्महे—इति शम् ।

श्रीमत्कः

वेदपाठी स्वामिदयानन्दो वेदाचार्यः

वेदाश्रमप्रतिष्ठापकस्तदध्यक्षश्च । चांदोद-नर्मदातट

विक्रमसंवत् २०२२, ता० २३।५।६६

श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोत्रियब्रह्मनिष्ठस्य कच्छप्रदेशीयविरक्तसाधुमण्डलाधीश्वरस्य ॐकार-मुक्तिधामप्रतिष्ठापकस्य वेदान्ताचार्यस्य विद्वद्व-रस्य स्वामिभगवन्नारायणगिरिमहाराज-महानुभावस्य

विशिष्टानुमोदनम्

तत्तद्गुणकर्माणि विहाय, वर्तमानसमये स्वतन्त्रे भारते पण्डितंमन्येषु कतिपयजनेषु दृश्यमानो जन्मना जातिवादस्य यो हठाग्रहोऽस्ति, स नूनं राष्ट्रसंघट्टनद्रोहः, समाजैकताद्रोहो, भारत-गौरवद्रोहः, सामाजिकोत्तमाधममिथ्याभेदप्रयोजकतया चान्यायश्चा स्तीति निष्पक्षपातैः राष्ट्रसमाजहितचिन्तकैर्विद्वद्धौरेयैश्चमन्यते ।

अत एव जन्मना जातिवादात्मकस्य गर्हणीयस्य भ्रमस्य प्रबलैस्तत्तत्प्रमाणसन्दोहैर्निराकरणं चातुर्वर्ण्यभारसमीक्षायां कृत्वा ब्रह्मनिष्ठा महामण्डलेश्वराः स्वामिमहेश्वरानन्दमहाराजाः प्रशस्ततमभारतराष्ट्रस्य गौरवशालिहिन्दुसमाजस्य चोपरि महा-न्तमुपकारमकार्षुरित्यहं मन्ये ।

'वयमेव सर्वश्रेष्ठा निखिलोत्तमाः पूज्या मान्याश्च स्मः' 'अस्माकमेवेदृशोऽधिकारो जन्मसिद्धोऽस्ति, नान्येषां वराकाणाम्, ते चेमे सन्ति कनिष्ठा अधमा नगण्याश्च' इत्यात्मकस्य घृणा-भावमिश्रितस्याभिमानस्य प्रबलस्य सुरापानसदृशस्य (अभिमानं सुरापानमित्युक्तत्वात्) सुस्थिरतया संरक्षणाय, मिथ्याप्रवादैः स्वकीयं विशालं राष्ट्रं, सुविस्तृतं हिन्दुसमाजञ्च प्रवञ्चयितुं प्रयत्नान्विविधान्कुर्वाणेभ्यो धर्मजयाय प्राणिसद्भावनायै विश्व-

कल्याणाय च दम्भपाखण्डमयीं मिथ्याघोषणां वितन्वानेभ्यस्त-त्तद्गुणकर्मश्रेष्ठतामनन्वानेभ्यश्च चातुर्वर्ण्यभारतसमीक्षालक्षणः प्रबलतमः सुदृढो विविधप्रमाणयुक्तिसंयुक्तः समर्प्यमाणो दण्ड-प्रहारस्तन्निष्ठं जन्मजातिवादहठाग्रहलक्षणं पांसुपिण्डं नूनं विचूर्णयति।

प्रयत्नेनानेन मिथ्यारूढिवादलक्षणा अन्धविश्वासाः प्रलयं गमिष्यन्ति। राष्ट्रसमाजयोर्विघटनप्रयोजको विषमभावश्च सुतरा-मस्तमेष्यति। श्रेष्ठत्वाभिमानिभिर्गर्वाभिमानदृष्टिभिर्विलोकिताः स्वनिष्ठहीनत्वभावनाग्रस्ता लघुताग्रन्थिप्रपीडिता जना बौद्धेसाई-म्लेच्छादिधर्मान्तरं स्वीकर्तुं अम्बेडकरादिवत्समुद्युक्ता ये सन्ति, ते ततः प्रतिरुद्धा भविष्यन्ति। काश्मीरादिसदृशानां विविधानां प्रश्नानां समुत्पादकः कलंकश्च विनंक्ष्यति।

समीक्षतां तावदिमां श्रुतिं छन्दोगशाखीयाम्—'ये रमणी-यचरणा रमणीयां योनिमापद्यन्ते' (छा. ५।१०) इत्यादि-लक्षणाम्।

अत्र किल शुभकर्मकर्तॄणां शुभजन्मलाभो वर्ण्यते। यदा च युष्माभिः पूर्वजन्मकर्मभिः श्रेष्ठजन्मलाभः मन्यते, तदा ऽस्मिन्नेव जन्मनि कृतैः शुभैः कर्मभिः शुभो योग्यः स्वरुच्यनु-कूलस्तत्तदुत्कृष्टकक्षालाभः कथं न मन्यते? तत्तद्गुणकर्मप्रयो-जिततत्तद्योग्यता च कथं नाङ्गीक्रियते? 'नायोग्यः पुरुषः कश्चि-त्प्रयोक्तैव सुदुर्लभः।' इत्युक्तत्वात्। अत एव रमणीयकर्मफल-लाभोऽत्र न मन्तव्यः, किन्तु परत्रैव मन्तव्य इति जन्मजाति-वादिनां कथनं नितरां हठवादितामेव प्रद्योतयति।

'मत्वाऽपि न मन्यते' इत्ययं किं हठवादो नास्ति?

इत्यस्योदाहरणं तावदिदमेकमवलोक्यताम् ।

द्वारकामन्दिरे यदा हरिजनप्रवेशः संजातस्तदा तत्र शाङ्करपीठाधीशो महाराजो नासीत्, किन्त्वन्यत्रासीत् मन्दिर-पूजारिगणैः स महाराजस्तत्प्रवेशप्रतिषेधाय समाहूतः, तथापि तेन पीठाधीशेन प्रभूतसत्तैश्वर्यसम्पन्नस्य भारतसर्वकारस्य विरोध-करणे स्वासामर्थ्यं प्रकटीकृतम्, अत एव स प्रवेशप्रतिषेधाय तत्र नागमत् । ततस्तेन सह तेषां मनोमालिन्यं जातम्, मिथो विरोधः प्रावर्तत । तथापि हिन्दुजनतासमर्थितस्य सर्वकारस्य प्रबलतम-कानूनानुरोधेन तत्राबाधिततया हरिजनप्रवेशः प्रचलितोऽभूत् । मन्दिरेषु नैवेद्यलक्षणा राजभोगा अपि प्रचलन्ति, ते च प्रेम्णो-पभोगाय स्वीक्रियन्ते । तत्प्रवेशेन प्रतिदिनं किं वैदिकपद्धत्या शुद्धिः क्रियते ? नैव । एतेन मूकभावेन तटस्थतया च तत्प्रवेशा-ङ्गीकारेऽपि ('मौनं स्वीकारलक्षणम्' इत्युक्तत्वात्) स्वमुखेन तस्यानङ्गीकारता स्वाविवेकं नैव ज्ञापयति ? एवं कर्मणा जाति-वादस्याङ्गीकारेऽपि तदनङ्गीकारता किं जन्मना जातिवादस्य हठाग्रहतां नैव सूचयति ?

इदं तावदपरमनादरस्योदाहरणं द्रष्टव्यम्—

अस्माकं हिन्दुधर्माभिमानिनां विषमयीं संकुचितानुदार-विषमभावनामवलोक्य सर्वकारस्य कस्मिन्नपि कार्यालये हिन्दु-वैदिकधर्मसमुद्धारकस्याद्यस्य जगद्गुरोः शङ्कराचार्यस्य चित्रं नावलोक्यते, किन्तु हिन्दुधर्ममनुदारं परित्यज्य समुदारं बौद्धधर्म-मङ्गीकर्तुरम्बेडकरमहोदयस्य चित्राणि सर्वत्रोपलभ्यन्ते । किम-यमादिमस्याचार्यस्य श्रीशङ्करस्यानादरो नास्ति ?

'वयं वसिष्ठपरशुरामप्रभृतिमहर्षीणां वंशोद्भवाः स्मः' इत्यस्माभिस्तद्वंशगर्वः प्रदर्श्यते। परन्तु यो वसिष्ठो महर्षिः स्वविशालसमुदारभावनातो विश्वामित्रस्य क्षत्रियस्य ब्रह्मर्षित्वं ब्रह्मवंशकारकत्वञ्च स्थापयामास- एवं यो भगवान्परमपराक्रमशाल्यपि कृपालुः परशुरामस्तदा स्वसन्निधौ ब्राह्मणवेषेण वर्तमानस्य 'ब्राह्मणोऽहमस्मीति' भाषमाणस्य क्षत्रियस्य शिष्यस्योपरि प्रशस्तानुग्रहं विधाय तन्निष्ठब्राह्मणभावनामादृत्य ब्रह्मत्वञ्च समर्प्य ब्रह्मक्षत्रियत्वेन तस्य प्रसिद्धिमकार्षीद्, ब्रह्मक्षत्रयोर्ज्ञानबलोभयशक्तिसमुच्चयं तत्रानुग्रहरूपेण स्थापयित्वा स्वस्य महदौदार्यं प्रशस्तानुकम्पाशीलत्वञ्च प्रकटितम्, सम्प्रत्यपि गुर्जरसौराष्ट्रकच्छादिप्रदेशेषु तद्वंशोद्भवा ब्रह्मक्षत्रियजातिः प्रज्ञावैभवशालिनी वैदिककर्मधर्माधिरूढा च सती सम्मुन्नता वर्तते।

सति चैवं गुणकर्मप्रयुक्तस्य जातिवादस्य विरोधः कमाधारं प्रामाणिकमवलम्ब्य क्रियते केनचित्पण्डितंमन्येनेति विद्वद्भिर्नं ज्ञायते ? तस्य विरोधं कृत्वा तत्तन्महर्षिप्रदर्शितस्याध्वनोऽनादरः किं न क्रियते तेन ? स च किमविवेको नास्ति ?

अपि च जन्मतो ब्राह्मणक्षत्रियादिप्रशस्तकुलोद्भवानामपि श्रेष्ठानां स्त्रीणां वैदिकधर्मकर्मस्वधिकारो नास्तीति ब्रुवाणेन जन्मजातिवादसमर्थकेन तेन स्वाभाविककर्मभिस्तासु पावित्र्याभावात्तदधिकारः प्रतिषिध्यत इत्यर्थतो बोध्यते। सति चैवं तेन बलात्कर्ममहत्त्वं स्वीकृतमेव। तथा च 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' (गी. ४।१३) इति भगवतः श्रीकृष्णस्य प्रामाणिकवचनानुरोधेनानिच्छताऽपि तेन तत्तत्कर्मविभागत एव

तत्तद्वर्णंजातिविभाग इति स्वीकृतमेव ।

अपि च चातुर्वर्ण्यभारतसमीक्षाया विशिष्टानुमोदनेऽत्र मया यद्यदुक्तं तत्तत्सर्वं पक्षपातं विहाय शास्त्रप्रामाणिकवचनान्यनुरुध्य स्तुत्यमौदार्यमवलम्ब्य विशालहिन्दुसमाजस्याभ्युदयञ्चाभिवीक्ष्य विशदप्रज्ञया विचार्यताम् ।

प्रामाणिकस्य प्रशस्तस्यास्य 'चातुर्वर्ण्यभारतसमीक्षा'-ग्रन्थस्य सहायताया अवलम्बनेनास्मदीये भारते हिन्दुसमाजे च वर्तमानानां विविधानामनेकासां कठिनपरिस्थितीनां समाधानमनयासेन सम्पद्यते । अत एवैतद्ग्रन्थलेखकमहोदयानां प्रातःस्मरणीयानां श्रीमत्परमहंसपरिव्राजकाचार्याणां वेदवेदान्तसांख्ययोगमीमांसादिविविधशास्त्रनिर्भयप्रवचनकर्तृणां श्रोत्रियब्रह्मनिष्ठानां पूज्यमहामण्डलेश्वराणां स्वामिमहेश्वरानन्दमहाराजानां भारतदेशस्य हिन्दुसमाजस्य च प्रशस्तहितसाधनाय सम्पादितैतादृशग्रन्थलेखनानुग्रहः—अस्माकं चित्तेषु निर्मलशान्तिसुखसमर्पणाय साधनभूतो भवति भविष्यतीति चाहं विनिवेदयामि । एतादृशस्यास्य महतः परोपकारस्य कृते पूज्यमहाराजमहामण्डलेश्वर-स्वामिमहेश्वरानन्दानां समक्षं विशालो बुद्धिवैभवशक्तिशाली हिन्दुसमाजः सर्वदा प्रभूतेन ऋणभारेण भरितः श्रद्धया च नतमस्तकः संस्थास्यतीति मम हृदये यथार्था भावना वर्तते । इति शम्

निवेदक :— स्वामी भगवन्नारायणगिरिर्वेदान्ताचार्यः

ॐकारमुक्तिधाम, अंजार-कच्छ,

ता० २५।७।६६

बम् - बम् - मन्त्रः

निरावलम्बस्य ममावलम्बं, विपाटिताशेषविपत्कदम्बम् ।
मदीयपापाचलपातशम्बं, प्रवर्ततां वाचि सदैव बम्-बम्- ॥
महादेवस्य मन्त्रोऽय-मुच्यतामार्यहिन्दुभिः ।
साधको समभावस्य, वैषम्यविपनाशकः ॥

हरिः ॐ तत्सत्

श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोत्रियब्रह्मनिष्ठस्य सत्य-सनातनवैदिकधर्मप्रचारपरायणस्य कनखलस्थमोहन-जगदीश्वराद्यनेकाश्रमप्रतिष्ठापकस्य विद्वद्वरेण्यस्य महामण्डलेश्वरस्य स्वामिजगदीश्वरानन्द-महाराजस्य पंजाबमण्डलाधीश्वरस्य—

यथार्थानुमोदनम्

श्रीमत्परमहंसपरिव्राजकाचार्येण निखिलनिगमागमशास्त्रपारदृश्वना विद्वत्समाजे एवं साधुसमाजे लब्धकीर्तिना सकलदैवीगुणगणालङ्कृतेन महामण्डलेश्वरेण 'ज्ञाने महेश इव' स्वामिमहेश्वरानन्दमहाराजेन विरचितं चातुर्वर्ण्यभारतसमीक्षाख्यं ग्रन्थरत्नं मम दृष्टिगोचरं सञ्जातम्। तस्याद्योपान्ताध्ययनेन मम हृदि महान् हर्षः संतोषश्च संजातः। ग्रन्थेऽस्मिन्खलु बहुविदा ग्रन्थकर्त्रा ब्राह्मणत्वादिजातिर्जन्मना वा स्यात्, तत्तद्गुणकर्मभिर्वा स्यादिति शास्त्रादिप्रमाणजातमवलम्ब्य सम्यग्विचारितम्।

यद्यपि प्रस्तुतग्रन्थकर्तुः प्रदर्शितेषु विविधेषु पक्षेषु कस्मिन्नऽपि पक्षे दृढाग्रहो नास्ति तथापि यथा हंसो गुणग्राही हेयोपादेयविवेकी प्रसिद्धः, तथा महानयं परमहंसोऽपि गुणग्राह्येव विवेकनिष्ठ एव भवति। तथा चात्र तत्तद्गुणकर्मप्रयुक्ते जातिवादे एव ग्रन्थकर्तुर्मुख्यं तात्पर्यं स्पष्टतः प्रतिभाति। पवित्रस्यास्य गौरवशालिनो भारतवर्षस्य गुणकर्मविहीनेन केवलेन जन्मना जातिवादेन विषमतास्वार्थान्धितादिदुर्गुणप्रयोजकेन का

दशा नैव, दुर्दशा नीता, इति तु सर्वेषां चक्षुष्मतां नो नादृष्टचरम् । जन्मनैव ब्राह्मणोऽहं सर्वश्रेष्ठः, ब्राह्मणत्वजात्यैव निष्क्रियया निर्गुणया मम श्रेयो भविष्यति, किमन्यैः साधनैः साधनीयमस्ति ? न किमपि, यद्वा तद्वा किमप्यनर्गलं कर्म कुर्वाणमपि मां सा जातिरेव चोद्धरिष्यति । इत्यप्रामाणिकेन विचारेणाद्यतनैर्ब्राह्मणब्रुवैर्वेदशास्त्राद्यध्ययनमपि परित्यक्तम्, सन्ध्यावन्दनयज्ञोपवीतशिखाधारणादिकं ब्राह्मणत्वलक्षकं चिह्नमपि प्रायः परित्यक्तम् । शमदमतपोज्ञानविज्ञानास्तिक्यादिगुणकर्माण्यपि तिरस्कृतानि, भारतीयप्रशस्तसंस्कृतिविनाशकविदेशीयोच्छृङ्खलविचारोच्चाराचारादीनि परिगृहीतानि च तथापि शर्माणः पाण्डेया उपाध्याया ब्राह्मणा वयमिति वदन्तो नापत्रपन्ते । केवलं जन्मना जातिवादमङ्गीकृत्य ब्राह्मणैः स्वीया प्रतिष्ठा चिरसंचिताऽपि विनाशिता । गुणकर्माभावेन हेतुना न कोऽपि तान्मानयति ।

एवं शौर्यधैर्यबलपराक्रमतेजोदाक्ष्यदानादिगुणकर्माभावेन क्षत्रियैरपि स्वप्रतिष्ठा नाशिता, अद्य राज्यशासनादपि ते भ्रष्टा दृश्यन्ते । शूद्रप्रायाः कापट्यदुराचारानृताद्यशुभकर्मानुष्ठानेऽपि वयं क्षत्रियाः, वयं वैश्या इति वदन्तोऽवलोक्यन्ते । अतो वयं यथार्थतो निश्चिनुमः—तत्तद्गुणकर्मभिरेव जातिवादो विहितः सनातनधर्ममूलाधारे प्रशस्ते वेदे । तथाहि वेदमन्त्रेषु तावद्विप्रशब्दस्यैवं ब्राह्मणशब्दस्य च प्रयोगस्तत्तद्विशिष्टगुणकर्मप्रबोधकविशेषणार्थं एवोपलभ्यते, न तु विशेष्येऽमुकसमाजविशेषे । विप्रः स्यान्मेधावी बुद्धिमान् प्रतिभाशाली शुभगुणकर्मविधर्ता । निरुक्ते यास्कमहर्षिणाऽपि तथैव प्रदर्शितमिति निष्पक्षपाता विद्वांसो विजानन्त्येव ।

एवं ब्राह्मणशब्दोऽपि ब्रह्म = वेदस्तदध्ययनकर्ता, प्रचारकर्ता, तदर्थं ब्रह्मचर्यादिव्रतविधर्ता, तल्लभ्यं ब्रह्मतत्त्वज्ञानञ्च यः सम्पादयति, स एव मुख्यो ब्राह्मणः प्रत्येतव्यः। न त्वमुकसमुदायविशेषे लब्धजन्मा ब्राह्मणः स्यात्। परन्तु बहुकालमारभ्य सम्प्रत्यपि भूयोभिः पण्डितैः पौराणिकैस्तादृशविशेषणार्थशून्यं केवलजातिपरमेव तच्छब्दसंयोजनं विहितं, विधीयते च।

एवं क्षत्रियशब्दस्य प्रयोगोऽपि वेदे तावद्विशेषणार्थ एव प्रयुज्यते, न तु विशेष्येऽमुकसमुदायविशेषे। परन्तु—अधुनाऽपि तैः पण्डितैः खलु तस्य प्रयोगो हठवादितया बलाद् अमुकजातिविशेषमेवोद्दिश्य क्रियते। क्षत्रियोऽस्ति क्षतात्त्राणकर्ता, यत्र कुत्रापि क्षतं दुष्टप्रहारान्यायादिलक्षणमुपलभ्येत, तत्र गत्वा तं स्वकीयं शौर्यादिकं प्रदर्श्य निवारयति, तं विपन्नं जनं समाजं राष्ट्रञ्च क्षतात् त्रायतेऽभिरक्षति, स एव यः कोऽपि स्यात्क्षत्रियो वेदितव्यः।

तथा च वैदिकयुगानन्तरं पौराणिकैः पण्डितैर्वेदमन्त्राणां स्वकपोलकल्पितानर्थान्कृत्वाऽद्यपर्यन्तं स्वस्वार्थान्धतायाः नग्नं प्रदर्शनं विहितं, विधीयते च, भारतराष्ट्रसमाजमुख्यैक्यविनाशकमिथ्याविषमताया विषमय्या विवर्धनं कृतं, क्रियते च। प्रशस्ते वैदिकसनातनधर्मविषये एवं हिन्दुसमाजव्यवस्थायां बहोः कालाद्धिन्दुजनता तैर्मिथ्याज्ञानात्मकगहनान्धकारे विनियोजिता, विनियोज्यते च।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।' (गी. ४।१३)
इति सर्वज्ञप्रभुश्रीकृष्णोक्तेरपि विनिश्चीयतेऽयं पक्षः। किं बहुनोक्तेन? अनेकैर्विद्वद्धौरेयैर्महानुभावैः स्वस्वसम्मतिषु विशदीकृतोऽयमर्थः। अतो द्रष्टव्यं तत्पुस्तकं 'सम्मतिविचाराभिनन्द-

तामुद्दिश्य विद्वद्वरैः प्रकटितानि सम्मत्यादिनि प्रदर्श्यन्ते १५

नादीनीतिशीर्षकं वेदान्ताचार्यस्वामिब्रह्मानन्दगिरिसङ्कलितं वैदिकसनातनधर्मसंस्कृतिमहौदार्यप्रसाधकं चातुर्वर्ण्यभारतसमीक्षाग्रन्थाभिप्रायसमर्थकम् ।

अतोऽहं चातुर्वर्ण्यभारतसमीक्षाख्यग्रन्थरत्नस्यास्मिन्प्रशस्तधर्मप्रिये भारते वर्षे सर्वत्र ग्रामे ग्रामे, नगरे नगरे च विपुलः प्रचारः स्यादित्याशासे, येन समस्ते भारते हिन्दूनामार्याणां तत्तद्गुणकर्ममूलकं प्रेमसद्भावविवर्धकं मिथ्याभिमानद्वेषादिविनाशकं विविधाभ्युदयसम्पादकं प्रशस्तं संगठनं साधितं स्यादिति ।

विज्ञापयति–

विदुषां साधूनां वशंवदः
स्वामिजदीश्वरानन्दो महामण्डलेश्वरः
मोहनजगदीश्वराश्रमाध्यक्षः
कनखलवास्तव्यः
ता० १६।६।६६

श्रीहरिवल्लभा-लक्ष्मीकमलादेवी

आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्बिभ्रती,
दानं पद्मयुगाभये च वपुषा सौदामिनीसंनिभा ।
मुक्ताहारविराजमानपृथुलोत्तुङ्गस्तनोल्लासिनी ,
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती हरिम् ॥

हरिः ॐ

श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोत्रियब्रह्मनिष्ठस्य विद्वद्वरिष्ठस्य वाराणसेयसप्तसागरस्थकाशीदेवीमठाध्यक्षस्य व्याकरणाचार्यस्य दर्शनशास्त्रिणः स्वामिरामानन्दमहाराजस्य—

बृहत्संमतिप्रशस्तिपत्रकम्

अन्तर्वाणिगणैः प्रणम्यचरणो विद्याप्रभाभासुरो,
विद्वत्तल्लजमण्डनो यतिवरो गाम्भीर्यवारांनिधिः ।
अन्तर्वेदमहोदधि-प्रविलसज्ज्ञानादिरत्नाश्रयः,
आनन्दान्तमहेश्वराख्ययतिराट् स्वामी विजेजीयते १॥१॥

अहो ! महान्तो महनीयकीर्त्तयः,
परोपकारे धृतबोधहेतयः२ ।
अस्मिन् भवाब्धौ पततां जनानाम्,
पारं विधातुं कृतबोधनौकाः३ ॥२॥

---

१ शार्दूलविक्रीडितम् । 'अन्तर्वाणिस्तु शास्त्रवित्' इत्यमरकोशात् अन्तर्वाणीनां शास्त्रविदां विदुषां गणैः समूहैरित्यर्थः । विद्याप्रभाभिर्भासुरः = सुशोभित इत्यर्थः । विदुषां मध्ये ये तल्लजाः =श्रेष्ठाः मान्याः सन्ति तेषामयं मण्डनः—भूषणभूतः श्रेष्ठः इत्यर्थः । विजेजीयते = अतिशयेन-विजयते ।

२ बोधहेतयः = ज्ञानास्त्राणीत्यर्थः ।

३ उपजातिवृत्तम् ।

यथा महेशाद्द्विविधा हि सृष्टि-
र्विलक्षणा दृष्टिपथं प्रयाति ।
तथा महेशाद्यतिवृन्दवन्द्याद्,
हृद्याऽनवद्या कृतिराशु नव्या१ ॥३॥

लिखति भव्यमनेकमनेकधा,
बुधवरो जगतीजनहेतवे ।
परमशेषविशेषगुणान्विता,
विशति तद्भणितिर्हृदि सत्वरम्२ ॥४॥

आमूलचूलं परिपठ्य ग्रन्थं,
संमन्यते प्रेमभरेण चेत्थम् ।
नैकापि रेका परिशेषिताऽत्र,
ग्रन्थो मनोज्ञो ननु जातिवादे३ ॥५॥

ये केचिद्धार्मिकंमन्या विवदन्ते परस्परम् ।
"वयं श्रेष्ठा वयं श्रेष्ठा अधमा अपरे जनाः" ॥६॥

तेषामज्ञानमग्नानां भ्रान्तिभूतं पलायताम्
एतद्ग्रन्थसमालोकात्सूर्यादन्धं तमो यथा ॥७॥

---

१ उपेन्द्रवज्रावृत्तम् ।

२ द्रुतविलम्बितम् । तद्भणितिः = तस्य बुधवरस्य सदुक्ति-रित्यर्थः ।

३ इन्द्रवज्रावृत्तम् । रेका = शंकेत्यर्थः । आमूलचूलम् = आद्योपान्तमित्यर्थः , मनोज्ञः = प्रामाणिकतया यथार्थ-वादितया चायं ग्रन्थोऽतीव सुन्दरो मनोरमः = मनःसुरुचि-कर इत्यर्थः ।

नानोपपत्तिभिर्युक्तैः सर्वैर्मानैः समर्थितम् ।
जातिवादं समादय विजयध्वं महाशयाः ! ॥८॥
नाद्यावधि मया दृष्टः, ईदृशः संग्रहः कृतः ।
केनापि विदुषाऽन्येन स्वामिवर्यैर्यथा कृतः ॥९॥
एतद्ग्रन्थप्रचारेण भ्रान्तिध्वान्तकृताश्च ये ।
अनर्था अभवंस्ते तु समूलं नाशिताः समे१ ॥१०॥
हर्षो महीयान् संजातो ग्रन्थस्यास्य विलोकनात् ।
जनताया महापुण्याद् ग्रन्थोऽयं दृश्यतां गतः ॥११॥
स्वामी महेश्वरानन्दो मण्डलेशो महानयम् ।
एतेनापूर्वग्रन्थेन युगान्तरविधायकः ॥१२॥
निर्भीकं शास्त्रसिद्धान्ता, रीत्या शोभनयाऽनया ।
प्रकाशिता जातिवादे स्वान्तध्वान्तविनाशकाः ॥१३॥
जातिवादं समाश्रित्य, ये प्रश्ना जगतीतले ।
यावन्तो ह्यद्य विद्यन्ते लोकशोकविधायिनः ॥१४॥
तेषां समेषां प्रश्नानामुत्तराणि कृतानि वै ।
अतः सन्तोषमायान्तु जिज्ञासवो हि सज्जनाः ॥१५॥
ब्रह्मणोत्पादिता लोका२ ब्राह्मणाः स्युरिमे ध्रुवम् ।
पितरि या स्थिता जातिः सा वै पुत्रे प्रतिष्ठिता ॥१६॥
अतोऽपि तेषु वैषम्यं नास्ति जन्मनिबन्धनम् ।
गुणकर्मप्रयुक्तं तन्मन्तव्यं शास्त्रबोधितम् ॥१७॥

---

१ समे=सर्वे इत्यर्थः, समः सर्वपर्यायः ।
२ लोकाः=जनाः–मानवाः ।

तामुद्दिश्य विद्वद्वरैः प्रकटितानि सम्मत्यादिनि प्रदर्श्यन्ते १९

शुचा दुद्राव स शूद्रः इति वेदशिरोवचः१ ।
प्राधान्यं गुणकर्मादे गौणतां जन्मनश्च तत् ॥१८॥
विज्ञापयति लोकेभ्यः समतैकत्वसिद्धये ।
तथापि लोका भ्राम्यन्ति स्वाज्ञानध्वान्तकारणात् ॥१९॥
प्राधान्यस्य परित्यागाद् गौणतायाश्च संश्रयात् ।
उत्तमाधमभावेभ्यो गर्वादिदोषपोषकाः ॥२०॥
२ तादृक्षलोकालोकाय ग्रन्थोऽयं दीपस्तम्भकः ।
३ वात्यादिभयशून्योऽस्ति प्रकाशेन सदान्वितः ॥२१॥
स्वामिवर्य्यैः कृताद्ग्रन्थाज्जना जाताश्च निर्भयाः ।
एतद्ग्रन्थं पुरस्कृत्य, जयं प्राप्नुत भो जनाः! ॥२२॥

---

१ वेदशिरोवचः = वेदांतस्योपनिषदो वचनम् । दुद्राव = गत-वान् । शुचा = शोकेन ।

२ (क) तादृक्षा लोकाः = तादृक्षलोकाः—तादृशजनाः, तेषां, आलोकाय = प्रकाशाय—ज्ञानप्रदीपाय ।

(ख) तादृक्षाः = तादृशजनाः, लोकालोकः = पर्वतविशेष इव । यथा लोकालोकपर्वतस्य कश्चिद्भागः प्रकाशयुक्तः अपरश्च अन्धकारावृतस्तथा तादृशलोकाश्च अर्धविवेकिन इत्यर्थः । तस्मै = तस्याविवेकनिवारणार्थं ग्रन्थोऽयं, दीप-स्तम्भकः = विवेकरूपप्रकाशस्तम्भः ।

३ यथा वात्यादिभ्यो दीपस्तम्भस्य भयं विद्यते तथैव शास्त्रार्थ-सिद्धान्तानामपि प्रतिवादिभयं विद्यते—शास्त्रे वादिभयमि-त्युक्तत्वात्—ग्रन्थोऽयं प्रतिवादिभयरहितः — अकाट्यप्रमाणैः सुरक्षितत्वात् ।

प्रमाणान्वेषणे कष्टं नैवोपजायतेऽधुना ।
स्वामिवर्यैर्ग्रन्थरत्ने सर्वेषां संग्रहः कृतः ॥२३॥
ग्रन्थस्यालोकनान्नैव शङ्काऽऽतङ्कोऽवशिष्यते ।
औदार्यं वेदधर्मस्य प्राशस्त्यञ्चावगम्यते ॥२४॥
प्रियभारतराष्ट्रस्य प्रेमसद्भावपूर्वकम् ।
संपन्नं स्तुत्यमेकत्वं नान्यत्किञ्चिदपेक्ष्यते ॥२५॥
काशीवासी यतिः स्वामी रामानन्दः समिच्छति ।
ग्रन्थरत्नमिदं जीव्याद्यावच्चन्द्रदिवाकरौ ॥२६॥
ग्रन्थदर्शनसम्भूत — हर्षोद्रेकतया मया ।
आशयः १ स्वाशयस्यैवं प्रादर्शि मोदहेतवे ॥२७॥
अनेकविधविद्वद्भि गुणलुब्धैरनेकशः ।
२हार्दरिङ्गत्तरङ्गैस्तैः स्वे स्वे भावाः प्रदर्शिताः ॥२८॥
ग्रन्थस्यास्य महत्त्वं हि स्पष्टं विज्ञायते भृशम् ।
गगने भासमानस्य भास्करस्य द्युतिर्यथा ॥२९॥

---

१ आशयः = अभिप्रायः स्वाशयस्य = स्वकीयचित्तस्येत्यर्थः । 'आशयः स्यादभिप्राये मानसाधारयोरपि' इति विश्वप्रकाश-कोशः । स्वे स्वे = स्वकीयाः—स्वकीयाः इत्यर्थः ।

२ हार्दरिङ्गत्तरङ्गैः = हृदयभवाः—हार्दाः—रिङ्गन्तः = विलसन्तः प्रचलन्तः—शुभाशयलक्षणाः तरङ्गाः येषां तैरित्यर्थः ।

महेश्वरजटाजूटाद् , गङ्गा रिङ्गति भूतले[१] ।
तथा महेश्वराज्जाता ग्रन्था भान्ति महोज्ज्वलाः ॥३०॥
चातुर्वर्ण्यसमीचेयं , भारतस्य हिताय या ।
कृता ध्वान्तस्य विध्वस्त्यै, भास्वद् दीप्तिर्यथा दिवि ॥३१
हृद्यानवद्यपद्यैस्तु रामानन्दो हि मस्करी ।
ईदृशाशयपुष्पाणां गुच्छोपदामदान्मुदा [२] ॥३२॥

श्रीनरसिंहस्य भगवतो भक्तरक्षा

भारत्या विजयाय कामकलयाऽप्येतां चिचीषुः कलां,
आविश्यामरुकस्य कायमुपभुञ्जानोऽवरोधस्त्रियः ।
श्रीमच्छङ्करदेशिको निजतनुं दग्धां चरै र्वह्निना,
यत्कारुण्यत आप तामविकलां तं श्रीनृसिंहं भजे ॥

---

१ रिङ्गति—प्रचलति—निर्गता सती प्रविभाति वेत्यर्थः । ग्रन्थेषु महोज्ज्वलत्वं विविधप्रमाणतर्कपरिष्कृतसुसंगतहितसुखकरमनोरमार्थप्रतिपादकत्वाद्धेतोः संख्यातिगविद्वज्जनमुखनिर्गतप्राशस्त्यधन्यवादसमर्पकत्वलक्षणमत्र वेदितव्यम् ।

२ उपदाम् = उपहारम्, गुच्छलक्षणमुपहारं, मुदा = प्रेम्णा-प्रमोदेन वा, अदात् = समर्पितवान् । 'उपायनमुपग्राह्यमुपहारस्तथोपदा ।' इत्यमरः ।

भारतीयार्यहिन्दुषु समतैकताप्रचारः कर्त्तव्यः,
भारतराष्ट्रस्य च सर्वविधोऽभ्युदयो विधातव्यः।

आर्यवैदिकहिन्दुधर्मानुयायिनां पवित्रतमस्यास्याखण्ड-भारतवर्षस्य हिन्दुसमाजादेव विनिर्गतैर्जिन्नाप्रभृतिभिर्भारतीयैर्य-वनैस्त्रयः—खण्डाः सर्वथा विभक्ताः कृताः। त्रिभिर्भागैर्विभाजित-त्वान्नास्माकीनं भारतमद्य विशालाखण्डभारतरूपेणावस्थितमिति सार्वजनीनं प्रत्यक्षमेतत्। हिन्दुजातावपि जन्ममूलकोत्तममध्य-माधमभेदभावेभ्यः, तत्तद्विभिन्नासंख्यधर्मसंप्रदायेभ्यश्च संघटन-समतैकताविनाशिका मिथो विषमयीविषमता सर्वत्र दृष्टा। अत एवावशिष्टानपि परस्परं विभक्तान् प्रेमसद्भावबन्धुभावरहितान् हिन्दून् विनाशयितुं बौद्ध-खिष्टीययवनादयो बद्धपरिकरा दृश्यन्ते।

जन्ममूलकोच्चावचजातिविभागेन हिन्दून् मिथो विभज्य, तेषु वैषम्यविषं प्रसार्य 'वयमुच्चजातीयाः' इति मन्यमानाः केचन, स्वाभ्युन्नतिशिखरिशिखरमारोढुकामानन्यजातीयान् अवरुन्धन्ति। नैतावदेव, प्रत्युत तैः साकमशिष्टशब्दादिलक्षणापमानजनक-व्यवहारान् विदधानास्तान् विधर्मिषु गन्तुं बाध्यान् कुर्वन्ति। अस्तु तावत् कस्मादपि कारणाद् ये प्राक् विधर्माणः संजाता-स्तान्नैजपूर्वहिन्दुजातौ प्रत्यागन्तुमिच्छतः—स्वात्मानं महाधार्मिकं धर्मनेतारमाचार्यं मन्यमाना गुरुमानिन इत्थं कर्तुमवरुन्धन्ति, ये प्राग् विकृताः—सञ्जातास्ते कथमपि संस्कृता नैव भवितुमर्हन्ती-ति—ब्रुवाणाः, 'दासान्यार्याणि अकरः, (ऋ० ६।२२।१०) विश्वं कृणुध्वमार्यम् (ऋ० ९।६३।५) इत्यादीनि स्वतःप्रमाणान्यति-धन्यानि वेदवचांस्यपि स्वमौढ्यात् तिरस्कुर्वाणाः।

अत एव हिन्दुसंघटनकामैः कतिभिश्चिन्महानुभावैः संयोजिते तच्छुद्धयवसरे तैर्हिन्दुजातिविघटनवादिभिर्दम्भदर्पशीलैर्महान्तोऽन्तराया एवोपस्थापिता इत्यत्र सप्रमाणा अनेके इतिहासाः समुपलभ्यन्ते ।

यदभूत्तदभूदेव-परन्त्वधुना जन्मजातिवादमादाय यः कोऽप्यादिजोऽन्त्यजो वा मिथ्याभिमानी, विविधज्ञानक्षेत्रे बलशौर्यक्षेत्रे विविधकलायन्त्रादिनैपुण्यक्षेत्रे राष्ट्रशासनक्षेत्रे च, स्वकीयप्रगतिं कर्तुकामं कंचिदपि जनं निरोद्धुं नैव शक्नोतीति महतः संतोषस्यावसरो जातः । 'चातुर्वर्ण्यभारतसमीक्षे' तिनामधेयस्य पुस्तकस्यास्यानुशीलनेनेदमवबुध्यते-यत् समये समये सामाजिकसंघटनस्य कर्त्तारः शाश्वतसमुदारवैदिकधर्मस्य चोपदेष्टारो महानुभावाः कांस्कान् निम्नजातीयान् समुन्नतान् विधाय तान् ब्राह्मणाद्युच्चश्रेणिषु न्यवेशयन् । विजातीयानां विधर्मिणां प्रतिकूलप्रचारान्नास्माकमियती हानिरस्ति, यावती स्वगृहावस्थितेभ्यः सजातीयेभ्यो मिथ्याभिमानिभ्यो विरोधिभ्यो भवति । यतो हि ते हिन्दुजातेरत्युपयोगिनं रक्षणपोषणसेवादिकर्त्तारं विशालसंख्याकं भागं जन्मनैव नीचं वदन्ति । जन्मनैव नीचजातिभावमसहमानं स्वगौरवलाभकामिनं स्वाभिमानिनं तं भागं बलाद् हिन्दुभ्यः पृथग्भवितुं, विधर्मिसमुदाये प्रवेष्टुं चोत्तेजयन्ति । 'अमुकनिम्नजातीयानां हिन्दूनां, देवमन्दिरादिषु धर्मस्थानेषु प्रवेशेन तान्यपवित्राणि-अनुपयोगीनि-निन्दनीयानि-अव्यवहार्याणि च भवन्ति' इत्याद्यनिष्टकरविचारवतां स्वीयविचारं कार्यरूपेण परिणतं कुर्वतां उरगजिह्वायमानानां-म्लेच्छबादशाहावरंगजीवकल्पानां लोकानां धर्मध्वजिनां नास्ति हिन्दुजातौ न्यूनता ।

काश्मीर-बंगाल-पञ्चाप-आसाम-प्रभृतिदेशानां विभागास्तेषां शोचनीयदशा च नाभविष्यद् यदि तद्देशीयसमधिकजनता विधर्मिणां पाशे नापतिष्यत् । पतितानामपि तेषां विकृतानां स्वबन्धूनां सद्यः समुद्धाराय संस्कारकरणाय च हिन्दुधर्मनेतारः—आचार्याः बद्धपरिकराः अभविष्यन् । परन्तु हा ! महाकष्टकरं तत्—तेषां मिथ्याभिमानिनां हृदयेषु कूपमण्डूकतानिभं कार्पण्यमेवाभूत्, दीर्घदृष्टितायाःसमुदारतायाश्च नामाऽपि नासीत् । अधुनापि तद्वंशोद्भवाः जीवन्ति, विविधान् मिथ्याविभेदान् समुपदिशन्तो हिन्दुजातिसंघटनमवरुन्धन्ति ।

काशीविश्वेश्वरस्य मन्दिरं वारत्रयं खण्डितं विधर्मिभिर्यवनैः-इति प्रसिद्धमितिहासेषु सर्वसाधारणजनेषु च, किन्तु आधुनिकैः सजातीयैः कतिपयैः-अवरंगजीवकल्पमानवापसदैः मिथ्याधर्माभिमानिभिः पुनरपि चतुर्थवारं दुरुक्तिप्रहारैर्विखण्डितं, यतस्तत्रास्पृश्यहिन्दुजातीयाः प्रविष्टास्तेन तन्मन्दिरमप्रवित्रं जातं तस्यार्चनदर्शनाद्यर्थमुपयोगोऽधर्मकरः, तस्य शिवलिङ्गमूर्तिरपि शौचालयस्थितपाषाणनिभा निन्दनीया जातेति वदद्भिः । एतादृशमिथ्याविचारवद्भ्यो हिन्दुजातिविघटने प्रयासवद्भ्यः स्वकीयस्वार्थमात्रसाधनाय प्रयत्नशीलेभ्यः क आशालेशो हिन्दुजातिसंगठने । ते हि मठे मन्दिरे पाठशालायामाश्रमे च स्थित्वा प्रलपन्ति—'हिन्दुषु अमुकजातीयाः भ्रष्टाः नीचाः शूद्रा महाशूद्राः अधमाश्च सन्ति, अमुकजातीयाश्चोत्कृष्टाः पूज्याः मान्याश्चेति" अवशिष्टे खण्डिते भारते वैषम्यविषं प्रसारयन्ति च ।

नेत्रे समुद्घाटच पश्यन्तु भवन्तः—यत्र-यदा-खृष्टीयाः यवनाः बौद्धादयश्च भारतस्य प्रतिदेशं प्रतिवनं प्रतिग्रामं प्रति-

नगरञ्च गत्वा प्रतिकूलजलवायु-निवासापमानकष्टादिकमप्य-वगराय्य निम्नकोटिषु हिन्दुषु प्रेमसेवासद्भावौदार्यादिकं प्रदर्श्य स्वधर्मस्य, स्वभाषायाः, स्वभूषायाः स्वसभ्यतायाश्च प्रचारार्थं स्वजीवनमप्युत्स्रष्टुं बद्धपरिकराः सन्ति तत्र तदा समुन्नतकोटिका हिन्दवः स्वगृहेष्वेव तिष्ठन्तो विविधसुखारामञ्च भुञ्जाना वय-मेवोत्तमाः स्मः, अपरे सर्वेऽप्यधमाः सन्तीति, शब्दतोऽपि स्व-स्मिन् गर्वमपरस्मिन् घृणाञ्च प्रदर्शयन्तः स्वहिन्दुजातिविघटनाय शौर्यं प्रदर्शयन्ति । ते किल लौकिकैकसुखजीविनो धार्मिकनेतृप-दवाच्याः वराकाः कथं जानीयुर्यत् स्वदेशस्य वन्यादिमिजोनागा-दिप्रदेशेषु वर्तमानानां निम्नकोटिकानामशिक्षितानां हिन्दुजाती-यानां का दशा भवति ?, कीदृशी च तेषां प्राचीनाऽर्वाचीना च स्थितिः ? आर्यहिन्दुधर्मघातका विरोधिनस्तान् स्वसंघेऽबाधगत्या विविधप्रकारैः कथं प्रवेशयन्ति ? वयं यथार्थतो निरीक्षामहे, सम्प्रति राष्ट्रसमाजयोः संरक्षणाय सर्वत्र सर्वैरप्यार्यैर्हिन्दुभिरेता-दृशी सफला शक्तिपूर्णा घोषणा विधेया—

हिन्दुसंघटनं भूयात्, बलबोधादिवर्धकम् ।
एकतासमताशालि, धर्मसंस्कृतिधारकम् ॥
राष्ट्रस्याभ्युदयो भूयात्, वेदधर्मप्रचारणम् ।
दीनताहीनतानाशो भारतं चाप्यकण्टकम् ॥' इति ।

भवतु तावद् अधुना-'स्थितस्य गतिश्चिन्तनीये' ति न्याय-मनुसृत्य सावधानेन भवितव्यम्-पूर्ववदनर्थकरी घटना न भवेदि' ति । अत एव महामण्डलेश्वरेण विद्वद्वर्येण स्वामिश्रीमहेश्वरा-नन्दमहाराजसंन्यासिमहोदयेन चातुर्वर्ण्यभारतसमीक्षानामकं पुस्तकं विरचय्य निर्भीकतापूर्वकमार्यहिन्दुजातिं विनाशात् संर-

क्षितुं प्रायत्यत। तत्कृतेऽस्माकं भूयांसः साधुवादा धन्यवादाश्च सन्ति।

वयं तावत् पश्यामः-यदा यदा जातीयसामाजिकराष्ट्र-यह्रासप्रसंगाः आगच्छन्ति, तदा तदा साधुसंन्यासिमहात्मान एव तन्निवारणाय सन्नह्यन्तः समुदारातिप्रशस्तशाश्वतवैदिकधर्म-ध्वजमुत्तोलयन्तश्चाग्रेसरा भवन्ति।

गीतासु तावत्—द्रव्ययज्ञास्तपोयज्ञाः इत्यादिवचनैरनेके प्रशस्ता लोककल्याणसाधकाः यज्ञाः प्रत्यपाद्यन्त। किन्त्वद्या-स्मत्कृते आर्यहिन्दुजातेः सर्वविधं प्रशस्तं संघटनमेवैको महान् स्तुत्यो यज्ञो विद्यते। अस्मिन् यज्ञे यथाशक्ति सर्वैरपि राष्ट्र-समाजैकतासमतासाधिकाः सद्विचारसदुच्चारादिलक्षणाः आहुतयः प्रक्षेप्तव्याः। सर्वापेक्षया महनीयो यदि कश्चिदिष्ट-देवोऽस्ति, तदखण्डितं स्वप्रशस्तसंस्कृतिधारकं बोधबलैश्वर्यादि-समन्वितं पावनं भारतवर्षमेव। एतस्य स्वेष्टदेवस्य समाराध-कानां संख्या न्यूना मा भूत्' किन्त्वधिकाभ्योऽप्यधिका स्यादिति सद्भावनापरवशेन परमदयालुना परमोदारमतिना महात्मना महामण्डलेश्वरेण स्वामिमहेश्वरानन्देन पुस्तकमिदं निष्पक्षपातया यथार्थप्रशस्तधिया विरचितम्। तस्मात्—'चातुर्वर्ण्यभारतसमीक्षा' नामकादस्मात् पुस्तकाद् हिन्दुसनातनवैदिकधर्मविषयिणीः सर्वाः कार्पण्यस्वार्थान्धतादिलक्षणाः शंका दूरीकृत्यार्यहिन्दुजातिसंघट-नाय सर्वेऽपि भारतीयाः बद्धपरिकरा भविष्यन्तीति वयमाशास्महे—

रामानन्दं परित्यज्य, रामानन्दरसप्रियः।
स्वामी व्याकरणाचार्यस्तद् ग्रन्थस्य प्रशंसकः॥
काशीदेवीमठे वासी काशीस्थे सप्तसागरे।
रामानन्दो यतिः साक्षात् संमतिपत्रलेखकः॥

श्रीमद्दार्शनिकपञ्चानन-षड्दर्शनाचार्य-नव्य-न्यायाचार्य-सांख्ययोगवेदान्तमीमांसातीर्थ-पण्डितप्रवर-परमहंसोत्तम-श्रीकृष्णवल्लभाचार्य-स्वामिनारायणमहोदयस्य चातुर्वर्ण्यभारतसमीक्षाग्रन्थरचयित्रे-

अभिनन्दनम्

श्रीमद् ब्रह्मात्मक-महामण्डलेश्वर-यतिवर्य-श्रीमन्महेश्वरानन्दजीस्वामिवर्यैर्भारतीयहिन्दुप्रजानां ज्ञप्तिकृतिहितार्थं ब्राह्मणत्वादिजातिनिरीक्षणरूपं सर्वतन्त्रसिद्धान्तानुमोदितपद्धतिमनुसृत्य चातुर्वर्ण्यभारतसमीक्षात्मकं शब्दब्रह्मणो मूर्तस्वरूपं तदधिकारिभ्योऽर्पितमिति निरवधिप्रमोदास्पदमेतत् ।

चातुर्वर्ण्यभारतसमीक्षाया लेखकमहोदयो महामण्डलेश्वरो महानुभावः सृष्टयुत्पादकपालकं ब्रह्मेव, वात्सल्यस्नेहसुधामयी मातेव, सौजन्यशिक्षकः पितेव च हिन्दुप्रजानां समतैकतासम्पादकं हितमावेदयति, पुनः स विद्वान् साधुसंन्यासिरूपः सन् समग्रभारतराष्ट्रस्य ज्ञानबलैश्वर्यधनधान्यश्रमस्वास्थ्यकीर्त्यादिविवर्धकं वास्तविकमभ्युदयनिःश्रेयससम्पादकञ्च धर्मं सनातनं वैदिकं बोधयति चेत्यतः स सर्वजनश्रद्धास्पदतां निःसंशयं लभते । श्रीमद्भिः स्वामिवर्यैर्महामण्डलेश्वरैर्भारतीयार्यहिन्दुषु वर्तमानाया जन्मजातिनिबन्धनोत्तमाधमभेदभावप्रयोजितविघटनलक्षणाया गर्वघृणादिमिथ्यादुर्गुणप्रयोजकनिन्दनीयविषमताया दूरीकरणाय स्वकीयं पावनं हृदयमत्र तत्तच्छास्त्रप्रमाणतर्कदृष्टान्तादिप्रदर्शनेनोद्गीर्णमिति नान्यो विद्वानेषां दिगन्तव्यापिनीं प्रशस्तां कीर्ति-

मिदानीं लब्धुं शक्तः—इत्यहं मन्ये। अत एव सर्वैरपि बुद्धिशालिभिर्भारतीयैर्ग्रन्थोऽयमभ्यासपदवीं प्रापयितुमर्हं इति। अस्याश्च समालोचनाय तान् राजधिष्ण्याधिष्ठितान् साम्यव्याप्तहृदयानेतद्विषयज्ञानप्रेप्सून् भारतीयशिक्षितनरनारीगणानप्यहमभ्यर्थये।

श्रीत्रिवेणीपुरीस्वामिब्रह्मचरणानां प्रशस्ता सम्मतिरपि चातुर्वर्ण्यभारतसमीक्षायास्तत्तदङ्गपुष्टिं विदधातीति सापि विदुषां प्रशस्ततरा भाति। कालीपदभट्टाचार्यादीनां वृत्तान्तेन भारतीयपण्डितब्राह्मणानामेव विद्यते भारतीयहिन्दुविघटनावनतिप्रयोजकतेति स्फुटमवगम्यते।

अपि च वाराणस्यां ब्राह्मणमहासम्मेलनावसरे वैष्णवाचार्यैः सर्वहिन्दुजातिभ्यो यद्वैदिकमन्त्रप्रदानं क्रियते तद्वैदिकं न वेति विचारे प्रस्तुते प्रशस्तैः समदर्शिभिः पण्डितैः—तत्राचार्या एव प्रमाणं, शास्त्रं त्वाचार्यनिर्मितमिति शास्त्रमाचार्याननुसरेन्न त्वाचार्याः शास्त्रमिति निर्णीतम्, तथा च शास्त्रोक्तमपि ब्राह्मण्यमाचार्यप्रबोधिततत्तत्प्रशस्तगुणकर्माधीनमेवेति विज्ञापितम्।

अथ जातौ संक्षिप्तो विचारो विधीयते—केयं जातिरिति? नहि निपुणतरमीक्षणे कृतेऽपि रत्नेष्विव ब्राह्मणादिषु पिण्डतत्संस्थानादृते कश्चिज्जात्यात्मको विशेषः प्रत्यक्षतोऽवगम्यते। यथाऽदृष्टपूर्वं हंसं प्रथमतः पश्यंस्तस्य हंसत्वजातिं न गृह्णाति, किन्तु विशिष्टाकृतिलक्षणं धर्ममात्रमेव पदार्थं गृह्णाति, तत्र संस्थानातिरेकेण न काञ्चित् पृथग्भूतां जातिमुपलभते तथा ब्राह्मणादिष्वपि वेदितव्यम्। अतः—'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।' (गी० ४।१३) इत्यादिशास्त्रप्रबोधिततत्त-

द्गुणकर्मादिविभागप्रयुक्तो ब्राह्मणत्वक्षत्रियत्वादि-औपाधिक-धर्मप्रबोधको राष्ट्राभ्युदयसाधकः शिक्षारक्षादिविभागनिर्वाहको व्यवहार एव श्रेयान् विराजते । अतो न ततः पृथग्रूपेण काचन जातिः सिद्ध्यति । अत एव भगवता श्रीस्वामिनारायणेन गुर्जरादिदेशेषु शरणागतनरनारीणां तथाविध (शमदमादिप्रशस्तगुण-यज्ञदानादि शोभनकर्मालङ्कृत) ब्राह्मणत्वप्राप्तिमहापथ-सन्तानो वैष्णवदीक्षाविधिलक्षणः सम्प्रवर्तितोऽद्यापि विराजते, आसृष्टयन्तं चिरजीवनो विराजिष्यते च । सति चैवं त्याग-विरागादिब्रह्मधर्माचारवन्तो ब्रह्मचर्यब्रह्मनिष्ठासम्पन्नास्त्यागाश्रमिणः सर्व एवोत्तमसोपानारूढाः श्रद्धेयाः पूज्याः श्रेष्ठब्राह्मणा एव प्रत्येतव्याः । यदाहुः—

निर्ममा निरहङ्कारा दानशूरा दयापराः ।
सत्यब्रह्मविदः शान्ताः सर्वशास्त्रेषु निष्ठिताः ॥
सर्वलोकहितोपाये प्रवृत्ताः सत्यवादिनः ।
भक्त्यासक्ताः प्रपन्नाश्च ब्राह्मणास्ते प्रकीर्तिताः ॥
क्षत्रियास्तु क्षतत्राणाद्वैश्या वार्ताप्रवेशनात् ॥ इति ।

(अभिनन्दनस्यास्य लेखकमहोदयःपण्डितप्रवरः श्रीकृष्ण-वल्लभाचार्यः—चातुर्वर्ण्यभारतसमीक्षायां तत्तद्दृष्टान्तोपबृंहिता ये ये विषयाः—जन्मजातिवाद - गुणकर्मवाद - वर्णद्वयवाद-एकवर्णवाद-एकत्र चातुर्वर्ण्यवादादयः—अभिवर्णिताः सन्ति, तान् सर्वान् स्वकीयविस्तृतलेखे स्वविशदानुमोदनेन समर्थयति । सम्पूर्णं तं विस्तृताभिनन्दनलेखमनुकूलावसरे प्राप्ते प्रकटयिष्यामि । अत्र तु कियन्तं तत्रत्यमावश्यकं तं तं प्रकीर्णं संक्षिप्तं लेखमेव प्रदर्शयामि) ।

इति निवेदयामि—

स्वामिब्रह्मानन्दगिरिर्वेदान्ताचार्यः

मम संमतिः

(लेखकाः-जम्बुकाश्मीरप्रदेशस्थितमठवास्तव्याः श्री
मत्परमहंसपरिव्राजकाचार्याः श्रोत्रियब्रह्मनिष्ठाः
वेदान्ताचार्य्याः-विपश्चिद्धरेण्याः स्वामि-
सत्यानन्दसरस्वतीमहाभागाः)

यश्चातुर्वर्ण्य - भारत-समीक्षाख्यो महानयम् ।
ग्रन्थो महेश्वरानन्द - यतीश्वरविनिर्मितः ॥१॥
तस्मिन् युक्तिप्रमाणाभ्यां, विचाराः ये प्रदर्शिताः ।
श्लाघनीयाश्च विद्वद्भिः, सर्वलोकहितावहाः ॥२॥
आहिमाद्रेरासमुद्रात् , आपूर्वापरवारिधिम् ।
स्थितो भारतवर्षोऽयं , पुराऽऽसीत्सुसमुन्नतः ॥३॥
अधिभूतं चाधिदैव - मध्यात्मञ्च विशेषतः ।
अयं विकसितो देशः सर्वाकर्षणभूरभूत् ॥४॥
कलाशिक्षाऽस्त्रशस्त्रादौ, साहित्ये वैद्यके तथा ।
विविधानीह शास्त्राणि, वेदोऽभून्मूर्धनि स्थितः ॥५॥
साहित्यैरुन्नतैः किञ्च , प्रोदारमतिभिर्बुधैः ।
अयं देशोऽन्यदेशानां गुरुर्मान्योऽभवन्मुदा ॥६॥
विश्वविद्यालयेष्वस्य , छात्राः विभिन्नदेशगाः ।
प्राप्य विद्यां निवृत्तास्ते , प्रशशंसुरिमं मुहुः ॥७॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरितं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥८॥

इत्येषा मानवी वाणी, प्रमाणमिह विद्यते ।
अन्ये च संस्कृताः ग्रन्थाः, संवदन्तीह साक्षिताम् ॥९॥
अत्र मूलं तु पश्यामः, सर्वोदयप्रसाधकम् ।
समत्वादर्शसंयुक्तं बन्धुभावं विशेषतः ॥१०॥
देशपतनहेतुश्च जातो मिथ्याग्रहोऽग्रतः ।
जात्यादिविषयोऽत्युग्रो भेदभावविवर्धकः ॥११॥
अभूद्विघटनं येन, पारतन्त्र्यप्रयोजकम् ।
वैदिकादर्शहानेन, लाभवन्तः परेऽभवन् ॥१२॥
पाकिस्तानश्च काश्मीरो नागदेशश्च संप्रति ।
निदर्शनस्वरूपेण प्रत्यक्षस्तस्य वीक्ष्यते ॥१३॥
मृतप्राया दशा चेयं हिन्दुधर्मावलम्बिनाम् ।
अत्र मूलं जन्मजाति - मिथ्याग्रहमिमं विदुः ॥१४॥
नाद्यापि यदि जागृयुः, हिन्दवः पतनात्पुनः ।
भवेद् दुर्दशा भीमा ह्यस्मदुत्तरवर्तिनाम् ॥१५॥
तस्मादुन्नतिवाञ्छा चेत्, मिथ्यावादान् परित्यजेत् ।
राष्ट्रोदयस्य हेतून् तान्, समीक्षायां प्रदर्शितान् ।
सर्वगान् बलबोधादीन् गृह्णीयादैक्यसाधकान् ॥१६॥
भाषावादः प्रान्तवादः, इत्यादिरपरोऽपि च ।
हेतुर्विघटनस्याभूद्, अद्य राष्ट्राहितप्रदः ॥१७॥
इमं दोषचयं सर्वं वैदिकादर्शतः खलुः ।
छित्त्वा संसाधयेन्नूनं राष्ट्रस्याभ्युदयं पुनः ॥१८॥

वैदिकादर्शबोधाय , राष्ट्राभ्युदयहेतवे ।
ग्रन्थोऽयं निर्मितः श्रीमन्मण्डलेश्वरतल्लजैः ॥१६॥
स्वामिमहेश्वरानन्द - यतिवर्यैर्महोदयैः ।
निरीक्ष्यतां बुधैः सोऽयं पक्षपातं विहाय च ॥२०॥
अनेन प्रतिबुद्धाश्च स्वान दोषान् वीक्ष्य लौकिकाः ।
अभ्युन्नतिं स्वदेशस्य करिष्यन्तीति मे मतम् ॥२१॥

॥ ॐ तत्सद्ब्रह्मणे नमः ॥

श्रीमत्परमहंसपरिव्राजकाचार्यस्य-श्रोत्रियब्रह्मनिष्ठस्य-नर्मदातटस्थित-ओंकाराश्रमप्रतिष्ठापकस्य-त्रैतवेदान्ताचार्यस्य-विद्वद्वरेण्यस्यार्यभावसत्यसनातनधर्मप्रचारकस्य स्वामिब्रह्मानन्दार्यमहाराजस्य-

स्वकीयं यथार्थं मन्तव्यम्

यः कश्चन महानुभावो वैदिकसनातनधर्मस्य मूलप्रमाणभूतान् वेदान् सुबुद्धेर्निष्पक्षविचारान्, सृष्टेः परिवर्तनशीलान् नियमान् च त्रयमेतत् बुद्धितुलया तोलयित्वाऽर्थात् सुसमीक्ष्य, भारते विशाले वर्तमानायाः चातुर्वर्ण्यव्यवस्थायाः निष्पक्षपातभावेन दर्शनं कृत्वा - यदि ब्राह्मणादिवर्णानां तत्तद्गुणकर्मस्वभावानुसारेण निर्माणं वेदपुरुषेण परमात्मना सर्वेश्वरेण कृतमिति स्वीकुर्यात्, तदेदं निश्चयेन यथार्थं मन्तव्यं भवति, यत् चतुर्णां ब्राह्मणादिवर्णानां व्यवस्था नैवास्ति रूढा, किन्तु तत्तद्गुणकर्मस्वभावप्रबोधिका योगिक्येवास्तीति । या किल सर्वत्र तत्तत्समाजे तत्तद्गुणकर्मपरिवर्तनानुसारेण बाहुल्येन परिवर्तनशीला द्रष्टुमभ्युपगन्तुश्च शक्या भवति ।

अतो यस्मिन् यस्मिन् मानवे येन येन गुणकर्मस्वभानु-

सारेण, तदनुसृत्य स्वजीवननिर्वाहसाधनतत्तद्व्यवसायपरिग्रहेण च या यौगिकी प्रक्रिया समुपलभ्येत, तदनुसारेणैव स स मानवस्तत्तद्ब्राह्मणादिवर्णवान् मन्तव्यः, अतः सर्वत्र भारतीयसमाजे गुणकर्मानुसारिण्येव वर्णव्यवस्थाऽभ्युपेया, न तु तद्विहीना जन्मजातिनिबन्धना, दरिद्रस्य कोटयधीशनामवत्, कातरस्य शूरवीराभिधानवत्, महामूर्खस्य वाचस्पतिसंज्ञावच्च ।

यदि कश्चन ब्राह्मणपुत्रो ब्राह्मणगुणकर्मस्वभावविरुद्ध-गुणकर्मस्वभाववानपि यथार्थब्राह्मणरूपेण स्वीक्रियेत, तदा डॉक्टरपुत्रो डॉक्टरीशिक्षाविहीनोऽपि डॉक्टररूपेण तल्लभ्यलाभयुक्तत्वेन चाभ्युपगन्तव्यः स्यात् । ईदृशी शास्त्रप्रमाणबुद्धिवादसृष्टिनियमविरुद्धा स्वीकृतिः नूनं शिष्टविचक्षणजनोपहासमेव प्रयोजयेत् । अतो ब्राह्मणगुणकर्मशमदमादिसन्ध्यागायत्रीजपादिरहितो वणिक्वृत्तिश्ववृत्त्यादिसमाश्रितो जनो ब्राह्मणेतर एव मन्तव्यः । ईदृश्येव गुणकर्मनिबन्धना व्यवस्था सर्वत्र क्षत्रियादावपि स्वीकर्तव्या, अर्थात् ब्राह्मणः स एव मन्तव्यः, यः किल बुद्धिविद्योपजीवी शमदमादिगुणशाली स्तुत्यचारित्र्यादर्शः शिक्षकः स्यात् । एवं क्षत्रियः स एव स्वीकर्तव्यः, यः खलु क्षतात् त्राणं करोति, विपन्नं राष्ट्रं समाजञ्च रक्षति, स्वयं बलशौर्यशस्त्रास्त्रशिक्षायुक्तः सिंहप्रकृतिको भवति । एवं वैश्यः स एवाभ्युपगन्तव्यः, यः किल वाणिज्यप्रवीणः कृषिपशुपालनरतः सन् राष्ट्रपोषणाय विपुलधनधान्यसमुत्पादको भवति । तथैव स एव शूद्रो मन्तव्यो यः खलु विद्याविहीनः क्षुद्रबुद्धियुक्तः श्रमजीवी भवति ।

इत्येवं तत्तद्गुणकर्मस्वभावव्यवसायानुसारेणैव व्यवह्रियमाणाः चत्वारो ब्राह्मणादयो वर्णाः वेदकालादारभ्यैव सर्वस्मिन् मानवसमाजे स्वीकृताः दृश्यन्ते। या किल वर्णव्यवस्था परमेश्वरप्रवर्तिता स्यात्, सा किल बुद्धितर्कसंगता प्रत्यक्षादिप्रमाणोपबृंहिता विवादविरोधरहिता च सती समाजसंघटनस्य राष्ट्राभ्युदयस्य च साधिका भवेत्। परन्तु पश्चात् मानवप्रणीता स्वार्थान्ध्यगर्वघृणादिदोषप्रयोजिका जन्मजातिनिबन्धना तत्तद्गुणकर्मादिविहीना व्यवस्था स्यात्, सा नैव स्वाभाविकी स्यात्, न च बुद्धिवादसंमता तर्कसंगता च भवेत्। अतो वेदादिप्रमाणबुद्धिवादसृष्टिनियमानुकूलत्वेनैव हेतुना गुणकर्मस्वभावव्यवसायानुसारिण्या एव वर्णव्यवस्थायाः स्वीकृतिः कर्तव्या। वेदादिप्रमाणोपबृंहितप्राचीनतमार्षप्रणालीबुद्धिवादादिविरुद्धस्यात् गुणकर्मादिविहीनस्य जन्मना जातिभेदवादस्य स्वीकृति नैव कर्तव्या, किन्तु तस्य सर्वथा सदा परित्याग एव कर्तव्यः।

अपि च तत्तद्ब्राह्मणक्षत्रियादिसमाजस्य प्रामाणिक इतिहासोऽपि गीतासु श्रीकृष्णप्रदर्शितां गुणकर्मानुसारिणीमेव व्यवस्थां सुदृढयति - तद्यथा - भारते गुर्जरादिप्रदेशे संप्रति समुपलभ्यमानाः ये शाकद्वीपीयब्राह्मणत्वेन व्यवह्रियमाणाः दशलक्षातिगाः सज्जनाः सन्तिः, ते पुरा अभारतीयाः अहिन्दवः अब्राह्मणाश्चासन्, ते खलु मध्यदक्षिण - एशियायाः सीस्थानात् = शकस्थानात् समायाताः - गौरवाढ्ये समुदारे आर्यसंघे सर्वश्रेष्ठे ब्राह्मणसमाजे च मिलित्वा ब्राह्मणा एवाभवन् इति तदितिहासस्तेषां शाकद्वीपीयसंज्ञा च तस्यां व्यवस्थायां प्रमाणभूततया जागर्ति। एवं सीस्थानात् समायाताः केचनाभारतीयाः जनाः - अत्रागत्य

शकसेना (सक्सेना) कायस्थाः क्षत्रियाश्चाभवन् । महाराष्ट्रीयाः प्रसिद्धाः गौरवाढ्या बुद्धिबलवैभवशालिनः चित्पावनब्राह्मणा अपि - इसरायलदेशात् समायाताः प्राक् - अभारतीयाः अब्राह्मणाः यहुदीवंशीयाः अनार्याः आसन्, तेऽपि समुदारां प्रशस्तां गुणकर्मानुसारिणीमेव व्यवस्थां 'विश्वं कृणुध्वमार्य' मिति पावनश्रौतादेशञ्चानुरुध्य श्रद्धेयाः - ब्राह्मणा अभवन् । यस्मिन् स्तुत्ये चित्पावनब्राह्मणसमाजे खलु पेशवा-रानाडे-गोखले-तिलक-भाण्डारकर-सावरकर-गोलवलकर-प्रभृतयो महापुरुषाः समुदारार्यसंस्कृतिविधारकाः संजाताः भारतस्यार्यावर्तस्य प्रशस्तं गौरवं वितेनिरे, वितन्वते च । एवं तत्तद्ब्राह्मणक्षत्रियादिसमाजस्यान्यान्यः प्रामाणिक इतिहासोऽपि गुणकर्मवादसमर्थनाय जन्मजातिवादखण्डनाय च द्रष्टव्यः, विस्तारभयान्नेह प्रदृश्यते ।

तस्मादस्माभिः - सर्वैः सनातनवैदिकधर्मानुयायिभिः— सर्वथैवानुमोदिता भूयोभूयोऽभिनन्दिता चेयं चातुर्वर्ण्यभारतसमीक्षा ग्रन्थरूपेण समक्षमवस्थिता - या किल श्रीमद्भिः श्रद्धेयैः-आचार्यशिरोमणिभि विद्वद्धौरेयैः - अनन्तश्रीविभूषितैः-स्वामिमहेश्वरानन्दजीमहाराजमहामण्डलेश्वरैः प्रणीता विशालसनातनार्यहिन्दुजातेः - भारतराष्ट्रस्य च महान्तमुपकारं वितनोतीति वयं मन्यामहे । अहं किलास्य ग्रन्थप्रणयनरूपस्य पुनीतकार्यस्य प्रयोजकाय महानुभावाय तस्मै महामण्डलेश्वराय भूयोभूयोऽभिनन्दनानि प्रेम्णा समर्पयामि । इत्येवमनेकानेकेदृशोपकारकग्रन्थप्रणयनादिरूपाणि प्रशस्तकार्याणि कारयित्वा भगवान् सर्वेश्वरः प्रभुः - अस्य श्रद्धेयस्य वैदिकसनातनधर्मस्य तद्द्वारा पुनः समुद्धारं कारयतु, इत्यर्थं तमहं प्रार्थये । तथा युगप्रवर्तकाः

धर्मसमाजसमुद्धारका:- आदिमा:-जगद्गुरवः प्रस्थानत्रयीभाष्य-कारा: श्रीमच्छङ्कराचार्याः, श्रद्धेया: श्रीमत्स्वामिविवेकानन्दाः श्रीमत्स्वामिरामतीर्थाः- महर्षिस्वामिदयानन्दाश्च तस्मै महा-मण्डलेश्वरमहाराजाय स्वकीयं सहजं साहसबलप्रतिभाधैर्यनि-र्भयतादिकं समर्प्य स्वसदृशाममरकीर्तिं प्रयच्छन्तु, भारतीयार्य-हिन्दुजातिसंघटनरूपकार्यकरणाय स महाराजः प्रभवतु इत्यहं सदा मंगलकामनां करोमीत्यलमतिपल्लवितेन । निवेदको भव-दीयः—स्वामी ब्रह्मानन्दार्यः त्रैतवेदान्ताचार्यः—ओंकाराश्रमाध्यक्षो गुर्जरदेशीयचांदोदतीर्थवास्तव्यः ।

* ॐ *

प्रशस्तिपत्रम्

(हिन्दुराष्ट्रनेपालस्थितसरस्वतीपीठाधीश्वराणां श्रीमत्पर-महंसपरिव्राजकाचार्याणां श्रोत्रियब्रह्मनिष्ठविद्वद्व-राणां स्वामिश्री-ईश्वरानन्दमहाराज-महोदयानामिदम्)

ता० ५।११।६७

सरस्वती अखाड़ा
स्वयंभू-काष्ठमण्डपम्

श्रीमत्परमहंसपरिव्राजकाचार्य- श्रोत्रियब्रह्मनिष्ठ-सकल-निगमागमशास्त्रनिष्णात-अनन्तश्रीविभूषित-स्वामिमहेश्वरानन्द -गिरिमहामण्डलेश्वरपूज्यपादानां वंदनीयचरणसरोरुहेषु—

ईश्वरानन्दस्य वसुवर्णोपेतमन्त्रराजाभिव्याहृतिसहिताः प्रणतिततयो विलसन्तुतराम् ।

स्वामिन् !

यथा पुरा देवासुराभ्यां मन्दराचलमन्थानेन समुद्रमुन्मथ्य विविधानि रत्नानि निष्कासितानि, तथा पूज्यचरणैर्मन्थानभूतया ऋतम्भरया प्रज्ञयाऽपारं वेदोदधिमुन्मथ्य ऋग्यजुःसामाथर्वोपनिषदात्मकानि रत्नानि मनोहराणि प्रकटितानि ।

इदानींतनाः केचन वर्तमानाः विद्वांस एवं कथयन्ति—

'अद्वैतब्रह्मविद्या विद्यतेऽर्वाचीना खलु । नैषा पूर्वेषां संहितामन्त्रद्रष्टृणां महर्षीणां बुद्धिपथेऽवतीर्णा चासीत् । उपनिषदां रचनाःकालः संहितानिर्माणकालाद्बहुकालानन्तरमेव ब्राह्मणग्रन्थरचनाकाले हि विनिश्चीयते । प्रत्यगभिन्नाद्वैतब्रह्मणः प्रतिपादनन्तूपनिषत्स्वेव परिदृश्यते, न तु संहितामन्त्रभागेषु । इति ।

संप्रत्यपि भारतीयविश्वविद्यालयादौ हिन्दुसंस्कृतिविषये समधीताङ्गलभाषाः पाश्चात्यभावभावितहृदयाः प्राध्यापकाः छात्रान् पाठयन्ति—'पूर्वं वैदिककाले एकदेवतावादो नासीत्, किन्तु बहुदेवतावाद आसीत् । अतिवृष्ट्यनावृष्टिभूकम्पवज्रपातादीन् प्रकृतेः कोपान् वीक्ष्य भयेन भ्रान्त्या वा तत्कर्तृत्वेन इन्द्रवरुणरुद्रादिबहुदेवताः कल्पिताः । इति ।

अन्यच्च ते पाठयन्ति—'शिवस्य परमेश्वरस्य वर्णनं, लिङ्गरूपेण तस्य पूजनादिकं च कुत्रापि ऋग्वेदे नास्ति । विशालार्यावर्तेतिहासेन ज्ञायते किल - भारतवर्षस्यादिवासिनामनार्याणां खलु देवता शिवः, उत्तरदिग्भ्यो नवागतैरार्य्यैस्तान् विजित्य तेषामपि स्वकीयार्यसंघे संयोजनकरणाय, तान् सन्तोषयितुञ्च स्वदेवत्वेन शिवो गृहीतः इति ।

अहन्तु मन्ये—तेषामध्यापकानां छात्राणां पूर्वोक्तविदुषाञ्च—महामण्डलेश्वरमहाराजप्रणीत - ऋग्वेदादिसंहितोपनिषदध्यात्मज्योत्स्नाविवृतिसम्यगवलोकनेनावश्यमेव दृष्टिपरिवर्तनं पूर्वोक्तभ्रान्तमन्तव्यनिरसनं सत्यार्थलाभश्च भविष्यतीति । पाश्चात्यपण्डितमिथ्यावादानुकारिणस्ते—'वयं सत्यात्कियद्दूरं गताः, विना विचारं भ्रमान्धकूपे पतिताश्चाभूम' इति स्वयमेव ज्ञास्यन्तीति ।

पुनश्च जीवपरयो र्भेदवादिनां प्रामाणिकतया श्रीमद्भागवतं मन्यमानानामपि—महामण्डलेश्वरमहाराजप्रणीतश्रीमद्भागवतसंहितोपनिषदध्यात्मज्योत्स्नाविवृतिसम्यगध्ययनेनापि-चक्षुष्यवश्यमेवोन्मीलिष्यतः, 'यच्च श्रीमद्भागवतेन वस्तुतः किं प्रतिपाद्यते' इति ।

इत्थं वेदादिशास्त्रतत्त्वं विविदिषूणां—नानार्थवादजटिलत्वेन हेतुना यथार्थरहस्यबोधशून्यानामत एव पाश्चात्यविभ्रमिजनोत्पादितगहनभ्रमान्धकारे बंभ्रम्यमाणानां जनानां कृते—यन्नवनीतवच्छास्त्रसारं समुद्धृत्य तत्त्वबोधमयञ्च प्रदीपं प्रज्वाल्य श्रीमहामण्डलेश्वरमहेश्वरानन्दस्वामिमहाराजैः महान् उपकारः कृतः, तस्याभारो न केनापि शब्देन दर्शयितुं शक्यते, इत्युक्त्वा विरम्यते ।

पूज्यपादानां वशंवदः - ईश्वरानन्दः

श्रीमन्महेशः कीदृशः ?

चिन्तामणिः स एवास्ति, भक्तचिन्तितपूरणे ।
पार्वती- प्राणनाथः श्री-महेशः करुणार्णवः ॥

॥ ॐ श्रीमहाकालेश्वरो विजयतेतराम् ॥

मालवा-उज्जैन (अवन्तिकापुरी) भारतीभवनवास्तव्यस्य 'पद्मभूषण-डॉक्टर ऑफ-लेटर्स' इति प्रशस्तोपाधिविभूषितस्य प्रसिद्धस्य पण्डितशिरोमणेः श्रीसूर्य-नारायणव्यासस्य

प्रसन्नताभिव्यक्तिः

उज्जैन २६।२।६८

श्रीमान् विद्वद्वरेण्य स्वामीजी महाराज !

सादरं नमोनमः ।

उज्जैनमें उस रोज जो अल्पक्षण के लिए—आप जैसे मनीषिवर्य के दर्शनों का लाभ मिला, मैं अपने को सौभाग्यशाली अनुभव करता हूँ । आपके द्वारा-वैदिकसाहित्य-जो उस दिन प्राप्त हुआ, मैंने अवलोकन किया है, बड़ा सुख प्राप्त हुआ है । मेरे ज्ञान संवर्धन में उससे पर्याप्त सहायता मिली है । मैं कृतज्ञ हूँ ।

मेरा निवेदन है – उस साहित्य के–'चातुर्वर्ण्य - भारत-समीक्षा' जैसी उदार विचार की रचना को जनभाषा (हिन्दी) में भी प्रचारित किया जाय तो–जनसाधारण को–आपके उत्कृष्टविचारों का पर्याप्त लाभ प्राप्त होगा । आशा है–इस निवेदन पर विचार होगा ।

विनीत सू० ना० व्यास

(अस्य संस्कृतानुवादः)

उज्जैननगर्यां तस्मिन् दिवसे यः - अल्पक्षणं - भवादृशमनीषिवर्यस्य दर्शनलाभः संप्राप्तः, तेनाहं स्वात्मानं सौभाग्यशालिनमनुभवामि । भवद्-द्वारा वैदिकसाहित्यस्य तस्मिन् दिवसे प्राप्तस्य (ऋक्-यजुः-सामाथर्ववेदसंहितोपनिषदादेः—अध्यात्मज्योत्स्ना-प्रास्ताविकवक्तव्यसहितस्य) अवलोकनं विहितम् । तेन महत् सुखं लब्धम् । भवदीयवैदुष्यात्—अहमतीवप्रभावितोऽभवम् । मदीयज्ञानसंवर्धने तेन पर्याप्ता सहायता लब्धा । अहं कृतज्ञोऽस्मि ।

मदीयं निवेदनं विद्यते—यत्—तत्साहित्यान्तर्गते लब्धे चातुर्वर्ण्यभारतसमीक्षासमाख्यग्रन्थे प्रदर्शितसमुदारविचाररचनायाः जनभाषा-(हिन्दी) यां यदा प्रचारः कृतः स्यात्, तदा भवतः—उत्कृष्टविचाराणां पर्याप्तो लाभो जनसाधारणस्यापि भविष्यति । अहमाशासे—अस्य निवेदनस्य साफल्याय कश्चन विचारः प्रवर्तिष्यते, इति । (चातुर्वर्ण्यभारतसमीक्षायाः हिन्दीभाषयाऽपि विस्तृतप्रचारप्रेरणाप्रदानेन—इयं भगवती समीक्षा भारतराष्ट्रसमाजहितकारकान् उदारान् प्रशस्तान् विचारान् प्रबोधयति, अर्थात् कृपणान् संकुचितान् पक्षपातस्वार्थान्ध्यादिदोषयुक्तान् विचारान् विमर्दयति चेति तेन व्यासमहोदयेन स्वप्रसन्नताऽभिव्यक्तिलेखकेनार्थाद् विज्ञाप्यते इति समीक्षकः स्वामी ब्रह्मानन्दो वेदान्ताचार्य्यः)

श्रीकामाची देवी

नमामि मदनानन्दविधानविहितादराम् ।
शम्भुवामाङ्गवामाचीं कामाचीं कामिताप्तये ॥

श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रोत्रियब्रह्मनिष्ठस्य वेदान्ताचार्यस्य वीतरागस्य विद्वद्वरिष्ठस्य स्वामि- श्रीमंगलानन्दतीर्थमहाराजस्य

गुणकर्मवादसमर्थनम्

स्मर्यते हि न्यायशास्त्रे सांख्यशास्त्रे महाभारते च आकृतिज्ञेया समानप्रसवात्मिका मनुष्यत्वजातिः एकविधैव शिष्टैर्महर्षिभिः—तद्यथा—'आकृति र्जातिलिङ्गाख्या' (न्यायदर्शने द्वितीयाध्याये द्वितीयाह्निके-६९ सूत्रम्) 'समानप्रसवात्मिका जातिः' (न्या० शा० २।२।७०) 'मानुषकश्चैकविधः समासतो भौतिकः सर्गः ।' (सांख्यकारिका-५३) 'सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः । वाङ् मैथुनमथो जन्म, मरणञ्च समं नृणाम् ॥' (महाभारते-३।१८०।३२) इति । अयमर्थः—जातिलिङ्गमित्याख्या = नाम यस्याः सा जातिलिङ्गाख्या आकृतिः, लिङ्ग्यते = ज्ञायते सूच्यतेऽनेनेति लिङ्गम् । शिरःकराद्यवयवसंस्थानविशेषरूपा आकृतिश्च जातिज्ञापिकेति सर्वत्र प्रसिद्धमेव । यथा तया तया संस्थानविशेषरूपयाऽऽकृत्यैव गवाश्वकाकादीनां गोत्वाश्वत्वकाकत्वादिजाति र्ज्ञायमाना भवति, तथा मनुष्यत्वजातिज्ञापिकाऽऽकृतिरपि सर्वेषु ब्राह्मणादिनामभिःपृथक्तया व्यवह्रियमाणेषु ब्राह्मणादिषु समानैवोपलभ्यते, न तु विलक्षणेति विसंवादरहितं प्रत्यक्षमेतत् ।

न ह्याकृतिमात्रेण ब्राह्मणत्वादिकं ज्ञातुं शक्यते केनापि शतशो व्यभिचारदर्शनात् । अतः - आकृतिमात्रेण ज्ञायमाना

मनुष्यत्वजातिरेवैका सर्वेषु समाना सिद्धयति, अर्थात् ब्राह्मण-त्वादयस्तु सन्ति तत्तद्गुणकर्मनिबन्धनाः परिवर्तनशीलाः औपाधिकधर्मविशेषाः, न तु जातिरूपा इति न्यायसूत्रेणानेन बोध्यते।

यत्र समानः = तुल्यो न तु विषमः, प्रसवः = जन्म-उत्पत्तिः-गर्भमोचनं संपद्यते, तदात्मिका जातिः सिद्धयति। यथा सर्वासु गोषु सर्वैरपि पुंगवैः समानरूपेण प्रसवः = वत्सजन्म संपाद्यते, न तु विजातीयैः - अश्वैः, विजातीयासु वडवासु च पुंगवैरपि वत्सजन्म संपादयितुं शक्यते। तथा सर्वैरपि मनुष्यैः सर्वासु मानुषस्त्रीषु समानरूपेण प्रसवः - कर्तुं शक्यते, अत एव येषु किल समानरूपेण तुल्यतया प्रसवः सन्तानोत्पत्ति र्भवति, तेषु मनुष्यस्त्रीपुरुषेषु समाना तुल्यैव - एकविधैव मनुष्यत्वजाति र्मन्तव्या। यतो यदि हि गवाश्वादिवत् जन्मत एवाभविष्यद् जाति-भेदः, तदा न क्षत्रियादिस्त्रीषु ब्राह्मणादिभ्यो विजातीयत्वेनाभिमतेभ्योऽपत्यान्युदपत्स्यन्त। न हि गवादिषु अश्वादिभ्योऽपत्यानि जायन्ते। उद्भवन्ति च ब्राह्मणादिस्त्रीषु क्षत्रियादीनां विजातीयत्वेनाभिमतानां संयोगादपत्यानि। ततश्च ब्राह्मणादिषु व्यवह्रियमाणो जातिभेदोऽयं काल्पनिको विद्यते, न तु वास्तविक इत्यवगम्यते। अत एव ब्राह्मणादिपदभाजामपि सर्वेषां मनुष्याणां स्वरूपाकृतयस्समाना एव परिलक्ष्यन्ते, तथा च सर्वत्र मनुष्यत्व-लक्षणा समानप्रसवात्मिका जातिः समानैव मन्तव्या। ब्राह्मण-त्वादयस्तु सन्ति तत्तद्गुणकर्मोपाधिप्रयुक्ताः पाचकपाठकादिवत् डॉक्टर-बैरिस्टर-इञ्जनियरादिवद्वा तत्तत्संस्कृतिज्ञापकाः तत्तद्वि-कृतिप्रतिषेधकाः औपाधिकाः धर्माः, ते तु तत्तद्गुणकर्मोपाधि-

परिवर्तनेन परिवर्तमानाः बभूवुः, भवन्ति चेति महद्भिर्विद्वद्वरैरपि सुस्पष्टं प्रतिपाद्यते ।

अत एव सांख्यशास्त्रेऽपि मानुषस्य सर्गस्य एकविधत्वमेव वर्णितम्, नानेकविधत्वं प्रदर्शितम् । अतः सांख्यतत्त्वकौमुदीव्याख्यात्रा श्रीवाचस्पतिमिश्रेणापि 'ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषादिति' व्याख्यातम् ।

अत एव महाभारतस्य महर्षिद्वैपायनव्यासवचनमपि–सर्वासु नारीषु सर्वे नराः = मानवाः सदा अपत्यानि - सन्तानान् जनयन्ति, तत्रापत्यप्रसवे नास्ति कश्चन देशप्रान्तजात्यादिभेदलक्षणः प्रतिरोधः । एवं सर्वेषां मानवानां वाणी, मैथुनं = संभोगः - जन्ममरणादिकमपि देशजात्यादिभेदमविगणय्य तुल्यमेव परिलक्ष्यते ।

एवं–'जन्मना ब्राह्मणो ज्ञेयः, संस्काराद् द्विज उच्यते । विद्यया याति विप्रत्वं, त्रिभिः श्रोत्रिय उच्यते ॥ जन्मना जायते शूद्रः, संस्काराद् द्विज उच्यते । वेदाभ्यासाद्भवेद् विप्रः, ब्रह्म जानाति ब्राह्मणः ॥' इत्यादयः स्मृतिप्रवादा अपि गुणकर्मवादमेव समर्थयन्ति, न तु जन्मजातिवादम् । ब्रह्मसृष्टत्वात् ब्रह्मप्रविष्टत्वाच्च सर्वेषां जन्मत एव ब्राह्मणत्वं विज्ञेयम् । अत एव तदा जन्मकाले संस्कारवेदाभ्यासादिगुणकर्माभावात् शूद्रत्वमपि बोध्यते । यज्ञोपवीतधारणगायत्रीजपादिरूपः संस्कारोऽत्र ज्ञेयः ।

अतएव केरलदेशनिवासिना परमभट्टारकेण श्रीचट्टम्पिस्वामिना तत्र प्रसिद्धेन महात्मना यतिना–गुणकर्मवादसमर्थन-

परं - 'प्राचीनमलयालम्' 'वेदाधिकारनिरूपणम्' इति ग्रन्थ-द्वयं केरलभाषायां निर्मितम् । तत्रादिमे ग्रन्थे—केरलदेशस्य प्राचीन इतिहासोऽभिवर्णितः । तस्मिन् सागरादभिनवप्रकटिते केरलदेशे समुदारमतिना कृपालुना बलशौर्यनिधिनाऽन्याय्यप्रतीकारप्रवणेन भगवता परशुरामेण—नौकासंचालकेभ्यो मत्स्यजीविभ्यो महा-शूद्रेभ्यो मत्स्यनिरोधजालसूत्रेभ्यो यज्ञोपवितानि निर्माय तेषां कण्ठप्रदेशे च तानि संस्थाप्य ब्राह्मण्यं समर्पितम् । गोत्रप्रवरनिर्दे-शगायत्रीजपवेदाध्ययनादीनि शुभगुणकर्माणि च विधारणायो-पदिष्टानि । 'विश्वं कृणुध्वमार्यम्' 'दासान्यार्याणि अकरः' इति वेदादेशानुसारेण संस्कारहीनेषु संस्कारान् संस्थाप्याधमान् अनार्यान् विकृतान् उत्तमान् आर्यान् संस्कृतान् च कृत्वा स्वस्यो-दारमतित्वं कृपालुत्वञ्च प्रकटितम् । प्रसिद्धनम्बुद्रिब्राह्मणरूपेण तेषा निर्माणं विहितम् । तदितिहासवर्णनद्वारा चातुर्वर्ण्यव्यव-स्थायां गुणकर्मवादस्यैव प्रशस्तं प्राधान्यं तत्र प्रदर्शितम् ।

एवं द्वितीये वेदाधिकारनिरूपणनाम्नि ग्रन्थे—येषु खलु बुद्धिप्रतिभा, वाक्सौष्ठवं, वेदधर्माभिरुचिश्च विद्यन्ते, ते सर्वेऽपि 'इमां वाचं कल्याणीमावदानि' इति श्रौतोपदेशानुसारेण वेदा-ध्ययनाधिकारिणः सन्ति, यत्र किल बुद्धिप्रतिभादयो धर्मा नोपलभ्यन्ते, ते न सन्त्यधिकारिण इति निरूपितम् । एवं 'यो-ग्याय योग्या कक्षा देया' इति नीत्यादेशः समर्थितः तेन महानु-भावेन तत्र ।

तथा च शिष्टाः निष्पक्षपाताः समाजसंघटनकामाः विद्वांसो द्वयोः गुणकर्मवादजन्मजातिवादयो, क्रमशः इष्टानिष्ट-

त्वमित्थं प्रतिपादयन्ति । तथाहि—गुणकर्मवादे तावत् औदार्यं, सौजन्यं, संस्कार्यं, न्याय्यत्वं धर्मत्वञ्चावलोक्यते, परन्तु केवले जन्मजातिवादे तु पक्षपातस्वार्थान्ध्यादिदोषयुक्तत्वात् कार्पण्यं, दौर्जन्यं, विकार्यं, अन्यायत्वमधर्मत्वञ्च ज्ञायते । गुणकर्मवादस्तु सर्वेषु स्वाभाविकरूपेण विद्यमानायाः योग्यतायाः रुचेश्च समादरं करोति,, जन्मजातिवादस्तु तयोः अनादरम् । गुणकर्मवादश्च योग्यतामनुरुध्य सर्वान् बोधबलधनादिशक्तिसंचयाय प्रवर्तयति । जन्मजातिवादस्तु—'न शूद्राय मतिं दद्यात्' इत्यादीनि मृषावचनानि ब्रुवाणः – बोधबलादिलाभाद् तत्तत्समुदायान् विमुखान् करोति ।

गुणकर्मवादस्तु सर्वत्राभीप्सितं समभावं, वेदोपदिष्टं शिष्टजनप्रशंसितं समानबन्धुत्वादर्शं, सर्वप्रगतेः पन्थानञ्च प्रदर्शयति । जन्मजातिवादश्च निन्दनीयं विषमभावं विस्तृणाति, समानबन्धुभावस्य प्रतिषेधं करोति, प्रगतिपथञ्च निरुणद्धि । गुणकर्मवादश्च गर्वमिथ्याभिमानघृणाहीनताग्रन्थिलघुत्वभावनादिदोषान् निवारयति । जन्मजातिवादस्तु तान् दुर्गुणान् सर्वत्र प्रोत्साहयति, समाजे विद्वेषासूयादिकं जनयित्वा विघटनं साधयति । गुणकर्मवादस्तु शुभगुणकर्मसंपादनद्वारैवोत्तमत्वं, अशुभगुणकर्मद्वारा चाधमत्वं बोधयति । जन्मजातिवादस्तु 'दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।' इत्यादिमृषावचनान्यभिधाय तस्माद्वैपरीत्यं न्याय्यविरुद्धमेव वर्णयति । गुणकर्मवादश्च विकृतं जन्मजातिवादं तत्रारोहं कृत्वा परिष्कृतं करोति । जन्मजातिवादस्तु 'अनिष्टकर्मसु प्रवर्तमाना अपि ब्राह्मणाः

पूज्याः भवन्ती' (मनुस्मृतिः) त्यन्याययुक्तप्रलापान् अभिधाय गीतासु भगवता कृष्णेनोपदिष्टं गुणकर्मवादं तिरस्करोति। इति द्वयो र्वादयोः सुजनदुर्जनवत्, रामरावणवत्, पाण्डवकौरववत्, हिन्दुस्थानपाकिस्तानवच्चेदृशं इष्टत्वानिष्टत्वलक्षणं वैलक्षण्यं वेदितव्यम्।

तथा चाहं श्रीमत्परमहंसपरिव्राजकाचार्यमहामण्डलेश्वर-सकलनिगमागमशास्त्रनिष्णात-विद्वद्धौरेयस्वामिमहेश्वरानन्दमहाराजप्रणीतायाः - समीक्षायाः मुक्तकण्ठतोऽभिनन्दनं कृत्वा तत्र प्रदर्शितस्याभीप्सितस्य हितकरस्य गुणकर्मवादस्य समर्थनं करोमीत्यलमतिपल्लवितेन।

संस्कृतभाषायाः महत्त्वं विपुलप्रचारश्च

प्रियभारतराष्ट्रस्य, भाषा गौरवशालिनी।
संस्कृताऽमरवाणी च, सर्वाद्या मधुरा प्रिया ॥१॥
संस्कृताध्ययनं सर्वे, कुर्वन्तु भारता जनाः।
संस्कृतेनैव कुर्वन्तु, व्यवहारं परस्परम् ॥२॥
शास्त्रबोधं समासाद्य, संस्कृताचारवृत्तयः।
सर्वतः संस्कृतीभूय, सुखिनः सन्तु सर्वतः ॥३॥
वन्दे मातरमित्युक्त्या, वसुधा भारती तथा।
संस्कृतिश्च विज्ञेयाः श्रद्धेयाः मातरो ह्यिमाः॥४॥

समीक्षायाः शुद्धाशुद्धपत्रकम् प्रच्युतयोजनञ्च

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
कदाचनः	ऽदाचन	४	३
त्वानुकार्याः	ऽनुकार्याः	४	१६
वचनानि	वचांसि	२२	७
यशस्कद्	यशस्कृद्	२३	५
महता भगवता	महाभगवता	२३	११
कृपासमन्वितः	कृपयाऽन्वितः	२३	१८
दुःखार्थं	दुःस्वार्थं	२५	१८
पुरुषैं	पुरुषैं	३२	१०
कलयुगे	कलियुगे	३३	१२
दृष्टिचरः	दृष्टचरः	३३	२३
तनातनस्य	सनातनस्य	३३	२४
स्वतन्त्रते	स्वतन्त्रे	३५	२०
प्रयौजकं	प्रयोजकं	३६	२१
विच्छिनः	विच्छिन्नः	३७	४
वुद्धिमत्वं	वृद्धिमत्त्वं	३७	२२
प्रमूतया	प्रभूतया	३८	१२
जगतीलले	जगतीतले	३९	१२
गन्धी	गान्धी	३९	२१
विभिनार्थकौ	विभिन्नार्थकौ	४१	८
हिन्दुस्तानः	हिन्दुस्थानः	४१	१८
राष्ट्रस्ययैकता	राष्ट्रस्यैकता	४१	२१
प्रवर्तनीम्	प्रवर्तनीयम्	४३	१३

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
नेतृणां	नेतॄणां	४३	२०
दुखदं	दुःखदं	४५	१४
बिभृतां	बिभ्रताम्	४६	२१
मुखादिगा	मुखादिगाः	४६	२१
वण्यते	वर्ण्यंते	४७	५
प्रषा	प्रपा	४८	३
कथं च न	कथञ्चन	४९	५
रस्यमयं	रहस्यमयं	४९	१४
एत्र	एत	४९	१६
स्चाराज्ये	स्वाराज्ये	५०	१९
यनैव	येनैवं	५१	६
नेतृणां	नेतॄणां	५२	१४
पूज्यरूपेण	पूज्यदेवरूपेण	५३	१०
परोकारा	परोपकारा	५३	१२
गूंणैः	गुंणैः	५४	२०
सक्यते	शक्यते	५५	८
प्रयौजकं	प्रयोजकं	५५	१३
समुपदिश्य	समुद्दिश्य	५५	२४
मेवागम्यते	मेवावगम्यते	५६	१३
प्रमृति	प्रभृति	५६	१७
संस्काराद्विज	संस्काराद् द्विज	५७	८
विधियन्ते	विधीयन्ते	५७	२०
समुपद्यते	समुपपद्यते	५८	२
कथमुपद्येत ?	कथमुपपद्येत ?	५९	७
यनावतिष्ठन्ते	येनावतिष्ठन्ते	५९	२४

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
दीव्यः	दीव्य	६१	६
सात्त्वकादि	सात्त्विकादि	६१	२३
प्रता	पता	६३	२
दृष्यते	दृश्यते	६३	११
वोधकाः	वोधकाः	६४	१०
सन्यासि	संन्यासि	६४	१३
ऽनुदिते	ऽनूदिते	६४	१७
श्रीयच्छं	श्रीमच्छं	६६	१
तत्त्वादि	तत्त्वात्यादि	६६	१०
दत्तद्	तत्तद्	६६	१७
सम्प्रत्युपलभ्यते	सम्प्रत्यप्युपलभ्यते	६८	२४
अद्वैव	अद्वैत	७१	१६
दुर्वलास्मः	दुर्वलाः स्मः	७५	२४
धपतनं	धःपतनं	७८	१४
भवन्त	भवन्तः	७९	३
योग्तां	योग्यतां	८०	८
प्रेक्षापाश्च	प्रक्षेपाश्च	८०	२१
चापक्ष्येते	चापेक्ष्येते	८१	१९
गोमातृणां	गोमातॄणां	८२	२३
गां	गवां	८३	१
वधः	वधः	८३	६
कतुं	कर्तुं	८४	१३
सुदृड	सुदृढ	८४	२१
सदृमं	सदृशं	८५	१
वभूवः	वभूवुः	८६	२१
मिदृशः	मीदृशः	८६	२४
नेतृणां	नेतॄणां	८७	८
वंण्य	वंर्ण्यं	८७	९
लेखनका	लेखका	८८	१२
वधो	वघो	८८	१७

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
मण्डुकता	मण्डूकता	८६	२०
लुण्टका:	लुण्टाका:	९०	११–१६
च्छाशनश्च	च्छाशनञ्च	९०	२०
राजवद	राजवदव	९०	२३
स्त्री:	स्त्री	९४	११
कूपमण्डुकता	कूपमण्डूकता	९७	१३
काष्टा,	काष्ठा,	९७	१५
इत्युक्वा	इत्युक्त्वा	९८	१४
कलप्यते	कल्प्यते	९९	१
मानवनां	मानवानां	९९	४
लभ्येत्	लभ्येत	९९	१९
बभूव:	बभूवु:	१०२	१८
शिक्षाणा	शिक्षणा	१०३	१८
यत्र	अत्र	१०४	६
दादृशं	तादृशं	१०९	२०
राज्ञ	राज्ञः	११०	४
पश्चाताप	पश्चात्तापं	११०	१३
सेवतो	सेवितो	११०	१५
मृतपत्या	मृतपतिना	११०	२३
प्रियपत्या	प्रियपतिना	१११	८
मृनेन	मृतेन	११२	२०
प्रतिसिद्धा	प्रतिषिद्धा	११३	४
वर्तिणा:	वर्णिता:	११४	२०
सूचयसि	सूचयति	११४	२२
प्रहरन्त्वेव	प्रहरन्त्येव	११७	२
संनिधानां	संनिधानं	११७	५
किञ्चद्	किञ्चिद्	१२०	१४
महाभगे !	महाभागे !	१२२	१४
उच्चव–	उच्च–	१२७	१५
भ्रातृणां	भातृणां	१२७	१५
प्रभूताश्चं	प्रभूताश्चर्यं	१३३	१९

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
यमीति	यमिति	१३४	२
कामनां	कामानां	१३५	१२
विनाशायमासुः	विनाशयामासुः	१३६	२०

१४१ तमे पृष्ठे ६ पंक्तौ अयं प्रच्युतः पाठोऽप्यनुसंधेयः- तद्यथा-एवं श्रीसीताऽन्वेषणतत्परेण महावीरेणश्रीरामभक्तेन हनुमता लंकायां रावणराजधान्यां विविधक्रतुयज्ञानुष्ठानतत्पराणां रक्षोवंशोद्भवानां साङ्गवेदविदुषां राक्षसब्राह्मणानां वेदपाठः श्रुतोऽनेनाभिवर्ण्यते-वाल्मीकिरामायणे-'षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् । शुश्राव ब्रह्मघोषान् सः, विरात्रे ब्रह्मरक्षसाम् ॥ (सुन्दरकाण्डे १८।२) इति । ब्रह्मरक्षसां = ब्राह्मणराक्षसानां, ब्रह्मघोषान् = मधुराह्लादकसुस्वरेण क्रियमाणसुसंगतवेदमन्त्रनिनादान्, विरात्रे = रात्र्यवसाने ब्राह्ममुहूर्ते, शुश्राव = श्रुतवान्, सः = हनुमान् श्रीरामसेवकः श्रीवैदेहीपर्यन्वेषकः । अतएवोच्यते प्रवादः शिष्टैः - 'अग्निहोत्रश्च वेदाश्च, राक्षसानां गृहे गृहे । दया दानं दमश्चैव (भक्तिर्ज्ञानं विरागश्च) प्रायो नैवावलोक्यते ॥' इति ।

कुशन्तलया	शकुन्तलया	१४२	२४
तस्या	तस्य	१४५	१७
पुर्वोक्ता	पूर्वोक्ता	१४८	२३
समपन्नः	सम्पन्नः	१४६	१२
स्वयुत्र	स्वपुत्र	१५०	७
दन्तोपत्ति	दन्तोत्पत्ति	१५०	१६
शकाशात्	सकाशात्	१५५	१८

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
शनुःशेपं	शुनःशेपं	१५७	२
शेतन	शतेन	१५७	१२
स्तूयामानः	स्तूयमानः	१६०	७
त्वदीयँच्छैव	त्वदीयेच्छैव	१६१	८
णीयञ्च	णीयश्च	१६४	६
मित्रसिष्ठा	मित्रवसिष्ठा	१६४	६
ऽभूत	ऽभूत्	१६४	२४
मभूत	मभूत्	१६५	२२
बाल्मीकि	वाल्मीकि	१६६	२२
रम्भायाः	रम्भायाः	१६६	२३
स्वसम्मतिं	स्वासम्मतिं	१६९	९
त्यर्थं	त्यर्थः	१७१	३
तस्याः	एतस्याः	१७१	२१
ब्रतीति	ब्रवीति	१७४	७
समुत्यादिता	समुत्पादिता	१७४	२१
स्वेक	स्वैक	१७५	१७
भारतभिधानं	भारताभिधानं	१७९	१८
राथाङ्गः	रथाङ्गः	१८१	२४
यस्य	यस्य च	१८३	९

१८५ पृष्ठे - १४ पंक्तितोऽनन्तरमयं किल प्रच्युतो लेखोऽप्यनुसंधेयः - सत्ययुगे तावत्प्रसिद्धाः महर्षयोऽपि बुभुक्षिताः महादरिद्राः निषिद्धभक्षणपराः आसन् इति स्वयं मनुमहाराजोऽपि स्वकीयमनुस्मृतौ स्मरति - 'अजीगर्तः सुतं हन्तुमुपासर्पद् बुभुक्षितः ।' (म० स्मृ० १०।१०५) 'अमांसमिच्छन्नार्तोऽत्तुं

धर्माधर्मविचक्षणः। प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान्॥' (१०।१०६) 'भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने।' (१०।१०७) क्षुधार्त्तश्चात्तुमभ्यगाद् विश्वामित्रः श्वजाघनीम्। चण्डालहस्तादादाय'। (म० स्मृ० १०।१०८) इति।

ऐताः	एताः	१६१	४
वह्व् यः	वह्व् यः	१६२	१४
ब्राह्मणाः	ब्राह्मणाः	१६२	१४
उपाहासा	उपहासा	१६३	२४
ज्जिाह्वा	जिह्वा	१६५	१६
विशेणैः	विशेषणैः	१६६	७
दशाचर्यः	दशाचार्यः	१६६	७
कटुभाव	कटुतम	१६६	१४
हेतो-	हेतोः	१६८	१७

१६६ पृष्ठे ३ पंक्तितोऽनन्तरमयं प्रच्युतो लेखोऽपि पठनीयः - एवं द्वाभ्यामुदाहरणाभ्यामपि मनुना ब्राह्मणेभ्य एव क्षत्रियाणामुत्पत्तिः प्रतिपादिता। तद्यथा - यथा 'अद्भ्यः प्रकृतिभ्योऽग्निः समुत्पद्यते, यथा वाऽश्मनः पाषाणात् कारणात् लोहमुत्थितं = प्रादुर्भूतं भवति, तथैव ब्रह्मतः = ब्राह्मणेभ्य एव क्षत्रं समुत्पन्नम्। अर्थात् ब्राह्मणसमुदाये ये किल बलशौर्यशालिनः सिंहप्रकृतिकाः दृष्टास्ते समाजराष्ट्ररक्षार्थं क्षत्रियरूपेण सृष्टाः, अनेन स्पष्टतो गुणकर्मवाद एव समर्थितः, जन्मना जातिवादश्च खण्डितो बभूव। 'तेषां सर्वगतं तेजः स्वासु योनिषु शाम्यति।' (म० स्मृ० ६।३२१) इत्यनेन यथाऽप्सु मिलित्वाऽग्निः शाम्यति, पृथग्रूपेण नावतिष्ठते, जलरूपमेव प्रकृतिभूतं संपद्यते, तथा ब्राह्म-

णेषु मिलित्वा तद्धर्मान् अङ्गीकृत्य क्षत्रिया अपि ब्राह्मणाः भवन्ति, इत्युपदिष्टम् । तथा च भागवतादौ श्रूयमाणः क्षत्रियादीनामपि ब्राह्मणभावः सुतरां संगच्छते ।

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
पराघीनं	पराधीनं	२००	१३
वोपयेयुः	वोपेयुः	२०१	१३
योक्त्रे	योक्त्रे	२०४	६
विरुध	विरोध	२०४	१७
विघमि	विधर्मि	२१४	१
माक्रण	माक्रमण	२१४	११

२१७ पृष्ठे २३ पंक्तौ पाठोऽयमनुसंधेयः- तद्यथा-केचनैवं वदन्ति- 'अग्रतश्चतुरो वेदान्, पृष्ठतः सशरं धनुः । इदं ब्राह्मं, इदं क्षात्रं, शापादपि शरादपि ॥' इतीदृशं वचो भगवतः परशुरामस्याप्यस्तीति । अत्र किल तेन महानुभावेनैकत्र ब्राह्मक्षात्रशक्तिसमन्वयवाद एवोपदिष्टः । अर्थात् क्षात्रशक्तिरहितायाः ब्राह्मशक्तेः, ब्राह्मशक्तिशून्यायाः क्षात्रशक्तेश्च राष्ट्रसमाजाभ्युदयमार्गे वैफल्यमेव ज्ञापितम् । इदं ब्राह्मं, इदं क्षात्रं समन्वितं द्वयं मय्येकत्र भवन्तः पश्यन्तु । अतोऽभ्युदयलाभाय स्वेष्वपि भवन्तस्तद्द्वयं समुच्चितं विधारयन्तु ।

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
पञ्चविंशी	पञ्चविंशी	२१७	२४
क्षत्रेणा	क्षत्रेण	२१६	७
धीनता	धीनतां	२२४	१७

निरीक्षता	निरीक्षिता	२२५	४
मुह्रद्	मुहृद्	२३१	३
विनिर्वार्यं	विनिवार्यं	२३२	६
लङ्करा	लङ्कारा	२३३	११
वादि	वादादि	२३३	२३
जन्मनेव	जन्मनैव	२४१	१
सन्तिः	सन्ति	२४२	२२
नुरूपं	नुरूपं शिक्षणं लब्ध्वा	२४८	७
प्रभुत	प्रभूत	२५०	१७
हसामुदः	हसामुदाः	२५१	२
सन्तिः	सन्ति	२५१	११
शौन्दर्यं	सौन्दर्यं	२५१	१८
पविर्तन्ते	परिवर्तन्ते	२५३	१०
परिस्थति	परिस्थिति	२५४	१७
वृत्त्याभि	वृत्त्यभि	२५५	१२
वार्चाचीन	र्वाचीन	२५८	१
ध्यनं	ध्ययनं	२६०	१८
समिलितुं	संमिलितुं	२६१	१५
ब्रह्मणा	ब्राह्मणा	२६२	२२
कृत्दाऽपि	कृत्वाऽपि	२६४	६
ग्रहीतं	गृहीतं	२६४	१६
तत्रानर्याः	तत्रानार्याः	२६४	२१
चर्या	चार्याः	२६५	२१
क्लेशटं	क्लेशदं	२६६	५
शक्तिञ्च	शक्तिश्च	२६६	१४
विष्णवा	विष्ण्वा	२७०	१४

भूमिकायाः शुद्धाशुद्धपत्रकम्

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
प्ररूढ	प्ररूढं	१	२१
पूर्रोक्तस्य	पूर्वोक्तस्य	६	८
पकिस्तान	पाकिस्तान	८	११
लोकिक	लौकिक	९	७
एवं	एव	१४	२३
प्रवतर्तानि	प्रवर्तितानि	१७	१८
कर्मणि	कर्माणि	२२	१९
तदेव	तदैव	२३	१३
चद्र	चन्द्र	२८	७
प्रदर्शितः	प्रदर्शिता	३१	७
योगवान्	योगवती	३१	८

अनुमोदनाभिनन्दनसम्मत्यादिशुद्धाशुद्धपत्रकम्

अशुद्धं	शुद्धं	पृष्ठं	पंक्तिः
पपिच्छतकम्	पनिषच्छतकम्	१	१८
विद्वद्वरेणस्य	विद्वद्वरेण्यस्य	४	४
चर्यस्य	चार्यस्य	७	३
लाभोः	लाभो	८	१७
जदीश्वरा	जगदीश्वरा	१५	१२
विघातव्यः	विधातव्यः	२२	२
स्वभानु	स्वभावानु	३२	२४

हरिः ॐ तत्सत् ॐ नमः शिवाय

एतद्ग्रन्थलेखकप्रणीतानीमानि पुस्तकानि

(१) ऋग्वेदसंहितोपनिषत्-अध्यात्मज्योत्स्नाविवृत्युपेता
(२) यजुर्वेदसंहितोपनिषत्- ,,
(३) अथर्ववेदसंहितोपनिषत्- ,,
(४) सामवेदसंहितोपनिषत्- ,,
(५) श्रीमद्भागवतसंहितोपनिषत् ,, (खण्डद्वयं मुद्रितम्)
(६) गीताप्रवचनसुधा (हिन्दी एवं गुजराती)
(७) दक्षिणतीर्थयात्रा (हिन्दी एवं गुजराती)
(८) सिद्धान्तद्वयसमीक्षा (हिन्दी)
(९) पुनीतसंस्मरण ,,
(१०) हरगोविन्ददासव्याख्यानमन्दिर (हिन्दी)
(११) गायत्रीमीमांसा संध्योपासनं पुरुषसूक्त-श्रीसूक्तं
(१२) गीताव्याख्यानसमीक्षा (अप्रकाशिता)
(१३) श्रीशंकरसूक्तिसुधा (हिन्दी-अनुवादसहिता)
(१४) सवार्तिकं पंचीकरणम् (हिन्दी-अनुवादसहितम्)
(१५) भगवत्प्रसाद, सद्गुरुप्रसाद
(१६) चातुर्वर्ण्य-भारत-समीक्षा (प्रथमः खण्डः संस्कृतः)
(१७) सम्मतिविचाराभिनन्दनादीनि

अयमात्मा हि गोविन्दो जीवोऽयं हि धनञ्जयः ।
धर्मक्षेत्रं ह्ययं देहः, कृष्णगीतं सनातनम् ॥
नद्यौ द्वे वहतः पुण्ये, गंगा गीता च भारते ।
पुनात्याद्या शरीरञ्च, मनो बुद्धिश्च ह्यन्तिमा ॥

भगवतो वेदस्य समुदाराः सदुपदेशाः

'अक्षण्वन्तः कर्णवन्तः सखायः, मनोजवेष्वसमाः बभूवुः'। (ऋ० १०।७१।७)
'श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमासुव, स हि रत्नधा असि' (ऋ० १०।३५।७)
'सत्यस्य नावः सुकृतमपीपरन्' (ऋ० ९।७३।१).
'मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षामहे' (शु० यजुः ३६।१८)
'उद्बुध्यध्वं समनसः सखायः' (ऋ० १०।१०१।१)
'अनृक्षराः ऋजवः सन्तु पन्थाः, येभिः सखायो यन्ति नो वरेयम्' (ऋ० १०।८५।२३)×

× अयमर्थः अक्षण्वन्तः = भद्रदर्शनशीलाक्षिमन्तः—प्रकृष्टपठनशीलाः वा, कर्णवन्तः = भद्रश्रवणशीलकर्णवन्तः—प्रकृष्टश्रवणशीला वा, सखायः = समभावशालिप्रकृष्टज्ञानवन्तो बभूबुः = भवन्ति, अत एव ते मनोजवेषु = मनसः प्रज्ञाप्रतिभाप्रगाल्भ्यैकाग्र्यादिलक्षणेषु शोभनवेगेषु असमाः = अतुल्याः—विशेषतरबलयशःशालिनो भवन्ति । अद्य = संप्रति, वरेण्यं = वरणीयं स्पृहणीयं - याचनीयं श्रेष्ठं भागं = सुखसम्पत्तिस्वास्थ्यसुमतिलाभप्रदं सौभाग्यं, नः = अस्मभ्यं, आसुव = प्रेरय देहीत्यर्थः, स हि = प्रार्थितस्त्वं भगवान् सविता, रत्नधा = रत्नसदृशरमणीयधर्मार्थकामादिपुरुषार्थानां धा = धाता-स्थापयिता - समर्पयिता असि । सत्यस्य = सर्वजनहितकरस्य, नावः = नौकाः, सुकृतं = सत्कर्मिणं-सत्यवक्तारं पुण्यशालिनं अपीपरन् = दुःखसंकटमहोदधेः पारमकुर्वन् । सखायः = समानबन्धुत्वादर्शशालिनः, समनसः = समानभावनाशालिमनस्काः, अन्योऽन्यस्य समाजस्य राष्ट्रस्य च हितसंपादने सर्वथाऽनुकूलाः सन्तो यूयं, उद्बुध्यध्वं = तेषां सर्वेषां रक्षायां उद्बुद्धाः-जागरुकाः-सावधानाः भवत ।

प्रकाशकः —श्रीस्वामी कैवल्यानन्दः सरस्वती महाभागः
मुद्रकः— मनमोहनसिंह, यमुना मुद्रणालयः, हरिद्वार ।